अपहरमाणं विनाशयन्तम् । इत्यनेन वचनातिशय उक्तः । स च न ज्ञानातिशयं विनेति तेन ज्ञानातिशयाक्षेपः । सोपि न अपायापगमातिशयं विनेति तेनापि च अपायापगमातिशयाक्षेपः । अपायभूता रागादयः तेषाम् अपगमः । स एव अतिशयः । अथ वा । वर्ध च्छेदनपूरणयोः । चौरादिकत्वाण्णिचि[2] कृते वर्ध्यते छिद्यतेसाविति स्वरान्तत्वात् कर्मण्यल् । ततो वर्धः छिन्नः मानः अहंकारो येनेति व्युत्पत्त्या वर्धमान इति नाम्नैव सूचितः । इत्थं चतुस्त्रिंशदतिशयज्ञापकम् अतिशयचतुष्कम् उक्तम् । पाइआहिँ भासाहिँ इत्यत्र बहुवचनम् अशेषान्यभाषासंग्रहार्थम् । अत्र च संस्कृतद्व्याश्रयप्रतिपादितव्याकरणसप्ताध्यायीसकललक्ष्यतद्व्यावर्ण्यमानश्रीमूलराजनृपादिचरितरूपाभिधेयानुक्रमायातप्राकृताष्टमाध्यायोदाहरणश्रीकुमारपालभूपालचरित्रस्वरूपम् अभिधेयम् अथशब्देन सूच्यते । अनेन च अभिधेयेन सह अस्य महाकाव्यस्य प्रतिपाद्य[3]-प्रतिपादकलक्षणः संबन्धः । प्रयोजनं च अनन्तरं सकलप्राकृतलक्षणश्रीकुमारपालचरितपरिज्ञानम् । परं परं च निःश्रेयसम् । यद् उक्तम् ।

व्याकरणात् पदसिद्धिः पदसिद्धेरर्थनिर्णयो भवति ।
अर्थात् तत्त्वज्ञानं तत्त्वज्ञानात् परं श्रेयः ॥ १
सुकृतं जनयत्यादावसुरसुरस्वामितां ततः क्रमशः ।
निर्वृतिवनितावाप्तिं धार्मिकगुणकीर्तनं विदुषाम् ॥ २

"अह पाइआहिँ" "बहुलं" "आरिसं" इति पदभणितिव्याजेन साक्षात् "अथ प्राकृतम्" [१.] "बहुलम्" [२.] "आर्षम्" [३.] इति सूत्रत्रयं प्रतिपादितम् । तच्च अग्रे यथालक्ष्यम् अत्र ग्रन्थे व्यक्तीभविष्यति ॥

---

[1] B °तारिसबं°. C तारिसमयबं°. [2] B C °ण्णिति. [3] C omits प्रतिपाद्य°.

अत्थि अणहिल्ल-नगरं, अन्ता-वेईसमाइ-निव-निचिअं,
सत्तावीसइ-मुत्तिअ-भूसिअ-जुवइ-जण-पइ-हरयं. २
तिअस-वई-हर-वहु-मुह-आदरिसीहूय-फलिह-सिल-सिहरो
जस्सिं पुहइ-वहू-मुह-अवयंसो सहइ पायारो ; ३

२. अधुना श्रीकुमारपालस्य चरितं विवर्णयिषुः सकलेन्दिराम-न्दिरं तद्राजधानीनगरं वर्णयति । अन्तर्वेदिः गङ्गायमुनयोर्मध्य-देशः तस्य ईशः स आदिर्येषां ते च ते नृपाश्च तैर्निचितं व्याप्तम् । प्रतापपराभूतमार्तण्डमण्डलस्य श्रीकुमारपालभूपालस्य प्रसादनाय सकलदिङ्मण्डलमिलिताखिलनरपालचक्रवालेन सर्वकालम् अस्य क-लितत्वात् । सप्तविंशतिमौक्तिकाभिर्नक्षत्रमालानामहारविशेषैः भू-षितो युवतिजनो येषु एवंभूतानि पतिगृहाणि ईश्वरसदनानि यत्र तत् अणहिलनगरम् अस्तीति संबन्धः ॥ तत् पुनः कथम् अणहिलन-गरम् इत्यभिधीयते । अभिधीयते । पूर्वं किल वनराजराजेन नूतननगरविधानविहितचित्तेन प्रधानभूमिखण्डगवेषणार्थं विचरता एकदा अरण्यमध्ये गवादींश्चारयन् अणहिलो नाम गोपालो दृष्टः । तदग्रे च चित्ताभिप्रायो निवेदितः । तेनापि तत्कार्य-करणार्थं शकुनगवेषणं कुर्वता एकत्र प्रदेशे शृगालो बलिष्ठकुर्कुरं निर्धारयन्नवलोकितः । तत्रैव च अणहिलेन वनराजराजो नगर-निवेशं स्वनाम्ना कारित इति अणहिलनगरम् ॥

वेईसमाइ इत्यत्र वक्रादित्वाद् [१. २६] अनुस्वारः । बाहुलकत्वात् [१. २४] क्वचिद् अन्यस्यापि व्यञ्जनस्य मः ॥

३. अधुना षड्विंशतिगाथामानेन आदिमहाकुलकेन एतदेव नगरं यच्छब्देन निर्दिशन् वर्णयति । तृतीया दशा येषाम् । मयूरव्यंसकादित्वान्निपातः । तेषां पतिः इन्द्रः तस्य गृहं स्वर्गः तत्र या

निव-सह-मुहावयंसा विइया गुरुणो अवीय-गुण-निवहा
निवसन्ति अणेग-बुहा[1] जस्सिं पुहवीस-सलहिज्जे ; ४
न हु अत्थि नवि अ हूअं इह लोए अइसएण जस्स समं
सुउरिस[2]-ठाणम् असूरिस-रहिअं सालाहण-पुरंपि ; ५

वध्वस्तासां यानि मुखानि तेषाम् उन्नतत्वाद् उज्ज्वलत्वाच्च[1] अनादर्शा आदर्शाः[2] संपन्नानि आदर्शीभूतानि स्फटिकशिलाशिखराणि यस्य । पृथिव्येव वधूः सुखहेतुत्वात् तस्या मुखं सर्वनगरप्रधानत्वात् इदमेव नगरं वक्त्रम् तस्य अवतंसः शोभाकारित्वात् शेखरः इत्थंभूतः प्राकारः कोट्टो यत्र राजते ॥

अन्तावेईस । सत्तावीसइ-मुत्तिअ-भूसिअ । "दीर्घह्रस्वौ मिथो वृत्तौ" [४.] इति स्वराणां समासे दीर्घह्रस्वौ । क्वचिन्न । जुवइ-जण । क्वचिद् वा । पइ-हरयं वई-हर । दीर्घस्य ह्रस्वः । सिल-सिहरो । क्वचिद् वा । वहु-मुह वहू-मुह ॥

४. नृपस्य सभाया रम्यत्वात् मुखस्य अन्यथानुपपत्तेश्च कान्तात्वम् । सा तस्या मुखम् तत्र अवतंसाः शोभाकृत्त्वेन आपीडा इव । किल गगनाङ्गणगत एक एव गुरुः प्रसिद्धः । परम् एते विशदप्रज्ञर्द्धितः उत्प्रेक्ष्यन्ते द्वितीया गुरवः । अविद्यमानो द्वितीयः उपमानतया यस्य सः अद्वितीयो निरुपमः । एवंभूतो गुणनिवहो येषाम् । न एकः अनेके[3] अनेके च[3] ते बुधाश्च ते तथा । पृथिवीशैरन्यनगरापेक्षया श्लाघ्ये प्रशस्ये यस्मिन् निवसन्ति ॥

मुह-अवयंसो मुहावयंसा । "पदयोः संधिर्वा" [१.] इति संस्कृतोक्तः सर्वः[4] संधिर्वा । पदयोरिति किम् । सहइ । बहुलाधिकारात् क्वचिद् एकपदेपि । विइया अवीय ॥

५. सकलनगरतिलककल्पं किल सातवाहनस्य राज्ञो नगरं प्र-

१ B C °बुहा for °बुहा. २ B सुग्ररिस° wrongly. C सउरिस°.

[1] C उज्जलत्वाच्चानादर्शा, and B उज्जलत्वाद्वानादर्शा for उज्ज्वलत्वाच्च अनादर्शा.
[2] B आदर्शीसं°. C आदर्शसं°. [3] B C अनेकः अनेकश्च. [4] C om. सर्वैः.

जस्सिं नमन्त-सीसो तियसीसोवि हु तवं तवन्ताण
तेलुक्क-सज्जणाणं थुणइ स-भिक्खूण सद्धाए ; ६
जत्थोभय-थण-नीसह-वहु-दंसण-निस्सहं नरा जन्ति,
दुसहाउ दुस्सहेणं मयणेण हयन्तरप्पाणो ; ७

तिष्ठानं नाम । यतः सुपुरुषाणां सदाचारनराणां स्थानं पदम् । असुपुरुषैः नीचैश्च रहितं विवर्जितम् । परं तदपि न खलु अस्ति नापि च आसीत् इह लोके अस्मिन् जगति अतिशयेन माहात्म्येन कृत्वा यस्य समं तुल्यम् । एतदनुमानेन अग्रेपि अनेन समं तन्न भावीति विज्ञायते ॥

निवसन्ति अणेग । हु अत्थि । "न युवर्णस्यास्वे" [६.] इति न संधिः । अस्व इति किम् । पुहवीस । युवर्णस्येति किम् । गुरुणो अत्रीय ॥

लोए अइसएण । "एदोतोः स्वरे" [७.] इति न संधिश्च । एदोतोरिति किम् । पुहवीस ॥

°वि अ । हूअं । लोए । अइसएण । रहिअं । "स्वरस्योद्वृत्ते" [८.] इति न संधिः । बाहुलकत्वात् क्वचिद् वा । सुउरिस असुरिस । क्वचित् संधिरेव । सालाहणो ॥

निवसन्ति अणेग । "त्यादेः" [९.] इति न संधिः ॥

६. यस्मिन् बाह्याभ्यन्तरभेदेन द्वादशप्रकारं तपः तप्यमानानां चरतां त्रयो लोकास्त्रैलोक्यम् । भेषजादित्वाद् यण् । ऊर्ध्वाधोमर्त्यलोकलक्षणम् । तात्स्थ्यात् प्राणिचयोपि । तस्य परिपालनादिभिः कृत्वा सज्जना बान्धवास्तेषां सद्भिक्षूणां प्रधानमुनीनां श्रद्धया अन्तरङ्गबहुमानेन आस्तां सुरासुरखचरनरनिकरः त्रिदशेशोपि । हु इति निश्चितम् । नमच्छीर्षः स्तौति ॥

तियसीसो । "लुक्" [१०.] इति लुक् ॥

तवं । "अन्त्यव्यञ्जनस्य" [११.] इति लुक् । वाक्यविभक्त्यपेक्षायां हि अन्त्यत्वम् अनन्त्यत्वं च । तेन उभयम् । सज्जणाणं सभिक्खूण ॥

७. दुःसहात् असह्यशीतातपादेरपि दुःसहेन असह्येन मदनेन

तेअ-दुरालोएहिं अन्तो-उवरिं घराण रयणेहिं
छूढव्व निरवसेसा सरिआहिव-संपया जत्थ ; ८
विज्जु-चलं महुर-गिरो दिन्तो लच्छि जणो छुहत्ताण
भिसओ खु, जहा सरओ दिसाण पाउस-किलन्ताण ; ९

हृतान्तरात्मानस्तिरस्कृतान्तःसत्त्वाः उन्नतस्तनैर्निःसहा गमनागमनादिकार्ये मन्दा या वध्वस्तासां दर्शनेन संजातरणरणकत्वाद् निःसहम् अधीरं यथा भवति एवं नरा भोगिनो यत्र यन्ति यान्ति वेति ॥

सद्धाए । उन्नय । "न श्रदुदोः" [१२.] इति न लुक् ॥

नीसह निस्सहं । दुसहाउ दुस्सहेणं । "निर्दुरोर्वा" [१३.] इति वा न लुक् ॥

८. गृहाणाम् अन्तः मध्यप्रदेशे उपरि उपरितनभागे च तेजोदुरालोकैः प्रेङ्खत्प्रभामण्डलखण्डितनेत्रप्रसरै रत्नैः मुक्ताफलप्रवालाद्यैः कृत्वा सरिदधिपसंपदो रत्नाकरविभूतयः निरवशेषाः समस्ताः क्षिप्ता विन्यस्ता यत्र मन्यन्ते ॥

अन्तरप्पाणो । दुरालोएहिं । निरवसेसा । "स्वरेन्तरश्च" [१४.] इति लुक् न । क्वचिद् भवत्यपि । अन्तो-उवरिं ॥

९. मधुरगीः प्रियवाक्यः सन् जनः क्षुधार्तेभ्यो बुभुक्षाक्षामकुक्षिभ्यः विद्युच्चलां क्षणदृश्यविनश्वरीम् अतो ददत् कारुण्यात् प्रयच्छन् लक्ष्मीम् स्वास्थ्यजनकत्वेन संभाव्यते भिषग् वैद्यः । यत्रेति प्रक्रमाज्ज्ञेयम् । अत्रार्थे पूर्णोपमाम् आह । यथा शरत्कालः प्रावृट्क्रान्तानां वर्षाकालकलुषितानां दिशां लक्ष्मीं प्रसादरूपां शोभां ददाति ॥

सरिआ । "स्त्रियाम् आद् अविद्युतः" [१५.] इति आत्वम् । बाहुलकाद् ईषत्स्पृष्टतरयश्रुतिरपि । संपया । अविद्युत इति किम् । विज्जु-चलं ॥

महुर-गिरो । "रो रा" [१६.] इति रा:[1] ॥

छुहत्ताण । "क्षुधो हा" [१७.] इति हा । आर्षे तु[2] खुहेत्यपि ॥

---

१ B doubtful between बू° and छू°. C बूढव्व.

---

[1] So B C. [2] B C आर्षेनि for आर्षे तु.

जत्थच्छरस-मण-हरो वहूहि रमिरोवि अच्छर-समाहिं
दीहाऊवि अदीहाउस-माणी सइ विवेइ-जणो ; १०
कुसुम-धणू धणुह-धरो कउहा-मुह-मण्डणम्मि चन्दंमि
रज्जं तमु एगं-छत्तं असंकमु उवभुंजए जत्थ ;

भिसओ । सरओ । "शरदादेरत्" [१८.] इति अन्त्यव्यञ्जनस्य अत् ॥

दिसाण । पाउस । "दिक्प्रावृषोः सः" [१९.] ॥

१०. यत्र अप्सरोमनोहरः त्रिदशाङ्गनामानसावर्जकः अप्सरःसमाभिः देवीकल्पाभिर्वधूभिः कान्ताभिः सह रन्तापि रमणशीलोपि दीर्घायुरपि परिपूर्णजीवितव्योपि "मूलविस॰"– इत्यादिसुगुरूपदेशवशप्रादुर्भूतानित्यत्ववासनावासिता[1]न्तःकरणत्वेन अदीर्घायुषम् आत्मानं मन्यते सदा विवेकिजनः युक्तायुक्तविमर्शकृल्लोकः ॥

अच्छरस । अच्छर । दीहाऊ । अदीहाउस । "आयुरप्सरसोर्वा" [२०.] इति सः ॥

११. ककुम्मुखमण्डने चञ्चत्किरणनिकुरुम्बप्रकृतदिक्कान्तावदनविलेपने चन्द्रे कुसुमधनुः पुष्पधन्वा राज्यम् आधिपत्यं तत् सर्वलोकप्रसिद्धं सर्वोत्कृष्टं वा एकच्छत्रम् अद्वितीयातपत्रम् अशङ्कं निर्भयं यत्र उपभुनक्ति पालयति । तदा तदाज्ञोल्लङ्घनासमर्थत्वाज्जगत इति ॥

कउहा । "ककुभो हः" [२१.] इति हः ॥

धणू । धणुह । "धनुषो वा" [२२.] इति वा हः ॥

रज्जं । "मोनुस्वारः" [२३.] इति मस्य अनुस्वारः । क्वचिद् अनन्त्यस्यापि । चन्दंमि ॥

छत्तं असंकमुव । "वा स्वरे मश्च" [२४.] इति वा अनुस्वारः । पक्षे लुगपवादो मस्य मः । बाहुलकाद् अन्यस्यापि व्यञ्जनस्य मः । तमेग ॥

---

[1] C omits °वासिता°.

रोमंच-कंटइल्लो संज्झाए वंक-जंपण-बइल्लो,
जत्थ मणंसिल-तिलओ विलसइ अहिसारिआ-लोओ ; १२
जत्थ भवणाण अवरिं देवं-नागेहिँ विम्हया दिट्ठो,
रमइ मणोसिल-गोरो मणसिल-लित्तो मयच्छि-जणो ;
पव्वेसु अपव्वेसुं जत्थ मुणीणं कमेण अकमेणं
काऊणं पडिवत्तिं हरिसं काऊण देइ जणो ; १४

१२. अभिसरति अभिसारयति वा कामार्ता कान्तम् इत्यभिसारिका। तल्लक्षणो लोकः अभिसारिकालोकः मनःशिलातिलकः वक्रजल्पने छेकः भाषितेतरवाच्यवचनरचनायां निपुणः अत एव रोमाञ्चेन कण्टकवान् संध्यायां यत्र विलसति क्रीडति। तथाविधजल्पनविलसनयोः अन्यथानुपपत्तितः कामिभिरिति अनुक्तमपि ज्ञेयम्॥

असंक। उवभुंजए। रोमंच। कंटइल्लो। संज्झाए। "ङञणनो व्यञ्जने" [२९.] इत्यनुस्वारः॥

१३. देवनागैः अमरनागकुमारैः कथमत्र मानुष्यः अप्सरोभ्यो नागाङ्गनाभ्यश्च अधिकागण्यलावण्यशालिन्यो दृश्यन्त इति विस्मयात् आश्चर्याद् दृष्टः गगनाङ्गणे कस्यचित् कार्यस्य संसिद्धये विचरद्भिः अवलोकितः मनःशिलावद्गौरः। सुवर्णवर्णत्वात्। मनःशिलालिप्तः अङ्गशोभातिरेकहेतुतिलकादिकरणेन। मृगाक्षिणी इव अक्षिणी यासां ताश्च जनश्च भवनानाम् उपरि यत्र रमते। कामिभिरिति शेषः॥

वंक जंपण इति आद्यस्य मणंसिल इति द्वितीयस्य अवरिं इति तृतीयस्य "वक्रादावन्तः" [२६.] इत्यन्तोनुस्वारः। क्वचिच्छन्दःपूरणेपि। देवं-नागेहिँ। क्वचिन्न। मणसिल। आर्षे मणोसिल॥

१४. पर्वसु उत्तरपारणपारणादिरूपेषु अपर्वसु तद्व्यतिरिक्तान्यदिनेषु क्रमेण प्रथमम् एकस्य पश्चाद् द्वितीयस्येत्यादिपरिपाट्या

वीस-गुणो तीस-गुणो कलि-कालो नूण जत्थ कय-जुगओ,
नूणं अणभुञ्जन्ते लोए मासं स-मंसंव; १५
जस्सि सकलंकंवि हु रयणी-रमणं कुणन्ति अकलङ्कं
सङ्खधर-संख-भङ्गोज्जलाओ भवणंसु-भंगीओ;
लङ्घिज्जइ नालंघं, वञ्चिज्जइ न हु अवंचणिज्जं च,
वञ्छिज्जइ नवि जस्सि अवंछणिज्जं च केणावि; १७

अक्रमेण समकालं प्रतिपत्तिम् "अभिमुह-गमणम्" इत्यादिसिद्धान्तोक्तभक्तिं कृत्वा हर्षं कृत्वा च मुनीनां यत्र जनो ददाति ॥

भवणाण । पव्वेसुं अपव्वेसुं । मुणीणं । कमेण अक्कमेणं । काऊणं काऊण । "त्काम्यादेर्णस्वोर्वा" [२७.] इत्यन्तो वानुस्वारः ॥

१५. किल अयं कलिकालः सर्वकालं सर्वकालेषु अधमतमः । परं सोपि सदाचारधार्मिकजनवत्त्वेन कृतयुगाद् विंशतिगुणस्त्रिंशद्गुणश्च यत्र । नूनम् इत्युत्प्रेक्ष्यते । नूनं निश्चितं मांसं स्वमांसवत् अभुञ्जाने अनश्नति लोके नरपत्यादौ सति । कृतयुगेपि हि केषांचित् पापात्मनां मांसाशित्वाद् अत्र च सर्वथा तदभावात् ततोधिकत्वम् ॥

वीस । तीस । "विंशत्यादेर्लुक्" [२८.] इति अनुस्वारलुक् ॥

मासं मंसं । नूण नूणं । "मांसादेर्वा" [२९.] इति अनुस्वारलुक् ॥

१६. यस्मिन् शङ्खधरशङ्खभङ्गोज्ज्वलाः चक्रधरपाञ्चजन्यच्छेदविशदा भवनांशुभङ्ग्यः सदनकिरणविच्छित्तयो रजनीरमणं चन्द्रम्। अपिर्विस्मये । सकलङ्कमपि समलमपि । हु इति निश्चितम् । अकलङ्कं निर्मलं कुर्वन्ति ॥

१७. अलङ्घ्यम् अनवज्ञेयं पूज्यं गुरुमातरपितरादिकं न लङ्घ्यते । तदाज्ञातिक्रमेण न पराभूयते । न च खलु अवञ्चनी-

वंजिअ-सत्ती, सत्ती-अणाञिओ, सत्ति-वंज्झ-जण-वञ्झो,

लुंटाय-लुण्टणो, संठे सण्ठो जत्थ निव-लोओ ; १८

उद्दंड-बाहु-दण्डा जस्सिं कुंठासहा सयम् अकुण्ठा

कंतंगा कन्त-गुणा नय-पंथे पन्थिआ पुरिसा ; १९

यम् अविप्रतार्यं मित्रादि वञ्च्यते विप्रतार्यते । नापि च अवाञ्छनीयम् अनभिलषणीयं परद्रव्यपरदारादि वाञ्छयते अभिलष्यते सदाचारनिरतत्वात् केनापि यस्मिन् ॥

१८. व्यञ्जिता प्रोद्धुरकन्धररणकण्डूलदोर्दण्डप्रचण्डशात्रवत्रासने शक्तिः स्वसामर्थ्यं येन । शक्त्या अनञ्जितः अगतशक्तिः । शक्तिवन्ध्यजनवन्ध्यः । पराक्रमवति अभियुक्तः । लुण्टाके चोरे लुण्टनो मोषकः । शठे मायाविनि शठश्छद्मपरः । नीतिमतां हि राज्ञां तथाविधेषु प्रतिकूलाचरणं न दोषाय । यद् आह भारविः ।

> व्रजन्ति ते मूढधियः पराभवं
> भवन्ति मायाविषु ये न मायिनः ।
> प्रविश्य हि घ्नन्ति शठास्तथाविधान्
> असंवृताङ्गान् निशिता इवेषवः ॥

यत्र नृपलोको राजानः ॥

१९. उद्दण्डौ शात्रवत्रासकृत्त्वेन प्रचण्डौ बाहुदण्डौ येषाम् । कुण्ठाः क्रियासु मन्दाः तान् न सहन्ते न क्षमन्ते इति कुण्ठासहाः । स्वयम् आत्मना च अकुण्ठाः देवार्चनादिक्रियासु अमन्दाः । कान्ताङ्गाः मनोज्ञहस्तपादाद्यवयवाः । कान्ता मनोज्ञा विश्वेन[1] वाञ्छिता वा गुणाः शौर्यौदार्यस्थैर्यगाम्भीर्यादयो येषाम् । नयपथे न्यायमार्गे पान्थाः पथिकाः पुरुषा यत्र ॥

---

[1] B C विश्वविश्वेन.

चंदुज्जाणव चन्दो वंफिअ-बंधूण बन्धवो जस्सिं
अणुकंप-कम्पिअ-मणो विहवि-जणो वम्फए धम्मं ; २०
लंबंत-लुम्बि-रंभारम्भिय-तोरण-निरुद्ध-संरंभो,
सरएवि पाउसम्मिव न जत्थ दीसइ फुडो तरणी ;
जत्थ चुलुक्क-निवाणं परिमल-जम्मो ज़सो, कुसुम-दामं,
नहम् इव सव्व-गओ, दिस-रमणीण सिराइँ सुरहेइ ; २२

२०. चंदुज्जेति देश्यः कुमुदवाची । ततो यथा कुमुदानां चन्द्रो बान्धवः एवं काङ्क्षिता निराश्रयत्वेन अभिलषिता बान्धवा यैस्तेषाम् उपकारकारित्वाद् अनुकम्पाकम्पितमना दयावशगतचेताः सन् बान्धवः विभविजनः ईश्वरलोको यस्मिन् धर्मं काङ्क्षति ॥

२१. लम्बमाना लुम्ब्यः फलसमूहा यासु ताश्च ता रम्भाश्च कदल्यस्ताभिः आरब्धानि प्रतिगृहं कृतानि यानि तोरणानि वन्दन-मालास्तैर्निरुद्धः निषिद्धः संरम्भः किरणनिकरप्रसररूप आटोपो यस्य स एवंभूतस्तरणिर्द्युमणिः स्फुटः प्रकटो न यत्र दृश्यते प्रावृषीव प्रावृट्काल इव शरद्यपि शरत्कालेपि । प्रावृषि हि सजल-जलधरान्तर्हितत्वाद् न दृश्यते । अत्र तु निवृत्तघनायां शरद्यपि न दृश्यत इति विरुद्धार्थः अपिशब्दः ॥

सकलंकं अकलङ्कं । सङ्ख संख । भङ्गो भंगीओ । लङ्घिज्जइ लंघं । वञ्चिज्जइ अवंचणिज्जं । वाञ्छिज्जइ अवंछणिज्जं । वंजिअ अणञ्जिओ । वंज्झ वञ्ज्झो । लुंटाय लुण्टणो । संठे सण्ठो । उद्दंड दण्डा । कुंढा अकुण्ढा । कंतंगा कन्त । पंथे पन्थिआ । चंदुज्जाण चन्दो । बंधूण बन्धवो । अणुकंप कम्पिअ । [वंफिअ] वम्फए । लंबंत लुम्बि । रंभा रम्भिअ । "वर्गेन्त्यो वा" [३०.] इति वा अनुस्वारस्य वर्गान्त्यः ॥

सरए । पाउसम्मि । तरणी । "प्रावृट्शरत्तरणयः पुंसि" [३१.] इति पुंलिङ्गे प्रयोक्तव्याः ॥

२२. यत्र चौलुक्यनृपाणां मूलराजप्रभृतीनां नभ इव गगनमिव

B C add वंफिअ before बंधूण instead of before वम्फए.

सव्व-वयाणं मज्झिम-वयंव, सुमणाण जाइ-सुमणंव,
सम्माण मुत्ति-सम्मंव, पुहइ-नयराण जं सेयं ; २३

चम्मं जाण न अच्छी, णाणं अच्छीइँ, ताणवि मुणीण
विअसन्ति जत्थ नयणा; किं पुण अन्नाण नयणाइं ?

गुरुणो वयणा वयणाइँ ताव, माहप्पम् अवि य माहप्पो
ताव, गुणाइंपि गुणा, जाव न जस्सिं बुहे निअइ ; २५

सर्वगतम् ऊर्ध्वाधोमर्त्यलोकप्राप्तं परिमलस्य सौरभ्यस्य जन्म उत्पत्तिस्थानं यशः कुसुमदाम पुष्पमाल्यं दिग्रमणीनां शिरांसि सुरभयति सुरभीणि करोति । एतन्नगरम् आरभ्य सकलदिक्चक्रवालव्यापि चौलुक्यनृपाणां यश इत्यर्थः ॥

२३. यथा सर्ववयसां कौमारयौवनवार्धकानां मध्यमवयः पुण्यं श्रेयः । यथा सुमनसां बकुलविचकिलपाटलादिपुष्पाणां जातिसुमनाः । यथा शर्मणां चक्रवर्तिदेवेन्द्रादिसौख्यानां मुक्तिशर्म तथा पृथिवीनगराणां प्रतिष्ठानादीनां मध्ये यत् श्रेयः प्रशस्यतरम् ॥

२४. येषाम् अक्षीणि न चर्म किं तु ज्ञानं तत्त्वावबोधरूपम् अक्षीणि । तेषामपि मुनीनां सातिशयज्ञानिनाम् ऋषीणां यत्र नयनानि विकसन्ति अत्यद्भुतधर्मधर्मस्थानादिवीक्षणात् प्रीयन्ते । किं पुनरन्येषां चर्मचक्षुषां सामान्यजनानां नयनानि सविकासानीति ॥

जम्मो । जसो । "स्नम् अदामशिरोनभः" [३२.] इति पुंस्त्वम् । अदामशिरोनभ इति किम् । दामं । नहं । सिराइं । बाहुलकात् । वयं । सुमणं । सम्मं । सेयं । चम्मं ॥

२५. गुरोः सुराचार्यस्य वचनानि तावद् वचनानि । आश्चर्यकारीणीत्यर्थः । माहात्म्यं गौरवमपि तावद् माहात्म्यम् गुणा बुद्धिमत्त्वादयोपि तावद् गुणाः यावत् न यस्मिन् बुधान् पश्यति ।

हरि-हर-विहिणो देवा जत्थन्नाइँवि वसन्ति देवाइं;
एयाए महिमाए हरिओ महिमा सुर-पुरीए. २६

जत्थञ्जलिणा कणयं, रयणाइँवि अञ्जलीइ देइ जणो,
कणय-निही अक्खीणो रयण-निही अक्खया तहवि. २७

तँत्थ सिरि-कुमार-वालो बाहाए सव्वओवि धरिअ-धरो
सुपरिट्ठ-परीवारो सुपइट्ठो आसि राइन्दो. २८

एतन्नगरबुधविलोकने तु बृहस्पतेर्वाग्मित्वं माहात्म्यं गुणाश्च न प्रतिभान्तीति भावः ॥

अच्छी अच्छीइँ । नयणा नयणाइं । वयणा वयणाइँ । माहप्पं माहप्पो ।
"वाक्ष्यर्थवचनाद्याः" [३३.] इति वा पुंस्त्वम् ॥

२६. हरिहरविधयो देवाः अन्येपि सूर्यसुगतफणिपत्यादयो देवा यत्र वसन्ति । अनेन महिम्ना सुरपुर्याः स्वर्गलोकस्य महिमा प्रभावः हृतस्तिरस्कृतः । सुरपुर्यां हि इन्द्र एव एकः प्रवरो वसति । अत्र महाप्रभावाण्यनेकानि देवतानि । अतो युक्तस्तन्महिमापहारः ॥

गुणाइं गुणा । देवा देवाइं । "गुणाद्याः क्लीबे वा" [३४.] इति वा क्लीबत्वम् ॥

२७. यत्र कनकम् अञ्जलिना हस्तेन रत्नान्यपि पद्मरागगारुत्मतहीरकमौक्तिकादीन्यपि अञ्जलिना यत्र जनो ददाति । कृपापात्रदीनानाथाद्यर्थिषु इति शेषः । तथापि कनकनिधिः सुवर्णशेवधिः अक्षीणः परिपूर्णः । रत्ननिधिश्च अक्षीणः । प्रतियाचकं तथा दाने शेवधीनां ह्रासः संभवति । परं वैश्रवणकल्पत्वाज्जनानां तत्परिपूर्णतैवेत्यर्थः । आदिमहाकुलकम् ॥

महिमाए महिमा । अञ्जलिणा अञ्जलीइ । निही निही । "वेमाञ्जल्याद्याः स्त्रियाम्" [३५.] इति स्त्रीत्वम् ॥

२८. सर्वतः सकलदिग्वलयावनिपालेभ्यो दिग्गजकूर्मकुलाचल-

तुह आणा-ओमालं सिरम्मि धरिमो, जह अणिम्मल्लं,
अम्हे एत्थाम्हेत्थ य इअ भणिउं, जो निवेहि नओ ; २९

तुह हरि-पिआ जइ इमा किंपि पिआ, किम् अवि मेइणी जइमा,
ता किंत्ति मएत्ति रुसेव जस्स कित्ती गया दूरं ; ३०

फणिपतिभ्यो वा बाहौ स्वदोर्दण्डे धृतधरः संस्थापितवसुंधरः सुप्रतिष्ठः सन्न्यायमार्गस्थितः परीवारो मित्रामात्यादिवर्गो यस्य । सुप्रतिष्ठः प्रतिज्ञाशूरः तत्र अणहिलनगरे श्रीकुमारपालो राजेन्द्र आस्ते ॥

बाहाए । "बाहोरात्" [३६.] इत्याकारोन्तादेशः ॥

वालो । सव्वओ । धरो । वारो । सुपइट्ठो । राइन्दो । "अतो डो विसर्गस्य" [३७.] इति विसर्गस्थाने डोः ॥

२९. अधुना एकान्नविंशत्या गाथाभिः अस्यैव राज्ञो वर्णनम् आह । तव आज्ञैव शासनमेव निर्माल्यं शेषां शिरसि शीर्षे धरामः वहामः । किमिव । यथा अनिर्माल्यं तत्कालविकसितशतपत्रिकाचम्पकादि दाम । अत्र सिन्धुदेशादौ वयम् अत्र कुङ्कुणदेशादौ च वयं वर्तामहे इति भणित्वा यो नृपैर्नतः ॥

सुपरिट्ठ सुपइट्ठो । ओमालं अणिम्मल्लं । "निष्प्रती ओत्परी माल्यस्थोर्वा" [३८.] निर्प्रती माल्ये स्थाधातौ च यथासंख्यम् ओत्परी वा ॥

३०. तव इयं हरेः प्रिया भार्या यदि किमपि अनाख्येयं यथा भवति एवं प्रिया मेदिनी च चाण्डाली इयं यदि किमपि प्रिया तदा किमिति किम् एवं सति मयेति अस्माद्धेतो रुषेव यस्य कीर्तिर्गता दूरम् ॥ कान्ता हि यदा नीचान्यकान्तासक्तं भर्तारम् अवलोकयति तदा रोषाद् अन्यत्र व्रजति । कीर्तिरपि तथा सर्वत्र भ्रमणाद् इत्थम् उत्प्रेक्षा । अत्र च हरिप्रिया लक्ष्मीः मेदिनी पृथ्वी ॥

"आदेः" [३९.] । आदेरित्यधिकारः कगचजेत्यादिसूत्रात् प्राग् अविशेषे वेदितव्यः ॥

अम्हे एत्थ अम्हेत्थ । जइ इमा जइमा । "त्यदाद्य०" इत्यादिना [४०.] त्यदादेरव्ययाच्च तयोरेवादेः स्वरस्य बहुलं लुक् ॥

जो दूसासण-रिउणो आसत्थामस्स राम-सीसस्स
वीसामिअ-जस-पसरो स-जसेणं कासवि-तलम्मि; ३१
वीसुं वासा-नीसित्त-महि-अले ऊस-मालि-तेअस्स
रज्जे जस्स न कासवि नीसत्तं नीसहत्तं वा; ३२
गुण-सामिद्धी पयडा, कला-समिद्धीवि पायडा जस्स,
जो दाहिण-पवण-निहो दक्खिण्ण-निही गुणि-वणाण; ३३

किंपि किमवि । "पदाद् अपेर्वा" [४१.] । पदात् परस्य अपेः आदेर्लुग् वा ॥

किंति । मणत्ति । "इतेः स्वरात् तश्च द्विः" [४२.] इति पदाद् इतेः आदेर्लुक् स्वराच्च तकारो द्विः ॥

३१. दुःशासनस्य रिपुर्भीमस्तस्य । अश्वत्थाम्नः द्रोणाचार्याङ्गजस्य । रामस्य परशुरामस्य शिष्यो भीष्मस्तस्य च विश्रमितयशःप्रसरः प्रशमितसुश्लोकप्रपञ्चः स्वयशसा कृत्वा यः काश्यपीतले पृथ्वीपीठे । भीमादीनां शौर्यादिगुणगणेभ्योपि अद्भुतगुणत्वाद् अस्य सुघटस्तद्यशःप्रशमः । अथ च चिरभ्रमणखिन्नं विश्राम्यते ॥

३२. उस्रमालितेजसः दुःसहत्वाद् मार्तण्डकल्पप्रतापस्य यस्य विष्वक् समन्ताद् वर्षासु प्रावृट्काले निषिक्तं धाराधरधाराधोरण्या उक्षितं महीतलं यत्र तस्मिन् राज्ये न कस्यापि निःसत्त्वं निर्द्रव्यत्वं निःसहत्वम् असमर्थत्वं वा । राजन्वत्यां हि पृथ्व्यां स्वकालं वृष्टिः ईश्वराः समर्थाश्च लोका इत्यादि सर्वं सुघटमिति ॥

दूसासण । आसत्थामस्स । सीसस्स । वीसामिअ । कासवि । वीसुं । वासा । नीसित्त । ऊस । कास । नीसत्तं । नीसहत्तं । "लुप्तयरव०" इत्यादिना [४३.] लुप्तयाणां शषसानाम् आदेः स्वरस्य दीर्घः ॥

३३. गुणानां शौर्यादीनां समृद्धिः संपत् प्रकटा अत्युत्कर्षप्राप्तत्वात् प्रसिद्धा । कलानां गीतपठितादिद्विसप्ततिसंख्यानां समृ-

सिविणम्मि वारण-बलं सुमिणम्मि अ आस-साहणं जस्स
दिण्ण-भयं पिच्छन्ता दत्त-करा रिउ-निवा जाया; ३४

अङ्गार-पिक्क-गोल्ले खाए इङ्गाल-पक्क-कन्दे अ
तत्त-निलाडा रिउणो जस्स णलाडं-तवे तवणे; ३५

द्धिरपि यस्य प्रकटा। दाक्षिण्यस्य अनुकूलताया निधिः शेवधिः। गुणिनः सन्तः त एव सर्वसाधारणत्वेन वनानि। तेषां फलसमृद्ध्यादिजनकत्वेन दक्षिणपवननिभो योस्ति ॥

सामिद्धी समिद्धी। पयडा पायडा। "अतः समृद्ध्यादौ वा" [४४.] इति आदेरस्य दीर्घो वा ॥

दाहिण। "दक्षिणे हे" [४५.] इति आदेरस्य दीर्घः। हे इति किम्। दक्खिण्ण ॥

३४. स्वप्ने वारणबलं गजसैन्यं स्वप्ने अश्वसाधनं तुरगकटकं च दत्तभयं वितीर्णत्रासं यस्य प्रेक्षमाणा दत्तकरा अर्पितदण्डा रिपुनृपा जाताः। तद्गजादिबलं चरेभ्यः सभयं निशम्य स्वप्ने साक्षादिव पश्यन्तस्त्रस्तचित्ता रिपुनृपाः स्वसौख्याय यं दण्डादिना प्रसादयन्तीति भावः ॥

सिविणम्मि। दिण्ण। "इः स्वप्नादौ" [४६.] इति इत्वम्। आर्षे उकारोपि। सुमिणम्मि। बाहुलकाण्णत्वाभावे न। दत्त ॥

३५. ललाटंतपे अत्युग्रे तपने मार्तण्डे सति तप्तललाटाः संतप्तभालस्थला रिपवो यस्य अङ्गारपक्वानि यानि गोल्लेति देश्यत्वाद् बिम्बीफलानि तानि। अङ्गारेषु पक्वा ये कन्दास्तांश्च खादन्ति भक्षयन्ति। यद्भयाद् अरण्यानीमध्यम् अध्यासीना अङ्गारपक्वबिम्बीफलकन्दादिभिः शत्रवः प्राणधारणां कुर्वन्तीत्यर्थः ॥

अङ्गार इङ्गाल। पिक्क पक्क। निलाड णलाडं। "पक्वाङ्गारललाटे वा" [४७.] इति वा इत्वम् ॥

कइमं मज्झिम-लोए रिऊहिँ चत्तं न छत्तिवण्ण-वणं,
नव-छत्तवण्ण-परिमल-मए गए जस्स संभरिउं? ३६
अमयमइओव्व अहवा अमयमयाओवि समहिओ जस्स
हर-हीर-पिआहिवि जस-गीअ-झुणी सुव्वए वीसुं; ३७
अखुडिअ-पडिहा-पसरस्स अग्गओ जस्स दप्प-कण्डूलं
खण्डिअ-नाण-प्पडिहं बुहं-चुडं[1] गउअ-चण्डंव; ३८

३६. मध्यमलोके मर्त्यलोके कतमत् सप्तपर्णवनं सप्तच्छदकाननं रिपुभिर्न त्यक्तम् नवसप्तपर्णपरिमलमदान् गजान् यस्य संस्मृत्य ॥

कइमं । मज्झिम । "मध्यमकतमे द्वितीयस्य" [४८.] इति अत इत्वम् ॥

छत्तिवण्ण छत्तवण्ण । "सप्तपर्णे वा" [४९.] इति अत इत्वं वा ॥

३७. अमृतस्य विकारः अमृतमयः स इव अथ वा अमृतमयादपि सुधाविकारादपि समधिकः समग्रीलो यस्य यशसो गीतस्य गानस्य ध्वनिर्निनादः आस्तां तावद् अन्यजनैः किं तु हरः ईश्वरः हरप्रिया गौरी ताभ्यामपि विष्वक् समन्तात् श्रूयते ॥

अमयमइओ अमयमयाओ । "मयय्यइर्वा" [५०.] इति आदेरतो अइः वा ॥

हर हीर । "ईर्हरे वा" [५१.] इति आदेरतो वा ईः ॥

झुणी वीसुं । "ध्वनिविष्वचोरुः" [५२.] इति आदेरस्य उत्वम् ॥

३८. अखण्डिता अच्छिन्ना प्रतिभा । नवनवोल्लेखशालिनी [प्रज्ञा] प्रतिभा । तस्याः प्रसरो यस्य तस्य यस्य अग्रतः पुरतो दर्पेण सकलशास्त्राद्भुतावबोधाभिमानेन पूर्वं कण्डूलं खर्जूलं खण्डिता निरुत्तरत्वाच्छिन्ना ज्ञानप्रतिभा यस्य तद् बुधचण्डम्[1] । उत्प्रेक्ष्यते । गवया गवाकृतयः सास्नारहिता आरण्यकपशवः तेषां चण्डमिव[2] ॥

अखुडिअ खण्डिअ । चुडं[3] चण्डं । "चण्डखण्डिते[3] णा वा" [५३.] इति आदेरस्य णेन सह उत्वम् ॥

---

१ B C बुहुंचुंद्रं गउवचंद्रंव.

---

1 B C °चंद्रं. 2 B C चंद्रमिव. 3 B C चुंद्रं चंद्रं । चंद्रखंडिते &c.

असि-पुढुमो, धनु-पुढमो, छुरिया-पढुमो अ, सेल्ल-पढमो य,
सव्वण्णुव्व, अहिण्णू जो सयल-कला-कलावस्स; ३९
उर-सेज्जाइवि हरिणो सुन्देर-घरम्मि सइ सिरी अथिरा,
जस्स गुण-वेल्लि-तरुणो थिरासि भू-वल्लि-पेरन्ते; ४०
जस्स य दिस-पज्जन्ते अहरिअ-जोण्होकरो जसोकेरो,
अच्छेर-निरीहाणवि अच्छरिअं किंव न करेइ? ४१

गउअ। "गवये वः" [५४.] इति वस्य उत्वम् ॥

३९. असौ प्रथमः धनुषि प्रथमः छुरिकायां प्रथमश्च । सेल्लेति देश्यः प्रासवाची। तस्मिन् प्रथमश्च । असिधनुश्छुरिकासेल्लशब्दैः एतत्क्रियापटवः सुभटा उच्यन्ते। तेषु प्रवरः स्वघातदानपरघातत्रनादिक्रियानिपुणत्वात्। किं बहुना यः सकलकलाकलापस्य अभिज्ञो विचक्षणः। किं च सर्वज्ञ इव सर्ववेदीव ॥

पुढुमो पुढमो पढुमो पढमो। "प्रथमे पथोर्वा" [५५.] इति पथयोः अस्य युगपत् क्रमेण च उर्वा ॥

सवण्णु। अहिण्णु। "ज्ञो णत्वेभिज्ञादौ" [५६.] इति ज्ञस्य णत्वे ज्ञस्यैव अत उत्वम् ॥

४०. आस्तां तावत् स्वावासकमलादौ अस्थिरा । सौन्दर्यगृहे हरेः उरःशय्यायामपि [सदा] श्रीः अस्थिरा चञ्चला। परं सापि गुणा एव यशःप्रसूनजनकत्वाद् वल्लयः वल्ल्यः तासां तरुरिव आधारभूतत्वात्। तस्य यस्य भूवल्लिपर्यन्ते सकले पृथ्वीवलये स्थिरा आसीत्। चापलम् अपास्य यस्मिन् गुणगणनिधौ लक्ष्मीः स्थितेति भावः ॥

सेज्जा। सुन्देर। "एच्छय्यादौ" [५७.] इति आदेरस्य एत्वम् ॥

४१. पूर्ववर्णनापेक्षया चः समुच्चये। यस्य दिक्पर्यन्ते अधरितः पराभूतो ज्योत्स्नायाश्चन्द्रिकाया उत्करो राशिर्येन स यशउ-

जो आसि बम्भचेर-ग्गहण-गुरू पइ-विओअ-विहुरस्स
रण्णन्तग्गय-रिउ-अन्तेउर-पोम्मच्छि-लोअस्स; ४२
पय-पउम-नमोक्कारे परोप्परामद्द-तुट्ट-हारेहिं
जस्स सहाइ निवेहिं ओप्पिअमिव मुत्तिआहरणं; ४३
जत्थप्पिअ-भू-भारो सुवइ फणी– तत्थ सोवइ हरीवि–
जोअत्थ-दिन्न-भारो न उणाइ, सयालुओ न उणा; ४४

त्करो न केवलम् अन्येषाम् आश्चर्यकौतुकनिरीहाः सद्ध्यानविन्यस्तचित्तत्वात् निराकाङ्क्षास्तेषां यमिनामपि आश्चर्यं किमिव न करोति। किं तु सर्वम् आश्चर्यं वितनोतीत्यर्थः॥

वेल्लि वल्लि। पेरन्ते पज्जन्ते। जोण्होक्करो जसोक्केरो। अच्छेर अच्छरिअं। "वल्ल्युत्करपर्यन्ताश्चर्ये वा" [५८.] इति वा आदेरस्य एत्वम्॥

४२. ब्रह्मचर्यं मैथुनसेवनविरमणं तस्य ग्राहणे अङ्गीकारणे गुरुः दीक्षादाता य आसीत् पत्युर्वियोगेन विधुरस्य सकष्टस्य अरण्यस्य अन्तः मध्ये गतो यो रिपूणाम् अन्तःपुरपद्माक्षीलोकः अवरोधवधूजनस्तस्य। सर्वशत्रूणां निर्मूलकाषंकषितत्वात् तन्नायिकानां ब्रह्मचर्यदीक्षादानम्। ब्रह्मचारी प्रायः अरण्यचारी भवतीत्युक्तिलेशः।

बम्भचेर। "ब्रह्मचर्ये चः" [५९.] इति चस्यात एत्वम्॥

अन्तेउर। "तोन्तरि" [६०.] इति तस्यात एत्वम्। क्वचिन्न। रण्णन्तग्गय॥

४३. पदपद्मनमस्कारे। क्रियमाणे इति शेषः। परस्परामर्देन अन्योन्यसंघर्षेण त्रुटिताः स्रस्ता ये हारास्तैः कृत्वा नृपैर्यस्य सभाया मौक्तिकाभरणमिव अर्पितं दत्तम्॥

पोम्म। "ओत् पद्मे" [६१.] इति आदेरतः ओत्वम्। "पद्मछद्म०" [२.११२] इति विश्लेषे न। पउम॥

नमोक्कारे। परोप्परा। "नमस्कारपरस्परे द्वितीयस्य" [६२.] इति अत ओत्वम्॥

४४. यत्र अर्पितभूभारः स्वपिति फणी शेषः तत्रैव अर्पितभूभारः

जइ सक्को न उण नरो न उणो नारायणोवि सारिच्छो
जस्स, पुणाइ-पुणाइवि भुवणाभय-दाण-ललिअस्स; ४५
रण्णे अरण्ण-साणाउलम्मि लाऊ-लया-हरे रुण्णं
जस्सारि-वहूहि तहा, अलाउ-कुल्ला जह कयाओ; ४६
उक्खय-संठविअ-निवेण जेण वच्छत्थलाओ हरिणोवि
उक्खाया भुय-दण्डे निअम्मि संठाविया लच्छी; ४७

हरिरपि स्वपिति। यः पुनः अन्यत्र न दत्तो भारः अर्थाद् भुव एव येन। अत एव च न पुनः शयालुः आलस्योपहतः॥

ओप्पिअ जत्थप्पिअ। "वाऽपौं" [६३.] इति अर्पयतेः आदेरस्य ओत्वं वा॥

सुवइ सोवइ। "स्वपावुच्च" [६४.] इति स्वपितौ आदेरस्य ओत् उच्च॥

४५. यस्य यदि शक्रः इन्द्रः सदृक्षो न। पुनः नरः अर्जुनो न पुनर्नारायणोपि। कुतः। पुनःपुनरपि भूयोभूयोपि भुवनस्य सकलसचराचरलोकस्य यद् अभयदानं वधनिवर्तनं तेन ललितस्य मनोहरस्य। यदीति संभावने। शौर्यादिभिः इन्द्रो यत्तुल्यः संभाव्यते। परमार्थतस्तु सोप्यविरतत्वाद् यत्तुल्यो नास्तीत्यर्थः॥

न उणाइ न उणा। "नात् पुनर्यादाइ वा" [६५.] इति आदेरस्य आ आइ इत्यादेशौ वा। पक्षे। न उण न उणो। केवलस्यापि दृश्यते। पुणाइ॥

४६. अरण्ये अरण्यश्वभिः वृकैः आकुले संकीर्णे अलाबूलतागृहे तुम्बिनीवल्लिमण्डपे यस्य अरिवधूभिः तथा अनवरताश्रुपनीपतनेन रुदितं यथा अलाबूनां सेकाय कुल्याः सारणयः कृताः॥

रण्ण अरण्ण। लाऊ अलाउ। "वालाब्वरण्ये लुक्" [६६.] इति आदेर्लुक्॥

४७. अहम् एवं मन्ये। येन हरेरपि वक्षःस्थलात् लक्ष्मीः उत्खाता उत्पाटिता ततो निजभुजादण्डे संस्थापिता। कथम् एवं ज्ञायत इति विशेषणद्वारेण हेतुम् आह। पूर्वम् उत्खाताः अभक्तत्वात् स्वस्था-

अह कइयावि दिवा-मुह-पत्थावे पत्थवोचिअं तस्स
अणुरागागय-मरहट्ठमाइ-सूएहिँ इअ पढिअं: ४८

हय-मंसल-तम-पसरो सइ वामो पंसुलाण[1] पच्चूसो,
सामय-वय-दिन्नग्घो तंव पयट्टो सया पुन्नो· ४९

नाख्याविताः पश्चात् सेवावशवर्तित्वात् संस्थापिता देशाधिपत्ये नियोजिता नृपा अनेनेति नृपस्वभावेन हरेः प्रियाया अपि इत्थं संभाव्यते । कविमार्गे विभूतिहरिप्रिययोरैक्याद् एवं वर्णना ॥

तहा जह । उक्खय उक्खाया । संठविअ संठाविया । "वाव्ययोत्खातादावदातः" [६७.] इति आदेराकारस्य अत् वा ॥

४८. अथ अनन्तरं कदाचिदपि कस्मिंश्चित् काले दिवामुखप्रस्तावे वासरप्रारम्भावसरे तस्य श्रीकुमारपालभूपालस्य प्रस्तावोचितं प्रभातपठनीयम् अनुरागेण अत्यद्भुतगुणगणश्रवणसंजातदर्शनस्नेहेन आगता ये ते च ते महाराष्ट्रः आदिर्येषां देशानां ते तथा तेषां सूताश्च मङ्गलपाठकास्तैः इति वक्ष्यमाणं पठितम्[1] ॥

पत्थावे पत्थवो । "घञ्वृद्धेर्वा" [६८.] इति आदेराकारस्य अत् वा । क्वचिन्न । अणुरागो ॥

मरहट्ठ । "महाराष्ट्रे" [६९.] इति आदेराकारस्य[2] अत् । वक्रादित्वाद् अनुस्वारः । बाहुलकाद् अन्यस्यापि व्यञ्जनस्य मः ॥

४९. अथ द्वाविंशत्या गाथाभिः सूतोक्तम् एवाह । हतः नवदिनकरकरसंपर्काद् ध्वस्तः मांसलः सूचिभेद्यस्तमःप्रसरः तिमिरप्रवृत्तिर्येन सदा वामः विटादिगृहगतिनिषेधकत्वेन प्रतिकूलः । कासाम् । पांसुलानां स्वैरिणीनाम् । श्यामाकपयोभिः आरण्यव्रीहिजलैः दत्तः त्रिप्रदक्षिणापूर्वं मार्तण्डमण्डलं प्रति क्षिप्तः अर्घः पूजा यत्र । प्रत्यूषः अहर्मुखम् । पुण्यः सकललोकलोचनान्ध्यपटलविध्वंसकत्वेन प्र-

---

१ B पुंस°.

---

1 B C पाठितम्· 2 B C °राकारः स्यात् for °राकारस्य अत्·

दिस-कुप्पिसन्त-जस-भर देवय-हरए तुमं सकुप्पासा
दिक्खाइरिआ सिक्खायरिएहि सहोवसप्पन्ति. ५०
गय-थीण-तिमिर-केसे खल्लीडे नह-सिरम्मि संवुत्ते,
थुवआ हवन्ति[1] लोआ एण्हिं सुण्हाल-चिन्धस्स. ५१

शस्यः प्रवृत्तः संजातः। त्वमिवेति। भवानप्येवंविधः। जिनवचनावबोधाद् ध्वस्तनिबिडाज्ञानप्रवृत्तिः। पांशुलानां पाप्मिनां सदा वामः दुःखदायित्वात्। सामजव्रजैः हस्तिघटाभिर्दत्तः अर्घः उपायनं यस्मै। सदाचारनिरतत्वात् पवित्रश्चेति ॥

[मंसल। पंसुला। "मांसादिष्वनुसारे" ॥ ७० ॥ मांसप्रकारेष्वनुस्वारे सति आदेरातोऽत् ॥]

सामय। "श्यामाके मः" [७१.] इति मस्य आत अत् ॥

५०. दिक्षु कूर्पासः कञ्चुलिका तद्वद् आचरन् यशोभरो यस्य स तथा तस्यामन्त्रणम्। हे दिक्कूर्पासवद्यशोभर देवतागृहे सकूर्पासाः सकञ्चुका दीक्षाचार्या बटुककरणादिसंस्कारकारिणः[1] शिक्षाचार्यैः शास्त्रपाठकैः सह त्वाम् उपसर्पन्ति। आशीर्वादप्रदानार्थं समीपम् आगच्छन्ति। इदानीम् इति प्रक्रमाज्ज्ञेयम्। एवम् अन्यत्रापि ॥

सई सया। कुप्पिसं कुप्पासा। "इः सदादौ वा" [७२.] इति आत इत्वं वा। दिक्खाइरिआ सिक्खायरिएहि। "आचार्ये चोऽच्च" [७३.] इति चस्य आत इत्वम् अत्वं च ॥

५१. गतं नष्टं स्त्यानं घनं तिमिरमेव श्यामवर्णत्वात् केशा यत्र। अत एव खल्वाटे खलतौ नभ एव सकललोकस्य उपरिवर्तित्वात् शिरस्तस्मिन् संवृत्ते जाते सति सास्नालचिह्नस्य वृषभध्वजस्य भगवत आदिनाथस्य शूलिनश्च इदानीं प्रत्यूषे लोका आर्हतमाहेश्वराः स्तावकाः स्तोतारो भवन्ति ॥

थीण। खल्लीडे। "ई स्त्यानखल्वाटे" [७४.] इति आदेरातः ई ॥

थुवआ। सुण्हाल। "उः सास्नास्तावके" [७५] इति आदेरातः उत्वम् ॥

---

1. B C वहंति.

---

1 B C °संस्कारिणः for संस्कारकारिणः.

गयणे तुहिणोसारिणि[१] तुहिणासारं पडन्तम् अगणन्ता,
उट्ठन्ति वहूओ पुरो अज्जूणं विणय-गेज्झाण. ५२
कुट्टिम-चउ-वारेसुं सतिण्हम् इण्हिं कुणन्ति रमणीओ
देरागय-पारावय-रावेहि अ पिअ-परीरम्भं. ५३
पारेवय-मणिएहिं तेत्तिअमेत्तं रमेसु वेसाओ,
तेत्तिअमत्तं मग्गन्ति चलिअ-मेत्ते भुअङ्गम्मि. ५४

५२. तुहिनस्य प्रालेयस्य आसारो वेगवद्वर्षो विद्यते यस्मिन् एवंभूते गगने सति तुहिनासारं पतन्तं शरीरे लगन्तम् अगणयन्त्यः अमन्यमाना विनयग्राह्याणां भक्त्या आवर्जनीयानाम् आर्याणां श्वश्रूणां पुरः पूर्वं वध्वः उत्तिष्ठन्ति ॥

तुहिणोसारिणि[1] तुहिणासारं। "ऊद् वासारे" [७६.] इति आदेरात ऊत् वा ॥

अज्जूणं। "आर्यायां र्यः श्वश्र्वाम्" [७७.] इति र्यस्य आत ऊः ॥

गेज्झाण। "एद्ग्राह्ये" [७८] इति एत्वम् ॥

५३. कुट्टिमानि मण्यादिभिर्बद्धतलानि चतुर्द्वाराणि चतुर्मुखगृहविशेषास्तेषु सतृष्णं दिने आशङ्कितभाविबहुविरहत्वेन सतर्षं यथा भवति एवम् इदानीं प्रातःक्षणे द्वारेषु आगता ये पारापतास्तेषां रावैः शब्दैरुत्थिता जागरिता ये प्रियास्तेषां परीरम्भम् आलिङ्गनं रमण्यः कुर्वन्ति ॥

देरा। "द्वारे वा" [७९.] इति आत एत्वं वा। पक्षे वारे। दुआरं। दारं इति प्रयोगद्वयम् अनुक्तमपि ज्ञेयम् ॥

५४. पारापतमणितानीव कलरवकूजितानीव यानि मणितानि रतकूजितानि तैः कृत्वा यावान् प्रतिज्ञातः कालस्तावन्मात्रं वेश्याः पण्याङ्गना अरंसिषत अक्रीडिषुः। भुजङ्गे विटे चलितमात्रे गमनोन्मुख एव तावन्मात्रं प्रतिज्ञातकालमनितं मार्गयन्ति गवेषयन्ति ॥ पूर्वार्धे जित्तिअमित्तम् इति तु रम्यः पाठः ॥

---

१ B °सारणि.

---

1 B °सारणि.

अद्द-नहङ्काण पियाण अल्ल-आलावयाण विलयाओ
उल्लन्ति अङ्कम् अंसुअ-ओलीहिं ओल्ल-नक्खङ्का. ५५
निअ-ठाण-मीलणं पिक्खिऊण चिन्ता-परा मिउल्लावा
नीलुप्पल-पेण्डे पिण्डिऊण, भसला रुअन्तिव्व. ५६

पारावय पारेवय। "पारापते रो वा" [८०.] इति रस्य आत एत्त्वं वा॥

तेत्तिअमेत्तं तेत्तिअमत्तं। "मात्रटि वा" [८१.] इति आत एत्वम्। बाहुलकात् क्वचिन्मात्रशब्देपि। चलिअ-मेत्ते॥

५५. आर्द्रास्तत्कालदत्तत्वात् सरसा नखाङ्काः कररुहव्रणानि येषाम् आर्द्राः स्नेहमिश्रा आलापाः परस्परोक्तयो येषां ते तथा। तेषां प्रियाणाम् अङ्कम् उत्सङ्गम् आर्द्रनखाङ्का वनिता योषितः अश्र्वालिभिः नेत्रबाष्पपङ्क्तिभिः आर्द्रयन्ति आर्द्रं कुर्वन्ति। सर्वरात्रं सुरतादिसुखनिमग्ना वयम् इदानीं च तदुच्छेदजनकः प्रियविप्रयोगो भवितेति दुःखाद् रुदन्तीत्यर्थः॥

उल्लन्ति ओल्ल। "उदोद् वार्द्रे" [८२.] इति आदेरातः उत् ओच्च वा। पक्षे अद्द। अल्ल॥

ओलीहिं। "ओदाल्यां पङ्क्तौ" [८३.] इति आत ओत्त्वम्॥

५६. प्रातः संकोचात् प्रागेव नीलोत्पलेभ्यो निर्गत्य रारट्यमानान् तत्कोशस्थांश्च भ्रमरान् वीक्ष्य कविः एवम् ऊहमानः प्राह। निजस्थानमीलनं स्वावाससंकोचं प्रेक्ष्य विलोक्य चिन्तापराः क्व वयम् इदानीं निराश्रयाः स्थास्याम इत्यादिविकल्पसंकल्पनिष्ठाः। मृदुः सकष्टत्वात् कृशः उल्लापः अन्योन्यजल्पनं येषां ते तथा सन्तो भसला नीलोत्पलपिण्डे असितोत्पलकोशे पिण्डयित्वा मिलित्वा रुदन्तीव। येषां किल राजादिना गृहं मुच्यते तेपि मिलित्वा रुदन्तीत्युक्तिलेशः॥

मिउल्लावा। "ह्रस्वः संयोगे" [८४.] इति यथादर्शनं ह्रस्वः॥

किंसुअ-कुसुमायम्बो केंसुअ-दल-सामलं विगय-मेरं
दलिऊण अन्धयारं, दंसइ पुहवीइ पहम् अरुणो. ५७
काउं महाविलं अतम-मूसयं कय-पडंसुए सूरे,
लक्ख-हलद्द-बंहेडय-रत्तव्व करा विअम्भन्ति. ५८
विरइअ-हलद्दि-कन्दाभ-दीवओ नव-हलिद्दि-रत्त-करो,
अहलिद्दा-राओ कामउव्व पुव्वं भअइ सूरो. ५९

पेण्डे पिण्डिऊण। "इत एद्वा" [८५.] इति आदेरिकारस्य एत् वा। कचिन्न। चिन्ता॥

५७. किंशुकदलश्यामलं पलाशपलाशनीलं विगतमेरं सर्वत्र उच्छृङ्खलम् अन्धकारं दलयित्वा विध्वस्य किंशुककुसुमानीव आताम्रः आरक्तः अरुणः सूर्यः तत्सारथिर्वा पृथिव्याः पन्थानं दर्शयति॥

किंसुअ केंसुअ। "किंशुके वा" [८६.] इति आदेरितः एत्त्वं वा॥

मेरं। "मिरायाम्" [८७.] इति इत एत्त्वम्॥

५८. महाबिलं कन्दरादिकम् अविद्यमानस्तम एव मूषिको यत्र तत् तथाभूतं कर्तुं कृतप्रतिश्रुते विहितप्रतिज्ञे सूर्ये सति करा अंशवो विजृम्भन्ते ऊर्ध्वाधः प्रसरन्ति। कीदृशाः लाक्षाहरिद्राविभीतकै रक्ता इव॥ प्रातःक्षणे दिनकरकराणां क्रमेण तथाभावाद् इत्थम् उत्प्रेक्षा॥

५९. विरचिता विहिता विष्वग्विसारिप्रभारहितत्वेन हरिद्राकन्दाभा दीपा येन। नवहरिद्रया रक्ता इव करा यस्य स सूरः पूर्वां भजति। अहरिद्रारागो[1] निबिडस्नेहः[2] कामुक इव। तस्मिन्नप्यागच्छति कान्तया दीपः क्रियते। कुङ्कुमादिना आरक्तकरश्च स भवति। अत्र कामुक इत्युपमानात् पूर्वस्याः कान्तात्वं निरूप्यते॥

पुहवीइ। पह। मूसयं। पडंसुए। हलद्दा। हलद्दी। बंहेडय[3]। "पथिपृथिवी°"

---

१ B व°.

---

1 B C omit अ°.　2 B C °स्नेहकामुक for °स्नेहः कामुक.　3 B C व°.

पिक्कङ्कुअंव निवडइ पिक्किङ्कुअ-धूसरो ससी एस,
सिढिल-करो मढिलङ्को तित्तिर-मइल-प्फुड-कलङ्को. ६०

इअ आसंसन्ति नि-सीह सिंहदत्ताइणो दिआ तुज्झ,
वीसं तीसं कप्पे जयसु दुजीहारि-नीसङ्क. ६१

अदुइअ-रवि-भा-विइए गयणे, जह पाइयम्मि दो-वयणं,
कत्थवि नत्थि तमो. अहि-निवास-लोअम्मि व णुमन्नो. ६२

इत्यादिना [८८.] आदेरितः अकारः । हरिद्रायां विकल्प इत्यन्ये । हलिद्दी । अहलिद्दा ॥

६०. शिथिलकरो मन्दकिरणः शिथिलाङ्को मन्दबिम्बः । तित्तिरिर्लावकः । तद्वन्मलिनः स्फुटः कलङ्को यस्य । पक्वेङ्गुदवत् परिपाकप्राप्ततापसतरुफलवद् धूसरो धूम्रः एष शशी पक्वेङ्गुदवत् निपतति अस्ताचले स्रंसते ॥

पिक्कङ्कुअं पिक्किङ्कुअ । सिढिल मढिल । "शिथिलेङ्गुदे वा" [८९.] इति आदेरितः अद् वा ॥

तित्तिर । "तित्तिरौ रः" [९०.] इति रस्य इतः अत् ॥

६१. हे नृसिंह नरोत्तम सिंहदत्तादयो द्विजाः तव इति आशंसन्ति आशीर्वादं कुर्वन्ति । तदेवाह । हे द्विजिह्वारिर्गरुडस्तद्वद् निःशङ्क निर्भय त्वं विंशतिं त्रिंशतं कल्पान् जय । कल्पो देवयुगसहस्रद्वयम् ॥

इअ । "इतौ तो वाक्यादौ" [९१.] इति इतितस्य इतः अत् ॥

निसीह । वीसं । तीसं । जीहा । "ईर्जिह्वा " इत्यादिना [९२.] जिह्वादिषु इकारस्य तिना ईः । बाहुलकात् क्वचिन्न । सिंहदत्त ॥

नीसङ्क । "लुकि निरः" [९३.] इति रलोपे इत ईः ॥

६२. यथा प्राकृते क्वापि द्विवचनं नास्ति । "द्विवचनस्य बहुव-

---

१ B C पिक्कंगुअ.

जरढोच्छु-रुई[1] चन्दो निस-पिअ-पावासुओव्व नो सहइ,

सच्च-जेहुट्ठिल[2] सूरे भू-सग्ग-दुहाइअ-करोहे. ६३

धम्मे जहिट्ठिला दोहाइअ-पवहा दुहावि मल-पटलं,

ओज्झर-निज्झरिणीसुं[3] न्हाऊण खिवन्ति वम्हाणा[4]. ६४

चनम्" [३. १३०.] इति वचनात् । तथा अद्वितीयरविभाद्वितीये निरुपमभास्करप्रभायुक्ते गगने सति तमः क्वापि नास्ति । तिर्यगूर्ध्वादिदेशेषु तद् अपश्यन् कविरेवम् ऊहते । अहीनां सर्पाणां वासे लोके पाताल इव निमग्नं प्रविष्टम् ॥

दुजीहा । णुमन्नो । "द्विन्योरुत्" [९४.] इति द्विनिशब्दयोः इत उत् ॥ बाहुलकात् क्वचिद् वा । अदुइअ । विइए ॥ क्वचिन्न । दिआ ॥ क्वचिद् ओत्वम् । दो-वयणम् ॥

६३. हे सत्ययुधिष्ठिर भूस्वर्गयोर्द्विधाकृतः पञ्चशल्या पञ्चशल्या पृथग्विहितः करौघो येन तस्मिन् सूरे सति जरठः परिपक्वो य इक्षुस्तद्वद् रुचिर्यस्य स तथाभूतश्चन्द्रो नो राजते । अत उत्प्रेक्ष्यते । निशैव प्रिया ततः प्रवासीव वियुक्त इव । अन्योपि यः प्रियावियुक्तः स विच्छायो भवति ॥

जरढोच्छु । पावासुओ । "प्रवासीक्षौ" [९५.] इति आदेरित उत्वम् ॥

६४. धर्मे सदाचारे युधिष्ठिरः द्विधाकृतो मध्यप्रवेशेन खण्डितः प्रवाहः ओघो यैस्ते निर्झरनिर्झरिणीषु[2] झरनदीषु स्नात्वा शौचं कृत्वा द्विधापि बाह्याभ्यन्तरभेदेन द्विप्रकारमपि मलपटलं रजःस्तोमं ब्राह्मणाः क्षिपन्ति ॥

जहुट्ठिल जहिट्ठिल । "युधिष्ठिरे वा" [९६.] इति आदेरित उत्वम् ॥

दुहाइअ दोहाइअ । "ओच्च द्विधाकृगः" [९७.] इति ओत्वम् उत्वं च ॥ क्वचित् केवलस्यापि[1] । दुहा ॥

ओज्झर निज्झर । "वा निर्झरे ना" [९८.] इति नेन सह इत ओत्वं वा ॥

---

१ B C °रुई. २ B C जुहिट्ठिल. ३ B निज्झरणी°. ४ B वम्हाण. C तन्हाणा.

---

1 B C insert निवास before क्वचित्. 2 B C °निर्झरणीषु.

हय-कम्हार-हरडई-चिक्किण-तिमिरस्स, गहिय-पाणीया,
पाणिय-तडम्मि विप्पा अजुण्ण सूरस्स देन्तग्घं. ६५

जिण्ण-तमं मल-हीणा अहूण-तेअं विहीण-अन्न-पहं,
अविहूणं तूह-दिआ थुणन्ति तित्थे रविं तं व. ६६

पेऊसासण-सामिय-दिस-आमेले रविम्मि उअ तारा,
केरिस-एरिसि[१]आओ बहेडयाभाओ नह-पेढे. ६७

६५. हृतं विदारितं कश्मीराणां हरीतकीव चिक्कणं निबिडं तिमिरं येन तस्य। अजीर्णो नवः स चासौ सूर्यश्च तस्य पानीयस्य निर्झरनद्यादिसंबन्धिजलस्य यत् तटं तस्मिन्। गृहीतं करपुटे कृतं पानीयं यैस्ते विप्रा अर्घम् अर्घाञ्जलिं ददति त्रिःप्रदक्षिणापूर्वं वितरन्ति॥

हरडई। "हरीतक्याम् ईतोऽत्" [९९.] इति आदेरीतः अत्॥

कम्हार। "आत् कश्मीरे" [१००.] इति ईत आत्॥

पाणिअ। "पानीयादिष्वित्" [१०१.] इति ईत इत्॥ क्वचिन्न वा। पाणीय॥

६६. जीर्णं ध्वस्तं तमस्तिमिरम् अज्ञानं च येन। अविहीनतेजसम् अन्यूनद्युतिम् उग्रप्रतापं च। विहीनः सन्मार्गप्रदर्शनेन विध्वस्तः अन्यो विपरीतः पन्था मार्गः अन्यायश्च येन। अविहीनम् अत्युच्चं पूर्वाचलचूलासंस्थं सकलभूपालप्रवरं च। तीर्थे आदित्यालये नद्याद्यवतारे वा तीर्थस्य तीर्थभूता वा द्विजा रविं त्वामिव स्तुवन्ति। रविं त्वां च स्तुवन्तीत्यर्थः॥

अजुण्ण। "उज्जीर्णे" [१०२.] इति ईत उत्॥ क्वचिन्न। जिण्ण॥

हीण अहूण। विहीण अविहूणं। "ऊ हीनविहीने वा" [१०३.] इति ईत ऊत्वं वा॥

तूह। "तीर्थे हे" [१०४.] इति ईत ऊः। हे इति किम्। तित्थे॥

६७. पीयूषाशना देवास्तेषां स्वामी इन्द्रः तस्य दिक् पूर्वा तस्या आपीडे शोभाकृत्त्वेन अवतंसे रवौ सति उअ इति पश्य। विभीतक-

[१] B C केरिसएरिसआओ.

चत्तूण नेड-पीढं नीड-घरा मउलिआ, मही-मउड,

विद्दाय-निद्दम् उड्डन्ति घरोवरिं रुक्ख-अवरिं च. ६८

गरुआवि गुरुअ-भिउडीहिँ वार-वालेहि पडिखलिज्जन्ता,

बहु-पोरिसावि पुरिसा निरुद्ध[1]-छीआ इहं एन्ति. ६९

वदू आभा सादृश्यं यासां तास्तारा नभःपीठे कीदृश्य ईदृश्यः। न कीदृश्योपीत्यर्थः॥

पेऊस। आमेले। केरिस। एरिसिआओ। बहेडया। "एत् पीयूष°" इत्यादिना [१०५.] एपु ईत एत्त्वम्॥

६८. हे पृथ्वीमुकुट पूर्वं मुकुलिता रात्रौ एकत्र स्थितास्ततो नीडपीठं कुलायतलं त्यक्त्वा नीडगृहाः पक्षिणो विद्रुतनिद्रं गततन्द्रं यथा भवति एवम् उड्डीयन्ते गृहस्योपरि वृक्षस्योपरि च॥

पेढ पीढं। नेड नीड। "नीडपीठे वा" [१०६.] इति ईत एत्त्वम्॥

मउलिआ। मउड। "उतो मुकुलादिष्वत्" [१०७.] इति एपु आदेरुतः अत्वम्॥ क्वचिद् आत्त्वमपि। विद्दाय॥

घरोवरिं अवरिं। "वोपरौ" [१०८.] इति उतः अत् वा॥

६९. गुरुकभ्रुकुटिभिर्द्वारपालैः प्रतीहारैः प्रतिस्खल्यमाना निरुध्यमाना गुरुका अपि कुङ्कणादिदेशस्वामिनोपि बहुपौरुषा अपि प्रचुरपराक्रमा अपि पुरुषाः मा भूत् अस्मत्स्वामिनः क्वापि कार्ये अशकुनम् इति निरुद्धक्षुता इह युष्मत्पादपद्मान्तिके आयन्ति आगच्छन्ति॥

गरुआ गुरुअ। "गुरौ के वा" [१०९.] इति स्वार्थिके के आदेरुतः अत् वा॥

भिउडीहिँ। "इर्भ्रुकुटौ" [११०.] इति आदेरुत इः॥

पोरिसा। पुरिसा। "पुरुषे रोः" [१११.] इति रोरुत इत्वम्॥

छीआ। "ई क्षुते" [११२.] इति आदेरुत ई॥

---

१ B पुरिमा रुद्ध-च्छीआ.

मुसल-धर-वाहु-मूसल रइ-सूहव-सुहय तुज्झ मुह-कमलं
दट्ठुं, ऊसुअ-नयणा पुणो-पुणो ऊससन्ति निवा. ७०
अणउच्छन्नोच्छाहो रिउ-दुसहो दूसह-प्पयावेण,
वोक्कन्त-निद्द-पसरो अह राया ओट्ठिओ सयणा. ७१
कोऊहल-कुसलेहिं कुऊहलत्थेसु कोउहल्लीवि,
सण्हाणवि सुण्हयरं परमप्पं थुणिय सव्वण्णुं, ७२
अमलोव्वीढ-दुअल्लो उव्वूढ-दुऊल-दण्डि-दिन्न-करो,
सो अत्थाणिं पत्तो दुगुल्ल-उल्लोअ-सोहिल्लं. ७३

७०. मुसलधरबाहू इव बाहुमुसलौ यस्य तस्यं आमन्त्रणम् । तथा रतिसुभगः कन्दर्पः तद्वत्सुभग सकललोकप्रिय हे राजन् तव मुखकमलं दृष्ट्वा उत्सुकानि सोत्कण्ठानि नयनानि येषां ते नृपाः पुनःपुनः उच्छ्वसन्ति भूयोभूयः पुलकिताङ्गा भवन्ति ॥

मुसल मूसल । सूहव सुहय । "ऊत् सुभग०" इत्यादिना [११३.] आदेरुत ऊद् वा ॥

७१. अनुच्छिन्नोत्साहः अखण्डितोद्यमः दुःसहप्रतापेन उग्रतेजसा रिपुदुःसहः अथ एवं मङ्गलपाठकपठितानन्तरं व्युत्क्रान्तनिद्राप्रसरो जागरितः सन् राजा शयनाद् उत्थितः ॥

ऊसुअ । ऊससन्ति । "अनुत्साहोत्सन्ने त्सच्छे" [११४.] इति आदेरुत ऊत् ॥
अनुत्साहोत्सन्न इति किम् । उच्छन्नोच्छाहो ॥

दुसहो दूसह । "लुकि दुरो वा" [११५.] इति रलोपे उत ऊत् वा ॥

वोक्कन्त । ओट्ठिओ । "ओत् संयोगे" [११६.] इति संयोगे परे आदेरुत ओत्त्वम् ॥

७२. ७३. अधुना राज्ञः प्रातस्त्यं कृत्यम् आह । युग्मम् । कुतूह-

[1] B is wanting in the commentary on the two couplets from कुतूहलकुशलैः up to करौ यस्येति. We with C.

तस्स भुमयाइ वसगा, अवाउला, पेसणिक्क-हणुमन्ता,
बल-कण्डुअमाण-भुआ, पुरो निविट्ठा निवा नमिरा[1]. ७४
पासम्मि ठिआ तस्स य महूअ-गोरीओ महुअ-महुर-गिरा,
वज्जन्त-कणय-नूउर-मणि-नेउर-वइर-निउराओ ; ७५

लकुशलैः कौतुकनिपुणैः कृत्वा कुतूहलार्थेषु कुतुकवस्तुषु कुतूहल्यपि सूक्ष्माणां परमाण्वादीनां मध्येपि सूक्ष्मतरं दुर्ज्ञेयत्वाद् अणुतरं सर्वज्ञं लोकालोकपदार्थपरिज्ञानचतुरं परमात्मानं स्तुत्वा स कुमारपालभूपः दुकूलानाम् उल्लोचैः शोभावतीम् आस्थानीं प्राप्तः । किंभूतः सन् । अमलानि उज्ज्वलानि उद्व्यूढानि परिहितानि दुकूलानि शतपट्टांशुकानि येन उद्व्यूढदुकूलेन दण्डिना दत्तो गमनकाले वितीर्णः करो यस्येति ॥

कोऊहल कुऊहल कोउहल्ली । "कुतूहले वा ह्रस्वश्च" [११७.] इति उत ओत् वा तत्संनियोगे ह्रस्वश्च वा ॥

सण्हाण सुण्ह । " अदूतः सूक्ष्मे वा " [११८.] इति ऊतः अत् वा ॥ आर्षे सुहुमेति ज्ञेयम् ॥

दुअल्लो दुऊल । " दुकूले वा लश्च द्विः " [११९.] इति ऊकारस्य अत्वं वा तत्संनियोगे च लस्य द्विः ॥ [आर्षे] । दुगुल्ल ॥

अमलोव्वीढ उव्वूढ । " ईर्वोद्व्यूढे " [१२०.] इति ऊत ईत्वं वा ॥

७४. तस्य राज्ञो भ्रुवो वशगाः । भ्रूक्षेपमात्रेण समस्तकार्यसाधका इत्यर्थः । अवातूलाः युक्तकारिणः । प्रेषणे स्वामिनिरोपणे एके अद्वितीया हनूमन्तः । बलेन कण्डूयमानौ कण्डूलौ । सदर्पावित्यर्थः । तथाभूतौ भुजौ येषां ते नम्रा नृपाः पुरः अग्रे निविष्टाः ॥

भुमयाइ । अवाउला । हणुमन्ता । कण्डुअमाण । " उर्भ्रूह०" [१२१.] इत्यादिना ऊत उत्वम् ॥

७५. चतुर्भिः कलापकम् । चामरदर्पणहस्ता वारयुवत्यस्तस्य राज्ञः

---

१ B नविरा.

कोहण्डि-कुसुम-मउवीओ, काम-तोणीर-थोर-कबरीओ,
निम्मोल्लङ्गय-मण्डिअ-कोप्परया, गहिअ-तम्बोला ; ७६
विब्भम-गलोइ-मेघा, रम्भा-थोणा-निहोरु-थूणाओ,
तोणीहविअ सयंचिअ रइ-वइणो तूणं-छड्डवणा ; ७७
सरउग्गय-मय-लञ्छण-सरिच्छ-वयणाओ वार-जुवईओ,
चामर-दप्पण-हत्था अकास-कन्ती किसङ्गीओ. ७८

पार्श्वे स्थिताः । किंभूताः । मधूकवद् गुडपुष्पवद् गौर्यः गौराङ्ग्यः । मधूकवन्मधुरा मनोज्ञा गीर्यासाम् । वदन्तौ चङ्क्रमणवशात् सिञ्जानौ कनकस्य नूपुरौ मञ्जीरौ मणयः पद्मरागाद्याः तत्खचितौ नूपुरौ वज्राणि हीरकाणि तत्खचितौ च नूपुरौ यासाम् ॥

७६. कूष्माण्डीकुसुमवद् मृद्व्यः कोमलाङ्ग्यः । कामतूणीरवत् तद्बाणानां पुष्पाणां तत्र प्रक्षेपात् स्थूलाः कबर्यः घना वेणयो यासाम् । निर्मूल्याङ्गदमण्डितकूर्पराः अनर्घ्यकेयूरभूषितभुजमध्या गृहीतताम्बूलाः ॥

७७. विभ्रमा विलासास्त एव गुडूची अमृता तत्र वृद्धिजनकत्वेन मेघाः । रम्भायाः स्थूणा[1] स्तम्भस्तत्संनिभा ऊरुस्थूणा यासां स्वयमेव तूणीभूय रतिपतेस्तूणमोचनाः ॥

७८. शरदुद्गतमृगलाञ्छनसदृक्षवदनाः अकृशा सर्वत्र विस्तृतत्वाद् घना कान्तिर्यासाम् कृशाङ्ग्यस्तनुशरीराः ॥

महुअ महुअ । " मधूके वा " [१२२.] इति ऊत उत् वा ॥

नेउर निउराओ । " इदेतौ नूपुरे वा " [१२३.] इति ऊत इत् एत् वा । पक्षे । नउर ॥

कोहण्डि । तोणीर । थोर[2] । निम्मोल्ल । कोप्परया । तम्बोला । गलोइ । "ओत् कूष्माण्डी° " इत्यादिना [१२४.] एषु ऊत ओत् ॥

---

[1] B C स्थूणाः. [2] B C थोरो.

मत्तेभ-मउअ-गमणे तसिंस माउक्क-आसणासीणे,
माउक्के अमउत्तेवि सुइ-गिराणं फुड-गिरेहिं ७९.

आसंसिअं दिएहिं, किवालु-हिअओ हवेहि महि-वट्टे,
तुह पिट्ठ-चरा देवा हवन्तु नागावि पट्ठ-चरा. ८०

अह खग्गि-सिङ्ग-पत्ते मसिणे मसणेण चन्दणेण गहे
अच्चिअ, राय-मयङ्को अकासि तिलयं मिअङ्क-निहं. ८१

थोणा थूणा । तोणी तूण । "स्थूणातूणे वा" [१२५.] इति ऊत ओत् वा ।

मय । "ऋतोऽत्" [१२६.] इति ऋतः अत्वम् ॥

७९. युग्मम् ॥ मत्तेभस्येव मृदुकं मन्थरं गमनं यस्य । मृदुकं हंसरूतपूरितत्वेन कोमलं यद् आसनं गष्टिकादि तस्मिन्नासीने उपविष्टे सति तस्मिन् राज्ञि श्रुतिगिरां वेदवाक्यानां मृदुत्वे अमृदुत्वेपि स्फुटगीर्भिः । वेदवाक्येषु यथास्थानम् उदात्तादिस्वरन्यासेन व्यक्तवाग्भिरित्यर्थः ॥

८०. द्विजैः इति आशंसितम् आशीर्वादः कृतः । तदेवाह । कृपालुहृदयो महीपीठे त्वं भव । तथा तव पृष्ठचराः पश्चाद्यायिनो देवाः पृष्ठचरा नागा अपि भवन्तु । तव क्षुद्रोपद्रवव्रातविकर्तनं सुरफणिपत्यादयः कुर्वन्त्वित्यर्थः । इतीत्यध्याहार्यम् ॥

अकास किसङ्गीओ । मउअ माउक्क । माउक्के अमउत्ते । "आत् कृशा०" इत्यादिना [१२७.] एषु ऋत आत् वा ।

किवालु । हिअओ । "इत् कृपादौ" [१२८.] इति आदेः ऋत इत्वम् ॥

पिट्ठ पट्ठ । "पृष्ठे वाऽनुत्तरपदे" [१२९.] इति ऋत इत् वा ॥ अनुत्तरपदे इति किम् । महि-वट्टे ॥

८१. अथ द्विजाशीर्वादानन्तरं मसृणे श्लक्ष्णे खड्गिनो गण्डकस्य शृङ्गं विषाणं तस्य पात्रे भाजने यच्चन्दनं तेन मसृणेन ग्रहान्

मिचु-अवमचु-हरणे दिजे विसज्जिअ, निसामिआ तेण
रिउ-सङ्ग-भञ्जणेणं धिट्ठाधट्ठाण विन्नत्ती. ८२
पुहवीस-उउ-वसन्तो, निवुत्त-तिलय-क्खणो, कलि-निअत्तो,
वन्दारय-वुन्दारय-समो, पयट्टो तिहिं[१] सोउं. ८३

अर्चयित्वा राजैव सौम्याह्लादकत्वादिगुणोपेतत्वाद् मृगाङ्कः मृगाङ्क-निभं वृत्तत्वशुक्लत्वाभ्यां चन्द्रतुल्यं तिलकम् अकार्षीत् ॥

८२. मृत्युः आयुषः परिसमाप्तौ मरणम् अपमृत्युः अकालमर-णम्। तयोर्हरणान् विध्वंसकान् द्विजान् विसृज्य संमाननापूर्वं[१] प्रेष्य रिपूणां शृङ्गस्य उत्कर्षस्य भञ्जकेन विनाशकेन [तेन राज्ञा] धृष्टाधृष्टानां प्रगल्भाप्रगल्भानां विज्ञप्तयो निशामिताः परिभाविताः ॥

सिङ्ग सङ्ग। मसिणे ममणेण। मयङ्को मिअङ्क। मिचु मचु। धिट्ठाधट्ठाण।

"मसृणमृगाङ्कमृत्युशृङ्गधृष्टे वा" [१३०.] इति एषु ऋत इत् वा।

८३. निवृत्तः समाप्तस्तिलकस्य मन्त्राभिमन्त्रितविशेषकस्य क्षणः अवसरः उत्सवो वा यस्य। निवृत्तः समग्रसचराचरलोकाभयप्रदान-विधानाद् गतः कलिः कलियुगं यस्मात्। वृन्दारका देवास्तेषु योग-क्षेमवाहित्वाद् वृन्दारकः श्रेष्ठः। इन्द्र इत्यर्थः। तेन समः सदृक्षः। पृथ्वीश एव निखिलभूमण्डलमोदकत्वाद् ऋतुवसन्तः तिथिं श्रोतुं प्रवृत्तः। वसन्तर्तुरपि निवृत्तः[२] संजातस्तिलकानां तिलककुसुमानां क्षणः अवसरो यत्र। निवृत्तः कामवशवर्तित्वेन उपरतः कलिः कामिकलहो यत्र। वृन्दारकेषु निरतिशयरूपोपेतत्वेन वृन्दारको मनोहरः। कन्दर्प इत्यर्थः। तेन समः तादृक्प्रकारः विकारकारि-त्वात् मित्रं च मित्रेण समं भवतीति ॥ कलि-निअत्तो इत्यत्र प्राकृ-तत्वाद् निअत्तो इत्यस्य परनिपातः। यथा

"भूअङ्कुरावयंसं छणपसर-महग्घ-मण-हर-सुरामोअं।
अपणामिअंपि गहिअं कुसुमसरेण महु-मास-लच्छीएँ मुहं"

इत्यत्र महग्घेत्यस्य परनिपातः ॥

---

१ B तिहं.

---

१ B C सन्मान°. २ C निर्वृत्तः.

निव-उसहो दिय-वसहे पिउ-कम-माउ-हर-आगए तत्तो
दाणेण तप्पिऊणं, संपत्तो माइ-हरयम्मि. ८४
माईण अमोसासीसयाण राया अमूस-परिवारो
अमुसा-वाई वुट्ठो धण-वुट्ठी-रयण-विट्ठीहिं. ८५
विट्ठ-घण-निम्मलेणं देवाणं पिहय पुहय देवीणं
तेणादिट्ठं गीअं मुइङ्गि-कर-ताडिय-मिइङ्गं. ८६[१]

उउ । " उदृत्वादौ " [१३१.] इति आदेर्ऋतः उत् ॥

निअत्तो निवुत्त । वन्दारय वुन्दारय । "निवृत्तवृन्दारके वा" [१३२.] इति ऋत उत्वं [वा] ॥

८४. ततः तिथिश्रवणानन्तरं पितृक्रमात् पितृवंशात् मातृगृहात् मातृवंशाच्च आगतान् द्विजवृषभान् प्रधानब्राह्मणान् दानेन तर्पयित्वा संतोष्य नृपवृषभो मातृगृहे संप्राप्तः ॥ वृषभशब्दस्य उत्तरपदस्थस्य[1] प्रधानार्थाभिधायित्वम् । यदू अमरः ।

स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुञ्जराः ।
सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ॥

उसहो वसहे । " वृषभे वा वा " [१३३.] इति वेन सह ऋत उत् वा ॥

पिउ-कम । माउ-हर । "गौणान्त्यस्य" [१३४.] [इति] गौणपदस्य योन्त्य ऋत् तस्य उत् स्यात् ।

८५. न विद्यते मृषा कूटभाषणं यस्य स परिवारो यस्य । अमृषावादी राजा अमृषा सत्या आशिषः प्रणामे कृते चिरं जीवेत्याद्याशीर्वचनानि यासां तास्तथा ताभ्यो [मातृभ्यः] धनवृष्टिरत्नवृष्टिभिर्वृष्टो वर्षति स्म । ताभ्यो धनं रत्नानि [च] ददावित्यर्थः ॥

माउ-हर माइ-हर । " मातुरिद्वा " [१३५.] इति मातुर्गौणस्य ऋत इत् वा क्वचिद् अगौणस्यापि । माईण ॥

अमोस अमूस अमुस । "उदूदोन्मृषि" [१३६.] इति ऋत उत् ऊत् ओत् ॥

८६. देवानाम् । अग्रत इति शेषः । पृथक् असांकर्येण देवीनां

१ B C मुअंगिकरताडियमिअंगं.

1 B C °पदस्थस्याप्र° for °पदस्थस्य प्र°.

कुल-जरईणं नत्तिअ-नत्तुअ-सहिआण सो वसु अदासि,
धरणि-बिहप्फइ-सीसो बुहप्फइ-सरिच्छ-गुरु-पुरओ. ८७

सो कुसुम-विण्ट-तिक्ख-प्पण्णाइ बहप्फइव्व, लच्छीए
काही पूअं सह-वेण्ट-फलेहिं स-वोण्ट-फुल्लेहिं. ८८

रिद्धि-हय-अणत्त-रिणो, राय-रिसी, धणुह-वेअ-राम-इसी,
रिज्जू, सहुज्जुएहिं नर-उसहेहि चलिओ निवइ-रिसहो. ८९

पृथग् वृष्टो मुक्तजलो यो घनस्तद्वन्निर्मलेन गतकलुषेण तेन राज्ञा गीतम् आदिष्टं कारितम्। कीदृशम्। मृदङ्गिकरैः मार्दङ्गिकहस्तैस्ताडिता आहता मृदङ्गा यत्र तत् तथाभूतम्॥

८७. कुले जरत्यो वृद्धस्त्रियः ताभ्यः। नप्तृकैर्युक्ता नप्तृकाः ताभिः सहितास्ताभ्यः पौत्रपौत्रीयुक्ताभ्यो धरण्यां बृहस्पतेः शिष्य उद्धवः तद्वत्। हेयोपादेयविचारचतुरत्वात्। स राजा बृहस्पतेः सदृक्षः अद्भुतविशदप्रज्ञर्द्धियुक्तत्वेन समो यो गुरुः पुरोहितस्तस्य पुरतो वसु द्रव्यम् अदात्॥

वुट्ठो विट्ठ। वुट्ठी विट्ठीहिं। पिहय पुहय। मुइङ्ग मिइङ्ग[1]। नत्तिअ नत्तुअ। "इदुतौ वृष्ट०" इत्यादिना [१३७.] एषु ऋतः इकारोकारौ॥

८८. कुसुमवृन्तवत् तीक्ष्णा या प्रज्ञा तया नूनं बृहस्पतिः स राजा लक्ष्म्याः सवृन्तफलैः सवृन्तपुष्पैश्च पूजाम् अकार्षीत्॥

बिहप्फइ बुहप्फइ। "वा बृहस्पतौ" [१३८.] इति ऋत इदुतौ वा॥ पक्षे बहप्फइ॥

विण्ट वेण्ट वोण्ट। "इदेदोद्वृन्ते" [१३९.] इति ऋत इत् एत् ओच्च॥

८९. ऋद्ध्या हृतं स्वधनेन निर्वर्तितम् ऋणेन ऋताः पीडितास्तेषाम् ऋणं येन। राजैव जीवरक्षाविधायित्वेन ऋषिः। धनुर्वेदे धनुःकलाप्रतिपादकशास्त्रे रामर्षिः परशुरामः। ऋजुः अकुटिलः ऋजु-

[1] B C मुअंग मिअंग.

सो वसन्त-रिउ-विलासओ, तह य गिम्ह-उउ-सरिस-लीलओ,
महुर-तिव्व-तेआसरिच्छओ, सम-हरं दरिअ-आढिअं गओ. ९०

भिर्नरऋषभैः सह नृपतिऋषभश्चलितः गुणनिकां कर्तुं प्रस्थितः ॥ रिपुच्छन्दा छन्दः ॥

रिद्धि । " रिः केवलस्य " [१४०.] इति व्यञ्जनेन असंपृक्तस्य ऋतो रिः ॥

९०. मधुरं सदाचारिप्रमोदकत्वेन प्रियं तीव्रं शत्रुसंतापकत्वेन प्रचण्डं यत् तेजो माहात्म्यं तेन असदृक्षः निरुपमः । अत एव वसन्तर्तुसदृक्षः विलासो विलसितं यस्य । तथा ग्रीष्मर्तुसदृक्षा लीला केलिर्यस्य च । मित्रामित्रेषु शान्ततीव्रवृत्तिरित्यर्थः । स राजा दृप्तादृतं बलिष्ठभटधृतं श्रमगृहं गुणनिकास्थानं गत इति उत्तरसर्गार्थसूचनम् ॥ पश्चिमान्तिका छन्दः । वदनकं वा ॥

अण रिणो । रिसी राम-इसी । रिज्जू सहुज्जुएहिं । उसहेहि रिसहो । रिउ उउ । " ऋणर्ज्वृषभर्त्वृषौ वा " [१४१.] इति ऋतो रिर्वा ॥

सरिस । सरिच्छ । " दृशेः क्विप्टक्सकः " । [१४२.] क्विप् टक् सक् इत्येतदन्तस्य दृशो धातोः ऋतो रिरादेशो भवति ॥

आढिअं । "आदृते ढिः" [१४३.] इति ऋतो ढिः ॥

दरिअ । " अरिर्दृप्ते " [१४४.] इति ऋतः अरिः ॥

इत्याचार्यश्रीहेमचन्द्रविरचितश्रीकुमारपालचरितप्राकृतद्व्याश्रयमहाकाव्यवृत्तौ प्रथमः सर्गः समाप्तः ॥

पङ्कय-केसर-कन्ती, अकिलिन्नो, हरि-चवेल-चविलो सो
स-किसर-किलित्त-दामो निवो पयट्टो समं काउं. १
गुरु-मण-थेणो रेवइ-देअर-सीअ-दिअराण वल-थूणो,
काही विअणं सो सयम् अवेअणो मल्ल-सेलाण. २

१. त्रि षट्क द्विक चतुष्क द्विक एक एक एक इत्येवं विंशत्या गाथाभिर्यथासंख्यं राज्ञो मल्लश्रमं धनुःश्रमम् असिश्रमं शक्तिश्रमं चक्रश्रमं सेल्लश्रमं परशुश्रमं शूलसीरश्रमम् आह ॥ पङ्कजकेसरः कमलकिञ्जल्कस्तद्वत् कान्तिः शरीरच्छविर्यस्य । स्वर्णवर्ण इत्यर्थः । अक्लिन्नः घर्मरहितः । हरिचपेटावत् सिंहतलप्रहारवत् चपेटा यस्य सकेसरं क्लृप्तं कण्टकन्दले स्थापितं दाम पुष्पमाला यस्य स नृपः श्रमं मल्लकलाभ्यासं कर्तुं प्रवृत्त इति ॥

अकिलिन्नो । किलित्त । " ऌत इलिः क्लृप्तक्लृन्ने " [१४५.] इति ऌत इलिः ॥

२. गुरोः कलाचार्यस्य मनःस्तेनः निरवधिकलाकौशलकरणेन चित्तहारकः । बलस्य सामर्थ्यस्य स्तेनश्चोरः । कयोः । रेवती रामप्रिया तस्या देवरः कृष्णः स च सीताया जानक्या देवरो लक्ष्मणश्च तयोः । तद्वत्पराक्रमवान् इत्यर्थः । स राजा स्वयम् अवेदनः मल्ला एव उन्नत्वाद् दृढत्वाच्च शैलास्तेषां वेदनां संतापम् अकार्षीत् ॥

केसर किसर । चवेल चविला । देअर दिअराण । विअणं वेअणो । "एत इद्वा॰" [१४६.] इति एत इत् वा ॥

थेणो थूणो । " ऊः स्तेने वा " [१४७.] इति एत ऊत् वा ॥

सेलाण । " ऐत एत् " [१४८.] इति आद्यकारस्य एत् ॥

तस्स सणिच्छर-पिउणोव्व कर-हयं सिन्धवंव मल्ल-कुलं
घम्म-जलोल्लं जायं स-सिन्न-पर-सेन्न-महिअंपि. ३
मुर-वेरिओव्व रक्खिअ-दइच्च-कयं-वइर-दइवय-सइन्नो
गेण्हीअ स तत्थ धणुं, कइलास-सओव्व केलासे. ४
देउव्वालक्खो, दइवेवि असङ्को, महि-अले नव-दइव्वं,
उच्चअ-नीचअ-लक्खे अणचुक्को, अवर-धीर-हरो. ५

३. तस्य राज्ञः शनैश्चरपिता रविस्तस्येव कराहतं हस्तताडितं किरणतापितं च सत् स्वसैन्यपरसैन्ययोर्महितं पराक्रमत्वेन श्लाघितमपि मल्लकुलं सैन्धवमिव लवणवद् घर्मजलार्द्रं क्षरत्स्वेदबिन्दु जातम् । अपिर्विस्मये ॥

सणिच्छर । सिन्धव । "इत् सैन्धवशनैश्चरे" [१४९.] इति ऐत इत्वम् ॥

सिन्न सेन्न । "सैन्ये वा" [१५०.] इति ऐत इत् वा ॥

४. मुरवैरीव नारायण इव रक्षितं दैत्यकृतवैरं दैवतसैन्यं येन [स इव] तत्र श्रमगृहे स राजा धनुरग्रहीत् । किंवत् । यथा कैलासे कैलासशयो हर इति ॥

दइच्च । दइवय । सइन्नो । "अइर्दैत्यादौ च" [१५१.] इति सैन्ये दैत्यादिषु च ऐतः अइः ॥

वेरि वइर । कइलास केलासे । "वैरादौ वा" [१५२.] इति ऐतः अइर्वा ॥

५. युग्मम् । स राजा शरान् वृष्टो वर्षति स्म । किंभूतः । शरग्रहसंधानादि कुर्वन् दैववद् अलक्ष्यः फलानुमेयप्रारम्भत्वात् । दैवेपि अशङ्कः लोकोत्तरधैर्यधारित्वाद् निर्भयः । महीतले नवः साक्षाच्छिष्टप्रतिपालकत्वेन दुष्टनिग्रहेण च अपूर्वो दैवः । उच्चैर्नीचैश्च लक्ष्ये वेध्ये अभ्रष्टः सम्यक्कलाचातुरीचुञ्चुत्वाद् अस्खलितः । अपरस्य विपक्षस्य धैर्यहरः ॥

१ B C °कइ°. २ B C °सउव्व. ३ B C दिव्वा°.

४ B C °चश्च°.

अन्नन्नं जोहेहिं सलाहिओ तह बुहेहि अन्नोन्नं,
मण-हर-सरलिअकुञ्चिअ-उहय-पवट्ठो सरे वुट्ठो. ६
कण्णो वलिअ-मणोहर-पउट्ठ-कर-सररुहेण नर-वइणो
लम्बिर-नाल-सरोरुहवतंसिओव्वासि[1] संधाणे. ७
कय-दुज्जण-सिर-विअणं, सिर-कुसुमाहरणम्, अणसिरो-विअणं[2][3],
आवज्जिअ-वाइअ-आउज्जस्सादिट्ठ-पुड-दलणं. ८
सूसास-वलिअ-चिबुओ अकासि सो गउअपुञ्छपमुहेहिं,
गाअङ्क-कोञ्चरिउ[4]-सुन्देरं पत्तो धणुह-मुण्डो. ९

६. अन्योन्यं योधैस्तथा बुधैश्च श्लाघितः प्रशंसितः । मनोहरसरलितः सरलः कृतः आकुञ्चितः कुटिलः कृतः उभयप्रकोष्ठः कलाचिको येन तथाविधः । स इति राजवाचकम् अनुक्तमपि प्रक्रमाज्ज्ञेयम् ॥

देव्वा दइवे दइव्वं । "एच दैवे" [१५३.] इति ऐत एत् अइश्चादेशः ॥
उच्चअ । नीचअ । "उच्चैर्नीचैस्यअः" [१५४.] इति ऐतः अअः ॥
धीर । "ईद्धैर्ये" [१५५.] इति ऐत ईत् ॥

७. संधाने शरासनशरारोपे वलितः आकर्णाकर्षणे पश्चाद्गतो मनोहरप्रकोष्ठो यः करः स एव सरोरुहं तेन कृत्वा । उत्प्रेक्ष्यते । लम्बमाननालं यत् सरोरुहं तेन अवतंसितः शेखरितो नरपतेः कर्ण आस्ते ॥

८. युग्मम् । कृता दुर्जनानां शिरोवेदना संतापो यत्र । शिरसि कुसुमान्येव अलंकारो यत्र । शेषालंकारान् मुक्त्वेत्यर्थः । अशिरोवेदनं यथा भवति एवं राजा आतोद्यिकैर्वादितं यद् आतोद्यं मृदङ्गपटहादिकं तस्य अदृष्टपुटदलनं[1] गोपुच्छप्रमुखैः शरविशेषैरकार्षीत् ।

९. किंभूतः । सोच्छ्वासं वलितं तिर्यग् नामितं चिबुकम् अध-

[1] B C °सिउव्वासि. [2] C °वयणं. [3] B °वअणं. [4] B C °कुंच°.

[1] B C °दलनं च.

अह कुच्छेअय-हत्थो कोच्छेअय-कउसलेण सो दिट्ठो,
कोवेस कउच्छेअय-सिद्धोत्ति, असेस-पउरेहिं. १०
अब्भास-गारवेणं गोविअ-सव्वङ्ग-गउरवो फलए,
नावाकारे तेरह-तेतीस-गुणोव्व सो आसि. ११

राधः प्रदेशो येन । धनुषि प्रसक्तः शौण्डः धनुःशौण्डः । सप्तमी शौण्डाद्यैरिति समासः[1] । धनुःकलाकुशल इत्यर्थः । अत एव गवाक्षकौञ्चरिप्वोर्हरभार्गवयोः सौन्दर्यं सौभाग्यं प्राप्तः प्राप्नोति स्मेति ॥

अन्नन्नं अन्नोन्नं । मणहर मणोहर । पवट्ठो पउट्ठ । सररुहेण सरोरुह । सिर-विअणं सिरो-विअणं । आवज्जिअ आउज्जस्स । "ओतोऽद्वान्योन्य°" इत्यादिना [१५६.] एषु ओतः अत्वं वा तत्संनियोगे च यथासंभवं कतयोर्व आदेशः ॥

सूसास । "ऊत् सोच्छ्वासे" [१५७.] इति ओत ऊत् ॥

गउअ गाअक्क । "गव्यउआअम्" [१५८.] इति ओतः अउ आअश्च ॥

कोञ्च । "औत ओत्" [१५९.] इति आद्यौतः ओत् ॥

सुन्देरं । सुण्डो । "उत् सौन्दर्यादौ" [१६०.] इति औत उत् ॥

१०. अथ अदृष्टपुटव्यधनानन्तरं कौक्षेयककौशलेन हेतुना कोपि लोकोत्तरः कश्चिदप्येषः कौक्षेयकसिद्धः खड्गविद्यासिद्ध इत्यशेषपौरैः निखिलनागरैः कौक्षेयकहस्तः सन् स राजा दृष्टः ॥

कुच्छेअय कोच्छेअय । "कौक्षेयके वा" [१६१.] इति औत उर्वा ॥

कउसलेण । कउच्छेअय । पउरेहिं । "अउः पौरादौ च" [१६२.] इति औतः अउः ॥

११. नावाकारे फलके अभ्यासगौरवेण शिक्षामहत्त्वेन गोपितसर्वाङ्गगौरवस्तिरोहितसमस्तगात्रगुरुत्वोपि स राजा आसीत् त्रयोदशत्रयस्त्रिंशद्गुण इव । स तदा अनेकभटप्रहारदानाद् अनेकस्तैर्ज्ञात इत्यर्थः । अपिः विरोधार्थोत्र द्रष्टव्यः । यः किल तिरोहित-

1 B C सः for समासः.

घडिआ अथेर-एक्कारएहि बहुएहिं दुव्वहा सत्ती
वेइल्ल-केल-कन्नेरयंव भामिय भुवि निहित्ता. १२
विअइल्ल-कण्णिआरय-कयलेहिं ऐ-अइत्ति भणिरेहिं
जोहेहि बोर-पोप्फल-पोरं-मन्नेहिं सा महिआ. १३
नोमालिअ-नोहलिआ-सोमालाहिं सलोण-मोहाहिं
तस्सोब्भमिअं लवणं सुउमाल-मऊह-मालिस्स. १४

गात्रः स एकोपि न लक्ष्यते कथं पुनस्त्रयोदशगुणस्त्रयस्त्रिंशद्गुणो वेति विरोधः। परिहारस्तु उक्त एव ॥

गारवेणं गउरवो। "आच्च गौरवे" [१६३.] इति औत आत्वम् अउश्च ॥

नावा। "नाव्यावः" [१६४.] इति औत आवादेशः ॥

तेरह। तेतीस। "एत् त्रयोदशादौ" इत्यादिना [१६५.] त्रयोदशन् इत्येवंप्रकारेषु संख्याशब्देषु आदेः स्वरस्य सस्वरेण व्यञ्जनेन सह एत्[1] ॥

१२. बहुभिः अस्थविरायस्कारैः दुर्वहा शक्तिः आयुधविशेषो घटिता निर्मापिता विचकिलकदलकर्णिकारमिव भ्रमयित्वा उपरि समन्ततश्चलयित्वा तेन राज्ञा भुवि निक्षिप्ता। तेनेति अत्र ज्ञेयम् ॥

१३. अयिअयि भोभो इति भणितृभिः ब्रुवाणैः बदरपूगफलपूतरवद् आत्मानं मन्यन्ते ये ते तथा। तैर्योधैः विचकिलकर्णिकारकदलैः पुष्पफलैः सा शक्तिः महिता अर्चिता ॥

अथेर। एक्कार। वेइल्ल। "स्थविरविचकिलायस्कारे" [१६६.] इति पूर्ववद् एत्। विअइल्ल इत्याद्यपि दृश्यते ॥

केल कयलेहिं। "वा कदले" [१६७.] इति पूर्ववद् एत् वा ॥

कन्नेरयं कण्णिआरय। "वेतः कर्णिकारे" [१६८.] इति पूर्ववद् एत् वा ॥

ऐ-अइ। "अयौ वैत्" [१६९.] इति पूर्ववद् ऐत् वा ॥

१४. नवमालिका यूथिका नवफलिका नूतनम् अल्पं फलं

[1] B C एइ for एत्.

चोद्दह-मणु-चोग्गुणओ, भुवण-चउद्दहय-वइ-चउग्गुणओ,
चोत्थेवि जुगे ति-पुरिस-चउत्थओ लक्खिओ स तया. १५
सागोक्खल-खइरोहल-लोहोऊखल-सिला-उलूखलया
चक्केण तेण दलिआ चोव्वारं पुण चउव्वारं. १६
इअ रइअ-कोउहल्लो कोहल-दक्खेहिं तक्किओ राया,
उअ कण्हो एस इहं भरहेसर-चक्कवट्टी ओ. १७

[यस्याः सा] तद्वत्सुकुमाराभिः सलवणा लावण्ययुक्ता मयूखाः कान्तयो यासां ताभिः स्त्रीभिः सुकुमारमयूखमालिनः दर्शनीयद्युतिधारिणस्तस्य राज्ञः लवणम् उक्कमितम् उत्तारितम् । विशेषणान्यथानुपपत्त्या अत्र स्त्रीभिरिति ज्ञेयम् ॥

बोर । पोप्फल । पोरं । नोमालिअ । नोहलिआ । "ओत् पूतर°" इत्यादिना [१७०.] पूर्ववद् ओत् ॥

१५. चतुर्दशानां मनूनां स्वायंभुवाद्यृषीणां समाहारश्चतुर्दशमनु । तस्माच्चतुर्गुणः । सर्वजनहितत्वेन अधिक इति भावः । भूर्भुवःस्वर्महर्जनस्तपःसत्येति सप्त । तान्येव सप्तभिर्वायुस्कन्धैः सह चतुर्दश भुवनानि । तेषां चतुर्दशकम् । तस्य पतिर्विष्णुः तस्माच्चतुर्गुणः । चतुर्थेपि युगे कलावपि त्रिपुरुषस्य ब्रह्मविष्णुमहेश्वररूपस्य सकललोकमहनीयत्वेन चतुर्थः स राजा तदा लवणोत्तारणक्षणे लक्षितः ।

१६. शाकस्य उलूखलश्च खदिरस्य उलूखलश्च लोहस्य उलूखलश्च शिलाया उलूखलश्च ते तथा तेन राज्ञा चक्रेण आयुधविशेषेण दलिताः । कथम् । चत्वारो वारा यत्र दलने तत् तथा । पुनश्चतुर्वारं च । ते तेन भूयोभूयो भग्ना इति भावः ॥

१७. इति धनुःखड्गशक्तिचक्रादिकलाकौशलप्रकारेण रचितकुतूहलो राजा कुतूहले कौतुकहेतुकर्मणि धनुःकलादौ दक्षैः प्रवीणैस्तर्कितः पर्यालोचितः । कथम् । इह पृच्छ्याम् उत किं उष्णः उत अथवा भरतेश्वरचक्रवर्तीति ॥

ओआरे अवयार-क्खमेण तेणावसह-रहिएण,
सेल्ल-कला-अवयासे भग्गो जोहाण ओआसो. १८
पन्नास-पलोऽवगओ किं जलणो उअ रवित्ति तस्स करे
उवहसिअ-परसुरामस्सूहसिअ-पवी महा-परसू. १९

सोमालाहिं सुउमाल। सलोण लवणं। मोहाहिं मऊह। चोद्दह चउद्दहय। चोग्गुण चउग्गुणओ। चोत्थे चउत्थओ। सागोक्खल खइरोहल लोहोऊखल उलूखलया। चोव्वारं चउव्वारं। कोउहल्लो कोहल। "न वा मयूख°" इत्यादिना [१७१.] पूर्ववद् ओत् वा॥

१८. अपकारे अपकारक्षमेण। सापराधे शिक्षाकरणसमर्थेनेत्यर्थः। अपशब्देन अयशसा रहितेन। क्वचिदपि स्खलिताभावात्। तेन राज्ञा। सेल्लेति देश्यः प्रासवाची। तस्य कलावकाशे योधानाम् अवकाशः स्फूर्तिः भग्नः। प्रासेन वेध्यव्यधनम् अस्य विलोक्य तथाविधकलाविकलत्वेन सभोपहासपात्रं स्वं तर्कयन्तो भटा न प्रासं करेऽपि चक्रुरित्यर्थः॥

१९. पञ्चाशत् पलानि मानम् अस्य स्यात्। °मात्रडिति संशये मात्रट्। द्विगोः संशये चेति तस्य लुप्। उपहासितः दीप्तितैक्ष्ण्याभ्यां तिरस्कृतः पविर्वज्रं येन स महापरशुः उपहसितस्तथाविधप्रहरणाङ्गीकारेण अनुकृतः परशुरामो येन स तथा तस्य राज्ञः करे सन् अवगतः[1] ऊह्यते किं ज्वलनः उत रविरिति॥

उअ ओ। ओआरे अवयार। अवयासे ओआसो। "अवापोते च" [१७२.] इति पूर्ववद् ओत् वा॥ क्वचिन्न। अवसह। अवगओ। उअ रवि॥

उवहसिअ रामस्सूहसिअ रामस्सोहसिअ। "ऊच्चोपे" [१७३.] इति पूर्ववद् ऊत् ओच्च वा॥

---

१ B C सिल्ल°. २ B C °स्सोह°. The author means that we should read °रामस्सोहसिअ° (=°रामस्स ओहसिअ°) as well as °रामस्सूहसिअ° (=°रामस्स ऊहसिअ°.)

---

[1] B C गतः सन् for सन् अवगतः.

सूल-कलाइ णुमण्णो सीर-णिसण्णो अ किन्ति-पङ्गुरणो,
सो किन्ती-पाउरणं सिइ-पावरणं च अणुकाही. २०
अह राय-वाडिअत्थं नाओ आणाइणो रिउ-घरट्टो
पुहइ-सईसेणागरु-सुरहि-मओ सुकुसुम-सुतारो. २१
सचमर-कण्णो विदुरो गय-पावो देव-दुज्जओ विजणे
सो धरिओ पर-वारण-कवलण-नत्तंचर[1]-चरित्तो. २२
बालक्क-मुहो सुहकर-गज्जी सुहयर-गई अ इअ थुणिओ,
जग-आगमिओ बहुतर-आअमिअ-कलेहिँ बहुअरयं. २३

२०. कीर्तिस्त्रिजगतीश्लाघ्या प्रावरणं यस्य [स] राजा शूलकलायां निषण्णो व्यापृतः । सीरे हलरूपायुधे निषण्णश्च कृत्तिप्रावरणम् ईश्वरं शितिप्रावरणं बलभद्रं [च] अन्वकार्षीत् अनुकृतवान् ॥

णुमण्णो णिसण्णो । "उमो निषण्णे" [१७४.] इति पूर्ववद् उमादेशो वा ॥

पङ्गुरणो पाउरणं पावरणं । "प्रावरणेऽङ्ग्वाऊ" [१७५.] इति पूर्ववत् अङ्गु आउ इत्येतौ आदेशौ वा ॥

२१. अथ शस्त्राभ्यासानन्तरं रिपुषु उपमर्दकत्वेन घरट्टः अगरुरिव सुरभिर्मदो दानजलं यस्य सुकुसुमा सुतारा शोभन आभरणविशेषो यस्य स तथाविधो नागः कुञ्जरो राजपाटिकार्थं चतुरङ्गसैन्यश्रमकरणाय बहिर्गन्तुं पृथिवीशचीशेन पृथिवीन्द्रेण आनायितः ॥

२२. अधुना गाथादशकेन तद्वर्णनम् आह । सचमरौ समीपप्रेङ्खत्प्रकीर्णकौ कर्णौ यस्य विदुरः हस्तिपकाभिप्रेतकृत्यकरणाद् विचक्षणः गतं भद्रजातीयत्वेन नष्टं पापं कुचेष्टा यस्य देवदुर्जयः सुरैरपि दुरभिभवः । परेषां शत्रूणां परे अन्ये वा पराः प्रकृष्टा वा वारणास्तेषां कवलने ग्रसने नक्तंचरचरित्रः अत एव स गजो विजने एकान्ते धृतः ॥

२३. बालार्क इव अरुणत्वाद् मुखं यस्य सुखकरा शुभकरा वा

१ B C नक्कं°.

जलयर-अजलचर-वई जस्स य इन्धं रुसा-पिसाजी सो
सुहदेसुवि सुहओ. जइ एरिसओ सो उण सुरेहो. २४
अमुगो कर-आउण्टण रम्मो चाउँण्ड-काउँए तुट्ठे
लब्भइ, अणिउँत्तय-सुरहि-जउँण-जल-बहुल-मय-वट्टो. २५[१]

गर्जिबृंहितं यस्य शुभे करगर्जी यस्येति वा शुभतरगतिः जगता आगमितो ज्ञातश्च स गजः इति वक्ष्यमाणप्रकारेण[1] बहुतरा आगमिता ज्ञाता कला यैः पुरुषैस्तैर्बहुतरकम् अतिशयेन स्तुतः श्लाघितः। स इति प्रक्रमात् ज्ञेयम्॥

२४. जलचराजलचरयोः। हस्तिनोरिति गम्यम्। उत्कृष्टत्वेन पतिः यस्य चिह्नं रुषापिशाची। कोपेन चण्डाल इत्यर्थः। शुभदेष्वपि राज्यसमृद्धिकृत्त्वेन शुभदः स गजः॥ अथवा अलं बहुनोक्तेन। यदि पुनरीदृशः एतत्समः स त्रिभुवनप्रसिद्धः सुरेभ ऐरावणः। यदीति संभावने॥

२५. अमुकोयं गजः करस्य शुण्डादण्डस्य आकुञ्चनं मण्डलीकरणं तेन रम्यः। अतिमुक्तकानीव माधवीलताकुसुमानीव सुरभिः यमुनाजलवद् बहुलः शितिः मदपट्टो दानप्रवाहो यस्य स तथा। चामुण्डाकामुके चन्द्रशेखरे तुष्टे परितोषं गते लभ्यते प्राप्यते॥

"स्वराद् असंयुक्तस्यानादेः" [१७६.] अधिकारोयम्। यद् इत ऊर्ध्वम् अनुक्रमिष्यामः तत् स्वरात्परस्य असंयुक्तस्य अनादेर्भवतीति वेदितव्यम्॥

राय-वाडिअत्थं। नाओ। आणाइओ। रिउ। पुहइ-सईसेण। मओ। "कगचजतदपयवां प्रायो लुक्" [१७७.] इति कादीनां लुक्॥ प्रायोग्रहणात् क्वचिन्न। अगरु। सुकुसुम-सुतारो। सचमर। विदुरो। गय-पावो। देव। विजणे॥ स्वराद् इत्येव। नत्तंचर[2]॥ असंयुक्तस्येति किम्। दुज्जओ। चरितो। बालक्क। गज्जी॥ क्वचित् संयुक्तस्यापि। नत्तंचर[3]॥ अनादेरिति किम्। विदुरो। गय। विजणे। पर। जग। यस्य तु जत्वम् आदौ वक्ष्यते॥ समासे तु वाक्यविभक्त्यपेक्षया भिन्न-

१. B अणिउंतय. C अणिउतय.

1 B C पूर्वोक्त° for वक्ष्यमाण°. 2 B C नक्तं°. 3 B C नक्तं°.

अइमुंतय-बिन्दु-करो अइमुत्तय-गोर-दन्तओ एस.
सविमो खु साव-चविओ तिअस-गय-वरो महि-अलम्मि. २६
अच्छ-कय-कण्ण-चिउओ महु-पिङ्गल-नयणओ मयङ्क-नहो
पियइव लायण्णम्[१] इमो अखुज्ज-कुम्भो पर-गयाण. २७

पदत्वमपि । तेन तत्र यथादर्शनम् उभयमपि । सुहकर सुहयर । आगमिओ आअमिअ । बहुतर बहुअर । जलयर अजलचर । सुहदेसु सुहओ ॥ क्वचिद् आदेरपि । इन्धं । उण ॥ क्वचित् चस्य जः । पिसाजी ॥ अमुगो इत्यादिषु तु "व्यत्ययश्च" [४.४४७.] इति कस्य गत्वम् ॥ आर्षे अन्यदपि दृश्यते । आउण्टण । अत्र चस्य टः ॥

२६. अतिमुक्तकानीव करे बिन्दवो यस्य अतिमुक्तकवद् गौरदन्तः एष राजगजो ज्ञायते । सोयं त्रिदशगजवरः[2] मुनेः कस्यचिच्छापेन च्युतो[2] भ्रष्टः स्वर्गाद् महीतले ॥ मनसा प्रत्यक्षमिव परिकल्प्य सुरेभम् इदमा निरदिक्षत् ॥

चाउंण्ड-काउंए । अणिउंतय[3] । जउंण । "यमुना०" इत्यादिना [१७८.] मस्य लुक् । लुकि च मस्य स्थाने अनुनासिकः ॥ क्वचिन्न । अइमुंतय अइमुत्तय ॥

साव । "नावर्णात् पः" [१७९.] इति न पस्य लुक् ॥

२७. अच्छं मलरहितं कचकर्णचिबुकं यस्य । मधुवत् पिङ्गले नयने यस्य । मृगाङ्कवद् निर्मलत्वाद् नखा यस्य । अकुब्जौ उन्नतौ कुम्भौ यस्य स गजः परगजानां लावण्यं पिबतीव । निखिललावण्यस्य तत्र दर्शनाद् इति भावः ॥

गय । कय । नयणओ । मयङ्क । लायण्ण[4] । गयाण । "अवर्णो यश्रुतिः" [१८०.] "कगचज" इत्यादिना [१७७.] लुकि शेषोऽवर्णः अवर्णात् परो लघुप्रयत्नतरयश्रुतिः । अवर्ण इति किम् । चिउओ ॥ अवर्णादित्येव । तिअस ॥ क्वचिद् भवति । पियइ ॥

---

१ B C लायन्न°.

---

1 B C °गजो for °गजवरः. 2 B C कस्यचित्थानाज्ञासेन च्युतो. 3 B C अणिउंतय. 4 B C लायन्न°.

खप्पर-खीलय-कुज्जय-कुसुम-समा जस्स सेल-खम्भ-दुमा,
रुन्धिअ-खासिअ-छिक्कं पिक्खिज्जइ मय-गलो एस. २८

मरगय-गेन्दुअ[1]-सरिसालि-गुच्छ-गण्डे निवो इहारूढो,
जयइ चिलाएव्व परे सिरिकण्ठ-किराय-वीरेवि. २९

जिअ-घण-सीभर-गङ्गा-सीहर-चन्दिम-सुसीअ-सीअरओ
फलिहामल-वीस-नहो निहस-प्पह-चिहुरओ एस. ३०

२८. कर्परश्च वटखण्डं कीलकश्च शङ्कुः कुब्जकः शतपत्रिकाविशेषः तस्य कुसुमानि च तैः समाः । एतान् अनायासेन उत्पाटयतीत्यर्थः । यस्य शैलस्तम्भद्रुमाः । एष मदकलो मदोत्कटः रुद्धकासितक्षुतं यथा भवति एवं प्रेक्ष्यते ॥

अखुज्ज । खप्पर । खीलय । "कुब्ज०" इत्यादिना [१८१.] एषु कस्य खः पुष्पं चेत् कुब्जाभिधेयं न ॥ अपुष्प इति किम् । कुज्जय ॥ आर्षेन्यत्रापि । खासिअ ॥

२९. मरकतकन्दुकसदृशा अलिगुच्छा ययोस्तौ तथाभूतौ गण्डौ यस्य तस्मिन्निह गजे आरूढः स नृपः श्रीकण्ठकिरातवद्वीरानपि परान् शत्रून् किरातानिव पुलिन्दानिव जयति ॥

मय-गलो । मरगय । गेन्दुअ । "मरकत०" इत्यादिना [१८२.] कस्य गः । कन्दुके तु आद्यस्य गः ॥

चिलाए । "किराते चः" [१८३.] इति कस्य चः । कामरूपिणि तु नेष्यते ॥ किराय ॥

३०. जिताः शैत्येन अभिभूता घनशीकरा गङ्गाशीकराश्च यैः अत एव चन्द्रिकावत् सुशीताः शीकरा मदबिन्दवो यस्य । स्फटि-

---

[1] B C °गेङ्डुअ°.

पिहु-जहणो साहु-मुहो सरिसव-खल-कडुअ-सलिलओ अथिरो,
इह एसो निव-जोग्गो पत्तो चोत्थि मयावत्थं. ३१

निव-धम्म-रओ अह सो, नभम्मि पाउस-घणोव्व, पिधम् इन्दो
अपिहंव आसणाओ असङ्कलं तं समारूढो. ३२

कवद् अमला विंशतिर्नखा यस्य । निकषः कषपट्टः । तस्य प्रभा-वत् चिकुरा यस्य स तथाभूत एष गजः ॥

सीभर सीहर । "शीकरे भहौ वा" [१८४.] इति कस्य भहौ वा । पक्षे सीअरओ ॥

चन्दिम । "चन्द्रिकायां मः" [१८५.] इति कस्य मः ॥

फलिह । निहस । चिहुरओ । "निकषस्फटिकचिकुरे हः" [१८६.] इति कस्य हः । चिहुरः संस्कृतेपीति दुर्गः ॥

३१. पृथुजघनो विकटकटीतटः साधुमुखः सौम्यवदनः सर्षप-खलवत् कटुकं सलिलं मदजलं यस्य । अस्थिरः निरन्तरं हस्तकर्ण-तालचलनेन चञ्चलः एष गजः चतुर्थीं मदेन उपलक्षिताम् अवस्थां प्राप्तः । त्रिंशद्वर्षदेश्यः संपन्न इत्यर्थः । अत एव नृपयोग्यः । एता-वता भद्रजातीयत्वम् उक्तम् । तथा च तल्लक्षणम् ।

महु-गुलिय-पिङ्गलक्खो अणुपुव्वि-सुजाय-दीह-नङ्गूलो ।
पुरओ उदग्ग-धीरो सव्वङ्ग-समाहिओ भद्दो ॥ इत्यादि ॥

३२. [अथ] नृपस्य धर्मे दुष्टनिग्रहशिष्टप्रतिपालनादौ आचारे रतः । पृथक् भूतलस्थितत्वेन भिन्न इन्द्रः स श्रीकुमारपालभूपः आसनाद् अपृथगिव शरीरसौस्थ्यकृत्त्वेन सिंहासनकल्पे अशृङ्खले अपासित-निगडे तस्मिन् हस्तीन्द्रे समारूढः । यथा नभसि प्रावृड्घनः । "सप्त-म्या द्वितीया" [३.१३७] इति तम् इत्यत्र सप्तम्याः स्थाने द्वितीया ॥

नहो । प्पह । पिहु । जहणो । साहु । मुहो । "खघथधभाम्" [१८७.] इति

पुन्नाम-दामवन्तो पुलोइओ भामिणीहि पउरीहिं
छालङ्क-देव-तेओ सुहओ रइ-सूहवोव्व निवो. ३३
इन्दो दुहओ चन्दोवि दूहवो आसि खेअर-वहूणं
तंसि दिट्ठे तइआ मणि-खसिआहरण-खइअङ्गे. ३४

खादीनां हः । असंयुक्तस्यैव । चोत्थि । मयावत्थं ॥ प्राय इत्येव । सरिसव-खल । अथिरो । निव-धम्म । नभम्मि ॥

पिध अपिहं । "पृथकि धो वा" [१८८.] इति थस्य धो वा ॥

असङ्कलं । "शृङ्खले खः कः" [१८९.] इति खस्य कः ॥

३३. गाथासप्तकेन राजवर्णनम् आह । पुन्नागदामवान् सुरपर्णिकाकुसुममालायुक्तः । छागाङ्कदेवो वह्निः । तद्वद् द्विषद्दारुदाहकत्वात् तेजो यस्य । सुभगः अनुकूलाचरणेन जगज्जनप्रियः नृपः रतिसुभग इव कन्दर्पवद् भागिनीभिः भाग्ययुक्ताभिः पौरीभिः नागराङ्गनाभिः प्रलोकितः सोत्कण्ठम् ईक्षितः ॥

पुन्नाम । भामिणीहि । "पुन्नागभागिन्योर्गो मः" [१९०.] इति गस्य मः ॥

छालङ्क । "छागे लः" [१९१.] इति गस्य लः ॥

३४. तदा राजवीथीचलन्मदकलपृष्ठतलारोहकाले मणिखचिताभरणैः पद्मरागेन्द्रनीलादिरत्नरोचिष्णुकटककेयूरमुकुटाद्यलंकारैः खचितानि युक्तानि अङ्गानि हस्तचरणोत्तमाङ्गप्रमुखा अवयवा यस्य तस्मिन् राज्ञि दृष्टे सति खेचरवधूनाम् इन्द्रो दुर्भगश्चन्द्रोपि दुर्भग आसीत् ॥ सौम्यसौभाग्यलावण्योपेततत्तनुविलोकने सर्वाङ्गीणनयनसहस्रेण भीषणत्वाद् इन्द्रः अन्तर्मलीमसत्वेन च चन्द्रस्तासां न प्रियंभावुकतां जगामेत्यर्थः ॥

सूहवो । दूहवो । "ऊत्वे दुर्भगसुभगे वः" [१९२.] इति गस्य वः ॥ ऊत्व इति किम् । सुहओ । दुहओ ॥

वेस-पिसाओ मुत्ती-पिसल्लओ अ झडिलो अजडिलो य,
खट्टङ्ग-घण्ट-भूसो निवारिओ न जह अटइ पुरो. ३५
केढव-सयढारि-सढाल-विक्कमो, फलिह-विमल-नेवच्छो,
चविला-फालिअ-कुम्भो नहंव चविडाइ फाडन्तो; ३६
अङ्कोल्ल-तेल्ल-णिद्धो, असढो, पिहडो कलाण सयलाण,
लहु-जढर-पिढर-पडियार-पाडणत्ताण कय-कीलो; ३७

३५. वेषेण पिशाचः जीर्णविवर्णविकृतवेषवान् ग्रहिलप्रायः। मूर्त्या पिशाचश्च भीषणदर्शनः। जटिलः सर्वत्र उद्गतरोमा। अजटिलः मुण्डितशिरमुण्डः कापालिकादिः खटाङ्गघण्टाभ्यां भूषा यस्य। स च मृतककपालघण्टादिकलित ईश्वररूपधारी। जटाधर इत्यर्थः। निवारितो दुःशकुनकारणाद् निषिद्धः यथा येन पुरः अग्रे न अटति नागच्छति॥

खसिअ खइअङ्के। पिसाओ पिसल्लओ। "खचित०" इत्यादिना [१९३.] यथासंख्यं सल्लौ वा॥

झडिलो अजडिलो। "जटिले जो झो वा" [१९४.] इति जस्य झो वा। "टो डः" [१९५.] इति टस्य डश्च॥ स्वरादित्येव। घण्ट॥ असंयुक्तस्येत्येव। खट्टङ्ग॥ क्वचिन्न। अटइ॥

३६. चतुर्भिः कलापकम्। कुमारेण कुमारपालेन कारितो विहारः कुमारविहारस्तस्मिन् श्रीपार्श्वनाथचैत्ये प्राप्तः। राजेति प्रक्रमात् ज्ञेयम्। कीदृशः कैटभशकटौ दैत्यौ। तयोर्यः अरिभूतः सटालो नरसिंहस्तद्वद् विक्रमो यस्य। स्फटिकवद् विमलनेपथ्यः। चपेटया पाटितस्ताडितः कुम्भो येन स तथाभूतः। श्यामकुम्भस्थलास्फालनात् अत्युन्नतत्वेन[1] अदृश्यकुम्भस्थलदत्तचपेटोत्थप्रतिरवाद् वा उत्प्रेक्ष्यते नभश्चपेटया पाटयन्निति॥

३७. अङ्कोठतैलवत् स्निग्धः अरूक्षकायः अशठः शाठ्यवर्जितः

[1] B अत्त्छ्यत्युतत्वेन. C अभ्युन्नतत्वेन.

दढ-खन्ध-हार-नाडिं पेल्लन्तो निबिड-कच्छ-नालिम् इभं,
उव्वेलु-अचुच्छङ्कुस-अच्छुच्छ-वेणूहि आवरिओ; ३८
अणतुच्छ-टयर-कप्पूर-धूव-महमहिअ-टसर-सुइ-वत्थो,
कुमर-विहारे पत्तो टूवर-पडिहार-दिन्न-करो. ३९

सकलानां कलानां पिठरो भाजनम् । लघु जठरं बुभुक्षाक्षामकुक्षिः तदेव पिठरस्तस्य प्रतीकारो भोजनलाभः तेन पातनम् इतस्ततो भ्रमणं तेन ऋताः । पीडिता इत्यर्थः । तेषां कृता मनोरथातिगवस्तुदानेन जनिता क्रीडा स्वेच्छाविलसनं येन स तथा ॥

३८. दृढा स्कन्धे हारभूता नाडिर्वरत्रा यस्य । निबिडा निश्चला कक्षायां मध्ये च नाडिर्यस्य स तथा । तम् इभं क्षिपन् प्रेरयन् । उद्वेणवः उद्गूर्णवंशदण्डास्ते च अतुच्छाङ्कुशाश्च एवंभूता ये अतुच्छा वेणवः प्रभूता राजविशेषास्तैरावृतः । वेणुर्वंशे नृपान्तरे इति वेणुशब्दो राजविशेषवाच्यपि ॥

३९. अतुच्छाः तगरश्च सुरभिद्रव्यभेदः कर्पूरो घनसारः धूपश्च नानासुरभिद्रव्यक्षोदः तैः । अर्थात् तद्धूमैः प्रसृतानि व्याप्तानि त्रसरः सूत्रभेदस्तस्य शुचीनि वस्त्राणि यस्य । तूवरः अनुद्भिन्नश्मश्रुर्मुण्डितश्मश्रुर्वा यः प्रतीहारस्तेन दत्तः करो यस्य स तथा ॥

केढव । सयढाणि । सढाल । "सटाशकटकैटभे ढः" [१९६.] इति टस्य ढः ॥

फलिह । "स्फटिके लः" [१९७.] इति टस्य लः ॥

चविला चविडाइ । फालिअ फाडन्तो । "चपेटापाटौ वा" [१९८.] इति चपेटायां ण्यन्ते पाटौ धातौ च टस्य लो वा ॥

जढर । "ठो ढः" [१९९.] इति ठस्य ढः ॥

अङ्कोल्ल । "अङ्कोठे ल्लः" [२००.] ॥

पिहडो पिढर । "पिठरे हो वा रश्च डः" [२०१.] इति ठस्य हो वा तत्संनियोगे च रस्य डः ॥

सुपइट्ठं, सुपडायं, वेडिस-दल-नील-भित्ति-गब्भिणयं,
अणिउँत्तय-फुल्ल-हरं बालाणवि रुण्ण-अवहरणं; ४०
बाहत्तरि-कल-सालाहण-सम-जणम्, अलसि-कुसुम-कय-सोहं,
पलिल-सिर-पलिअ-पीवल-करण-घुसणुम्मीसँ-ण्हवण-जलं. ४१

कीलो । "डो लः" [२०२.] इति डस्य लः ॥ क्वचिद् वा । नाडि नालि । क्वचिन्न । निबिड ॥

उव्वेल्ल वेणूहि । "वेणौ णो वा" [२०३.] इति णस्य लो वा ॥

अच्चुच्छ अछुच्छ अणतुच्छ । "तुच्छे तश्चछौ वा" [२०४.] इति तस्य चछौ वा ॥

टयर । टसर । टूवरं । "तगरत्रसरतूवरे टः" [२०५.] इति तस्य टः ॥

४०. अधुना यादृशं तज्जिनमन्दिरं यादृशश्च सन् राजा प्रविष्टस्तद् गाथाद्वादशकेनाह ॥ द्वादशभिः कुलकम् । निजनाम्ना अङ्कितम् उपलक्षितं यद् निजकीर्तनम् । कुमारविहार इत्यर्थः । तद् भक्त्या आदरेण ततः प्राप्त्यनन्तरं स श्रीकुमारपालभूपः प्रविष्टः प्रविशति स्म । कीदृशं तत् । सुप्रतिष्ठं शास्त्रविधिविहितविधानविशेषम् अतिशयप्रसिद्धं वा । सुपताकं चश्चद्वैजयन्तीकं वेतसो वानीरस्तस्य दलानीव नीलमणिनिर्मितत्वेन या नीला भित्तयस्ताभिर्गर्भितं गर्तापुरोर्ध्वशिखरान्तराले युक्तम् । अतिमुक्तकफुल्लानां गृहाणि पूजार्थं कृता गृहाकारा विच्छित्तयो यत्र । किं बहुना । बालानामपि रुदितापहरणम् कौतुकात् कृतसस्मितबालकम् इत्यर्थः ॥

४१. द्विसप्ततिः कला येषाम् अत एव सातवाहनसमा जनाः श्रावकलोका यत्र । अतसीकुसुमकृतशोभं क्षुमाप्रसूनजनितान्तराविच्छित्ति । पलितशिरसां यानि पलितानि तेषां पीतकरणं स्वर्णवर्णापादनं यद् घुसृणं कुङ्कुमं तेन उन्मिश्रं स्नपनजलं यत्र तत्

१ B C अणिउंतय°. २ B C °घुसणुम्मीस°.

1 B C अचुछं. 2 B गर्तापूरो°. We with C. 3 So B C.

पीअल-धाउ-विणिम्मिअ[1]-विहत्थि-पम-माहुलिङ्ग-आहरणं,
भरह-जिण-भवण-सरिसं मङ्गल-वसहिं सिरी-वसइं; ४२

अध काहल-भव्व-जणं, सिढिलिअ[2]-कलि-कालम्, असढिलाणन्दं,
नयरस्स मेढिभूयं, पढमं तित्थंव पुढवीए; ४३

पुहवी-निसीढ-तम-भर-निसीहिणीनाह-सरिस-जिण-बिम्बं,
खण्डिअ-डम्भिअ-दम्भं, उद्दण्ड-सुवण्णमय-डण्डं; ४४

डरिआणं दर-हरणं, डड्ढागरु-दड्ढ-धूव-सुह-गन्धं,
अहि-डसण-डट्ठ-मरणं, दसण-कवाडंसु-दट्ठ-तमं; ४५

तथा । स्नानजलचन्दनेन यत्र पलितशिरसः स्वर्णवर्णकचा भवन्तीत्यर्थः ॥

४२. पीतधातुना गाङ्गेयेन विनिर्मितं वितस्तिप्रमं मातुलिङ्गाभरणं यत्र । भरतजिनभवनसदृशं मङ्गलानां कल्याणानां वसतिं स्थानं श्रियः शोभाया लक्ष्म्या वा वसतिम् ॥

४३. अथ कातराः पापभीरवो भव्यजना यत्र । शिथिलित-अनवरतधर्मनिमग्नजनतापूर्णत्वेन मन्दीकृतः कलिकालो येन । अशिथिलः निबिडः आनन्दो यस्मात् । नगरस्य मेथिभूतं नाभिभूतम् । अन्यतीर्थपरित्यागेन तदाराधनधार्मिकलोकदर्शनाद् उत्प्रेक्षते । पृथिव्यां प्रथमं तीर्थम् ॥

४४. पृथिव्यां निशीथे अर्धरात्रे यस्तमोभरस्तत्र निशीथिनीनाथसदृशं निर्मलकाषंकषत्वेन चन्द्रकल्पं जिनबिम्बं यत्र खण्डितदाम्भिकदम्भम् । विघ्नविधानेन ध्वस्तमायिकमायम् इत्यर्थः । उद्दण्डसुवर्णमयदण्डम् ॥

४५. दरितानां भीतानां दरहरणं भयध्वंसकम् । दग्धागरुदग्ध-

---

[1] B °विणम्मिअ°. C °विणमिअ°. [2] B C सिढलि°.

डाहत्त-दाह-हरणं, कय-डोहलयाण पुन्न-दोहलयं,

कडण-मइ-चत्त-कदणं, डब्भङ्कुर-नील-नीलमणिं; ४६

दब्भग्ग-मई दर-डोलिर-सीसम् अदोलिरेण हिअएण,

दूरम् अहरं डसन्ते डहमाणो मिच्छ-दिट्ठि-जणे; ४७

थुणिरो देवं बारह-रवि-तेअं भत्ति-गग्गर-गिराए,

धम्म-करि-करलि-हूओ, कयलि-मिऊ, कोह-अपलित्तो; ४८

धूपाभ्यां शुभगन्धम् । अहिदशनदष्टानां शरणं त्राणस्थानम् । लग्नगाढविषाशिषोपि तत्रागता जीवन्तीत्यर्थः । दशनानां दन्तिदन्तानां कपाटानि तेषाम् अंशवः तैर्दष्टं ग्रस्तं तमो येन ॥

४६. दाहार्तदाहहरणं भवदावसंतापापनोदकम् । कृतदोहदानां संजातदोहदानां पूर्णदोहदम् । पूरिताभिप्रेतम् इत्यर्थः । कदनमतिभिः हिंसाबुद्धिभिः । पापिष्ठैरित्यर्थः । तैरपि त्यक्तं कदनं यत्र । दर्भाङ्कुरवद् नीला नीलमणयः प्राङ्गणादिषु यत्र तत् तथा ॥

४७. स च कीदृशः । दर्भस्य कुशस्य अग्रं तद्वत् सूक्ष्मार्थपरिच्छेदकत्वेन मतिर्यस्य । अदोलावता निश्चलेन हृदयेन उपलक्षितः । दरदोलावत् शीर्षं जिनबिम्बरामणीयकविलोकनविस्मयेन ईषच्चलन्मस्तकं यथा भवति एवं प्रविष्टः । जिनप्रवचनप्रभावनामात्सर्येण विघ्नाशक्ततया च दूरम् अतिशयेन अधरं दशतो मिथ्यादृष्टिजनान् दहन् संतापयन् ॥

४८. द्वादशरवितेजसं देवं वीतरागं भक्तिगद्गदगिरा जयजयेत्यादिवाचा स्तोता स्तवनशीलः । धर्म एव करी तत्र कदलीभूतः शोभाकृत्त्वेन पताकातुल्यः । कदलीवद् मृदुः कोमलाङ्गः । क्रोधेन अप्रदीप्तः । प्रशान्त इत्यर्थः ॥

दोहल-दुउणिअ-धाराकयम्ब-धूलीकलम्ब-कण्टइओ,

धिप्पिर-सुवन्न-दिप्पिर-तनु-कन्ति-कवट्टिअन्न-पहो; ४९

चइउं निव-कउहाइं निसढाइ-निवाण धम्म-सिक्खाओ[1]

ओसहम् ओसढिओ इव दिन्तो, स निसीहिअं काउं; ५०

निअ-नामङ्किअ-णिअ-कित्तणयं अनिलोव्व अतुल-थामेण,

पज्जलिआनल-तेओ भत्तीइ तओ पइट्ठो सो. ५१

४९. दोहदेन स्वसमयोद्भूतधूलिधाराधरधाराधोरणी[1]छोटनरूप-दौहृदपरिपूर्त्या द्विगुणितौ वृद्धिं गतौ यौ धाराकदम्बधूलीकदम्बौ ताविव कण्टकितः संजातरोमाञ्चः । दीप्रसुवर्णवद् दीप्रा या तनुकान्तिस्तया कदर्थितान्यप्रभः ॥ एकस्यैव कदम्बस्य द्विधा अभिधा। यद् उक्तम् ।

ग्रीष्मसमये[2] विकासी कथितो धूलीकदम्ब इति लोके ।
जलधरसमयप्राप्तौ[3] स एव धाराकदम्बः स्यात् ॥

५०. नृपककुदानि छत्रखड्गवाहनमुकुटचामररूपराजचिह्नानि त्यक्त्वा निषधादिनृपेभ्यो धर्मशिक्षाः धर्मोपदेशान् ददत् वितरन् । किंवत् । यथा औषधानि पण्यम् अस्य औषधिकः गान्धिकः औषधम् इति । स चतुःसमुद्रवसुंधराप्रसिद्धनैषेधिकीं कृत्वा ॥

५१. अतुलस्थाम्ना अमितबलेन कृत्वा अनिल इव वायुमदृक्षः । प्रज्वलितानलतेजा जाज्वलितज्वलनप्रतिमप्रताप इति ॥

पडिहार । सुपडायं । " प्रत्यादौ डः " [२०६.] इति तस्य डः ॥ आर्षे दुक्कडादि ज्ञेयम् ॥ प्राय इत्येव । सुपइट्ठं ॥

वेडिस । " इत्वे वेतसे " [२०७.] इति तस्य डः ॥

गब्भिणयं । अणिउंतय[4] । " गर्भितातिमुक्तके णः " [२०८.] इति तस्य णः ॥

रुण्ण । " रुदिते दिना ण्णः " [२०९.] इति दिना सह तस्य ण्णः ॥

बाहत्तरि । " सप्ततौ रः " [२१०.] इति तस्य रः ॥

सालाहण । अलसि । " अतसीसातवाहने लः " [२११.] इति तस्य लः ॥

---

1 B C निसिढाइ°.

---

1 B C °धोरिणी°. 2 B C °समय°. 3 B C °प्राप्तौ स एव. 4 B C अणिउंतय.

लिम्बासय-निम्बगिरा कलि-ण्हाविअ-पाव-नाविआदरिसा
धम्म-रिउणोवि तसिं दिट्ठे धम्मोम्मुहा हूया. ५२

पलिल पलिअ । "पलिते वा" [२१२.] इति तस्य लो वा ॥

[पीवल] पीअल । "पीते वो ले वा" [२१३.] इति तस्य वो वा स्वार्थे ले परे ॥

विहत्थि । माहुलिङ्ग । भरह । वसहिं । काहल । "वितस्ति°" इत्यादिना [२१४.] तस्य हः ॥ बाहुलकात् क्वचिन्न । वसइं ॥

सिढिलिअ । असढिला । मेढि । पढमं । "मेथि°" इत्यादिना [२१५.] थस्य ढः ॥

पुढवीए पुहवी । निसीढ निसीहिणी । "निशीथपृथिव्योर्वा" [२१६.] इति थस्य ढो वा ॥

डम्भिअ दम्भं । उद्दण्ड डण्डं । डरिआणं दर । डड्ढा दड्ढ । डसण दसण । डट्ठ दट्ठ । डाह दाह । डोहलयाण दोहलयं । कडण कदणं । डब्भ दब्भ । डोलिर अदोलिरेण । "दशन°" इत्यादिना [२१७.] दस्य डो वा ॥ दरस्य भयार्थवृत्तेरेव । अन्यत्र दर ॥

डसन्ते । डहमाणो । "दंशदहोः" [२१८.] इति दस्य डः ॥

बारह । गग्गर । "संख्यागद्गदे रः" [२१९.] इति दस्य रः ॥

करलि । "कदल्याम् अद्रुमे" [२२०.]इति दस्य रः ॥ अद्रुम इति किम् । कयलि ॥

पलित्तो । दोहल । "प्रदीपिदोहदे लः" [२२१.] । प्रदीप्यतौ धातौ दोहदे च दस्य लः ॥

कयम्ब कलम्ब । "कदम्बे वा" [२२२.] इति दस्य लो वा ॥

धिप्पिर दिप्पिर । "दीपौ धो वा" [२२३.] इति दस्य धो वा ॥

कवट्टिअ । "कदर्थिते वः" [२२४.] इति दस्य वः ॥

कउहाइं । "ककुदे हः" [२२५.] इति दस्य हः ॥

निसढाइ । "निषधे धो ढः" [२२६.] इति धस्य ढः ॥

ओसहम् ओसढिओ । "वौषधे" [२२७.] इति धस्य ढो वा ॥

कित्तणयं । "नो णः" [२२८.] इति नस्य णः ॥ आर्षे अनिलो । अनल इत्यादि ॥

निअ । णिअ । "वादौ" [२२९.] इति नस्य णो वा ॥

५२. निम्बवत् कटुः । क्रूर इत्यर्थः । एवंभूत आशयः अभि-

सो फणस-फालिहद्दय-दीहर-भुअ-फलिह-जोडिअ-णडालो
अफरुस-गिराइ फालिअ-मोहो इअ जिण-थुइम् अकासि. ५३
फलिहा-जलं वहुत्तम्बुजेहि जह, जह वणं च नीमेहि,
जग-सिरि-नीवावेडय सहइ[1] मही तह तुह पएहिं. ५४
तुह कय-कुसुमामेला, पणट्ठ-पारद्धि-पमुह-पाव-मला,
मुत्ताहल-विमला इह हवन्ति रेभव्व मुद्धन्ना. ५५

प्रायः तथा निम्बवद् गीश्च येषाम् । कलिरेव कुत्सितकर्मणा नापितः पापमेव नापितः तयोः उपकरणभूतत्वेन ज्ञापकत्वेन च आदर्शाः अत एव धर्मरिपवोपि तस्मिंस्तथाविधनृपे दृष्टे सति धर्मोन्मुखा भूता जाताः । अपिर्विस्मये ॥

लिम्बा निम्ब । ण्हाविअ नाविअ । "निम्बनापिते लण्हं वा" [२३०.] इति नस्य लण्हौ वा ॥ "पो वः" [२३१.] इति पस्य च वः ॥ प्राय इत्येव । रिउणो ॥

५३. पनसपारिभद्राविव यौ दीर्घौ भुजपरिघौ ताभ्यां योजितं ललाटं भालस्थलं येन । ललाटे योजितकर इत्यर्थः । पाटितमोहो विनाशितविपरीतावबोधः सन् अपरुषगिरा मृदुस्वरेण इति वक्ष्यमाणरीत्या स राजा जिनस्तुतिम् अकार्षीत् ॥

५४. परिखा खातिका तस्या जलं यथा प्रभूताम्बुजैः वनं च यथा नीपैः राजति । जगतां श्रियो नीपानां कदम्बकुसुमानाम् आपीड शोभाकृत्त्वेन [हे] शेखर तथा तव पादैर्मही राजति ॥

फणस । फालिहद्दय । फलिह । अफरुस । फालिअ । फलिहा । "पाटि°" इत्यादिना [२३२.] ण्यन्ते पटिधातौ परुषादिषु च पस्य फः ॥

वहुत्तं । "प्रभूते वः" [२३३.] इति पस्य वः ॥

५५. तव कृतकुसुमापीडाः प्रनष्टपापाद्धप्रमुखपापमलाः अत एव मुक्ताफलवद् विमला विगतकर्ममला इह अस्मिन् जन्मनि भवन्ति

[1] C तह सहइ मही तुह पएहिं.

सहलो जम्मो सभलं च जीविअं ताण, देव फणि-चिन्ध,

जे तं चम्पय-सवलेंहिं भिसिणि-कुसुमेहिं अच्चन्ति. ५६

असिर-कमन्धे अकयन्ध-सिरे समरम्मि तुज्झ झाणेण,

केढव-रिउणोव्व, निवा विसढाविसमं न जाणन्ति. ५७

वम्मह-पिआहिवन्नू अहिमन्नु-पिआ य अहरिओ तेण,

तुह भसल-साम पय-पङ्कएसु भमराइअं जेण. ५८

रेफवद् मूर्धन्याः सकललोकाग्रस्थाः । सिद्धा भवन्तीत्यर्थः । रेफोपि "ऋवर्णटवर्गरषा मूर्धन्याः" इति मूर्धन्यः ॥

नीमेहि नीव । आवेडय कुसुमामेला । "नीपापीडे मो वा" [२३४.] इति पस्य मो वा ॥

पारद्धि । "पापर्द्धौ रः" [२३५.] इति अपदादौ पस्य रः ॥

५६. हे देव पार्श्व फणिचिह्न तेषां जन्म सफलम् जीवितं च सफलम् । ये त्वां चम्पकशबलैर्बिसिनीकुसुमैः अर्चन्ति पूजयन्ति ॥

क्वचिद् भः । रेभ ॥ क्वचित्तु हः । मुत्ताहल ॥ क्वचिद् उभावपि । सहलो । सभलं । "फो भहौ" [२३६.] इत्यनेन ॥ अनादेरित्येव । फणि ॥

सवलेंहिं । "बो वः" [२३७.] इति बस्य वः ॥

भिसिणि । "बिसिन्यां भः" [२३८.] इति बस्य भः ॥

५७. अशिरांसि कबन्धानि यत्र अविद्यमानकबन्धानि शिरांसि यत्र तस्मिन् समरे तव ध्यानेन भवतः स्मरणेन कैटभरिपव इव विष्णव इव [नृपा] विषमाविषमं न जानन्ति ॥ सर्वत्र विजयवैजयन्तीं प्राप्नुवन्तीति भावः ॥ अशिर इति कबन्धविशेषणं स्वरूपभणनार्थम् । केढव-रिउणो इत्यत्र बहुत्वं मत्स्याद्यवतारापेक्षया ॥

कमन्धे अकयन्ध । "कबन्धे मयौ" [२३९.] इति बस्य मयौ ॥

केढव । "कैटभे भो वः" [२४०.] इति भस्य वः ॥

विसढाविसमं । "विषमे मो ढो वा" [२४१.] इति मस्य ढो वा ॥

५८. मन्मथपिता विष्णुः अभिमन्युः अर्जुनाङ्गजः अभिमन्यु-

पहु तुम्हकेर-अह-खाय-संजमे सोवओग[1]-साहूण

न समो अह-जाओ तव-किसङ्ग-लट्ठी वि हु कुदिट्ठी. ५९.

करणिज्जाकरणीअं पेआपिज्जं च जे नवि मुणन्ति,

ते दोस-दुइज्जावि हु गुण-बीआ हुन्ति तइँ दिट्ठे. ६०

पिता च तेन अधरितः न्यक्कृतः। स सर्वोत्कृष्ट इत्यर्थः। हे भसल-वत् श्यामल तव पदपङ्कजयोः येन भ्रमरायितं चञ्चरीकवद् आच-रितम्। यस्त्वां प्रणत इत्यर्थः॥

वम्मह। "मन्मथे वः" [२४२.] इति मस्य वः॥

पिआहिवन्नू अहिमन्नु। "वाभिमन्यौ" [२४३.] इति मो वो वा॥

भसल भमराइअं। "भ्रमरे सो वा" [२४४.] इति मस्य सो वा॥

५९. हे प्रभो पार्श्व त्वदीये भवत्संबन्धिनि यथाख्यातसंयमे प-ञ्चमचारित्रे[1] सोपयोगसाधूनां सावधानयतीनाम्। हु इति निश्चि-तम्। न समो न सदृक्षः। कः। यथाजातः शीतात[2]पाद्युपद्रवस-हनाय प्रावरणरहितः तपसा कृशाङ्गयष्टिः दुर्बलगात्रोपि कुदृष्टिर्ज-मदग्न्यादिः॥

जेण। "आदेर्यो जः" [२४५.] इति यस्य जः॥ आदेरिति किम्। भमराइअं॥ बाहुलकात् सोपसर्गस्य अनादेरपि। संजमे॥ क्वचिन्न। सोवओग॥ आर्षे लो-पोपि। अह-खाय। अह-जाओ॥

तुम्हकेर। "युष्मदर्थपरे तः" [२४६.] इति यस्य तः॥

लट्ठी। "यष्ट्यां लः" [२४७.] इति यस्य लः॥

६०. हे देव करणीयाकरणीयं पेयापेयं च ये नैव जानन्ति ते दोषद्वितीया अपि गुणद्वितीयाः सगुणास्त्वयि दृष्टे सति भवन्ति। संबोधनपदम् अत्र ज्ञेयम्॥

१ B C सोवओअ°.

1 C °चरित्रे. 2 C शीततापाद्यु°.

वेकक्ख-उत्तरीआ धवल-दुगूलोत्तरिज्ज-पिहिअ-मुहा
तुह कय-न्हवणा घण-छाय-छत्त-छाहीओ माणन्ति. ६१
इय सच्छाओ कइवाह-परिअणो कइअवं थुइं काउं,
आइ-किडिव्व अभेडो जिणॅ-न्हवणे अह पयट्टो सो. ६२
पल्लाणिअ-अपडायाणिअ-हयम् आएहि अवर-राएहि
कणवीरच्चिय-कलसो हलिद्द-गोरो स किर दिट्ठो. ६३

६१. हे देव वैकक्ष्ये उत्तरासङ्गे उत्तरीयम् उपरितनं वस्त्रं येषाम् धवलं तदेव धौतत्वाच्छुचि यद् दुकूलं क्षौमं तच्च तद् उत्तरीयं च तेन पिहितं विगन्धोच्छ्वासलगनाशातनाशङ्कया स्थगितं मुखं यैस्ते तथा। तव कृतस्नपना घना सान्द्रा छाया आतपाभावो यस्मात् तच्च तच्छत्रं च तेन याश्छायाः शोभास्ता अनुभुञ्जते अनुभवन्ति ॥

करणिज्जाकरणीअं। पेआपिज्जं। दुइज्जा बीआ। उत्तरीआ दुगूलोत्तरिज्ज। "वोत्तरीयानीयतीयकृद्ये ज्जः" [२४८.] इति यस्य ज्जो वा ॥

६२. इति पूर्वोक्तरीत्या कतिपयां स्वशक्त्युचितां स्तुतिं कृत्वा सच्छायः शोभनकान्तिः कतिपयपरिजनः मितपरिवारः। आदिकिरिः आदिवराहः स इव अभेरः अकातरः स श्रीकुमारपालभूपः जिनस्नपने अथ स्तवनभणनानन्तरं प्रवृत्तः ॥ अत्र स्तुतिं कृत्वेति क्त्वाप्रत्ययेन स्नानप्रवृत्तेरानन्तर्यमात्रे उक्तेपि अत्यानन्तर्यप्रतिपादनार्थम् अथशब्दः। यथा देवदेवं प्रणम्यादौ इत्यत्र आदिशब्दः अतिसामीप्यप्रतिपत्त्यर्थः ॥

छाय छाहीओ। "छायायां होऽकान्तौ वा" [२४९.] इति हो वा ॥ अकान्तौ इति किम्। सच्छाओ ॥

कइवाह कइअवं। "डाहवौ कतिपये" [२५०.] इति यस्य डिदाह-वौ पर्यायेण ॥

किडि। अभेडो। "किरिभेरे रो डः" [२५१.] इति रस्य डः ॥

६३. पर्याणं गृह्णन्ति हयाः। णिज् बहुलम् इत्यादिना णिच्। ते

तेण जिणम्मि दुवालस-रवि-तेए मुहल-घण्ट-थोर-रवं
णङ्गलि-लङ्गलिभायर-सरिसेण पलोट्टिआ कलसा. ६४
णङ्गूलि-णाहलत्तण-अपुण-भवत्थं, निवेण करुणाए
लङ्गूलि-लाहलावि हु सित्ता जिणॅ-न्हवण-सलिलेण. ६५

सैन्यपालैः प्रयुज्यन्ते । प्रयोक्तृव्यापारे णिगि क्तः । ततः पर्याणिता ग्राहितपल्ययना अपर्याणिताश्च हया यत्रेति । एवम् आयातैः अपरराजैः करवीरैः करवीरकुसुमैः अर्चितकलशः । हरिद्रावद् गौरः स राजा किल दृष्टः । सविस्मयोत्कण्ठं विलोकितः । किलेति प्रसिद्धौ ॥

पल्लाणिअ अपडायाणिअ । " पर्याणे डा वा " [२५२.] इति रस्य डा वा ॥ कणवीर । " करवीरे णः " [२५३.] इति आद्यरस्य णः ॥

६४. लाङ्गलिलाङ्गलिभ्रातृसदृशेन बलभद्राच्युततुल्येन तेन राज्ञा मुखराः प्रतिरवैर्वाचाला या घण्टास्तासां स्थूलो रवो यत्र इत्येवं जिने जिनबिम्बे द्वादशरवितेजसि पर्यस्ताः कर्पूरकुङ्कुमादिसुरभिद्रव्यक्षोदमिश्रजलमोचनाय अवाञ्चः कृताः कलशाः सुवर्णमणिमृन्मयादिकुम्भाः ॥

हलिद्द । मुहल । " हरिद्रादौ लः " [२५४.] इति रस्य लः ॥ आर्षे दुवालस । थोर । " स्थूले लो रः " [२५५.] इति लस्य रः ॥

६५. लाङ्गूलिलाहलत्वयोः तिर्यक्त्वम्लेच्छविशेषत्वयोः अपुनर्भवार्थं पुनरप्रादुर्भावाय नृपेण करुणया । आस्ताम् अन्ये । लाङ्गूलिलाहला अपि । हु इति निश्चितम् । सिक्ताः आर्द्राः कृता जिनस्नपनसलिलेन ॥

णङ्गलि लङ्गलि । णङ्गूलि लङ्गूलि । णाहल लाहला । " लाहललाङ्गललाङ्गूले वादेर्णः " [२५६.] । एषु आदेर्लस्य णो वा ॥

सिसि-खण्ड-णडालाहिं समरी-भासाइ दूसिमिण-हरणं,
सिविणोवि दुलहम्, अणुजिणम् अकारि संगीयम् इत्थीहिं.६६

दढिआ सुनीविआहिं नीमीओ नच्चणीहिं तक्कालं,
सविसेस-सद्द-गीए सज्जाइ-कमोक्कम-पयट्टे. ६७

६६. शशिखण्डवद् अष्टमीचन्द्रवत् ललाटं भालस्थलं यासां ताभिः स्त्रीभिः शबरीभाषया गायनप्रसिद्धपुलिन्दीभाषया उपलक्षितं दुःस्वप्नहरणम् । जिनगुणगणोत्कीर्तनाकर्णनैर्दुःस्वप्नसूचितोपद्रवविघातात् । स्वप्ने[1] किल दुःप्रापमपि प्राप्यते । परं तत् स्वप्नेपि दुर्लभं जिनमनु पार्श्वनाथं लक्षीकृत्य संगीतकं प्रेक्षणीयकम् अकारि प्रारब्धम् ॥

समरी । "शबरे बो मः" [२५८.] इति बस्य मः ॥

६७. गाथैकादशकेन तद्वर्णनम् आह । शोभनाः । रचनया बन्धुरा इत्यर्थः । नीवयो वस्त्रग्रन्थयो यासां ताभिर्नर्तनीभिः नीवयः तत्कालं प्रेक्षणक्षणे द्रढिताः नर्तनाय निश्चलीकृताः । कदा । षड्भ्यो जातः षड्जः । यद् उक्तम्

नासां कण्ठम् उरस्तालु जिह्वां दन्तांश्च संस्पृशन् ।
षड्भ्यः संजायते यस्मात् तस्मात् षड्ज इति स्मृतः ॥

स आदिर्येषाम् ऋषभादिस्वराणां तेषां क्रमेण नादाध्यारोहपरिपाट्या उत्क्रमेण च तथैव व्याघुटनेन ताभ्यां प्रवृत्ते । एतेन शुद्धरागत्वम् अत्रोक्तम् । सविशेषा निर्दोषसदृशसार्थकत्वेन रम्याः शब्दा यत्र तच्च तद् गीतं च तस्मिन् सति ॥

दूसिमिण सिविणे । सुनीविआहिं नीमीओ । "स्वप्ननीव्योर्वा" [२५९.] इति वस्य मो वा ॥

सविसेस । सद्द । सज्जाइ । "शषोः सः" [२६०.] इति शषयोः सः ॥

---

1 B C स्वप्नेपि.

तइआ वणिअ-सुसाहिं निव-सुण्हा-वल्लहाओ ता दिट्ठा,

पाहाण-पुत्तिआहिव पासाण-त्थम्भ-लग्गाहिं. ६८

वञ्जिअ-दस-विह-धाऊ जणणी लासस्स दह-विहस्सावि,

दिवसे दिवहावगमे अ सुह-यरी वाइआ वीणा. ६९

रञ्जिअ-नर-सिङ्घेणं वंसिअ-सीहेण वाइओ वंसो,

दायत्त-दाह-हरणो छुह-धवले जिण-गुणे गाउं. ७०

६८. तदा प्रेक्षणीयकक्षणे नृपस्नुषाणां राजवधूनामपि वल्लभाः विलोकनाय ईप्सितास्ता नर्तक्यः पाषाणस्तम्भे लग्नाभिः संकीर्णत्वेन प्रेक्षणीयकस्य दुर्दर्शत्वेन संबद्धाभिर्वाणिजस्नुषाभिः [[1]पाषाणपुत्तिकाभिः पाषाणमयीभिः शालभञ्जिकाभिरिव] दृष्टाः[2] ॥

मुसाहिं सुण्हा । "स्नुषायां ण्हो वा" [२६१.] इति षस्य ण्हो वा ॥

६९. व्यञ्जितः तत्प्रदेशकोणसारणया प्रकटितो दशविधो दशभेदो धातुः भरतादिशास्त्रप्रसिद्धः आलत्तिका[3]विशेषो यया । दशविधो गेयपदाद्यङ्गभेदेन दशप्रकारः । यद् उक्तम्

गेयपदं स्थित[4]पाठ्यम् [5]आसीनं पुष्पगण्डिका ।
प्रच्छेदकस्त्रिगूढं च सैन्धवाख्यं द्विगूढकम्[6] ॥
उत्तमोत्तमकं चैवम् उक्तप्रत्युक्तमेव च ।

इति दश लास्याङ्गानि । तस्यापि लास्यस्य जननी उत्पादिका । तत्स्वगानुसारेण नर्तकीनां नर्तनात् । दिवसे दिवसापगमे च । अहर्निशम् इत्यर्थः । अमृतास्वादकल्पस्वरकलितत्वेन सुखकरी वीणा वादिता क्वाणिता ॥

पाहाण पासाण । दस दह । "दशपाषाणे हः" [२६२.] इति शषयोर्यथादर्शनं हो वा ॥

दिवसे दिवहा । "दिवसे सः" [२६३.] इति सस्य हो वा ॥

७०. रञ्जितः आह्लादितः नरसिंहः कुमारपालराजो येन तेन वां-

---

[1] B C both omit this. [2] B C insert नर्तन after दृष्टाः. [3] C आलत्तिक्य°. [4] C स्थितं. [5] B C पाठ्यं मासीनं. [6] B C °मूढ°.

छमि-छत्तिवण्ण-गोरी, छट्ठी भल्लिव्व पञ्च-बाणस्स,
मयॅ-छावच्छी, वर-मुहर-गायणी, गिण्हिउं तालं, ७१

अमयॅ-छिरा-महुर-सरा, अमय-सिरोवम-सराहि अणुगमिआ,
जिण-गाणम्मि पयट्टा गुण-भायण-दाण-भाणं तो. ७२

दणु-कुल-दणुअ-कुलाराइ-दुल्लहं तीइ रा-उल-विहारे
राय-उल-पियम् अवीअं गीअं सोउं न को आओ ? ७३

शिकसिंहेन । वंशवादनं शिल्पम् अस्य वांशिकश्रेष्ठेन दाहार्तानां दाहस्य हरणः श्रुतिसुखकृत्त्वेन संतापस्य विनाशको वंशो वेणुर्वादितः सुधावत् मकोलवत् निर्मलान् जिनगुणान् गातुम् ॥

सिङ्घेणं सीहेण । "हो घोऽनुस्वारात्" [२६४.] इति हस्य घो [वा] ॥ क्वचिद् अननुस्वारादपि । दाघत्त दाह ॥

७१. युग्मम् । ततः वीणावेणुवादनानन्तरं वरमुखरगायनी तालं कांस्यिकां[1] गृहीत्वा जिनगाने प्रवृत्ता । कीदृशी । शमिसप्तपर्णवत् शमीसप्तच्छदपुष्पवद् गौरी गौरवर्णा । पञ्च बाणाः उन्मादनमदनमोहनतापनशोषणाख्याः शरा यस्य स पञ्चबाणः कन्दर्पस्तस्य षष्ठी भल्लिरिव । तया हि बाणैरिव स सर्वं स्ववशं करोतीति भावः । मृगशावस्येव अक्षिणी यस्याः ॥

७२. अमृतशिरावत् सुधाधारावत् मधुरः स्वरो यस्याः सा तथा अमृतशिरोपमः स्वरो यासां ताभिः अनुगता । आलप्तिकाक्षणे अन्यगायनीभिः कृतपृष्ठनिनादेत्यर्थः । गुणभाजनानां गुणपात्राणां यद् दानं जिनसद्गुणोत्कीर्तनोत्थपरितोषाद् धनवितरणं तस्य भाजनम् ॥

छुह । छमि । छत्तिवण्ण । छट्ठी । छावच्छी । "षट्शमी°" [२६५.] इत्यादिना आदेर्वर्णस्य छः ॥

छिरा सिरो । "शिरायां[2] वा" [२६६.] इति आदेश्छो वा ॥

७३. दनुजकुलस्य दैत्यसमूहस्य दनुजकुलारातयो देवास्तेषां च

1 B C कांशियकां. 2 B C शिरायां.

सक्कय-वारण-पाइअ-वायरण-पउत्त-सद्द-कय-गीए

आउज्जिअ-पायारे रङ्गे पुण आसि गुणि-पारो. ७४

तत्थागओ अ कालायस-सम-कालास-अहिअ-हिअओ जो,

सो केलि-किसलयासोअ-किसल-कोमल-हिओ आसि. ७५

दुग्गावी-पा-वीढं दुग्गा-एवीस-पाय-वीढं च

मोत्तुं, गण-गन्धव्वा तं गीअं सोउम् ओच्छरिया. ७६

दुर्लभं राजकुलस्य नरनाथयूथस्य प्रियं श्रोत्रसुखकृत्त्वेन हृद्यम् अद्वितीयं तस्या वरमुखरगायन्या गीतं श्रोतुं राजकुलविहारे कुमारविहारे को नायातः । किं तु सर्वोप्यायातः ॥

भायण भाणं । दणु दणुअ । रा-उल राय-उल । "लुग् भाजन°" [२६७.] इत्यादिना सस्वरस्य जस्य लुग् वा ॥

७४. संस्कृतव्याकरणप्राकृतव्याकरणयोः प्रयुक्ताः प्रतिपादिता ये शब्दास्तैः कृतं गीतं यत्र आतोद्यिकानां मृदङ्गादिवादकानां प्राकारो मण्डलं यत्र तस्मिन् रङ्गे पुनः गुणिप्राकार आसीत् ॥ संगीतकाकर्णनाय समागतसमस्तलोकेपि प्रासादे रङ्गभूमौ विचक्षणा एव उपवेशिता इति पुनःशब्दार्थः ॥

७५. तत्र च रङ्गे कालायसं लोहजातिस्तेन समं कालायसाद् अधिकं च हृदयं यस्य स तथाविधो य आगतः स केलिकिसलयाशोककिशलयवत् रम्भाकङ्केलिदलवत् कोमलहृदय आसीत् ॥ चित्तचमत्कारकारिजिनेन्द्रगुणस्फीतगीतश्रवणात् सोपि सार्द्रहृदयः संवृत्त इति यावत् ॥

वारण वायरण । पायारे पारो । आओ तत्थागओ । "व्याकरणप्राकारागते कगोः" [२६८.] इति को गश्च लुग् वा ॥

कालायस कालास । किसलया किसल । हिअओ हिओ । "किसलय°" [२६९.] इत्यादिना यस्य लुग् वा ॥

७६. दुर्गादेव्याः गौर्याः पादपीठं पादासनम् । अत्र च सामी-

जिण-पाय-वडण-गुरु-पा-वडणाइँ चइअ तत्थ उब्भ-जणो
पुलयङ्कुरेहि कलिओ, उउम्बरो उम्बरेहिंव. ७७

जाव निवो कय-पूओ, आरत्तिय-मङ्गलं न जा कुणइ,
ता देव-उले मरुवय-पूअं अणुसोइउं लग्गो. ७८

मइ ताव देउलम् इमं निम्मविअं सहल-जीविअ-मणेण;
सव्व-रिउ-कुसुम-पूआ नो जइ, जीअं न मे सहलं. ७९

प्यात् चरणान्तिकम् इत्यर्थः। दुर्गादेवीशस्य पादपीठं मुक्त्वा गणा नन्दिवन्दिप्रभृतयस्ते च ते ते गन्धर्वाश्च किंनरास्तद् गीतं श्रोतुं कर्णाञ्जलिभिः पातुम् अवस्तृता आगताः॥

७७. जिनपादपतनगुरुपादपतनानि त्यक्त्वा तत्र रङ्गस्थाने ऊर्ध्वजनः आसीत्। किंभूतः। पुलकाङ्कुरैः कलितो युक्तः। किंवत्। यथा उदुम्बरो जन्तुफलः उदुम्बरफलैरिति॥

दुग्गावी दुग्गा-एवी। पा-वीढं पाय-वीढं। पाय-वडण पा-वडणाइं। उउम्बरो उम्बरेहिं। "दुर्गादेवी°" [२७०.] इत्यादिना दस्यान्तर्मध्ये लुग् वा। अन्तरिति किम्। दुर्गादेव्याम् आदौ मा भूत्॥

७८. यावत् कृतपूजो नृपः तथा आरात्रिकेन सहितं मङ्गलं आरात्रिकमङ्गलम्। आरात्रिकं माङ्गलिक्यं चेत्यर्थः। न यावत् करोति तावद् देवकुले कुमारविहारे मरुबकपूजाम् अनुशोचितुं लग्नः। पूजाविषयं पश्चात्तापं कर्तुं प्रवृत्तः॥

७९. अनुशोचनमेवाह। मया तावद् देवकुलम् इदं निर्मापितम्। अनेन च सफलं जीवितं निर्मापितम्। मम चेत्यर्थात्। परं सर्वर्तुकुसुमपूजा नो यदि चेन्न तदा जीवितं न मे सफलम्॥ देवगृहविधानाज्जीवितं सफलमपि तथाविधपूजाया अभावाद् नातिशयेन सफलम् इति यावत्॥

अह भणिअं खे सासण-देवीए, एवमेव मा जूर;

आवत्तमाण-जस, तुमम् एमेअ किम्[1] अत्तमाण-मणो ? ८०

गुणि-पावारय-पारय, दुह-अड-चिन्तावडेसु मा पडसु;

होही तुह उज्जाणं सइ सव्व-रिऊहि कय-कुसुमं. ८१

८०. अथ इत्थं चिन्तानन्तरं खे गगनाङ्गणे शासनदेव्या भणितम् आवर्तमानं त्रिलोक्यां बम्भ्रम्यमाणं यशो यस्य । तस्य आमन्त्रणम् । हे आवर्तमानयशः त्वम् एवमेव मा खिद्यस्व निरर्थकं मा दैन्ययुक्तो भव । तथा एवमेव किम् आवर्तमानमनाः सर्वर्तुकुसुमपूजा भविष्यति वा न वेति किं चिन्तापरचित्तः ॥

८१. खेदचिन्तयोर्निरर्थकत्वमेवाह । गुणिन एव प्रावारकाः पटास्तेषां प्रावारक अनुपमागणितगुणयुक्तत्वेन आच्छादक । दुःखं खेदः तदेव अवटश्च कूपः । चिन्ता अभीप्सितार्थं प्रति संदेहः सैव अवटश्च । तयोस्त्वं मा पत मा निमज्ज ॥ ननु किमिति भगवत्या एवं निषिध्यते तत्राह । तव उद्यानं भवेत् आरामवनं सदा सर्वकालं सर्वर्तुभिः कृतकुसुमं जनितप्रसूनं भविष्यति । मम प्रसादाद् इति शेषः ॥

जाव जा । ता ताव । देव-उले देउल । जीविअ जीअं । एवमेव एमेअ । आवत्तमाण अत्तमाण । पावारय पारय । अड चिन्तावडेसु । "यावत्ताव°" [२७१.] इत्यादिना यावदादिषु वकारस्य अन्तर्वर्तमानस्य लुग् वा ॥ अन्तरित्येव । एवमेवेति अन्त्यस्य न ॥

इति प्राकृतद्व्याश्रये महाकाव्ये अष्टमस्याध्यायस्य उदाहरणप्रतिपादनद्वारेण प्रथमः पादः संपूर्णः ॥

---

१ B किमित्त°. C किमेन°.

आरत्तियम् अह काउं, मुक्क-मलो, अपरिमुत्त-माउक्को,
तव-सत्तं गुण-सक्कं माउत्त-निहिं गुरुं पणओ. ८२
विञ्छुअ-डक्कोरग-दट्ठ-जीव-जीवाउ-चरण-रेणु-कणं,
लुक्क-कलिं, लुग्ग-भवं तं समुपासिअ, गओ राया. ८३
लक्खण-पुण्णम्, अखीणं, अच्छीण-गमणं, अझीण-तणु-तेअं,
खन्धाइ-सत्त-पिहुलं, पोक्खर-गन्धं, धुवावत्तं; ८४

८२. अथ अभीप्सितार्थसाधकशासनदेवीवचनानन्तरम् आरात्रिकं कृत्वा मुक्तमलः गतविकल्पकालुष्यः। अपरिमुक्तमृदुत्वः आर्जवयुक्तो राजा श्रीकुमारपालः तपसि "अणसणम् ऊणोअरिआ" इत्यादिसिद्धान्तप्रसिद्धे शक्तं समर्थम्। तन्निष्ठम् इति यावत्। गुणेषु क्षान्त्यादिषु शक्तं मृदुत्वनिधिं गुरुं प्रणतः प्रणमति स्म ॥

८३. वृश्चिकदष्टाश्च उरगदष्टाश्च ये जीवास्तेषां[1] जीवातवो जीवनौषधानि चरणरेणुकणा यस्य। रुग्णः सावद्यव्यापारप्रध्वंसकत्वेन भग्नः कलिः कलहः कलिकालो वा येन। रुग्णभवं मुक्तपदवीप्रदाभयदानादिधर्मानुष्ठानविधापनेन निर्दलितचातुर्गतिकसंसारं तं गुरुं समुपास्य संसेव्य। तदन्तिके देशनाश्रवणादिधर्मानुष्ठानं कृत्वेत्यर्थः। राजा श्रीकुमारपालो गतः देवगृहान्निःसृतः ॥

"संयुक्तस्य" [१.]। अधिकारोयम् "ज्यायाम् ईत्" [२.११५] इति यावत् ॥

मुक्क मुत्त। माउक्को माउत्त। सत्तं सक्कं। डक्को दट्ठ। लुक्क लुग्ग। "शक्तमुक्त°" [२.] इत्यादिना एषु को वा ॥

८४. अथ नृपाध्वारोहार्थम् आनीतस्य अश्वोरसस्य गाथासप्तकेन वर्णनम् आह। सप्तभिः कुलकम्। अश्वम् आरूढः। राजा इति प्रक्रमात्। कीदृशम्। लक्षणपूर्णं शालहोत्रशास्त्रोक्तसमस्तप्रशस्यचिह्नभृतम् अक्षीणं परिपूर्णसर्वाङ्गोपाङ्गम् अक्षीणगमनम् ॥

---

१ B C विञ्छुअ°.

---

[1] B C जीवाश्च तेषां for जीवास्तेषां.

खन्दपिउ-कन्द-सरिसावणीस-जुग्गं, असुक्क-रोम-छविं,

अणसुक्ख-मउलि-कुसुमं, खेडय-जर-खेडअङ्ग-रजं; ८५

सिहि-सीह-वसह-वग्घाण हत्थि-हंसाण चास-नेउलाण ।
तह तित्तिरस्स सरिसी सुहा गई होइ तुरयाण ॥

इति शास्त्रोक्तगतिसंपूर्णम् इत्यर्थः । अक्षीणतनुतेजसम् अन्यूनकायकान्तिम् । स्कन्धादिषु सप्तसु सप्तस्थानेषु पृथुलं विस्तृतम् । यत उक्तम् ।

वच्छ-यल-भाल-कक्खन्तराइँ तह कडिअ-खन्ध-गत्ताइं ।
पिहुलाइँ सत्त सुपसत्थ-पाय-पट्ठीय-सहियाइं ॥

पुष्करगन्धं कमलवत् सुरभिम् । यद् उक्तम् ।

महु-कमल-कुट्ठ-कुङ्कुम-कयम्ब-कप्पूर-कुञ्जय-सुअन्धा ।
धय-चन्दण-बिल्लोसीर-जाइ-गन्धा सुहा तुरया ॥

ध्रुवा ध्रुवनागानः आवर्ता दशसंख्या भ्रमरका यस्य स तथा तम् । यद् उक्तम् ।

दो सीसे दुन्नि उरे इक्को भालम्मि फुरणए इक्को ।
दो रन्धे दो अवरन्धयम्मि इअ धुअ-दसावत्ता ॥
तुरय-मत्थइ वे जि आवत्त ते चन्द-सूरइं ।
पयड विन्नि उरह अस्सिणि-कुमारइं ।
वयसन्नरु भाल-यलि वसइ ।
वाउ फुरणम्मि सारइ ।
रन्धह उवरन्धहँ जि ठिअ विण्णि विन्नि आवत्त ।
तिहिँ तिहिँ कमि निवसहिँ सयल सोमि विसाह पवित्त ॥
जो हीणो धूआवत्तएहिँ सो हीण-लक्खणो तुरओ ॥
जो तेहिँ जुओ सो कुल-कोसल-जस-सुक्ख-संजणणो ॥

८५. स्कन्दपितृस्कन्दाभ्यां श्रीकण्ठकार्तिकेयाभ्यां सदृशा ये अवनीशास्तेषां योग्यः अर्हः तम् । अशुष्का अरूक्षा । लावण्योपेतेति यावत् । इत्थंभूता रोम्णां छविः कान्तिर्यस्य । अशुष्कमौलिकुसुमं सान्द्रशिरोमाल्यम् । क्ष्वेटकज्वरस्फेटकं देवताधिष्ठितत्वेन विषतापविध्वंसकम् अङ्गरजो यस्य स तथा तम् ॥

१ B C °मुक्क°.

1 B C निउ°. 2 B C णु°. 3 C वेय°. 4 B C °गिग. 5 B उवरंध. 6 C सलय.

थाणु-पिया-जल-पुण्णं, अत्थाणु-वायं, जणेहि दीसन्तं
पडिखम्भिअट्ट-थम्भय-थम्भिअ-तणु-ठम्भिअच्छेहिं; ८६
रग्गं, पिग-रत्त-सरं, रवि-हय-सुक्कंव, नील-किचि-छविं,
सुङ्क-करणग्ग-चच्चर-चइत्त-ठिअ-दिट्ठि-दुच्चज्जं; ८७
पच्चूहा पच्चूसेवि[१] पञ्च-धारासु अकय-णिव्वेअं,
णच्चा बुज्झा पिच्छीइ वण्णिअं सिक्ख-विज्जंति; ८८

८६. स्थाणोः ईश्वरस्य प्रिया गङ्गा तस्या यज्जलं तद्वत् पुण्यम्। अविद्यमानः स्थाणौ पातो यस्य जात्यत्वात् तम्। यद्वा अस्थाणुवातं रोगविशेषरहितम्। प्रतिस्तम्भिता इव तत्क्षणे तदङ्गसङ्गाद् दत्तान्यस्तम्भा इव ये अट्टानां स्तम्भकास्तेषु स्तम्भिता अवष्टब्धास्तनवो यैस्ते च ते स्तम्भिताक्षाश्च निश्चलनेत्रास्तैर्जनैर्दृश्यमानं प्रक्षेपम् ईक्ष्यमाणम्॥

८७. रक्तं सादिशिक्षास्वनुरक्तम्। पिकवद् रक्तः कलः। गम्भीर इत्यर्थः। एवंभूतः स्वरो हेषारवो यस्य स तथा तम्। यद् उक्तम्।

अच्छिन्न-गहिर-सद्दा सुपसत्था हयवरा हुन्ति॥

नीलकृत्तिच्छविं नीलवर्णत्वक्कान्तिम्। यद् उक्तम्।

सेअङ्ग-सामकन्नो, अण्णो जो सेअ-चरण-नयणो य,।
सिअ-केसरो अ नीलो, ते तिण्णिवि सुप्पसत्थाइ॥

अत उत्प्रेक्ष्यते[1]। रवेर्ये हया अश्वास्तेषां शुल्कमिव दानमिव। यथा अन्यो वणिग् मण्डपिकायां दानं दत्त्वा चलति तथा रविणापि एतद्देशोपरि विचरता एतद् अनुष्ठितमिवेत्यभिप्रायः[2]। शुल्ककरणस्य मण्डपिकाया अग्रे चत्वरे बहुमार्ग्यां चैत्येषु देवकुलेषु [च] स्थितानां दृष्टिभिर्दुस्त्यजम्। कौतुकाद् निर्निमेषम् ईक्ष्यमाणम् इत्यर्थः॥

८८. प्रत्यूषात् प्रत्यूषेपि[3]। प्रतिप्रभातम् इत्यर्थः। पञ्चधाराः।

---

१ B पच्चुसंपि. We with C.

---

1 From °क्ष्यते C wants the commentary and grammar (not the text), up to लि° in लिच्छूहिं under 91 as also the couplet 91. See note 1 page 76. 2 B °ष्ठितमेवे° C wanting. 3 So we with B C.

विञ्चुअ-अहिविञ्छिअ-अच्छीविस-विस-हरणॅ-छेत्त-सेअ-जलं,

खुर-ताडण-अखमॅ-छमं रिक्ख-पवङ्गेस-सम-वेगं; ८९

अवि रिच्छ-सरिच्छेहिं सणिच्छयं सच्छणं च लोएहि[१]

अच्छी-पच्छं लिच्छूहिं पेच्छिअं आसमू आरूढो. ९०

आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतम् ।

इति गतिविशेषाः । तासु अकृतनिर्वेदम्[1] । तत्रासक्तम् इत्यर्थः । तथा ज्ञत्वाद्[2] विचक्षणत्वाद् बुद्ध्वा अवगम्य पृथ्व्या पृथ्वीस्थजनेन वर्णितं श्लाघितम् । कथम् । शिक्षया विद्वान् इति सर्वगतिकरणनिपुण इति ॥

८९. वृश्चिकाश्च द्रुणाः । अहिमूत्रोद्भवा वृश्चिका अहिवृश्चिकाश्च तीव्रविषद्रुणविशेषाः[3] । अक्षिषु विषं येषां ते च ते अक्षिविषाः सर्पविशेषाः । तेषां यद् विषं गरलं तस्य हरणं ध्वंसकं क्षेत्रस्य शरीरस्य स्वेदजलं घर्माम्बु यस्य । खुराणां ताडने आघाते अक्षमा असमर्था । वेपमानेति यावत् । इत्थंभूता क्षमा पृथिवी यस्मात् । ऋक्षाश्च जाम्बवदादयः । प्लवङ्गाश्च हनूमदादयः । तेषाम् ईशः सुग्रीवः तेन समवेगं तुल्यत्वरितगतिम् ॥

९०. ऋक्षसदृक्षैरपि चापल्याद् अच्छभल्लकल्पैरपि सनिश्चयम् एकाग्रचित्तम् । यद्वा ऋक्षसदृक्षैरपि चञ्चचारुहारादिमनोहरत्वेन तारककल्पैरपि सक्षणं सोत्सवं च यथा भवति एवम् अक्षिपथ्यं लिप्सुभिर्लोकैः प्रेक्षितम् ।

लक्खण । अखीणं । "क्षः खः°" [३.] इति क्षस्य खः ॥ क्वचित्तु छझावपि[4] । अछीण । अझीण ॥

१ C लोगेहिं.

[1] B निर्वेदः. C wanting. [2] So B. C wanting. [3] B °द्रुणशेषाः. C wanting. [4] B छत्सावपि. C wanting.

धवलगेहम् अइ-निच्चलाकिदी वच्छलो चुलुग-वंस-दीवओ,
तच्च-देवय-वरेण तक्खणोसारिआखिल-दुहो पहुत्तओ. ९१

खन्धाइ । पोक्खर । "ष्कस्कयोर्नाम्नि" [४.] इति खः ॥

खन्द कन्द । असुक अणसुक्ख । "शुष्कस्कन्दे वा" [५.] इति खो वा ॥

खेडय । खेडअ । "क्ष्वेटकादौ" [६.] इति खः ॥

अखाणु । "स्थाणावहरे" [७.] इति खः । अहर इति किम् । थाणु ॥

पडिखम्भिअं[1] अट्ट-थम्भय । "स्तम्भे स्तो वा" [८.] इति स्तस्य खः ॥

थम्भिअ । ठम्भिअ । "थठावस्पन्दे" [९.] इति स्तम्भे स्तस्य थठौ ॥

रग्गं रत्त । "रक्ते गो वा" [१०.] इति गो वा ॥

सुक्कं सुङ्ग । "शुल्के ङ्गो वा" [११.] इति ङ्गो वा ॥

किच्चि । चच्चर । "कृत्तिचत्वरे चः" [१२.] इति चः ॥

दुच्चज्जं । "त्योऽचैत्ये" [१३.] इति त्यस्य चः । अचैत्य इति किम् । चइत्त ॥

पच्चूहा पच्चूसे । "प्रत्यूषे षश्च हो वा" [१४.] इति त्यस्य चः । तत्संनियोगे षस्य हो वा ॥

णच्चा । बुज्झा । पिच्छीइ । विज्जंति । "त्वथ्वद्ध्वां चछजझाः क्वचित्" [१५.] । एषां यथासंख्यम् एते क्वचित् ॥

विञ्चुअ विञ्छिअ । "वृश्चिके श्चेर्ञ्चुर्वा[2]" [१६.] इति ञ्चुः ॥

अच्छी । छेत्त । सरिच्छेहिं । अच्छी । "छोऽक्ष्यादौ" [१७.] इति क्षस्यापवादश्छः ॥ आर्षे तु इक्खू । खीरं । सारिक्खं[3] । इत्याद्यपि दृश्यते ॥

छमं । "क्षमायां कौ" [१८.] इति छः । काविति किम् । अखम ॥

रिक्ख रिच्छ । "ऋक्षे वा" [१९.] इति छो वा ॥

९१. अतिनिश्चलाकृतिः अतिस्थिरस्वभावः वत्सलः जीवदयाप्रवर्तकत्वात् सर्वजनीनः चौलुक्यवंशस्य प्रकाशकत्वाद् दीपक इव तथ्यः सत्यो यो देवतायाः शासनदेवताया वरः । होही तुह उज्जाणं

---

1 B C पडिखंभि। 2 B श्चेञ्चुर्वा. C wanting. 3 B सरिक्खं. C wanting.

सइ सव्व-रिऊहिँ कय-कुसुममिति [८१.] प्रसादस्तेन कर्त्रा तत्क्षणे तस्मिन्नेव काले उत्सारिताखिलदुःखः अपगतसमस्तचिन्तः धवलगेहं प्रासादं प्राप्तः । राजेति शेषः ॥ वैतालीयापरान्तिका छन्दः । वद-[1] नकं वा छन्दः । "तच्च-देवय-वरेण" इति उत्तरसर्गार्थसूचनम् ॥

सच्छणं । "क्षण उत्सवे" [२०.] इति छः । उत्सव इति किम् । तक्खणो ॥

सणिच्छयं । पच्छं । लिंच्छुहिं[2] । वच्छलो । "ह्रस्वात् थ्यश्चत्सप्साम् अनिश्चले" [२१.] इति ह्रस्वात् परेषाम् एषां छः । अनिश्चल इति किम् । निच्चला ॥ आर्षे तथ्ये चोपि । तच्च ॥

इत्याचार्यश्रीहेमचन्द्रविरचितश्रीकुमारपालचरितप्राकृताह्वयश्रयमहा-
काव्यवृत्तौ द्वितीयः सर्गः समाप्तः ॥

---

[1] B has पच्चचाद्दोवदनकमिति before वदनकं. C is wanting. [2] See note 1 on page 73.

कय-वम्मह-सामच्छं, वर-सामत्था कओसवम् उऊहि,
नयणोच्छवम् उज्जाणं गओ निवो उच्छुओ दट्ठुं. १
जयॅ-छिह-ऊसुअ-मयणो, अवज्ज-निप्पिह-सभज्ज-जुव-लोओ,
अलि-सेज्ज-चूअ-कलिओ तओ पयट्टो वसन्त-उऊ. २

१. कृतमन्मथसामर्थ्यम् उद्दीपनविभावत्वाज्जनितकन्दर्पप्रकर्षम् वरसामर्थ्यात् देवताप्रसादोत्कर्षाद् ऋतुभिर्वसन्ताद्यैः कृतोत्सवं युगपत् तत्तत्पुष्पफलप्रवालपटलैः प्रारब्धमहामहिम । नयनानां रम्यत्वाद् उत्सवम् उद्यानं क्रीडाकाननम् उत्सुकः सोत्कण्ठो नृपो द्रष्टुम ईक्षितुं गतः ॥

२. तत्र युगपत् सर्वर्तुप्रादुर्भावेपि वाचः क्रमवृत्तित्वाद् ऋतुषु च वसन्तस्य सम्राट्कल्पत्वाद् अष्टाशीत्या गाथाभिरादौ तमेव वर्णयति ॥ जयस्पृहायां धर्मार्थादिपराभवेच्छायाम् उत्सुको मदनो यत्र । अवद्ये कुव्यापारे निःस्पृहा विमुखाः सभार्या युवलोकास्तरुणपुरुषा यत्र । अलिशय्या भ्रमरवसतयो ये चूता आम्रवृक्षास्तैः कलितः । ततः देवतावरानन्तरं वसन्तऋतुः प्रवृत्तः ॥

सामच्छं सामत्था । कओसव नयणोच्छव । उच्छुओ ऊसुअ । "सामर्थ्योत्सुकोत्सवे वा" [२२.] इति छो वा ॥

छिह । "स्पृहायाम्" [२३.] इति फस्य अपवादश्छः ॥ बाहुलकात् क्वचिद् अन्यदपि । निप्पिह ॥

अवज्ज । सभज्ज । सेज्ज । "द्ययर्या जः" [२४.] इति एषां जः ॥

अहिमज्जु-जणय-अहिमञ्जु-माउ-भायाहिमन्नु-पमुहाण
अहिउच्चिआसि मयणो अणवञ्झासज्झ-कुसुम-सरो. ३
गय-सज्झसस्स मयरद्धयस्स कुसुमज्झओउ-दुइअस्स
कङ्केल्लि-पल्लव-मिसा आसि पयावो समिज्झन्तो. ४
पट्टण-वहु-वलयाइअ-वट्ट-पयट्टालि-मण्डलो चूओ
पवण-कवट्टिअ-कुसुम-रज-सुरहि-महि-मट्टिओ जाओ. ५

३. अभिमन्युजनकश्च अर्जुनः अभिमन्युमातृभ्राता बलदेवः अभिमन्युश्च ते प्रमुखा धुर्या येषां वीराणां ते तथा तेभ्यः अवन्ध्याः कार्यसाधकत्वेन सफलाः असह्याः क्षन्तुम् अशक्याः कुसुमान्येव शरा यस्य स तथाभूतो मदनः अधिक एव त्रैलोक्यवशवर्तिकारित्वेन अभ्यर्हित एवासीत् ॥ अधिकापेक्षया अनुपात्तक्रियेपादाने पमुहाणेति पञ्चमीप्राप्तौ "क्वचिद् द्वितीयादेः" [३. १३४] इति षष्ठी ॥

अहिमज्जु अहिमञ्जु । "अभिमन्यौ जञ्जौ वा" [२५.] इति जो ञ्जश्च वा । पक्षे । अहिमन्नु ॥

४. गतसाध्वसस्य स्वर्गिपोगीश्वरस्यापि तदाज्ञाविधायित्वेन निर्भयस्य मकरध्वजस्य कुसुमान्येव ध्वजश्चिह्नं यस्य स चासौ ऋतुश्च स द्वितीयो यस्य । वसन्तर्तुयुक्तस्येत्यर्थः । कङ्केल्लिपल्लवमिषात् प्रतापः समिन्धानः समन्ताद् दीप्यमान आसीत् ॥ प्रतापो हि आरक्तो वर्ण्यते । अशोककिशलयानि च तथा । इतीत्थम् उत्प्रेक्ष्यन्ते ॥

अणवञ्झ । असज्झ । सज्झसस्स । "साध्वसध्यह्यां झः" [२६.] इति झः ॥
द्धयस्स °ज्झओ । "ध्वजे वा" [२७.] इति झो वा ॥
समिज्झन्तो । "इन्धौ झा" [२८.] इति इन्धौ धातौ झा ॥

५. पत्तनमेव वधूः कान्ता तस्या वलयायितं कङ्कणवद् आचरितम् यतः वृत्तं यथा भवति एवं प्रवृत्तं गन्तुम् उद्यतम् अलिमण्डलं

कामिणि-धुत्तिम-वत्ता-निवत्तणो, वल्लि-नट्टईण नडो,
पयडिअ-वम्मह-वट्टो, सिढिलिअ-वासन्तिआ-वेण्टो; ६
विरहिणि-विसण्ठुलट्ठी-करणो, रइणाह-रइ-महु-चउट्ठो,
कामट्ठत्थो, सुहओ चउत्थ-पुरिसत्थगाणंपि; ७
ठीणम्बु-सीअलो, थीण-चूय-लट्ठि-महु-बिन्दु-चुम्बणओ,
वम्मह-संदट्टेसुं इट्टाघाओ, महुट्टिअओ; ८

यस्मिन् । पवनेन कदर्थितानि प्रेङ्खोलितानि यानि कुसुमानि तेषां यद् रजः परागस्तेन सुरभिः सुगन्धिर्महीमृत्तिका यस्मात् स तथाभूतश्चूतो जातः ॥

पट्टण । वट्ट । पयट्ट । कवट्टिअ । मट्टिओ । "वृत्तप्रवृत्त०" [२९.] इत्यादिना टः ॥

६. गाथादशकेन वसन्तर्तुसर्वस्वभूताः सुरभिशीतमृदुगुणयुक्ता मलयानिला वर्ण्यन्ते ॥ दशभिः कुलकम् । पर्यस्तलतम् इतस्ततः प्रेङ्खोलितशाखं यथा भवति एवं मलयानिलो वातो वाति स्म । कीदृशः । कामिनीनां धूर्तत्ववार्ताया माने हेतुप्रावीण्यवृत्तान्तस्य निषेधकः । मलयानिले हि वाति निर्विचारं तासां प्रियाभिसरणात् । वल्लय एव नर्तक्यस्तासु नटः पल्लवकरप्रेङ्खकत्वेन नृत्योपाध्यायः । प्रकटितमन्मथवार्तः प्रख्यापितकन्दर्पोदन्तः शिथिलितानि कम्पनाद् अदृढीकृतानि वासन्तिकावृन्तानि माधवीलताप्रसवबन्धनानि येन स तथा ॥

७. विरहिणीनाम् अचैतन्याङ्गसादादिकृत्त्वेन विसंस्थुलास्थिकरणः । रतिनाथरतिमधूनां कन्दर्पतत्प्रियावसन्तानां पृष्ठानुचरत्वेन चतुर्थः । कामस्य अर्थः प्रयोजनम् अर्थो धनं यस्य । चतुर्थपुरुषार्थगानामपि मोक्षमार्गप्रवृत्तानामपि शरीरसंतापनिर्वापणात् सुखदः ॥

८. स्त्यानाम्बु हिमं तद्वच्छीतलः । स्त्याना घना ये चूतयष्टिमधुबिन्दवः आम्रलतामकरन्दविप्रुषः तेषां चुम्बनः अन्तर्वहनात् स्प-

1 B C °सर्वर्तु° for °सर्वस्व°. 2 C °प्रार्वाण्यं. 3 C °प्रसूनप्रसव°.

मुह-गड्ड-निबुड्डेहिँव उच्च-विअड्डि-ट्ठिएहिँ पिज्जन्तो,
छड्डिअ-मलउज्जाणो, मड्डिअ-वेइल्ल-विच्छड्डो; ९

रय-संमड्ड-सम-हरो, कवड्डि-सिर-सरिअ-सलिल-सीअलओ,
लङ्घिय-गड्डहवाहण-पुरो, मयण-गद्दहिअ-लोओ; १०

मलयाचल-कण्डलिआ-आउह-सालाउ भिण्डिवालोव्व,
ठड्ढेण वुड्ढ-जग-जयॅ-छिहाइ गहिओ महु-भडेण; ११

शोकः । मन्मथसंदष्टेषु इष्टाघातः । कामार्तप्राणिपीडाप्रद इत्यर्थः । मधोर्वसन्तस्य कार्यकरणाद् औष्ट्रिकः । भृत्य इत्यर्थः ॥

९. मुखस्य गर्तोपचाराद् बाहुल्यम् । तत्र निमग्नैरिव । अनवरतसुरतव्यासक्तैरित्यर्थः । उच्चा चासौ वितर्दिश्च वेदिस्तत्र स्थितैर्मत्तवारणभूमिगतैः पीयमानो रतक्लमापनोदार्थं सेव्यमानः । छर्दितं तदानीं दक्षिणस्या उत्तरस्यां गमनाद् वान्तम् । त्यक्तम् इत्यर्थः । मलयोद्यानं येन । मर्दितः अन्तर्भ्रमणेन कदर्थितः विचकिलानां विच्छर्दो विस्तारो येन स तथा ॥

१०. रतसंमर्दात् सुरतासक्तेः श्रमः खेदस्तस्य हरो विध्वंसकः । यतः किंभूतः । कपर्दी ईश्वरः तस्य यच्छिरस्तत्र या सरिद् गङ्गा तस्या यत् सलिलं तद्वत् शीतलः । लङ्घितं गर्दभवाहनस्य रावणस्य पुरं लङ्काख्या नगरी येन । मदनेन गर्दभितो गर्दभवद् आचरति स्म लोको यत्र स तथा ॥

११. मलयाचलकन्दरिकैव आयुधशाला तस्या भिन्दपालः शस्त्रविशेषः स इव स्तब्धेन साहंकारेण वृद्धा महती या जगज्जयस्पृहा तया मधुभटेन वसन्तवीरेण गृहीतः ॥

दड्ढोज्जीविअ-मयणो, विरहिणि-नीसास-वुड्ढि-परिविद्धो,
अविअड्ढ-असड्ढ-अणिड्ढीणंपि विइण्ण-रइ-सद्धो; १२
रिद्धिं पत्तो, कम्पिअ-लवली-मुड्ढो, वसन्त-मुद्धन्नो,
अड्ढद्धीकय-माणिणि-माणो, पज्जुण्ण-दिण्णाणो; १३
पण्णास-गुणं मयणं पण्णरह[१]-गुणं महुं च पयडन्तो,
मन्तुमइ-मन्नु-दलणो, समत्त-लय-तम्ब-वित्थरणो; १४
अविरहि-विरहि-थवातव-पत्तं पल्लत्थ-लयम् अपल्लट्टो
उच्छाहकरोणुत्थारयाण मलयाणिलो वाऊ. १५

१२. दग्धोपि ईश्वरतृतीयनेत्रार्चिषा भस्मसात्कृतोपि उज्जीवितः शरीरीकृतो मदनो येन विरहिणीनिःश्वासवृद्ध्या परिवृद्धः विस्तृतः। अविदग्धाश्च कामप्रवृत्तौ अनिपुणाः अश्रद्धाश्च तदनिच्छवः अनृद्धयो दरिद्रास्तेषामपि वितीर्णरतिश्रद्धः उत्पादितसुरताभिलाषः॥

१३. ऋद्धिं सौरभ्यादिसंपदं प्राप्तः कम्पिता अन्दोलिता लवलीलतानां मूर्धानः शिरांसि येन। वसन्ते[1] मूर्धन्यः प्रधानः। अर्धार्धीकृतः रतोत्कण्ठाकरणात् तुर्यांशो[2] विहितो मानिनीनां मानो येन[1]। प्रद्युम्नस्य कन्दर्पस्य दत्ता आज्ञा येन। जनानाम् इति शेषः। कन्दर्पराज्यम् अधुना जनेषु उदघोषयद् इत्यर्थः॥

१४. पञ्चाशद्गुणं मदनं पञ्चदशगुणं मधुं च प्रकटयन्। तयोराधिक्यं जनयन्नित्यर्थः। मन्युमतीनां प्रियविप्रियेण सक्रोधानां प्रेयसीनां मन्युदलनः। सख्यादिचाटुकारम् अन्तरेणापि प्रसादनकारक इत्यर्थः। समस्तलतास्तम्बानां विस्तरणः अनुकूलत्वेन वृद्धिजनकः॥

१५. अविरहिणश्च युवतियुक्ताः विरहिणश्च तद्विपरीताः। तेषां

१ B C पन्नरह°.

[1] B omits from वसन्ते up to येन. [2] C संखत्सो. B wanting.

स्तवास्तवयोः शीतसंतापोद्दीपकत्वेन प्रशंसाप्रशंसयोः पात्रम्[1]। [पर्यस्ता लता यस्मिन् कर्मणि तथा[2]] अपर्यस्तः। इतरवायुभिरसंमिश्र इति भावः। अनुत्साहानां कामार्थे अनुद्यमानाम् उत्साहकरः आसक्तिजनकः॥

नट्टईण। "र्तस्याधूर्तादौ" [३०.] इति र्तस्य टः। अधूर्तादाविति किम्। धुत्तिम। वत्ता। निवत्तणो॥ बाहुलकाद् वट्टो॥

वेण्टो। "वृन्ते ण्टः" [३१.] इति ण्टः॥

विसण्ठुलट्ठी। "ठोऽस्थिविसंस्थुले[3]" [३२.] इति ठः॥

चउट्ठो चउत्थ। अट्ठत्थो। पुरिसत्थ। ठीण थीण। "स्त्यानचतुर्थार्थे वा" [३३.] इति ठो वा। परम् अर्थशब्दे व्यवस्थितविभाषया ठत्वम्। धनार्थे न भवति॥

लट्ठि। "ष्टस्यानु°" [३४.] इत्यादिना ष्टस्य ठः। अनुष्ट्रेष्टासंदष्ट इति किम्। संदट्ठेसुं। इट्ठ। मट्टिअओ॥

गड्डु। "गर्ते डः" [३५.] इति र्तस्य डः टापवादः॥

विअड्डि। छड्डिअ। मड्डिअ। विच्छड्डो। संमड्डु। कवड्डि। "संमर्द°" [३६.] इत्यादिना र्दस्य डत्वम्॥

गड्डह गद्दहिअ। "गर्दभे वा" [३७.] इति र्दस्य डो वा॥

कण्डलिआ। भिण्डिवालो। "कन्दरिकाभिन्दिपाले ण्डः" [३८.] इति ण्डः॥

ठड्ढेण। "स्तब्धे ठढौ" [३९.] इति यथाक्रमं ठढौ॥

वुड्ढ। दड्ढो। वुड्ढि। अविअड्ढ। "दग्ध°" [४०.] इत्यादिना ढः॥ क्वचिन्न। परिविद्धो॥

असड्ढ सद्धो। अणिड्ढीणं रिद्धि। मुड्ढो[4] मुद्धत्तो। अड्ढद्धी। "श्रद्धर्द्धि°" [४१.] इत्यादिना ढो वा॥

पज्जुण्ण[5]। आणो। "म्नज्ञोर्णः" [४२.] इति णः॥

दिण्णा। पण्णास। पण्णरह। "पञ्चाशत्पञ्चदशदत्ते" [४३.] इति णः॥

मन्तु मन्नु। "मन्यौ न्तो वा" [४४.] इति न्तो वा॥

---

[1] Bc सात°. [2] B C om. these words. [3] So B C. [4] Neither B nor C has मुंड्ढो, either in the text or in the commentary. [5] B C पज्जुन्न.

भमरालिद्धे झसचिन्धय-चिण्हे आसि सिन्दुवारम्मि
भस्सिय-झसिन्ध-जीवाउ-भप्प-चुन्नं किर पराओ. १६
अप्पाणत्ता मुक्को भरियप्प-पिएहि पहिअ-सत्थेहिं,
कङ्किल्लि-कुम्पलं रुप्पिणि-सुअ-बाणंव दट्ठूण. १७
रुच्मि-निव-सरिस-जोव्वण-गुणेहि तस्सि कया जुआणेहि
पुष्फिअ-असोअ-विपिणे परोप्पर-प्फद्धम् अन्दोला. १८

वित्थरणो । "स्तस्य" [४५.] इत्यादिना स्तस्य थः । असमस्तस्तम्ब इति किम् । समत्त । तम्ब ॥

थवातव । "स्तवे वा" [४६.] इति स्तस्य थो वा ॥

पल्लत्थ पल्लट्टो । "पर्यस्ते थटौ" [४७.] इति पर्यस्तेण थटौ ॥

उच्छाह अणुत्थारयाण । "वोत्साहे थो हश्च रः" [४८.] इति थो वा । तत्संनियोगे च हस्य रः ॥

१६. भ्रमरैराश्लिष्टे सौरभ्यलोभाद् आलिङ्गिते झषचिह्नकस्य कामस्य चिह्ने उत्कण्ठादायकत्वेन व्यञ्जके सिन्दुवारे निर्गुण्डे भस्मितः समाधिभङ्गप्रकुपितत्र्यम्बकतृतीयनेत्रजाज्वल्यमानज्वलनज्वालया भस्मसात्कृतो यो झषचिह्नस्तस्य जीवातोर्जीवनौषधस्य भस्मसदृशचूर्णमिव संभाव्यते परागः ॥

आलिद्धे । "आश्लिष्टे लधौ" [४९.] इति यथासंख्यं लधौ ॥

चिन्ध इन्ध । "चिह्ने न्धो वा" [५०.] इति न्धः । ण्हापवादः । पक्षे सोपि । चिण्हे ॥

१७. रुक्मिणीसुतबाणमिव जगन्मोहनात् पञ्चशरशरमिव कङ्केल्लिकुड्मलम् अशोकाविकसितकुसुमं तत्प्रवालं वा दृष्ट्वा स्मृता सौख्याय अनुध्याता आत्मप्रिया यैस्ते तथा तैः पथिकसार्थैः आत्मनः आत्मा स्वजीवो मुक्तः । ते तदा तद्दर्शनात् क्षोभेण मृता इत्यर्थः ॥

भस्सिय भप्प । अप्पाणत्ता अप्प । "भस्मात्मनोः पो वा" [५१.] इति पो वा ॥

१८. पुष्पिताशोकविपिने तस्मिन् उद्याने रुक्मी रुक्मिणीभ्राता

सोवि बुहप्फइ-सीसो बुहप्पई सोवि तत्थ ओच्छरिओ,

निप्पहिअ-तिअस-लीलं दोला-लीलोसवं दट्ठुं. १९

विरहिअ-भिप्फं असिलिम्ह-कण्ठयं विगय-सेफ-कण्ठेहिं

तम्बम्ब-दलोत्तंसं दोलिर-तरुणीहि अह गीअं. २०

स चासौ नृपश्च तेन सदृशं यौवनं गुणाश्च येषां तैर्युवभिः परस्परम् अन्योन्यं स्पर्धा यत्र अन्दोलने तद् यथा भवति एवम् अन्दोल्यते अस्याम् इत्यन्दोला प्रेङ्खा कृता ॥

कुम्पलं । रुप्पिणि । "ड्क्मोः" [५२.] [इति] पः ॥ क्वचित् च्मोपि । रुच्मि ॥

१९. अथ वसन्तक्रीडापीडं दोलाविलासं गाथाष्टकेन वर्णयति । सोपि भूमण्डलाखण्डलत्वेन प्रसिद्धोपि बृहस्पतेः बृहस्पतिनामोपाध्यायस्य शिष्यः श्रीकुमारपालनृपः सोपि तदुपाध्यायत्वेन विशदप्रज्ञर्द्धियुक्तत्वेन च उत्कृष्टोपि बृहस्पतिः तत्र उद्याने निष्प्रभिताः स्वातिशयात् पराभूतास्त्रिदशानां लीलाः क्रीडा येन तत् तथाभूतं दोलालीलोत्सवं द्रष्टुम् अवसृतः आगतः । अपिशब्दः समुच्चये ॥

पुप्फिअ । प्फद्ध । "ष्पस्पयोः फः" [५३.] इति फः ॥ बाहुलकात् क्वचिद् वा । बुहप्फइ । बुहप्पई ॥ क्वचिन्न । परोप्पर । निप्पहिअ ॥

२०. विरहितं त्यक्तं भीष्मं श्रुतिकटुकत्वं येन तत् । सुकुमारम् इत्यर्थः । अथ वा विरहितानां वियुक्तानां भीष्मं भयावहं विरहोद्दीपकत्वात् । अविद्यमानः श्लेष्मा कफो यत्र स तथा एवंभूतः कण्ठो यत्र । ताम्राणि यान्याम्रदलानि तेषाम् उत्तंसः आपीडो यत्र तद् यथा भवति एवम् । विगतश्लेष्मकण्ठैः । तरुणैः सहेत्यर्थात् । दोलयन्तीत्येवंशीला दोलयित्र्यः । ताश्च ताः तरुण्यस्ताभिः अथ दोलाध्यारोहानन्तरं गीतं गीयते स्म ॥ कान्तैः सह दोलाध्यारूढाभिस्तरुणीभिर्गीतं कृतम् इत्यर्थः ॥

¹ So B C.

अखलिअ-जिब्भं पइ-नाम पुच्छिआ तत्थ खलिअ-जीहाओ,
मय-विहलाहिं मय-भिब्भलाओं लट्ठीहि विब्भलिआ; २१
उब्भम् अणुद्धं च ठिआ दोलासुं, विज्ज-विजिय-कम्हारा,
कम्भारजम्म-पीवल-कर-जुग्गय-चरण-जुम्माओ; २२
कय-बम्भचेर-भङ्गा सुन्देरेणं स-बम्हचरिआण,
चल-नेउर-जय-तूराहिअ-सर-सोडीर-धीराओ; २३

भिप्फं। "भीष्मे ष्मः" [५४.] इति ष्मस्य फः॥
असिलिम्ह सेफ। "श्लेष्मणि वा" [५५.] इति ष्मस्य फो वा॥
तम्बम्ब। "ताम्राम्रे म्बः" [५६.] इति मयुक्तो बः॥

२१,२६. षड्भिः कुलकम्। धरणिबृहस्पतिशिष्येण पृथ्वीपुरंद-रेण। राज्ञेत्यर्थः। सकलकलाकौशले बृहस्पतिना सुराचार्यसदृशेन उपनतानि आरामिकैर्ढौकितानि वनस्पतीनि वनस्पतिफलानि यस्य स तथा। तेन वनस्पतिवने वृक्षवने। वनं जलाद्यपीति तद्व्यवच्छेदार्थं वनस्पतिग्रहणम्। वनिता अङ्गना दृष्टाः॥ कीदृश्यः। स्खलिताः प-तिपुरतः पतिनामप्रच्छनोद्भूतलज्जया अविस्पष्टा जिह्वा रसना यासां तास्तथा। यतो मदेन क्षीबतया विह्वला विसंस्थुला यष्टिभिर्यष्टिघातैः कृत्वा विह्वला व्याकुलीकृता अस्खलितजिह्वम्। व्यक्तम् इत्यर्थः। एवं तत्र उद्याने मदविह्वलाभिः। वयस्याभिरिति गम्यते। पतिनाम पृष्टाः॥

२२. विद्यया जितकाश्मीराः कलाकौशलेन विजितसरस्वतीदेश-काश्मीरपण्डिताः। काश्मीरजन्मना कुङ्कुमेन पीतं पीतवर्णं करयुग्मं चरणयुग्मं च यासां ताः। तथा दोलासु प्रेङ्खासु ऊर्ध्वम् अनूर्ध्वं च स्थिताः॥ काश्चिद् उपविष्टा अन्दोलयन्ति काश्चिद् ऊर्ध्वा एवेति भावः॥

२३. सब्रह्मचर्याणां नियमितमैथुनसेवानां सौन्दर्येण अङ्गोपाङ्गानु-

1 So B C.

धिज्ज-गुरु-घुम्मण-समुन्नय-पय-पेरन्त-हणिअ-पज्जन्ते
खण-पुप्फिए असोए अच्छेरस्सवि कयच्छरिआ; २४
अच्छअर-सोअमल्ला[1], कयच्छरीआ पिअच्छरिज्जाण,
पल्लत्थ-दीहरोरुअम् अभिपल्लाणिअ-पिअ-कडीओ; २५

तरम्यत्वेन कृत्वा कृतब्रह्मचर्यभङ्गा जनितब्रह्मव्रतलोपाः। चला नूपुरा एव जयतूर्याणि तैः आहिते स्मरस्य शौटीर्ये[1] च पराक्रमो धैर्ये च अकातरत्वं यकाभिः॥ वीराणां हि जयतूरश्रवणात् समराय उत्साहधैर्ये प्रादुर्भवतः तथा मञ्जीरझङ्कारे च स्मरस्य अत्यन्तोल्लासाद् इत्थम् उक्तिः॥

२४. धैर्येण गुरुघूर्णनं बहुभ्रमणं यस्य स चासौ समुन्नतपादश्च तस्य पर्यन्तेन प्रान्तेन हतः पर्यन्तो यस्य। अत एव क्षणपुष्पिते तत्कालमेव संजातकुसुमे अशोके सति। आश्चर्ययोगात् पुमानप्याश्चर्यः। तस्यापि तादृक्कान्तादर्शनेन सकौतुकस्यापि कृताश्चर्याः। तत्कालं स्वपादप्रहारमात्रेण अशोकपुष्पोत्पादनेन जनितकौतुकान्तरा इत्यर्थः॥

२५. आश्चर्यम् अत्यद्भुतं सौकुमार्यं मृदुत्वं यासाम्। प्रियाश्चर्याणां कृताश्चर्याः उत्पादितकुतूहलाः। पर्यस्तौ पार्श्वतः क्षिप्तौ दीर्घौ ऊरू सक्थिनी यत्र इत्येवम् अभिपर्याणिताः पल्ययनीकृताः प्रियाणां कट्यो यकाभिस्तास्तथा॥

जिब्भं जीहाओ। "ह्वो भो वा" [५७.] इति ह्वस्य भो वा॥

विहलाहिं भिब्भलाओ विब्भलिआ। "वा विह्वले वौ वश्च" [५८.] इति ह्वस्य भो वा तत्संनियोगे च वेर्वस्य वा भः॥

उब्भम् अणुद्धं। "वोर्ध्वे" [५९.] इति भो वा॥

कम्हारा कम्भार। "कश्मीरे म्भो वा" [६०.] इति म्भो वा॥

जम्म। "न्मो मः" [६१.] इति न्मस्य मः। अधोलोपापवादः॥

---

[1] B C °सोउमल्ला°.

[1] B C शौण्डीर्य.

धरणि-बहस्सइ-सीसेण, सयल-कल-कोसले बहप्फइणा,
विलया वणस्सइ-वणे दिट्ठा उवणय-वणप्फइणा. २६
बप्फुल्ल-वयण-बाहुल्ल-लोयणीकय-पउत्थम् उल्लसिअं
दस-काहावण-वीस-कहावण-मुल्लं तिलय-फुल्लं. २७

जुग्गय जुम्माओ । "ग्मो वा" [६२.] इति ग्मस्य मो वा ॥

बम्भचेर । सुन्देरेणं । सोंडीर । तूरा । "ब्रह्मचर्य°" [६३.] इत्यादिना र्यस्य रः । जापवादः । चौर्यसमत्वाद् बम्हचरिआण ॥

धीराओ धिज्ज । "धैर्ये वा" [६४.] इति र्यस्य रो वा ॥

पेरन्त । "एतः पर्यन्ते" [६५.] इति एकाराद् र्यस्य रः । एत इति किम् । पज्जन्ते ॥

अच्छेरस्स । "आश्चर्ये" [६६.] इति एकाराद् र्यस्य रः । एत इत्येव । कयच्छरिआ । अच्छअर । कयच्छरीआ । पिअच्छरिज्जाण । "अतो रि°" [६७.] इत्यादिना अकाराद् र्यस्य रिअ अर रिज्ज रीअ इत्यादेशाः । अत इति किम् । अच्छेरस्स ॥

सोअमल्ला[1] । पल्लत्थ । अभिपल्लाणिअ । "पर्यस्त°" [६८.] इत्यादिना र्यस्य ल्लः ॥

बहस्सइ बहप्फइणा । वणस्सइ वणप्फइणा । "बृहस्पतिवनस्पत्योः सो वा" [६९.] इति सो वा ॥

२७. बाष्पेण ऊष्मणा । प्रियाविरहसंतापोत्थस्वेदेनेति यावत् । आर्द्राणि क्लिन्नानि वदनानि येषां ते च बाष्पैः कान्तावियोगोत्थाश्रुभिः आर्द्राणि लोचनानि च येषां ते च । ततश्च्विप्रत्यये बाष्पार्द्रवदनबाष्पार्द्रलोचनीकृताः प्रोषिता येन । दश कार्षापणाः विंशतिः कार्षापणाश्च मूल्यं यस्य तत् तथाभूतं तिलकफुल्लं वृक्षविशेषपुष्पम् उल्लसितं विकसितम् ॥

बाहुल्ल । "बाष्पे होऽश्रुणि" [७०.] इति हः । अश्रुणीति किम् । बप्फुल्ल ॥

काहावण । "कार्षापणे" [७१.] इति हः ॥ कथं कहावणेति । "ह्रस्वः संयोगे" [१.८४.] इति प्रागेव ह्रस्वत्वे पश्चात् हादेशे कहावणेति भविष्यति ॥

[1] B C सोमल्ला.

दुहिआण दुक्ख-हरणम्मि दक्खिणो, काम-दाहिण-करोव्व,
उम-तित्थिआण तूहं, फुड-फुल्लो आसि महुअ-तरू. २८

पायाहओ असोओ कोहलि-सामाहिं पम्हलच्छीहिं
कोहण्डी-कुसुमो कम्हारज-किसलो अ हवइ म्ह. २९

नव-रवि-रस्सि-पसूणो सर-उम्ह-करो अलक्खि बम्ह-तरू,
रोलम्ब-सण्ह-रव-कय-सागय-पण्हो महु-सिरीए. ३०

२८. दुःखितानाम् अननुकूलकलत्रत्वेन पीडितानां दुःखहरणे दक्षिणः तदभीप्सितार्थसाधकत्वेन हितः । अत उत्प्रेक्ष्यते कामस्य दक्षिणकर इव । तत्करसाध्यकार्यस्य तेनापि निष्पादनात् । उमातीर्थिकानां गौरीभक्तानां तीर्थम् । तत्र गौरी वसतीति श्रुतेः । तेषां भक्तिस्थानम् स्फुटफुल्लो विकसितकुसुमः मधूकतरुरासीत् ॥ उमेति "दीर्घह्रस्वौ मिथो वृत्तौ" [१.४] इति ह्रस्वः ॥

दुहिआण दुक्ख । दक्खिणो दाहिण । तित्थिआण तूहं । "दुःखदक्षिणतीर्थे वा" [७२.] इति हो वा ॥

२९. कूष्माण्डीवत् श्यामाः श्यामवर्णास्ताभिः पक्ष्मलाक्षीभिः अशोकः पादेन आहतः । ततः कूष्माण्डीकुसुमवत् कुसुमानि यस्य स तथा । कश्मीरजं कुङ्कुमं तद्वत् किशलयानि च यस्य स तथाभूतश्च भवति स्म । स्वदोहदसंप्राप्तितः शाड्वलः संवृत्त इति भावः ॥

कोहलि कोहण्डी । "कूष्माण्ड्यां ष्मो लस्तु ण्डो वा" [७३.] इति ष्मा इत्यस्य हः । ण्ड इत्यस्य तु वा लोऽपि ॥

३०. नवरविरश्मिवद् रक्तानि प्रसूनानि यस्य । स्मरस्य उष्मकरः दर्शनकारिलोकस्य स्मरज्वरजनकः । मधुश्रियाः वसन्तलक्ष्म्या रोलम्बा भ्रमरास्तेषां सूक्ष्माः श्लक्ष्णा वा ये रवा गुञ्जितानि तैः कृतस्वागतप्रश्न इव ब्रह्मतरुः पलाशः अलक्षि मन्यते स्म ॥

[1] B C हे for वा.

जण्हवि-जल-ससि-जुण्हा-सीयलम् अलि-पडल-कसण-कसिण-दलं,
अवरण्ह-विअसिअं आसि पाडलं रइअ-पल्हायं. ३१

अक्खलिअ-सुत्त-निच्चल-अणिट्ठुरोग्गीवॅ-छच्चरण-भुत्तं,
विरहिणि-दुक्खोप्पायन्तप्पायं कुरवयं[1] फुडिअं. ३२

खग्गि-पिअ-सेर-मुद्धय-सिरीस-लग्गा अलक्खि भमरोली,
नासीकयव्व भल्ली विक्कमि-कन्दप्प-वीरेण. ३३

पम्हल । कम्हार । म्ह । उम्ह । बम्ह । "पक्ष्मश्म०" [७४.] इत्यादिना पक्ष्मस्थस्य क्ष्मस्य श्मष्मस्मम्हां च म्हः ॥ क्वचिन्न । रस्सि । सर ॥

३१. जाह्नवीजलशशिज्योत्स्नावत् शीतलम् अलिपटलैः कृत्वा कृष्णानि नीलानि कृत्स्नानि समस्तानि दलानि यस्य तत् तथा अपराह्णकाले विकसितं रचितप्रह्लादं सौरभ्यादिना कृतप्रमोदं पाटलं पाटलिपुष्पम् आसीत् ॥

सण्ह । पण्हो । जण्हवि । जुण्हा । अवरण्ह । "सूक्ष्म०" [७५.] इत्यादिना सूक्ष्मस्थस्य क्ष्मस्य श्नष्णस्नह्नह्णक्ष्णां च ण्हः ॥ विश्लेषे तु कृष्णकृत्स्नयोः कसण कसिण ॥

पल्हायं । "ह्लो ल्हः" [७६.] इति ह्लस्य ल्हः ॥

३२. अस्खलितं निरुपद्रवं यथा भवति एवं सुप्ता अत एव निश्चला अप्रकम्पा अनिष्ठुरोद्ग्रीवाः कोमलोर्ध्वकन्धरा ये षट्चरणास्तैर्भुक्तम् आस्वादितमधु । विरहिणीनां दुःखोत्पादकेषु अन्तःपातो यस्य तत् तादृशं कुरबकं[1] स्फुटितं विकसितम् ॥

३३. खड्गिनां गण्डकानां प्रियाणि स्मेराणि विकचानि मुग्धकानि मनोज्ञानि यानि शिरीषाणि शिरीषपुष्पाणि तेषु लग्ना मकर-

1. B C कुरुवयं.

1 B दुःखोत्पादेकविधानोऽन्तप्रायं मृत्युकल्पं कुरवकं. C दुःखोत्पादे कष्टविधानेऽन्तप्रायं मृत्युकल्पं कुरवकं.

भव्व-सरा वण-वारे सद्दिअ-विक्कव-पउत्थ-वहु-चन्द्रा,
भद्दं व भद्द-सिरिणो पढिउं लग्गा पिगी महुणो; ३४
वक्कलि-दिआण सव्वाणोव्वेय-करी अकम्मसाणंपि,
आबल्ल-विरत्ताणवि[1] दारन्ती हियय-दाराइं. ३५

न्दलोभाद् आसक्ता भ्रमरालिः अलक्षि उत्प्रेक्षिता। यदुत विक्कमि-कन्दर्पवीरेण पराक्रमकलितस्मरसुभटेन भल्लिर्बाणविशेषः सैव न्यासीकृता प्रस्तावे ग्रहीष्य [इति] स्वमित्रवसन्तर्तुप्रधाने शिरीष-वृक्षे स्थापिता ॥

अक्खलिअ। सुत्त। निच्चल। अणिट्ठुरोग्गीव। छच्चरण। भुत्तं। दुक्खोप्पाय। अन्तप्पायं। खग्गि। मुद्धय। "कगट०" [७७.] इत्यादिना एषाम् ऊर्ध्वस्थितानां लुक् ॥

सेर। लग्गा। नासी। "अधो मनयाम्" [७८.] इति मनयाम् अधःस्थानां लुक् ॥

३४. युग्मम्। वनद्वारे काननमुखे शब्दितानि कूजितव्याजेन नूनम् अधुना युष्मत्प्रिया नागमिष्यन्तीति वार्तितानि विक्लवानि स्मर-विह्वलानि प्रोषितवधूनां चन्द्राणि [वृन्दानि] यया सा तथा। भव्यस्वरा सती। उत्प्रेक्ष्यते। भद्रश्रियः सर्वर्तुरम्यत्वेन मनोज्ञलक्ष्मी-कस्य मधोर्वसन्तस्य भद्रमिव मङ्गलवाक्यमिव पठितुं लग्ना पिकी कोकिला। अन्यापि गाथिकी ईश्वरगृहद्वारे मङ्गलं गायतीति ॥

३५. भूयः किंभूता। सर्वेषां वल्कलिद्विजानां तरुत्वक्परिधान-तापसानाम् उद्वेगकरी संतापजननी। स्मरज्वरोत्पादनात्। अकल्म-षाः शुभध्यानक्षिप्तपापाः तेषामपि आबाल्यं शैशवाद् आरभ्य विरक्ता भवभीरवस्तेषामपि हृदयद्वाराणि चित्तमध्यानि दारयन्ती पीडयन्ती ॥

विक्कमि। कन्दप्प। सद्दिअ। विक्कव। वक्कलि। "सर्वत्र लवराम् अचन्द्रे" [७९.] इत्यूर्ध्वाधःस्थितानाम् एषां लुक् ॥ संयुक्तानाम् उभयप्राप्तौ यथादर्शनं लोपः।

---

[1] B C °विरत्ताणं.

अगणिअ धाइं धारी-सुआणुसरिआओ कोउहल्लेण
फुल्लन्धुअ-धत्तिं धाविआओ बाला नवं लवलिं. ३६
मायन्द-निउञ्जे कूजिएहिँ अन्नाण-जाणि-मण-हरणा
मत्ता अतिण्ह-सर-सर-तिक्खण-विण्णाणिणिव्व पिगी. ३७

क्वचिद् ऊर्ध्वम् । सव्वाणो । अकम्मसाणं ॥ क्वचित्त्वधः । दिआण । आवल्ल ॥ क्वचित् पर्यायेण । वारे दाराइं । अचन्द्र इति किम् । चन्द्र । संस्कृतसमोयं प्राकृतशब्दः । अत्र उत्तरेण विकल्पोपि न निषेधसामर्थ्यात् ॥

भद्दं भद्द । "द्रे रो न वा" [८०.] इति द्रे रस्य वा लुक् ॥

३६. धात्रीम् आमलकीं बालधारिकां वा अगणयित्वा अनादृत्य धात्रीसुताभिः अनुसृताः पृष्ठतोनुगता बालाः कुमारिकाः । फुल्लन्धुअ इति देश्यो भ्रमरार्थः । तेषां मकरन्ददुग्धदायित्वेन धात्रीमिव नवां तत्क्षणप्रादुर्भूतकोरकत्वेन प्रत्यग्रां लवलीं धाविताः कुतूहलेन । पुष्पादिरामणीयकातिशयकौतुकेन तां प्रति गताः ॥

धाइं धत्तिं । "धात्र्याम्" [८१.] इति रस्य लुक् । पक्षे धारी ॥

३७. चूतनिकुञ्जे आम्रगहने कूजितैः कृत्वा अज्ञाना मूर्खाः ज्ञानिनो विद्वांसः । तेषां मनसां हरणी । रणरणककृत्त्वेन वैक्लव्यकारिकेत्यर्थः । अतस्तर्क्यते । अतीक्ष्णाः स्वकार्यकरणासमर्थत्वेन कुण्ठा ये स्मरशरास्तेषां तीक्ष्णने उत्तेजने विज्ञानिनीव विचक्षणेव । मत्ता आम्रमञ्जरीस्वादनेन पुष्टा पिकी अस्ति ॥ चूतस्य माकन्दादेशो "गोणादयः" [२. १७४] इत्यनेन । संस्कृतेपीत्यन्ये ॥ तीक्ष्णं करोति "णिज् बहुलम्" इति णिजि अन्त्यस्वरलोपे तीक्ष्ण्यते इति धुटि तीक्ष्णनम् ॥

अतिण्ह तिक्खण । "तीक्ष्णे णः" [८२.] इति णस्य लुग् वा ॥

अन्नाण जाणि । "ज्ञो ञः" [८३.] इति ञस्य लुग् वा ॥ क्वचिन्न । विण्णाणिणि ॥

मज्झण्हतरू[1] मज्झण्ण-पुप्फ-जीविअ-दसार-वइ-पुत्तो,
महु-जुव-मंसु-सरिच्छालि-गुच्छओ आसि मण-हरणो. ३८

हरिअन्द-रुप्पि-सरिसाणवि पहिआणं वणं मसाणंव,
रत्तीसु अराईसुवि कसिण-पलासेहि खोहयरं. ३९

३८. मध्याह्नपुष्पैर्मध्याह्नकालविकासिभिः प्रसूनैर्जीवितः समाधिभङ्गप्रकुपितत्रिनेत्रतृतीयनेत्रज्वालया भस्मितोपि प्राणितः दशार्हपतेर्विष्णोः पुत्रः अनङ्गो येन स तथा। मधुयूनो वसन्ततरुणस्य श्मश्रुसदृशो दंष्ट्रिकाकल्पः अलिगुच्छो भ्रमरस्तबको यत्र स तथा मध्याह्नतरुः अत्यन्तरक्तमध्याह्नविकाशिपुष्पो वृक्षभेदो मनोहरणः अतिरम्यत्वात् सकललोकचित्तावर्जक आसीत्॥

मज्झण्ह मज्झण्ण। "मध्याह्ने हः" [८४.] इति हस्य लुग् वा॥

दसार। "दशार्हे" [८५.] इति हस्य लुक्॥

३९. हरिश्चन्द्रो राजर्षिः रुक्मी च रुक्मिणीभ्राता। तयोः सदृक्षाणामपि। निःप्रकम्पानामपीत्यर्थः। पथिकानां वनं काननं श्मशानवत् पितृवनवत्। रात्रिषु अरात्रिष्वपि। अहर्निशम् इत्यर्थः। कृत्स्नपलाशैः समस्ततरुजातिपर्णैः समस्तकिंशुकैर्वा कृत्वा क्षोभकरं प्रियावियोगवेदनाजनकम् आसीत्। श्मशानमपि पलाशैर्मांसास्वादिभिर्भूतशाकिनीप्रभृतिभिर्धीराणामपि भीतिम् आवहति॥

मंसु। मसाणं। "आदेः श्मश्रुश्मशाने" [८६.] इति आदेर्लुक्॥ आर्षे श्मशानस्य सीआणं सुसाणं इत्यपि॥

हरिअन्द। "श्चो हरिश्चन्द्रे" [८७.] इति श्च इत्यस्य लुक्॥

रत्तीसु अराईसु। "रात्रौ वा" [८८.] इति लुग् वा॥

रुप्पि। रत्तीसु। "अनादौ शेषादेशयोर्द्वित्वम्" [८९.] इति द्वित्वम्॥ क्वचिन्न। कसिण। अनादाविति किम्। खोह॥

---

१ B C मज्झण्णतरू.

मुच्छिर-सरा कय-गुणक्खाणव्व अविग्घ-कट्ठमहु-पाणे
नीसास-निज्झरा इव चउ-कट्ठं सिसिर-सिरि-मुक्का, ४०

निब्भर-महद्धि-गन्धे वण-सिरि-गुप्फत्थ-नील-मणि-निउरा
अच्छि-पडिक्खण-मज्झे अवुड्ढ-वउले गया अलिणो. ४१

भसलालिद्ध-पसत्थोग्गय-पुप्फो आसि कामि-भिब्भलणो
दिग्घामोओ दीहं ऊससिअ-रईसरो सिरिसो. ४२

४०. युग्मम्। अवृद्धबकुले नवकेसरे अलयो गताः। मूर्च्छितो वर्द्धनशीलः स्वरो गुञ्जितं येषां ते तथा सन्तः। उत्प्रेक्ष्यते[1]। कृतगुणाख्याना[2] इव विहितमाधुर्यादिप्रशंसा इव। क्व। अविघ्नं निरुपद्रवं यत् काष्ठमधुनः कुसुममकरन्दस्य पानं स्वादनं तत्र। तथा निःश्वासनिर्झरा इव। वसन्तश्रीपराभूतत्वेन सकष्टत्वाद् निःश्वसनप्रवाहा इव चतुःकाष्ठं चतसृषु दिक्षु शिशिरश्रिया शीतकाललक्ष्म्या मुक्ताः॥

४१. वनश्रियो गुल्फस्थाश्चरणग्रन्थिस्था गुञ्जितश्यामलत्वयुक्तत्वेन नीलमणीनां नूपुरा इव निर्भरः सकलदिक्चक्रव्यापी महर्द्धिगन्धो यस्य तस्मिन् अक्षिप्रतीक्षणमध्ये। चक्षुर्निमेषमात्र इत्यर्थः॥

४२. भसलैः आश्लिष्टानि मकरन्दपानाय आश्रितानि प्रशस्तानि मनोहराणि उद्गतानि प्रादुर्भूतानि पुष्पाणि यस्मिन् स तथा कामिनां विह्वलनः। प्रियां प्रति उत्कण्ठाजननाद् अभिमानहारक इत्यर्थः। दीर्घामोदः सर्वत्र प्रसृमरपरिमलः। दीर्घम् अत्यर्थं यथा भवति एवम् उच्छ्वसितरतीश्वरः[3] उज्जीवितकन्दर्पः शिरीष आसीत्॥

मुच्छिर। गुणक्खाण। अविग्घ। कट्ठ। निज्झरा। कट्ठं। निब्भर। महद्धि। गुप्फत्थ। अच्छि। पडिक्खण। मज्झे। अवुड्ढ। आलिद्ध। पसत्थो। पुप्फो।

[1] B उत्प्रेक्ष्यंते. [2] B गुणख्या°. [3] C उच्छ्वसित°.

वम्मह-तंस-सरोवम-संझा[1]-सुन्देर-हारि-कुंपलओ,

विहलिअ-पहिओ, धट्ठज्जुण-भाउ-समेवि कामकरो, ४३

कणिआर-तरू, नव-कण्णिआर-सुन्देर-दरिअ-सब्भावो,

हर-खन्द-जुग्ग-कुसुमो जाओ रञ्जिअ-हर-क्खन्दो. ४४

भिब्भलणो । "द्वितीयतुर्ययोरुपरि पूर्वः" [९०.] इति द्वित्वप्रसङ्गे उपरि पूर्वः ॥

दिग्घा दीहं । "दीर्घे वा" [९१.] इति घस्योपरि पूर्वो वा ॥

४३. युग्मम् । हरस्कन्दयोर्योग्यानि पूजार्हाणि कुसुमानि यस्य अत एव रञ्जितहरस्कन्दः प्रमोदितशंकरकार्तिकेयः कर्णिकारतरु जातः । कीदृशः । मन्मथस्य त्र्यश्राः त्रिकोणा ये शरास्तैरुपमा येषां तानि तथा । ताम्रत्वेन संध्यासौन्दर्यस्य हारीणि [अपहर्तॄणि] कुड्म लानि उद्भिद्यमानपत्राणि यस्मिन् स तथा । विह्वलिताः प्रियास्मरणाद् उद्वेजिताः पथिका येन स तथा । आस्ताम् अन्यस्मिन् । धृष्टद्युम्नभ्राः शिखण्डी नपुंसको द्रुपदपुत्रस्तेन समस्तुल्यः तस्मिन्नपि कामकर-सुरतेच्छोत्पादकः ॥

४४. नवानि यानि कर्णिकाराणि स्वपुष्पाणि तेषां यत् सौन्दर्यं चारुता तेन दृप्तसद्भावः अन्यवृक्षपुष्पसमृद्ध्याधिक्यात् साहंकारप्रकृतिः ॥

ऊससिअ । रईसरो । तंस । संझा । कुंपलआ । "न दीर्घानुस्वारात्" [९२.] इति न द्वित्वम् ॥

सुन्देर । विहलिअ । "रहोः" [९३.] इति न द्वित्वम् ॥

धट्ठज्जुण । "धृष्टद्युम्ने णः" [९४.] इति न द्वित्वम् ॥

कणिआर कण्णिआर । "कर्णिकारे वा" [९५.] इति वा न द्वित्वम् ॥

दरिअ । "दृप्ते" [९६.] इति न द्वित्वम् ॥

---

१ B °संज्झा°.

---

1 B संज्झा.

पिअ-कुसुम-पयर-पूरिअ-कुसुम-प्पयरो पमुक्क-मेर-सिरी,
तेल्ल-सणिद्धालि-कुलापम्मुको आसि वेइल्लो. ४५

कोल्ला-सोत्त-पडिच्छन्दीकय-रय-सेव्व-घम्म-सलिलाण
पुप्फिअ-लवली जाया सेवा-जुग्गा मयच्छीणं. ४६

महु-नक्खआउह-नहव्व आसि सारङ्गि-वत्थ-कन्तीइं
छमरुह-रयण-पलासे कुसुमाइँ सलाह-पत्ताइं. ४७

४५. प्रियः केशकलापादिसौरभ्याय अभिप्रेतः कुसुमप्रकरो येषां [तेषां] पूरितः संपादितः कुसुमप्रकरो येन । प्रमुक्तमेरश्रीः निरवधिसमृद्धिः । तैलवत् स्निग्धम् अरूक्षकान्ति यद् अलिकुलं तेन मधुपानलोभाद् अप्रमुक्तः विचकिल आसीत् ॥

[हर-खन्द हर-क्खन्दो] । कुसुम-पयर कुसुम-प्पयर । "समासे वा" [९७.] इति द्वित्वम् ॥ बाहुलकाद् अशेषादेशयोरपि । पमुक्क । पम्मुक्क इत्यादि ॥

४६. कुल्या कृत्रिमा सरित् तद्रूपं यत् स्रोतः प्रवाहस्तस्य प्रतिच्छन्दीकृतं सदृशं रतसेवया घर्मसलिलं यासां तासां मृगाक्षीणां पुष्पितलवली सेवायोग्या रतिश्रमापनोदाय सेवनीया जाता ॥

तेल्ल । वेइल्लो । सोत्त । "तैलादौ" [९८.] इति द्वित्वम् ॥ आर्षे । पडिसोओ । विस्सोअसिआ ॥

४७. मधुर्वसन्तः स एव पान्थभीषकत्वाद् नखायुधः सिंहः तस्य आरक्तकुटिलत्वेन मन्यन्ते नखा इव । शार्ङ्गी पीताम्बरस्तस्य वस्त्राणामिव कान्तिः । पीतरक्तयोः कविसमये ऐक्यात् । प्रभा येषाम् क्षमारुहा वृक्षास्तेषु सश्रीकत्वाद् रत्नम् । प्रधान इत्यर्थः । यः पलाशस्तस्मिन् कुसुमानि श्लाघापात्राणि रम्यत्वादिविषयलोकप्रशंसास्थानानि आसन् ॥

सेव्व सेवा । नक्ख नह । "सेवादौ वा" [९९.] इति वा द्वित्वम् ॥

जुव-जण-जणिअ-सणेहा[1] पउत्थ-विरहागणिम्मि णेह-समा
मयण-पयावग्गि-णिहा पलक्ख-तरु-पल्लवा जाया. ४८

सिरि-नन्दण-किरिआरिह-तरुणीहिं चइअ-कसिण-हिरिआहिं
अह कुसुमावचय-कलाओ दंसिआ दिट्ठिआ भणिउं. ४९

सारङ्गि । "शार्ङ्गे ङात् पूर्वोऽत्" [१००.] इति ङात् पूर्वः अत् ॥

छम । रयण । सलाह । "क्ष्माश्लाघा०" [१०१.] इत्यादिना अन्त्यव्यञ्जनात् पूर्वः अत् ॥

४८. युवजनानां जनितस्नेहाः प्रियायाम् उत्पादिताभिलाषाः प्रोषितानां विरह एव प्रियावियोग एव संतापकत्वाद् अग्निस्तस्मिन् स्नेहसमाः तद्वृद्धिजननाद् घृतादिसदृक्षाः । मदनप्रताप एव सोढुम् अशक्यत्वेन अग्निः तेन निभास्तुल्याः प्लक्षतरोः पल्लवाः किशलयानि जाताः ॥

सणेह णेह । अगणिम्मि अग्गि । "स्नेहाग्न्योर्वा" [१०२.] इति संयुक्तान्त्यात् पूर्वः अत् ॥

पलक्ख । "प्लक्षे लात्" [१०३.] इति लात् पूर्वः अत् ॥

४९. त्यक्तकृत्स्नह्रीकाभिः मुक्तसख्यादिसक्तसमस्तलज्जाभिः । श्रीनन्दनः स्मरः तस्य याः क्रियाः कटाक्षविक्षेपसहास्यकथाद्यास्तासाम् अर्हा योग्या यास्तरुण्यस्ताभिः अथ सर्ववनराजिपुष्पोद्गमानन्तरं कुसुमावचयकला भणित्वा एवमेवं क्रियन्ते इति परस्परम् उक्त्वा दिष्ट्या आनन्देन दर्शिताः प्रकटिताः ॥

सिरि । किरिआरिह । कसिण । हिरिआहिं । दिट्ठिआ । "ह्रींश्री०" [१०४.] इत्यादिना एषु संयुक्तान्त्यात् पूर्व इः ॥

---

१ B C °सिणेहा°.

वासेणं वरिसेहिवि नामरिसो किर पियाइ जो गमिही,
सो दरिसिअ नव-चूए पिए गओ झत्ति हरिस-वसा. ५०
मयण-वइरग्गि-तत्तेण तोसिआ सुदढ-माण-तविअ-पिआ
कवि वज्ज-कढिण[1]-हिअया केणवि दाउं बउल-दामं. ५१
कीइवि किलन्त-कम-विप्पव-हरणा मल्लिआण मालाओ
महु-सुक्क-पक्ख-जुण्हा-पवव्व उप्पाविआ गयणे. ५२

५०. वसन्तकुसुमोच्चयमेव गाथात्रयोविंशत्या प्राह ॥ वर्षेण एकेन वर्षैरपि बहुभिः। किलेति संभावने। प्रियाया योऽमर्षः मानो नागमत् स दर्शितनवचूते इतः पश्येत्यङ्गुल्या प्रकटितमाकन्दे प्रिये झटिति तत्क्षणादेव हर्षवशात् चूतदर्शनोद्भूतरणरणकोपशमप्रियदर्शनोत्थप्रमोदाद् गतः ॥

५१. मदन एव वज्राग्निः अनुपशमकवह्निस्तेन तप्तेन दग्धेन केनापि [सुदृढमानतप्तप्रिया] सुदृढमानेन अनिवर्तकाहंकारेण तप्ता अत्यन्तम् असहना प्रिया वज्रकठिनहृदया कापि बकुलदाम दत्त्वा तोषिता ॥

दंसिआ दरिसिअ। वासेणं वरिसेहि। वइर वज्ज। तत्तेण तविअ। "र्शर्ष०" [१०५.] इत्यादिना संयुक्तान्त्यात् पूर्वे इर्वा ॥ व्यवस्थितविभाषया क्वचिन्नित्यम्। नामरिसो। हरिस ॥

५२. [कयापि] क्लान्तानां खिन्नानां क्लमः खेदः तेन विप्लवः अङ्गविसंष्ठुलता[1] तस्य हरणीः[2] शैत्याद् अपहारिका मल्लिकानां विचकिलकुसुमानां मालाः स्रजो गगने उत्प्लाविता उत्क्षिप्ताः सत्यः उत्प्रेक्ष्यन्ते मधुरेव सर्वत्र पुष्पोद्गमैः शौक्ल्यकरणात् शुक्लपक्षः। तस्य ज्योत्स्नाप्लवा इव चन्द्रिकापूरा इव ॥

किलन्त। "लात्" [१०६.] इति संयुक्तान्त्यलात् पूर्वे इः। क्वचिन्न। कम। विप्पव। सुक्क-पक्ख। [पव]। उप्पाविआ ॥

---

१ B °कढण°.

---

1 B °संस्थुलता. 2 B हरणी शौ°.

गुम्फन्ती जव-दामं भविअ-सिआवाइ-चेइअ-निमित्तं
कावि जुवई जुवाणय-मण-थेरिअ-चोरिअम् अकासि. ५३
सिविणम्मिवि अइदुलहा सिणिद्ध-कुसुमा सणिद्ध-मयरन्दा
परिमल-णिद्धा कीइवि रइआ वासन्तिआ-माला. ५४
कण्ह-कसिणालि-कसणा लवली गन्धारिहावि नोच्चिणिआ
केणवि कज्जल-कण्हं सुमरिअ कवरिं पिअयमाए. ५५

५३. भव्यं यत् स्याद्वादिनो जिनस्य चैत्यं तन्निमित्तं जपादाम गुम्फन्ती ग्रथ्नती कापि युवती युवमनसां यत् स्थैर्यं निर्विकारता-दार्ढ्यं तस्य सलीलपुष्पग्रहणगुम्फादिना हरणम् अकार्षीत् ॥

भविअ । सिआवाइ । चेइअ । थेरिअ । चोरिअ । "स्याद्भव्य०" [१०७.] इत्यादिना स्यादादिषु चौर्यसमेषु च यात् पूर्व इः ॥

५४. स्वप्नेप्यतिदुर्लभा तथाविधाया आजन्माप्यदर्शनात् । स्नि-ग्धानि अरूक्षाणि । सरसानीत्यर्थः । एवंभूतानि कुसुमानि यस्यां सा तथा स्निग्धमकरन्दा सार्द्रपरागा अतएव परिमलेन स्निग्धा भ्र-मराणां प्रिया वासन्तिकामाला माधवीलतास्रक् कयापि रचिता ग्रथिता ॥

सिविणम्मि "स्वप्ने नात्" [१०८.] इति नात् पूर्व इः ॥

सिणिद्ध सणिद्ध । "स्निग्धे वाऽदितौ" [१०९.] इति नात् पूर्वौ अदितौ वा । पक्षे णिद्धा ॥

५५. कृष्णवत्कृष्णा ये अलयस्तैः कृष्णा । मकरन्दपानाय षट्प-दाच्छादितेत्यर्थः । गन्धेन सौरभ्येण अर्हा पुष्पोच्चययोग्यापि कज्ज-लवत्कृष्णां प्रियतमायाः कबरीं वेणिं स्मृत्वा सादृश्यात् केनापि ल-वली नोच्चिता । प्रियानुध्यानविह्वलत्वेन न तत्कुसुमावचयः कृत इत्यर्थः ॥

अणरह, अणरुह-दामं रे मुक्ख-मुरुक्ख, करसि इअ भणिउं
पोम्मच्छीए हणिओ कोवि पिओ पाय-पउमेण. ५६

छउमेण अॅछम्मेण य साम-दुवारेण दण्ड-वारेण
केणवि कावि अगेज्झा बउलेहि पसाइआ तणुवी. ५७

गरुवीओ लवलीओ सुहुमे[1] वत्थे सुरुग्घजे खित्ता
कीएवि हु मुद्धाए सुवे विहसिरावि कलिआओ. ५८

कसिण कसण कण्हं। "कृष्णे वर्णे वा" [११०.] इति संयुक्तान्त्यात् पूर्वौ अदितौ वा। वर्ण इति किम्। विष्णौ कण्ह ॥

५६. अनर्ह विप्रियकरणाद् अयोग्य रे मूर्खमूर्ख वठरवठर अनर्हदाम अमनोज्ञत्वाद् मम अयोग्यां मालां करोषीति भणित्वा पद्माक्ष्या कोपि प्रियः[1] पादपद्मेन हतः ॥ मुक्ख-मुरुक्ख इत्यत्र कोपे "संमत्यसूया०" इत्यादिना द्विरुक्तिः ॥

अरिहा अणरह अणरुह। "उच्चार्हति" [१११.] इति संयुक्तान्त्यात् पूर्वं उत् अदितौ च ॥

५७. छद्मना शाठ्येन अच्छद्मना आर्जवेन सामद्वारेण प्रियवाक्यमुखेन दण्डः यदि त्वं मदुक्तं न करिष्यसि तदा न त्वं मम प्रिया नाहं तव प्रियः इत्यादिरूक्षवाक्यद्वारेण च कापि तन्वी मृद्वङ्गी अगृह्या अनावर्जनीया केनापि बकुलैः केसरकुसुमैः प्रसादिता प्रसन्नीकृता ॥

मुक्ख मुरुक्ख। पोम्म पउमेण। छउमेण अछम्मेण। [दुवारेण वारेण] "पद्मच्छद्ममूर्खद्वारे वा" [११२.] इति संयुक्तान्त्यात् पूर्वं उत् वा ॥

५८. सूक्ष्मे सुघ्नजे देशविशेषोत्पन्ने वस्त्रे। हु इति निश्चितम्। कयापि मुग्धया अविचक्षणया गुर्वीतो महत्या लवलीतः श्वः आगामिदिने विहसित्र्योपि विकसनशीला अपि कलिकाः कोरकाः क्षिप्ताः

१ B सुहमे. C सुहुमे.

1 B प्रेयान्.

कुसुमाकर-रिउ-स-जणा सुवे जणा पारिजाय-तरुणो व्व,
सर-जीआभालि-कुला सर-ठग-वाणारसि-पएसा, ५९

आणालव्व कणेरूहि, कुरंवया[1] दढयरं[2] समालिद्धा
वर-विलयाहि अहरिआलचपुर-मरहट्ठ-जुवईहिं. ६०

न्यस्ताः। विचक्षणा हि प्रतीक्ष्य स्वयं विकसिता एव ता गृह्णाति तया तु अन्यथा कृतम् इति मुग्धत्वम् ॥

तणुवी। गरुवी। उकारान्ता ङीप्रत्ययान्तास्तन्वीतुल्यास्तेषु "तन्वीतुल्येषु" [११३.] इति संयुक्तान्त्यात् पूर्वं उः॥ क्वचिद् अन्यत्रापि। सुरुग्घ॥ आर्षे। सुहुमं।

५९. युग्मम्। कुसुमानाम् आकरः उत्पत्तिस्थानम् ऋतुः। वसन्त इत्यर्थः। तस्य स्वजना इव तदुदये तेषां समृद्धिभावाद् बन्धव इव। तथा पुष्पपत्रादिसादृश्याद् मन्यन्ते स्वजना इव सहोदररूपा बान्धवा इव पारिजाततरोर्देववृक्षस्य। स्मरस्य ज्या प्रत्यञ्चा तदाभम् अलिकुलं येषु ते तथा। स्मर एव ठको विप्रतारकस्तस्य वाराणसीप्रदेशा इव। यथा वाराणसी ठकानां स्थानं तथा एते दंपत्योरुत्कण्ठादिजननात् स्मरस्येति भावः॥

६०. एवंवर्णितस्वरूपाः कुरवकाः अधरिता लावण्यप्रशस्यसंस्थानादिना पराभूताः अचलपुरं च नगरविशेषः। महाराष्ट्रं च सुराष्ट्रम्। तयोर्युवत्यो यकाभिस्ताभिर्वरवनिताभिः दृढतरम् अत्यर्थं पुष्पोच्चयाय समाश्लिष्टाः। यथा आलानानि आलानस्तम्भाः करेणुभिः॥ "ताक्ष्यर्थवचनायाः" [१.३३] इति आलानस्य पुंस्त्वम्॥

सुवे। सुवे। "एकस्वरे श्वःस्वे" [११४.] इति श्वःस्वयोरन्त्यव्यञ्जनात् पूर्व उत्। एकस्वर इति किम्। सजणा॥

जीआ। "ज्यायाम् ईत्" [११५.] इति अन्त्यव्यञ्जनात् पूर्वं ईत्॥

वाणारसि। कणेरूहि। "करेणू०" [११६.] इत्यादिना रणयोर्व्यत्ययः। करेणू इति स्त्रीलिङ्गनिर्देशात् पुंसि न॥

---

[1] B कुरु°. We with C. [2] B दढतरं.

---

1 B सयणा. C wanting.

लवणिम-जलॅ-द्रह-निह-नाहि-मण्डले, उच्चिणेसु लहुअम् इमं
हलिआर-गोरि, हरिआल-वन्नयं हलुअम् अमिलायं. ६१
वण-सिरि-णडाल-तिलयं तिलयं गेय्हं तए वर-णलाडे,
गेज्झाथोव-परिमलं अथोक्क-जहणे, अथेव-सिरि. ६२
दाही अथोअ-कुसुमेहि सेहरं दिट्ठिएहं[१] बिम्बोट्ठि,
धूआ-बहिणी-भइणी-दुहिअव्व तुह प्पिआ लवली. ६३

आणाल। "आलाने लनोः" [११७.] इति लनोर्व्यत्ययः॥
अलचपुर। "अचलपुरे चलोः" [११८.] इति चलयोर्व्यत्ययः॥
मरहट्ठ। "महाराष्ट्रे हरोः" [११९.] इति हरयोर्व्यत्ययः॥

६१. [७२] द्वादशभिः कुलकम्। बहिः अबहिः स्फुटप्रेमभिः मनोवाक्कायेषु व्यक्तानुरागैः कैरपि तरोरधः रतेर्मातृष्वसृदुहितर इव निरतिशयसौन्दर्याद् उत्प्रेक्ष्यन्ते स्मरप्रियाया जननीभगिनीपुत्रिका इव प्रेयस्यो वल्लभाः इति पूर्वोक्तरीत्या आलपिताः सस्नेहं भणिताः॥ [६१]। आलपनप्रकारमेवाह। लवणिमा लावण्यं स एव दृष्टथाप्यायकत्वेन जलं तस्य ह्रदनिभं नदकल्पं नाभिमण्डलं यस्यास्तस्या आमन्त्रणम्। तथा हरितालवद् गौरि गौरवर्णे हरितालवद् वर्णो यस्य तत् लघुकं सूक्ष्मम् इदं पुरोवर्ति अमिलातकं वर्णपुष्पं लघुकं शीघ्रं यथा भवति एवम् उच्चिनु त्रोटय॥

६२. हे वरललाटे रम्यभालस्थले अस्तोकजघने विशंकट[1]कटीतटाग्रभागे त्वया वनश्रीललाटस्य तिलकमिव शोभाकृत्त्वात् पुण्ड्रकमिव। ग्राह्यो नासिकापेयः अस्तोकः परिमलो यस्य तत् तथा अस्तोकश्रि प्रभूतशोभं तिलककुसुमं ग्राह्यम्॥

६३. दुहिता च पुत्रिका भगिनी च स्वसा भगिनीदुहिता च ता इव प्रिया लवली। बिम्बवद् ओष्ठो यस्यास्तस्या आमन्त्रणम्। हे बि-

१ B C हि.

1 B C बिसंकट°.

छूढासव-गण्डूसे खित्त-पउत्ताडणे समुच्चिणसु
पुप्फाइँ वउल-वच्छे असोअ-रुक्खे अ विलय-वरे. ६४
सुर-वणिआ-नाग-त्थी-अकूर-कय-हरिसम् ईसि-उल्लसिअं
पिच्छेत्थी-धिइ-जणइं दिहि-मइ, हिन्ताल-मञ्जरिअं. ६५
सिसु-मञर-जुव-वञर-जर-मज्जारेहिँ पल-भमा दिट्ठं
वेरुलिअ-केसि, वेडुज्ज-भूसणे, किंसुअं लेसु. ६६
एण्हिं पिच्छेत्ताहे गिण्हसु रम्भं, कुणेसु अ इमाए
पुरिमाणंपि अपुव्वं आमेलं हित्थ-हरिणच्छि. ६७

म्बोष्ठि तव इह अत्र उद्याने अस्तोककुसुमैः शेखरं दिष्ट्या प्रीत्या दास्यति। लवल्याः कुसुमभरनम्रत्वाद् इत्थम् उक्तिः। बन्धुश्च बन्धवे पुष्पशेखरादि ददाति॥

६४. क्षिप्तासवगण्डूषे बकुलवृक्षे। क्षिप्तं कृतं पादोत्ताडनं यत्र तत्र अशोकवृक्षे च हे वनितावरे अङ्गनाश्रेष्ठे पुष्पाणि समुच्चिनु। त्वद्गण्डूषक्षेपपदाघाताभ्यां पूर्णदोहदत्वेन बकुलाशोकयोः सांप्रतं पुष्पावचयसमयः संवृत्त इति भावः॥

६५. सुरवनितानागस्त्रीणाम् अनीषत् अत्यर्थं सौरभ्यादिना कृतहर्षाम् ईषत् मनाग् उल्लसिताम् उद्भिन्नकोरकां स्त्रीणां धृतेः सौख्यस्य शैत्यात् जनिकाम्। धृतिः संतोषो विद्यते यस्या यद्वा धृतौ मतिर्यस्यास्तस्याः संबोधनम्। हे धृतिमति धृतिमते वा पश्य हिन्तालस्य मञ्जरिकां पुष्पितलताम्॥

६६. शिशुमार्जारयुवमार्जारजरन्मार्जारैः बालतरुणवृद्धबिडालैः पलभ्रमात् आरक्तत्वेन मांसभ्रान्त्या दृष्टं किंशुकं पलाशकुसुमम् हे वैडूर्यकेशि नीलमणितुल्यचिकुरे हे वैडूर्यभूषणे मरकतखचितालंकारे लाहि गृहाण॥

६७. इदानीं सांप्रतं पश्य रम्भाम् इदानीं गृहाण रम्भाम् कुरुष्व

१ C °उब्भसिअं. २ B रब्भं. C रत्तं.

तट्ठातत्थालि-कुलो भयस्सई अट्ठमोव्व पहिआण,
तुह जुग्गो पुन्नामो रूवेण बहस्सइ-घरिल्ले. ६८

अमइल-तणु, परिगुम्फिअ-पोप्फलि-मउरेण भसल-मलिणेण
अवह-कुचोवह-हत्थोभय-चलणे[1] तुज्झ भूसेमि. ६९

सिप्पि-पिहु-नयण-छुत्तोत्तंसे, आढत्त-संझ-रायम् इमं
उच्चिणसु भमर-छिक्कं महु-पाइक्कं जवा-कुसुमं. ७०

त्र अस्या अनया वा रम्भाया रम्भया वा पूर्वासामपि पूर्वकृतापीडानामपि नायिकानाम् अपूर्वम् असंजातपूर्वम् । आश्चर्यकारीति भावः । आपीडम् अवतंसम् हे त्रस्तहरिणाक्षि चकितकुरङ्गनेत्रे ॥

६८. त्रस्तात्रस्तमिव चञ्चलत्वान्मन्यते चकिताचकितमिव अलिकुलं यत्र स तथा बृहस्पतिरिव अष्टमः पीडाकारित्वात् पथिकानाम् । यद् उक्तम्

द्वादशदशमचतुर्थे जन्मनि षष्ठाष्टमे तृतीये च ।
व्याधिं विदेशगमनं मित्रविरोधं च सुरगुरुः कुरुते ॥ १ ॥

पुन्नागस्तत्र योग्यः । विकस्वरपुष्पभास्वरत्वात् कुसुमावचयोचित इत्यर्थः । हे रूपेण कृत्वा बृहस्पतिगृहिणि ॥

६९. भसलैर्मलिनेन मकरन्दपानासक्तैः षट्पदैः श्यामलेन । परिगुम्फितो यः पूगफल्या मुकुरो बालपुष्पं तेन कृत्वा हे अमलिनतनु विशदमूर्ते तव उभयकुचोभयहस्तोभयचरणान् भूषयामि अलंकरोमि ॥

७०. शुक्तिवत् पृथुनी विस्तीर्णे ये नयने ताभ्यां छुप्तः स्पृष्टः उत्तंसः कर्णपूरो यया तस्याः संबोधनम् । हे शुक्तिपृथुनयनच्छुप्तोत्तंसे आरब्धः अरुणत्वात् प्रकृतः संध्याराग इव येन तत् तथा भ्रमरैः सौरभ्यात् छुप्तं मधोर्वसन्तस्य पदातिं कामिमोहनादितत्कर्मकारित्वेन भृत्यम् इदं पुरोवर्ति जपाकुसुमम् उच्चिनु ॥

---

१ B °चरणे.

आरद्ध-बहल-परिमल-केलि-पयाईकयन्न-तरु-कुसुमं,
किडि-दाढ-सुत्ति-भङ्गोज्जलम् उच्चिण फुल्ल-वेइल्लं. ७१
वाहिं अबाहिरे फुड-पेम्मेहिं पीअसीओ तरु-हेट्ठे
केहिंपि इआलविआ रईइ माउच्छ-धूअव्व. ७२

७१. आरब्धा या बहलपरिमलस्य केलिर्विलासः तया पदातीकृतानि । अधःकृतानीत्यर्थः । अन्यतरूणां कुसुमानि येन तत् तथा । किरिः शूकरस्तस्य दंष्ट्रा च शुक्तिश्च तयोर्यो भङ्गश्छेदः तद्वद् उज्ज्वलं फुल्लविचकिलं विकसितमल्लिकाकुसुमं त्वम् उच्चिनु ॥

द्रह । "ह्रदे हदोः" [१२०.] इति हदयोर्व्यत्ययः । आर्षे हरए मह-पुण्डरिए ॥

हलिआर हरिआल । "हरिताले रलोर्न वा" [१२१.] इति रलयोर्व्यत्ययो वा ।

लहुअं हलुअं । "लघुके लहोः" [१२२.] इति लहोर्व्यत्ययो वा ॥

णडाल णलाडे । "ललाटे लडोः" [१२३.] इति लडोर्व्यत्ययो वा । आदेर्लस्य णविधानाद् [१. २५७] द्वितीयो लः स्थानी ॥

गेय्हं गेज्झ । "ह्ये ह्योः" [१२४.] इति हययोर्व्यत्ययो वा ॥

अथोव अथोक्क अथेव । "स्तोकस्य थोक्कथोवथेवाः" [१२५.] इति स्तोकस्य त्रय आदेशा वा । पक्षे अथोअ ॥

धूआ दुहिअ । बहिणी भइणी । "दुहितृभगिन्योर्धूआबहिण्यौ" [१२६.] इति अनयोः एतावादेशौ वा ॥

छूढा खित्त । वच्छे रुक्खे । "वृक्षक्षिप्तयो रुक्खछूढौ" [१२७.] इति अनयोर्यथासंख्यं रुक्खछूढौ वा ॥

विलय वणिआ । "वनिताया विलया" [१२८.] इति विलयादेशो वा । विलयेति संस्कृतेपीति केचित् ॥

अकूर । "गौणस्य०" [१२९.] इत्यादिना ईषतो गौणस्य कूरो वा । पक्षे ईसि ॥

[इत्थी] त्थी । "स्त्रिया इत्थी" [१३०.] इति स्त्रिया इत्थी वा ॥

निअ-माउसिआ-पिउसिअ-पिउच्छ-तणया-घरेव्व उज्जाणे
मिहुणेहिं हित्थ-तिरिच्छि-पिच्छिरेहिं रमिअम् एअं. ७३

धिइ दिहि । "धृतेर्दिहिः" [१३१.] इति धृतेर्दिहिर्वा ॥

मञ्जर वञ्जर । "मार्जार०" [१३२.] इत्यादिना मार्जारस्य मञ्जरवञ्जरौ । पक्षे मज्जारेहिं ॥

वेरुलिअ वेडुज्ज । "वैडूर्यस्य वेरुलिअं" [१३३.] इति वेरुलिअं वा ॥

एण्हि एत्ताहे । "एण्हि एत्ताहे इदानीमः" [१३४.] । पक्षे इआणिं इति ज्ञेयम् ।

पुरिमाणं । "पूर्वस्य पुरिमः" [१३५.] । पक्षे अपुव्वं ॥

हित्थ तट्ठा । "त्रस्तस्य हित्थतट्ठौ" [१३६.] । पक्षे तत्थ ॥

भयस्सई । "बृहस्पतौ बहो भयः" [१३७.] । पक्षे बहस्सइ ॥

मइल मलिण । अवह उभय । सिप्पि सुत्ति । छुत्तो छिक्कं । आढत्त आरद्ध । पाइक्कं पयाई । "मलिनोभ०" [१३८.] इत्यादिना एषां यथासंख्यं मइलादयो वा । उवहं इत्यपि केचित् ॥ आर्षे उभओकालं इति ज्ञेयम् ॥

दाढ । "दंष्ट्राया दाढा" [१३९.] । दाढा संस्कृतेऽप्यस्ति ॥

बाहिं अबाहिरे । "बहिसो बाहिंबाहिरौ" [१४०.] ॥

हेट्ठे । "अधसो हेट्ठं" [१४१.] ॥

७३. निजा चासौ मातुःस्वसा च पितुःस्वसा च पितृष्वसुस्तनया च तासां गृहं तस्मिन्निव उद्याने परस्परं तारामेलके सति त्रस्तं सभयं तिर्यक् तिरश्चीनं यथा भवति एवं प्रेक्षणशीलैर्मिथुनैः स्त्रीपुरुषरूपद्वन्द्वैः एतद् वक्ष्यमाणं रतं रमणं कृतम् ॥

माउच्छ माउसिआ । पिउसिअ पिउच्छ । "मातृपितुः०" [१४२.] इत्यादिना मातृपितृभ्यां परस्य स्वसुः सिआ छा इत्यादेशौ ॥

तिरिच्छि । "तिर्यञ्चस्तिरिच्छिः"[१४३.] ॥ आर्षे तिरिआ इति ज्ञेयम् ॥

---

1 B तिर्यच°. We with C and Dh.

आसण-ठिआइ घरिणीइ गह-वई झम्पिऊण अच्छीइं,
हसिरो मोत्तुं सङ्कं चुम्बिअ अन्नं सढो[1] मुइओ. ७४
मा सोउआण अलिअं कुप्प, मईआ सि तुम्हकेरो हं,
इअ केणवि अणुणीआ णिअय-पिआ पाणिणीअजडा. ७५
किं हवसि पारकेरा? न हु पारक्को तुहाहमू, इअ भणिआ
राइक्क-वार-विलया केणावि हु रायकेरेण. ७६

७४. रमणमेव गाथाषोडशकेनाह । आसनस्थिताया उपविष्टाया गृहिण्या अक्षिणी झम्पिऊणेति हस्ताभ्यां पिधाय शङ्कां भीतिं मुक्त्वा अन्याम् अपरां स्त्रियं चुम्बित्वा हसिता चस्करिकरणशीलः शठो गूढापराधो गृहपतिर्मुदितः ॥ "भ्रमेष्टिरिटिल्ल०" [४.१६१.] इति भ्रमेर्झम्पादेशे "धातवोऽर्थान्तरेपि" [४.२५९.] इति पिधानार्थत्वम् ॥

घरिणी । "गृहस्य घरोऽपतौ" [१४४.] इति घरः । अपताविति किम् । गह-वई ॥

पिच्छिरेहिं । हसिरो । "शीलाद्यर्थस्येरः" [१४५.] इति "तृन् शील०" इत्यादिभिर्विहितस्य प्रत्ययस्य इरः ॥

७५. अलीकं मरव्याद्युक्तकूटं श्रुत्वा आकर्ण्य त्वं मा कुप्य मा रोषं कुरु । मदीया त्वम् त्वदीयोहम् इति अनया रीत्या केनापि पाणिनीयेन पाणिनीयव्याकरणेन अजडा विचक्षणा निजकप्रिया स्ववल्लभा अनुनीता प्रसादिता । विचक्षणो हि सुखेनैव प्रसाद्यते ॥

झम्पिऊण । मोत्तुं । चुम्बिअ । सोउआण । "क्त्वस्तुम०" [१४६.] इत्यादिना तुम अत् तूण तुआण इत्येते आदेशाः ॥ वन्दित्तु इति अनुस्वारलोपात् । वन्दित्ता [इति] सिद्धसंस्कृतस्यैव वलोपेन । कट्टु इत्यपि ज्ञेयम् ॥

तुम्हकेरो । "इदमर्थस्य केरः" [१४७.] इति इदमर्थस्य प्रत्ययस्य केरः । न च भवति । मईआ । पाणिणीअ ॥

७६. किं त्वं परकीया भवसि यतः । हु इति निश्चितम् । नाहं

[1] B सठो.

तुम्हेच्चया य अम्हेच्चया य एगव्व होउ तणु-लट्ठी,
इअ जम्पिऊण दइआ केणवि सव्वङ्गिअं गहिआ. ७७

तुह पय-पह-पहिओ हं अप्पणयो, पीणिम-प्पणइ-जहणे,
पीणत्तण-सालि-थणे, इअ केणवि तोसिआ रमणी. ७८

तव परकीयः । किं तु तावकीन इत्यर्थः । ततस्त्वयापि मदीययैव भवितव्यम् इति भावः । इति अनया रीत्या केनापि राजकीयेन राजसंबन्धिना राजवारवनिता भणिता ॥

पारकेरा । पारक्को । राइक्क । रायकेरेण । "पर-राजभ्यां क्कडिक्कौ च" [१४८.] इति आभ्यां यथासंख्यं क्क डित् इक्कश्च । चकारात् केरश्च ॥

७७. यौष्माकी च आस्माकी च तनुयष्टिः एकवद् भवतु । आवयोः संयोगो जायताम् इति भावः । इति पूर्वोक्तं कथयित्वा केनापि सर्वाणि अङ्गानि व्याप्नोति यद् ग्रहणं तत् सर्वाङ्गीणं यथा भवति एवं दयिता प्रिया गृहीता ॥

तुम्हेच्चया । अम्हेच्चया । "युष्मद०" [१४९.] इत्यादिना अत्र एच्चयः ॥

एगव्व । "वतेर्व्वः" [१५०.] इति वतेः प्रत्ययस्य व्वः ॥

सव्वङ्गिअं । "सर्वाङ्गादीनस्येकः" [१५१.] इति "सर्वादेः पथ्यङ्ग०" इत्यादिना विहितस्य ईनस्य स्थाने इकः ॥

७८. पीनत्वप्रणयि काठिन्ययुक्तं जघनं यस्यास्तस्याः संबोधनम् । तथा हे पीनत्वशालिस्तनि तव अहम् आत्मीयः स्वकीयः पदपथपान्थः । अनुचर इत्यर्थः । इति अनया रीत्या केनापि रमणी तोषिता तोषं नीता ॥

पहिओ । "पथो णस्येकट्" [१५२.] । "नित्यं णः" इति यः पथो णो विहितस्तस्येकट् ॥

अप्पणयो । "ईयस्यात्मनो णयः" [१५३.] इति ईयस्य णयः ॥

पीणत्त-निहि-निअम्बे, तिलेल्ल-अङ्कोल्लतेल्ल-कन्तिल्ले,[1]
मा तित्तिएण कुप्पेत्ति इत्तिअं कोवि पियम् आह. ७९
जित्तिअमत्तं रत्तो म्मि,[2] एत्तिअं रज्ज; एत्तिलं किम् इमं?
केणवि एद्दहम् उत्ता तुण्हिका माणिणी जाआ. ८०

सिहिओ सि जेत्तिअं,[3] जेत्तिलं[4] च भणिओ सि, जेद्दहं थविओ,
न हु तेत्तिएण होसित्ति पई कीइवि उवालद्धो. ८१

७९. पीनत्वस्य निधिः स्थानं नितम्बो यस्यास्तस्याः संबोधनम्। तिलस्य स्नेहस्तिलतैलं तच्च अङ्कोठतैलं च ते इव कान्तिमति तद्वत्स्निग्धकान्तियुक्ते त्वं तावता सख्याद्युक्तालीकव्यलीकमात्रेण मा कुप्य। इति इत्थम् एतावत् इयन्मात्रं कोपि कश्चित् प्रियाम् आह ॥

पीणिम पीणत्तण। "त्वस्य डिमात्तणौ वा" [१५४.] इति त्वस्य डिमात्तणौ। पक्षे पीणत्त ॥

तिलेल्ल। "अनङ्कोठ" [१५५.] इत्यादिना तैलस्य डेल्लः। अनङ्कोठाद् इति किम्। अङ्कोल्लतेल्ल ॥

८०. कश्चिन्मानिनीं प्रसादयन् तया च तत्संयुक्तस्त्वं न मयि तव प्रेमानुबन्ध इत्यादि सक्रोधं निर्भर्त्स्यमानः तां प्रति आह। यावन्मात्रं रक्तः अनुरागयुक्तोस्मि अहं त्वमपि इयत् एतावद् वा रज्यस्व अनुरागं कुरु। नाहम् अधिकम् अर्थये इत्यर्थः। इयत् एतावद् वा इदं क्रोधाडम्बरं किम्। निरर्थकम् इत्यर्थः। केनापि इयत् एतावद् वा उक्ता सती मानिनी तूष्णीका जाता। निश्चितस्ववाल्लभ्यतया न किंचिद् उपालेभे इत्यर्थः ॥

तित्तिएण। इत्तिअं। जित्तिअ। "यत्तद" [१५६.] इत्यादिना एभ्यो डावादेरतोः परिमाणार्थस्य इत्तिअः एतदो लुक् च ॥

८१. यावत् यत्परिमाणं स्पृहितः चेतसि वाञ्छितोसि यावद् भ-

[1] C °तिल्ल°. [2] Bc मि. [3] Bc जित्तिअं. [4] Bc जित्तिलं.

तं तेत्तिल-पेम्मं तुह न केत्तिअं? तेद्दहा य अणुवित्ती
न हु केत्तिलावि? केद्दहम् इत्थं कीइवि सढो भणिओ. ८२

सयहुत्तं विणइल्लो दइओ जोण्हाल-चन्द-सिरिमन्तो
णेहालूए कीइवि बाहुल्लच्छीहि अहिसित्तो. ८३

गव्विर, न माणइत्ता सहन्ति गव्वंति भणिअ, कीएवि
दइओ हणिओ हणुमा-लङ्गूल-पलम्ब-लट्ठीए. ८४

णितः आगच्छागच्छ त्वं मत्प्रिय इत्युक्तोसि यावच्च स्तुतः न त्वत्समः सौभाग्यपात्रम् अपरोस्तीति श्लाघितः । हु इति निश्चितम् । न तावता तावन्मात्रेण भवसि । अनुरज्यस इत्यर्थः । इति अनया रीत्या कयापि पतिर्भर्ता उपालब्धः रेरे धृष्ट दुराचार आराध्योसि इति निर्भर्त्सितः ॥

८२. तत् तावत् प्रेम तव न कियत् कियन्मात्रम् । तावती च अनुवृत्तिरपि अनुकूलकरणमपि तव नैव कियती । असत्प्रायप्रेमानुवृत्तिरसीत्यर्थः । इत्थम् अनया रीत्या कियदपि कयापि शठः गूढापराधो भणितः ॥

एत्तिअं एत्तिलं एद्दहं । जेत्तिअं जेत्तिलं जेद्दहं । तेत्तिएण तेत्तिल तेद्दहा । केत्तिअं केत्तिला केद्दह । "इदंकिमश्च०" [१५७.] इत्यादिना इदंकिंभ्यां यत्तदेतद्भ्यश्च अतोर्डावतोर्वा डित् एत्तिअ एत्तिल एद्दह एतल्लुक् च ॥

८३. शतकृत्वः । अनेकश इत्यर्थः । विनयवान् । अलीकापनयनाय पादप्रणत इत्यर्थः । ज्योत्स्नावच्चन्द्रस्य या श्रीः आह्लादिका शोभा तद्वान् सचन्द्रिकचन्द्रशोभायुक्तो दयितः प्रियः स्नेहवत्या कयापि बाष्पवदक्षिभिः स्नेहवशोद्भूताश्रुप्रवाहयुक्तलोचनैः अभिषिक्तः आर्द्रीकृतः ॥

सयहुत्तं । "कृत्वसो हुत्तं" [१५८.] । वारे विहितकृत्वसः हुत्तं ॥

८४. रे गर्विन् साहंकार न मानवत्यः अहंकारवत्यो नायिका गर्वं

१ C किति०.

1 Bc जिन्तिअं. 2 Bc जि'न्तलं. 3 Bc तिन्तिल. 4 C गर्वित.

अन्नत्तो अन्नहि एसि, तहवि अन्नत्थ अन्नदो जासि;
एकसि न खु त्थिरो सित्ति पिओ कीइवि उवालद्धो. ८५
एक्कसिअं चिअ भणिओ एकइआ णेगया य गामिल्लिं
अप्पुल्ल-पियं व[1]च्चेत्ति भच्छिओ कोवि अन्नाए. ८६

सहन्ते । ताः प्रियाणां गर्वापनोदं कुर्वन्तीत्यर्थः । इति भणित्वा कयापि हनुमल्लाङ्गूलवत् प्रलम्बा द्राघीयसी या यष्टिभ्रूतादिलता तया दयितो हतस्ताडितः ॥

विणइल्लो । जोण्हाल । सिरिमन्तो । णेहालुए । बाहुल्ल । गव्विर । माणइत्ता । "आल्विल्लो°" [१५९.] इत्यादिना मतोः स्थाने आलुइत्यादयो नव आदेशा यथाप्रयोगम् । केचिद् मादेशमपि इच्छन्ति । हणुमा ॥

८५. अन्यतः सपत्नीतः अन्यत्र अपरसपत्न्याम् एषि गच्छसि । तत्रापि एवमपि सति अन्यतः अपरसपत्नीतः अन्यत्र प्रतिपक्षनायिकायां यासि । एकत्र एकस्यां दयितायां नैव स्थिरोसि । इति अनया रीत्या कयापि प्रिय उपालब्धः ॥

अन्नत्तो अन्नदो । "त्तो दो तसो वा" [१६०.] ॥
अन्नहि । तह । अन्नत्थ । "त्रपो हिहत्थाः" [१६१.] ॥

८६. एकदैव भणितस्त्वम् एकदा अनेकदा च ग्राम्याम् आत्मीयाम् आत्मनो वा प्रियां व्रज । एकवाक्येनैव त्वदग्रतस्तावद् एतद् उक्तम् यद् उत त्वं यथेच्छं स्ववल्लभाम् अभिसर । न मम त्वया किमपि प्रयोजनम् इत्यर्थः । इति इत्थम् अन्यया कोपि भर्त्सितः ॥

एक्कसि एक्कसिअं एक्कइआ । "वैक°" [१६२.] इत्यादिना एकाद् दाप्रत्ययस्य सि सिअं इआ । पक्षे णेगया ॥

गामिल्लि । अप्पुल्ल । "डिल्लडुल्लौ भवे" [१६३.] इति डितौ इल्लोल्लौ ॥

१ C वच्चित्ति.

1 B C om. °प्र°.

निच्च-नवल्लय-रच्चिर, मं ऐक्क-मणं नवाणुराइल्लं
एकल्लं चिअ मुञ्चसि, कीइवि रमणम्मि इअ रुन्नं. ८७
अवरिल्लञ्चल-गहिओ भालोवरि-निहिअ-भुमयम् अन्नाए
भमया-दासोव्व पिओ विहसन्तो सणिअम् अवगूढो. ८८
मणयं च मुच्छिरो, वेविरो अ मणिअं, पिओ मणा हसिरो,
कीइवि रइ-मीसाए वम्मह-मीसालिओ रमिओ. ८९

८७. नित्यं नवे अन्यान्यनायिकारूपे रागवन् रागपर एकस्मिन् त्वय्येव मनो यस्याः सा तथा तां नवानुरागाम् उदीयमानस्नेहाम् एकाम् असहायामेव मां मुञ्चसि कयापि रमणे इति इत्थं रुदितं साश्रुपातं जल्पितम् ॥

अप्फुल्ल । नवल्लय । राइल्लं । "स्वार्थे कश्च वा" [१६४.] इति कः । चकारात् डितौ इल्लोल्लौ ॥

नवल्लय । एकल्लं । "ल्लो नवैकाद् वा" [१६५.] इति ल्लः । पक्षे एक्क । नव ॥

८८. भालस्य उपरि ऊर्ध्वे निहिते धृते भ्रुवौ यत्र ग्रहणे तत् तथा । सकोपम् इत्यर्थः । एवम् उपर्यञ्चलेन उत्तरीयांशुकान्तेन गृहीतः अवष्टब्धः भ्रुवो दास इव तदुत्क्षेपमात्रेण कृत्यकरणात् मन्यते किंकर इव प्रियः अन्यया विहसन् धृष्टत्वाद् विकसन् शनैर्मन्दम् अवगूढः आलिङ्गितः ॥ ज्ञातापराधत्वेन पादपतनादिभिराराधयन्नपि निर्भर्त्सितत्वाद् गन्तुं प्रवृत्तः सन् कृतकोपं चेलाञ्चलेन गृहीत्वा मन्दम् आलिङ्गित इति भावः ॥

अवरिल्ल[1] । "उपरेः संव्याने [१६६.] इति ल्लः ॥ [संव्यान इति किम् । भालोवरि] ॥

भुमय भमया । "भ्रुवो०" [१६७.] इत्यादिना मया डमया इत्येतौ ॥

सणिअं । "शनैसो डिअम्" [१६८.] इति डित् इअम् ॥

८९. मनाग् मूर्छावान् मनाग् वेपवान् मनाक् च हास्यवांश्च । शठत्वात् तदावर्जनाय किंचित् तत्तद्भावभाग् इति भावः । मन्मथेन

१ C इक्कमणं. २ B C उव०.

1 Bc उवरिल्ल.

गिम्हो दीह-गन्ध-अन्धालिणि-दीहर-पत्त-चम्पओ,
मण-मउअत्तयाइ कामन्धल-विज्जुलिआ-दुरिक्खओ
दिट्ठो विज्जु-पीअ-नव-किंसुअ-पत्तल-पीवलोवणो,
तत्ताऊ विओअ-विहुरीकय-पन्थिअ-गोण-खेअणो. ९०

[मिश्रः सुरतेच्छायुक्तः प्रियः रतिमिश्रया] रतेच्छया मिश्रया सुरताभिलाषयुतया कयापि रमितः कामितः ॥

मणयं मणिअं । "मनाको न वा डयं च" [१६९.] इति डयं डिअं च । पक्षे मण। ॥

मीसालिओ । "मिश्राड्डालिअः" [१७०.] । पक्षे मीसाए ॥

९०. दीर्घगन्धेन पुष्पोत्थप्रभूतपरिमलेन अन्धाः । व्याप्ता इत्यर्थः । एवंभूता अलिन्यो यत्र स चासौ दीर्घपत्रश्च एवंभूतश्चम्पको यत्र स तथा । मनसो मृदुत्वेन अकठिनत्वेन कामान्धैर्विद्युद्वद् दुरीक्षः घनतरतापकृत्त्वेन द्रष्टुम् अशक्यः । विद्युद्वत् पीतानि पीतवर्णानि यानि नवकिंशुकपत्राणि प्रत्यग्रपलाशपुष्पपलाशानि तैः पीतानि उपवनानि यत्र स तथा । तप्तापः संतप्तपानीयः । वियोगेन विधुरीकृता दुःखिता ये पान्थास्त एव अचेतनत्वाद् गावस्तेषां खेदनः खेद[2]जनको ग्रीष्मो दृष्टः इति उत्तरसर्गार्थसूचनम् । राज्ञेति शेषः ॥ षत्तुगौ द्वितीयषष्ठौ जोलीर्वा द्विपदी एकः षण्मात्रः पञ्चचतुर्मात्रा गुरुश्च । [3]तथा द्वितीयषष्ठौ च गणौ जोलीर्वा द्विपदी ॥

दीह दीहर । "रो दीर्घात्" [१७१.] इति रो वा ॥

मउअत्तयाइ । "त्वादेः सः" [१७२.] इति स एव त्वादिर्वा ॥

अन्धा अन्धल । पत्त पत्तल । विज्जुलिआ विज्जु-पीअ पीअलो "विद्युत्पत्र°" [१७३.] इत्यादिना एभ्यः स्वार्थे लो वा ॥

तत्ताऊ । गोण । "गोणादयः" [१७४.] । गोणादयः शब्दा अनुक्तप्रकृतिप्रत्ययलोपागमवर्णविकारा बहुलं निपात्यन्ते ॥

इत्याचार्यहेमचन्द्रविरचितश्रीकुमारपालचरितद्व्याश्रयमहाकाव्यवृत्तौ तृतीयः सर्गः ॥

---

1 Bc डिय़ं. 2 C खेदन°. 3 C ते तथा for तथा.

तं निव-पुच्छिअ-दोवारिएण भणिअं ति. आम, गिम्ह-सिरी
उण्हेह सीअला णवि कयलि-वणे, पेच्छ, पुणरुत्तं. १

"हन्दि विदेसो! जीवइ हन्दि पिआ? हन्दि किं पिआ मुक्का?
हन्दि मरणं, जमो गिम्हो हन्दि," लवन्ति इअ पहिआ. २

१. अधुना सप्तसप्तत्या[1] गाथाभिर्ग्रीष्मर्तुं वर्णयन् आह । नृपेण कुमारपालभूपालेन पृष्टः वसन्तर्त्वसंभविपुष्पादिदर्शनात् कः संप्रति ऋतुरिति नोदितो यो दौवारिकः प्रतीहारस्तेन इति अमुना प्रकारेण भणितम् । तं इति वाक्योपन्यासे । विवृत्य उक्तम् इत्यर्थः । तदेव वाक्यार्थकर्मणा आह आमेत्यादि । आमेति अभ्युपगता अङ्गीकृता । ज्ञातेति यावत् । ग्रीष्मश्रीः इह उद्यानेस्ति । णवीति वैपरीत्यार्थत्वाद् अप्यर्थो ज्ञेयः । उष्णापि शीतला कदलीवने पश्य । राजन् इति शेषः । पुणरुत्तम् इति एकवारं दृष्ट्वा भूयोपि अवलोकयेति । एवम् अग्रेपि राजन् इति संबोधनपदं ज्ञेयम् ॥

["अव्ययम्" । १७५. । अधिकारोयम् । इतः परं ये वक्ष्यन्ते आ पादसमाप्तेस्ते अव्ययसंज्ञका ज्ञातव्याः] ॥

तं । "तं वाक्योपन्यासे" [१७६.] ॥

आम । "आम अभ्युपगमे" [१७७.] ॥

णवि । "णवि वैपरीत्ये" [१७८.] ॥

पुणरुत्तं । "पुणरुत्तं कृतकरणे" [१७९.] ॥

२. हन्दि इति विषादे । कष्टं विदेशोऽस्माकम् ॥ हन्दीति विकल्पे । जीवति प्रिया न वा ॥ हन्दीति पश्चात्तापे । किं प्रिया

---

1 B सप्तसा for सप्तसप्तत्या.

"हन्द महु, हन्दि परिमलम् इमं"व्व भणिरेहि भसल-मिहुणेहि,

उअ, सहइ कञ्चणारो मउडो इव गिम्ह-लच्छीए. ३

जणणिमिव, धूअंपिव, नत्तिविअ, सोअरंविव, सहिंव

मालारीओ सिणेहा नव-कञ्चण-केअइम् उवेन्ति. ४

जेण अहुल्ला लवली वोलीणा णइ वसन्त-उउ-लच्छी,

फुल्लं च धूलिकम्बं[१] तेण फुडाचेअ[२] गिम्ह-सिरी. ५

अस्माभिर्विरहदुःखम् अविचार्यैव मुक्ता । एवं च हन्दीति निश्चितं मरणम् अस्माकम् यतो हन्दीति सत्यम् यमः कृतान्तकल्पो ग्रीष्मः इति पान्था लपन्ति परस्परं जल्पन्ति ॥

हन्दि । "हन्दि विषादविकल्पपश्चात्तापनिश्चयसत्ये" [१८०.] ॥

३. हन्द इति । गृहाणेत्यर्थः । मधु मकरन्दम् । हन्दीति । गृहाणेत्यर्थः । परिमलं गन्धम् इदमिव भणितृभिः । मञ्जुगुञ्जितकरणाद् उत्प्रेक्ष्यते । एतद् मधु इदं[1] परिमलं गृह्णीत इत्यन्योन्यं भणनशीलैर्भसलमिथुनैः षट्पदद्वन्द्वैः कृत्वा उअ इति पश्येत्यर्थः । काञ्चनारो राजति नीलमणिकल्पालिकलितसुवर्णवर्णप्रसूनत्वेन । तर्क्यते । मुकुट इव ग्रीष्मश्रियः ॥

हन्द । हन्दि । "हन्द च गृहाणार्थे" [१८१.] ॥

४. जननीमिव । दुहितरमिव । नप्त्री पौत्री तामिव । सोदरा भगिनी तामिव । सखीमिव स्नेहाद् नवकाञ्चनकेतकीं नूत्नस्वर्णकेतकीं मालाकार्यः उपयान्ति । तत्कुसुमावचयार्थं समीपे गच्छन्ति ॥ ग्रीष्मे हि स्वर्णकेतक्यः पुष्प्यन्तीति ॥

इमंव । जणणिमिव । धूअंपिव । नत्तिविअ । सोअरंवित्र । सहिंव । "मिवपिव°" [१८२.] इत्यादिना एते इवार्थे अव्ययसंज्ञकाः प्राकृते प्रयुज्यन्ते वा । पक्षे मउडो इव ॥

५. वसन्तर्तुलक्ष्मीरतिक्रान्तैव । कथम् । येन लक्ष्यीकृत्य । काः ।

---

१ B कम्मं. C कम्मंबं. २ B C चेव.

---

1 So B C.

फुल्लच्च सुगन्धच्चिअ लयाण नोमालिआ बले रम्मा ;
जा किर मल्ली, जा इर जवा, बले ते मयण-बाणा. ६

सुत्ते जणम्मि जो हिर सद्दो चीरीण सुव्वए णवर,
गाअइ किल तस्स मिसा णवरि वसन्तस्स गिम्ह-सिरी. ७

अफुल्ला लवलीः ॥ तथा ग्रीष्मश्रीः स्फुटैव । कथम् । तेन लक्ष्मीकृत्य । किम् । फुल्लं धूलिकदम्बम् ॥ "गौणात् समया०" [हे० २. २.] इत्यादिना येनतेनयोगे द्वितीया । फुल्लं चेति चकारः पृथग्वाक्यद्योतनार्थः ॥

जेण । तेण । "जेण तेण लक्षणे" [१८३.] ॥

६. फुल्लैव सुगन्धैव । बले इति निर्धारणे । लतानां मध्ये नवमालिका रम्या ॥ तथा या । किलेति संभावयामि । मल्ली । या किल जपा । बले इति निश्चितम् । ते मदनस्य बाणौ । तत्साध्यपान्थमोहनादिकार्यस्य ताभ्याम् अनुष्ठानात् ॥

णइ । चेअ । च्च । च्चिअ । "णइ चेअ चिअ च्च अवधारणे" [१८४.] ॥

बले । "बले निर्धारणनिश्चययोः" [१८५.] ॥

७. सुप्ते जने यः किल शब्दश्चीरीणां भृङ्गारीणां[1] श्रूयते । किलेति प्रसिद्धौ । लोकस्वापवेलायां चीरीनादः श्रूयत इति लोकप्रसिद्धिः । णवरेति केवलम् । तस्य मिषात् चीरिकाध्वनिव्याजात् । णवरि इति आनन्तर्ये । वसन्तस्य अनन्तरम् किलेति संभावयामि । ग्रीष्मश्रीर्गायति हर्षाद् गानं करोतीव ॥

किर । इर । हिर । "किरेर हिर किलार्थे वा" [१८६.] । पक्षे किल ॥

णवर । "णवर केवले" [१८७.] ॥

णवरि । "आनन्तर्ये णवरि" [१८८.] ॥

---

1 B भृङ्गाराणां.

पहिआ, अलाहि गन्तुं, अणदइआण कुसलाइं इह णाइं;

माइं इह एध, हद्धी इअव्व चीरीहि उल्लविअं. ८

समुहोट्ठिअम्मि भमरे वेव्वेत्ति भणेइ मल्लिउच्चिणिरी

वारण-खेअ-भएहिं, भणिउं वेव्वे वयंसेत्ति. ९

वेव्व सहि, चिट्ठसु. हला निसीद. मामि रम. जासि कत्थ हले?

दे पसिअ. किमसि रुट्ठा? हुं, गिण्हसु कणय-भायणयं. १०

८. भोः पान्थाः । अलाहि इति निवारणे । अलं गत्वा । गमनेन स्मृतम् इत्यर्थः । अण इति नञर्थे । अदयितानां कान्तारहितानाम् । णाइं इति नञर्थे । इह अस्मिन् वने न कुशलानि । अतः । माइं इति मार्थे । मा इह वने एत । अपि तु स्वपत्नीपार्श्वे गच्छतेत्यर्थः । इतीव । हद्धी इति निर्वेदे । सनिर्वेदं यथा भवति एवं चीरीभिरुल्लपितम् । कूजितव्याजेन पान्थान् प्रति चीरिकाभिरिदम् उक्तम् इत्यर्थः ॥

अलाहि । "अलाहि निवारणे" [१८९.] ॥

अण । णाइं । "अण णाइं नञर्थे" [१९०.] ॥

माइं । "माइं मार्थे" [१९१.] ॥

हद्धी । "हद्धी निर्वेदे" [१९२.] ॥

९. वेव्वे इत्यामन्त्रणे । हे वयस्ये इति भणित्वा संमुखोत्थिते भ्रमरे वारणम् अलेर्हस्ततलचालनेन निषेधनम् खेदस्तन्निवारणादेव प्रयासः भयम् अलिदशनात् त्रासः तैः कृत्वा वेव्वे इति मल्लिकाम् उच्चेत्री मल्लिकापुष्पावचयकर्त्री भणति ॥

वेव्वे । "वेव्वे भयवारणविषादे" [१९३.] ॥

१०-२१. २१. अधुना[2] गाथाद्वादशकेन ग्रीष्मपानक्रीडाम् आह । द्वादशभिः कुलकम् । ग्रीष्मसुखं मानयितुम् अनुभवितुं प्रवृत्ता एता

1 B uncertain between स्मृ and सृ. 2 C अमुना.

हुं तुह पिओ न आओ? हुं किं तेणज्ज? सो हु अन्न-रओ.
तुमयं खु माणइत्ता. तस्स हु जुग्गा सि सा खु न तं. ११
सहि, वव्वरो खु, अह धीवरो हु, एसो खु तुज्झ ऊ रमणो,
ऊ इअ हसेइ लोओ. इमम्मि ऊ किं मए भणिअं? १२
ऊ अच्छरा मह सही, थू रे निक्किट्ठ कलह-सील अरे,
दासो सि इमाइ हरे, सढो सि ओ, ओ किमसि दिट्ठो? १३

वारवनिताः इति पूर्वोक्तरीत्या यदपि-तदपि क्षीबतया संबद्धासंबद्धं लपित्र्यो भाषणशीलाः पक्काः परिपाकप्राप्ता या द्राक्षास्तासां रसं पिबन्ति पानपात्रैर्धयन्ति ॥

१०. लपनप्रकारमेवाह । वेव्व इति आमन्त्रणे । हे सखि तिष्ठ । हलेति हे सखि निषीद । मामीति हे सखि रमस्व क्रीडां कुरु । हले इति हे सखि क्व यासि । दे इति सामान्येन संबोधने सख्यामन्त्रणे वा । हे सखि [प्रसीद] । किम् असि रुष्टा । हुं इति दाने । वितीर्णम् इत्यर्थः । कनकभाजनं गृहाण ॥

११. हुं इति पृच्छायाम् । पृच्छाम्यहं तव प्रियो नायातः । हुं इति निवारणे । श्रुतम् । अस्माकं किं तेनाद्य । नाधुना तेन प्रयोजनम् इत्यर्थः । हु इति निश्चितम् । सोऽन्यस्यां रतः । खु इति निश्चितम् । त्वं मानवती । हु इति ऊहे । संभावयामि च तस्य योग्या सा अन्या । खु इति ऊहे । संभावयामि च तस्य न योग्या त्वम् असि ॥

१२. हे सखि । खु इति संशये । वर्वरो वा । हु इति संशये धीवरो वा । खु इति विस्मये । एवं हुशब्दोपि । आश्चर्यम् एष समीपवर्ती तव । ऊ इति गर्हायाम् । निन्दितो रमणः । ऊ इति सूचने । दोषाविष्करणपूर्वम् इति अनया रीत्या इमं त्वत्प्रियं लोकः सखीजनरूपो हसति । अथ वा ऊ इति आक्षेपे । किं मया भणितं लोको हसति ईदृशम् अमुम् इति । एतद् मम वक्तुं न युक्तम् इत्यर्थः ॥

१३. ऊ इति आश्चर्यम् । अप्सरा मम सखी । थू इति कुत्सायाम्

१ B खु.

1 C सूतं. B wanting.

अव्वो नओ तुह पिओ. अव्वो तम्मेसि कीस? किं एसो
अव्वो अन्नासत्तो? अव्वो तुज्झेरिसो[1] माणो! १४
अव्वो पिअस्स समओ! अव्वो सो एइ. रूसणो अव्वो.
अव्वो कट्ठं! अव्वो किं एसो सहि मए वरिओ? १५
अइ एसि रइ-घराओ, वणे मिलाणा सि दइअ-दरवलिआ.
मुणिमो वणे न मुणिमो, तं न वणे कहइ न जम् अङ्गं. १६

रे इति संभाषणे। निकृष्ट अधम कलहशील । अरे इति रतिकलहे । रतिकलहकारकेत्यर्थः । हरे इति संभाषणे रतिकलहे क्षेपे च। दासोसि अस्या मत्सख्याः। ओ इति सूचने । शठोसि गूढापराधो वर्तसे। ओ इति पश्चात्तापे। किम् असि दृष्टः। त्वद्दर्शनात् पश्चात्तापो जात इत्यर्थः ॥

१४. अव्वो इति सूचने। नतस्त्वां प्रियः । अव्वो इति कष्टम्। किं ताम्यसि। अव्वो इति संभाषणे। किम् एष समीपवर्ती अन्यासक्तः। अव्वो इत्यपराधे विस्मये च। तत्र ईदृशो मानः । सप्रणये प्रणयिनि मानकरणाद् अपराध आश्चर्यं च ॥

१५. अव्वो इति आनन्दे । प्रियस्य समयः आगमनलक्षणः। अव्वो इति आदरे। एति आगच्छति स मद्वल्लभः। अव्वो इति भये। बिभेमि रोषणः स्तोकापराधेपि कोपनः सः। अव्वो इति खेदे विषादे च। कष्टं यथा भवति एवं खिन्ना विषण्णा चाहम् इत्यर्थः। अव्वो इति पश्चात्तापे। अनुतप्तास्मि किम् एष सखि मया वृतः ॥

१६. अयीति संभावयामि। त्वम् एषि आगच्छसि रतिगृहात्। वणे इति संभावयामि । यतो दयितेन उपभुक्ता सती म्लाना विच्छायासि। वणे इति विकल्पे। जानीमो वा न जानीमः। परं वणे इति निश्चितम्। तद् नास्ति यद् अङ्गं न कथयति। दन्तक्षतादिप्रकट-

[1] C तुज्झेरिसो.

दासो वणे न मुच्चइ मणे पिओ तुज्झ. मुच्चइ स अम्मो
पत्तो खु अप्पणोच्चिअ तए सयंचेअ निउणाए! १७

पाडिक्कं दइआओ, ताण वयंसीओ पाडिएक्कं च,
पत्तेअं मित्ताइं उअ एसो एइ भासन्तो. १८

देक्ख तुहेसो दइओ. कहम् इहरा पुलइआ सि दट्ठुम् इमम्?
भणिमो न वयम् इअरहा. मुणिअम् इमं एक्कसरिअंति. १९

नाद् अङ्गमेव सुरतक्रीडितं प्रतिपादयतीत्यर्थः । उपभुक्तस्य तक्षादित्वात् [४. ३९९.] दरवलः ॥

१७. वणे इत्यनुकम्प्ये । मणे इति विमर्शे । अन्ये मन्ये इत्यर्थेपि इच्छन्ति । अहं विमृशामि मन्ये वा प्रियस्तव दासः अनुकम्प्य इति न मुच्यते ॥ स प्रियः अम्मो इति आश्चर्यम् स्वयमेव प्राप्तः खु इति आश्चर्यम् त्वया निपुणया [स्वयमेव] मुच्यते ॥ निपुणयेति सोल्लुण्ठम् । ज्ञातं तव नैपुण्यं यद् अत्यन्तप्रणतं प्रेयांसं स्वयं गृहम् आगतम् अवमन्यस इत्यर्थः ॥

१८. काचित् सखी कलिकौतुकिनी कांचन प्रति प्रियव्यलीकानि साक्षादेव दर्शयति । प्रत्येकं दयिता अन्या वल्लभाः प्रत्येकं तासां दयितानां वयस्याश्च प्रत्येकं मित्राणि च तासाम् अनुकूलानि भाषमाणः आवर्जनार्थम् आलपन् । उअ इति पश्य । एष त्वत्प्रियः एति आगच्छति ॥

१९. पश्य तव एष दयितः । कथम् इतरथा इमं दृष्ट्वा पुलकितासि । न च कूटभाषिकात्वम् अस्मासु आरोप्यम् यतो न वयम् इतरथा पुलकावलोकनं विना भणामः । अतः एक्कसरिअंति झगिति सांप्रतमेव वा इदं तवायं वल्लभ एवेति ज्ञातम् ॥

१ C तुब्भ. २ B C चेव. ३ B C °पि.

1 B C स्व. 2 B C सोल्लु°. 3 B वस्यश्च. C वयस्यश्च. 4 B D एक्कसरि अमिति.

मा तम्म मोरउल्ला दर-विअसिअ-बन्धुजीव-कुसुमोट्ठि ;
अणुसोचसि धुत्तम् इमं सरल-सहावे, किणो रमणं? २०

वार-विलया इ एआ गिम्ह-सुहं माणिउं पयट्टा[1] जे
इअ जंवि-तंपि[2] लविराओं पिअन्तिर पिक्क-दक्ख-रसं. २१

२०. दर इति अर्धेन ईषद् वा विकसितं यद् बन्धुजीवकुसुमं जपापुष्पं तद्वद् ओष्ठौ यस्यास्तस्याः संबोधनम् । मोरउल्ला इति मुधा त्वं मा ताम्य । तथा । किणो इति प्रश्ने । हे सरलस्वभावे धूर्तं शठम् इमं रमणं किम् अनुशोचसि । मायाविनोऽस्य अनुशोचनं कर्तुं नोचितम् इत्यर्थः ॥

वेव्वे । वेव्व । "वेव्व चामन्त्रणे" [१९४.] ॥

हला । मामि । हले । "मामि हला हले सख्या वा" [१९५.] । पक्षे सहि ॥

दे । "दे संमुखीकरणे च" [१९६.] ॥

हुं । "हुं दानपृच्छानिवारणे" [१९७.] ॥

हु । खु । "हु खु निश्चयवितर्कसंभावनविस्मये" [१९८.] ॥

ऊ । "ऊ गर्हाक्षेपविस्मयसूचने" [१९९.] ॥

थू । "थू कुत्सायाम्" [२००.] ॥

रे । अरे । "रे अरे संभाषणरतिकलहे" [२०१.] ॥

हरे । "हरे क्षेपे च" [२०२.] ॥

ओ । "ओ सूचनापश्चात्तापे" [२०३.] ॥

अव्वो । "अव्वो सूचनादुःखसंभाषणापराधविस्मयानन्दादरभयखेदविषादपश्चात्तापे" [२०४.] ॥

अइ । "अइ संभावने" [२०५.] ॥

वणे । "वणे निश्चयविकल्पानुकम्प्ये च" [२०६.] ॥

मणे । "मणे विमर्शे" [२०७.] ॥

अम्मो । "अम्मो आश्चर्ये" [२०८] ॥

---

१ B C पयट्टो. २ B जंप.

एकेकम्[1] एस स महू, अम्बोवि हु एकमेकम् एसो सो,
लोआ, हणिही पहिआऽलीण रवेणेमम् आह वणं. २२

अप्पणो । "स्वयमोर्थे अप्पणो न वा" [२०९.] । पक्षे सयं ॥

पाडिक्कं । पाडिएक्कं । "प्रत्येकमः पाडिक्कं पाडिएक्कं" [२१०.] । पक्षे पत्तेअं ॥

उअ । "उअ पश्य" [२११.] । पक्षे देक्ख ॥

इहरा । "इहरा इतरथा" [२१२.] । पक्षे इअरहा ॥

एक्कसरिअं । "एक्कसरिअं झगिति संप्रति" [२१३.] ॥

मोरउल्ला । "मोरउल्ला मुधा" [२१४.] ॥

दर । "दरार्धाल्पे" [२१५.] ॥

किणो । "किणो प्रश्ने" [२१६.] ॥

[इ । जे । र] । "इजेराः पादपूरणे" [२१७.] ॥

वि । पि । "प्यादयः" [२१८.] ॥

इति प्राकृतद्व्याश्रयमहाकाव्ये अष्टमस्याध्यायस्य उदाहरणप्रतिपादनद्वारेण द्वितीयः पादः संपूर्णः ॥

---

२२. एकैकं पृथक्पृथग् यथा भवति एवम् एष स मधुः मधूकः तथा एकैकम् आम्रोपि । हु इति संभावयामि । भो लोकाः पान्थान् हनिष्यति इदम् आह अलीनां रवेण गुञ्जितव्याजेन वनं काननं कर्तृ। अन्योपि अध्वन्यान् प्रति कृपालुतया क्वचिद् अवस्थितांश्चौरादीन् घातकान् कथयतीत्युक्तिलेशः ॥

एकमेकम् । "वीप्स्यात् स्यादेः° [१.] इत्यादिना वीप्सार्थात् पदात् परस्य स्यादेः स्थाने स्वरादौ वीप्सार्थे पदे परे मो वा । पक्षे एक्केक्कम् ॥

अम्बो । "अतः सेर्डोः" [२.] इति डो ॥

एस एसो । स सो । "वैतत्तदः" [३.] इति डो वा ॥

लोआ । पहिआ । "जश्शसोर्लुक्" [४.] ॥

इमं । "अमोऽस्य" [५.] इति अमोऽस्य लुक् । "शेषेऽदन्तवत्" [३. १२४] इत्यदन्तवत्त्वात् ॥

---

१ B C इक्केक°.

---

1 B C इक्क°.

खज्जूरेहि पिआलेहिँ फणसेहि अवि दंसिअ-फलत्तो
हरिसाओ दूराउवि उज्जाणम् इमं न को सिहइ? २३
सिरिसाहिन्तो[1] तह किंसुआहि बउला य महमहिअ गन्धो
देसत्तो गामाओ नयराउवि किं[2] न आणेइ? २४
पत्थाहिन्तो रामेसुन्तो देवेसराहिवि अणूणो
धारा-हरस्स मज्झे तओ गओ सज्जिअम्मि निवो. २५

अलीण । रवेण । "टाआमोर्णः" [६.] इति टाया आमश्च णः ॥

२३. खर्जूरैः प्रियालैः राजादनैः पनसैश्च कृत्वा दर्शितं च तत् फलं च एतस्मात् प्रकटितफलाद् अत एव हर्षाद् दूराद् अनासन्न-देशादपि को न उद्यानम् इदं स्पृहयति । अपि तु तत्तद्वृक्षफलास्वाद-वाञ्छया सर्वोपि सहर्षम् इदम् अभिलषतीति भावः ॥

खज्जूरेहि । पिआलेहिँ । फणसेहि । "भिसो हि हिँ हिं" [७.] ॥

२४. शिरीषात् तथा किंशुकाद् बकुलाच्च प्रसृत्य गन्धः कर्ता देशेभ्यो ग्रामेभ्यो नगरेभ्योपि कं न आनयति किं तु तेन गन्धेन कृष्टः सर्वतः सर्वोप्यागच्छतीत्यर्थः ॥

फलत्तो । हरिसाओ । दूराउ । सिरिसाहिन्तो । किंसुआहि । बउला । "ङसेस् त्तो दो दु हि हिन्तो लुकः" [८.] इति ङसेः षड् आदेशाः ॥

२५. अथ ग्रीष्मर्तुविलाससर्वस्वभूतं जलकेलिक्षणं विवर्णयिषुः जलयन्त्रगृहनृपप्रवेशपूर्वं जलयन्त्रगृहवामादिदेशतद्भित्तिर्दिमकरमुखस्फटिकस्तम्भद्वारोत्तरङ्गपश्चालिकाकर्णादिप्रदेशेभ्यस्तत्साधनभूतं जलनिर्गमम् आह । पार्थेभ्यः पाण्डवेभ्यः रामेभ्यः रामचन्द्रपरशुरामबलभद्रेभ्यः इन्द्रेभ्योपि अनूनः । सर्वोत्तम इत्यर्थः । नृपः धारागृहस्य जलयन्त्रगेहस्य सज्जिते सकलोपकरणोपेते मध्ये ततो दौवारिकाद् ग्रीष्मप्रादुर्भावश्रवणानन्तरं गतः प्रविष्टः ॥

---

१ B मिरसा°. २ So B C.

1 B सिरसा°.

रेल्लन्ता वण-भागा तओ पलोट्टा[1] जवा जलाणोघा
वामाउ दाहिणाओ समुहत्तो पच्छिमाहिन्तो. २६
वेइअ-मयर-मुहाहि अ आ-मूल-सिरं च फलिह-थम्भाओ
वारोत्तरङ्गयाओ नीहरिआ वारि-धाराओ. २७
पञ्चालिआहि मुक्कं कन्नेसुन्तो जलं मुहासुन्तो
हत्थेहिन्तो चरणाहिन्तो वच्छाहि उअरेहि. २८

देसत्तो । गामाओ । नयरा[1]उ । पत्थाहिन्तो । रामेसुन्तो । देवेसराहि । "भ्यसस् त्तो दो दु हि हिन्तो सुन्तो" [९.] इति भ्यसः षड् आदेशाः ॥

धारा-हरस्स । "ङसः स्सः" [१०.] ॥

मज्झे । सज्जिअम्मि । "डे म्मि ङेः" [११.] इति ङेर्डित् एकारः म्मिश्च ॥

२६. ततो राज्ञो यन्त्रगृहप्रवेशाद् ऊर्ध्वं वनभागान् प्लावयन्तो जवात् जलौघाः प्रवृत्ताः । कथम् । वामात् । दक्षिणात् । संमुखात् । पश्चिमात् । पार्श्वपृष्ठाग्रप्रदेशस्थजलयन्त्रप्रादुर्भूतजलप्रवाहैर्वेगेन काननान्तराला व्याप्ता इत्यर्थः ॥ प्लावयतेः तक्षादित्वात् [४. १९९.] रेल्लादेशः ॥

२७. वेदिकायां वितर्दौ यानि मकरमुखानि तेभ्यश्च मूलं च शिरश्च ते अभिव्याप्य मूलशिरो यथा भवति एवं स्फटिकस्तम्भेभ्यश्च द्वाराणां यान्युत्तरङ्गाणि ऊर्ध्वदारूणि तेभ्यश्च वारिधारा निःसृताः ॥

रेल्लन्ता । वण-भागा । जवा । जलाण । वामाउ । दाहिणाओ । समुहत्तो । पच्छिमाहिन्तो । मुहाहि । थम्भाओ । गयाओ । "जस्शस्ङसित्तोदोद्वामि दीर्घः" [१२.] । एषु अतो दीर्घः । ङसिनैव सिद्धे त्तोदोदुग्रहणं भ्यसि एत्वबाधनार्थम् ॥

२८. कर्णेभ्यः मुखेभ्यः हस्तेभ्यश्चरणेभ्यो वक्षोभ्यः उदरेभ्यः पञ्चालिकाभिः शालभञ्जिकाभिर्जलं मुक्तम् ॥

---

१ B C पलुट्टा.

---

1 B C नगराउ.

वेएणं सम-विसमे पूरन्तेहिं जलेहि कूवेहि

खन्धेसु तुसार-मिसा तरूहिँ पुलउव्व पायडिओ. २९

दट्ठुं तं छणम् अच्छीहिँ जणो, उज्जाण-भूमिसु अमन्तो,

तत्थ गिरीसु तरूओ गओ गिरीओ तरूसुं च. ३०

पक्खेसु चउसु दारेसु चऊसु चऊहि सालभञ्जीहि

चउहि करएहि तुल्लं पलोट्टिअं वारि धारीए. ३१

कन्नेसुन्तो । मुहासुन्तो । हत्थेहिन्तो । चरणाहिन्तो । वच्छाहि । उअरेहि ।
"भ्यसि वा" [१३.] । भ्यसादेशे अतो दीर्घो वा ॥

२९. कूपेभ्य इति उपात्तविषये अपादाने पञ्चमी । ततः कूपाद् निःसृत्येत्यर्थः । वेगेन दक्षपुरुषप्रेरितकूपान्तर्वर्तियन्त्रवस्त्वाञ्जवेन समविषमान् प्राञ्जलनिम्नोन्नतप्रदेशान् पूरयद्भिर्जलैः कृत्वा तरुभिः कर्तृभिः । मूलात् शाखावधयः प्रकाण्डाः । तेषां मस्तकानि स्कन्धास्तेषु पुलक इव वेगविनिःसृतजलप्रवाहोच्छलिततद्बिन्दुसंदोहविष्वग्व्याप्तत्वेन रोमाञ्च इव प्रकटितः व्यक्तीकृतः ॥

वेएणं । सम-विसमे । "टाणशस्येत्" [१४.] इति एकारः ॥

कन्नेसुन्तो इत्यादि । पूरन्तेहिं । जलेहि । कूवेहि । खन्धेसु । "भिस्भ्यस्सुपि" [१५.] । एषु अत ए ॥

३०. तत्र सर्वर्तुपुष्पजातियुक्तत्वात् प्रसिद्धासु उद्यानभूमिषु अमान् संकीर्णत्वेन अवस्थातुम् अपारयन् तम् आश्चर्यकारिक्षणं मकरमुखादिजलयन्त्रनिर्गममहोत्सवम् अक्षिभिर्द्रष्टुं जनस्तरुभ्यो गिरिषु गिरिभ्यस्तरुषु च गतः । निरन्तरायम् अवलोकयितुम् उच्चोच्चतरप्रदेशेष्वारूढ इत्यर्थः ॥

तरूहिं । अच्छीहिं । गिरीसु । तरूओ । गिरीओ । तरूसुं । "इदुतोर्दीर्घः" [१६.] ॥ क्वचिन्न । भूमिसु ॥

३१. पक्षेषु स्तम्भादिपार्श्वेषु चतुर्षु द्वारेषु पार्श्वपृष्ठाग्रगृहमुखेषु

थम्भ-सिहराहि चउओ चऊओ वेई-मुहाहि सिञ्चीअ
कील-गिरी कील-तरू जल-पूरो उरुम् अमन्द-गई. ३२
साऊ जलोह-पन्ती जइ एसा, किं दहिं ? महुं किं वा ?
इअ नम्म-पट्ठू जल-पाण-रई लवइ म्ह विड-लोओ. ३३
मयणग्गउं[1] तह विरहग्गओवि संधुक्किआ चिरं जेहि
अइ-मलय-वायओ वायउव्व हूआ जल-प्पवहा. ३४

चतुर्षु वर्तमानाभिश्चतसृभिः शालभञ्जिकाभिः चतुर्भिः करकैर्वारिघटिकाभिः कृत्वा तुल्यं युगपद् धारया वारि पर्यस्तं मुक्तम् ॥

३२. स्तम्भशिखरेभ्यश्चतुर्भ्यः वेदिकामुखेभ्यश्चतुर्भ्यः अमन्दगतिः शीघ्रप्रवृत्तिः उरुर्महान् जलपूरः क्रीडार्थं कृता गिरयः क्रीडागिरयस्तान् तथा क्रीडातरून् असिञ्चत् औक्षत् ॥

चउसु चऊसु । चउहि चऊहि । चउओ चऊओ । "चतुरो वा" [१७.] इति दीर्घो वा ॥

कील-गिरी । कील-तरू । "लुप्ते शसि" [१८.] इति दीर्घः ॥

३३. स्वादुः जलौघपङ्क्तिः मकरमुखादिनिर्गतजलप्रवाहपरंपरा यद्येषा तदा किं दधि किं वा मधु । शरीरसौस्थ्यस्य अमृतमधुरया अनयैव कृतत्वाद् नैताभ्यां प्रयोजनम् इत्यर्थः । इति नर्मणि परस्परं चस्करौ पटुः जलपानरतिर्विटलोकः षिङ्गजनो लपति स्म ॥

साऊ । पन्ती । पट्ठू । रई । "अक्लीबे सौ" [१९.] इति दीर्घः । अक्लीब इति किम् । दहिं । महुं । केचिद् दीर्घत्वं विकल्प्य मादेशम् इच्छन्ति । उरुम् अमन्द-गई ॥

३४. मदनाग्नयस्तथा विरहाग्नयोपि यैश्चिरं संधुक्षिताः संदीपिताः ते वायव इव जलप्रवाहा भूता जाताः । तत् किं मलयवायव इव । नेत्याह । अतिक्रान्तमलयवायवः । पान्थसार्थस्य अधिकतरं मदना-

[1] B C मयणग्गओ.

जलिअग्गिणोव्व जल-वाउणोवि विरहीण साहवो नासि;
अह वा विहिम्मि वामे साहूवि न साहुणो हुन्ति. ३५

कीला-गिरिणो साहउ, कीला-तरुणोवि साहओ जाया;
नीक-पवाहेहि जओ गिरी तरू वा जल-सलोणा. ३६

उच्चिणिअ बहू तरुणो काउं गिरिणोव्व बहु-कुसुम-रासी,
गिरिणो तरुणो अ तले कुसुमाभरणाइँ रइआइं. ३७

भिविरहाग्निदीपनात् तेभ्योप्युत्कृष्टा इत्यर्थः । अत्र तच्छब्दो ज्ञेयः ॥

३५. ज्वलिताग्नय इव जलेन मिश्रा वायवो जलवायवस्तेपि विरहिणां पान्थानां ज्वलिताग्नय इव साधवः उपकारका नासन् । अधिकतरं संतापमेव चक्रुरित्यर्थः । अथ वा युक्तमेवैतत् । विधौ वामे प्रतिकूले सति साधवोपि हिता अपि न साधवो हिता भवन्ति ॥

मयणग्गउ विरहग्गओ । वायओ वायउ । "पुंसि जसो डउ डओ वा" [२०.] इति अउ अओ इत्यादेशौ । पक्षे अग्गिणो । वाउणो ॥

३६. नीकानां कुल्यानां प्रवाहैः कृत्वा क्रीडागिरयः साधवः प्रधानाः क्रीडातरवोपि साधवो जाताः । यतो गिरयस्तरवो वा जलेन सलवणा लावण्योपेता भवन्ति ॥

साहवो । "वोतो डवो" [२१.] इति जसो डित् अवो । पक्षे साहू । साहुणो । साहउ । साहओ ॥

३७. उच्चित्य बहूंस्तरून् ततः कृत्वा गिरीनिव अत्युच्चत्वात् पर्वतानिव बहुकुसुमराशीन् गिरेस्तरोश्च तले अधः कुसुमाभरणानि जलकेलिक्षणोचितानि कर्णपूरादीनि रचितानि । दंपतिभिरिति[1] शेषः ॥

कीला-गिरिणो । कीला-तरुणो । तरुणो । गिरिणो । "जश्शसोर्णो वा" [२२.] इति णो । पक्षे गिरी । तरू । बहू । रासी ॥

---

1 B C दंपतीभि°.

गुरुणो कीला-गिरिणो निवडिअ निज्झर-जलाइँ जायाइं
चन्दण-घुसिणल्लाइं दहिणो महुणो सिरि-हराइं. ३८

लीला-गिरीउ चङ्गिम-गुरूउ निज्झर-जलाइँ सहिआइं
अखलिअ-गइस्स किर रइ-पहुस्स जय-वेजयन्तीओ. ३९

रइ-अहिवइणा पहुणा तइआ पबलेण तरुण-मिहुणाण
दहिणा दहिंव महुणा महुंव मिलिअं मणेण मणं. ४०

३८. गुरोः महतः क्रीडागिरेः सकाशाद् निपत्य निर्झरजलानि चन्दनघुसृणवन्ति सन्ति चन्दनमिश्रितत्वाद् दध्नः घुसृणमिश्रितत्वाच्च मधुनः सकाशात् श्रियं हरन्ति चोरयन्ति दध्नो मधुनो वा संबन्धिनीं श्रियं हरन्ति श्रीहराणि जातानि। तदधिकशोभाकलितानि संवृत्तानीत्यर्थः॥

३९. चङ्गत्वेन प्रधानत्वेन गुरोर्गरिष्ठात् लीलागिरेः सकाशाद् निर्झरजलानि अस्खलितगतेः अविलङ्घिताज्ञस्य रतिप्रभोः किर इति इवार्थत्वात् जयवैजयन्त्य इव राजितानि द्राघीयस्त्वनिर्मलत्वाभ्यां जयपताका इव शोभितानि॥

गिरिणो। तरुणो। गुरुणो। कीला-गिरिणो। दहिणो। महुणो। "ङसिङसोः पुंक्लीबे वा" [२३.] इति णो। पक्षे गिरीउ। गुरूउ। गइस्स। पहुस्स॥

४०. प्रभुणा स्वाज्ञाविधापनासमर्थेन तदा लीलागिरिनिपतन्निर्झरवारिप्रवाहावसरे प्रबलेन सर्वसामग्रीयुक्तत्वेन प्रचण्डेन रत्यधिपतिना तरुणमिथुनानां युवदंपतीनां दध्ना दधीव मधुना मध्विव मनसा मनो मेलितम् ऐक्यं प्रापितम्॥

अहिवइणा। पहुणा। दहिणा। महुणा। "टो णा" [२४.] इति णा। ङसिङसोरित्यस्य व्यावृत्तिरपि। इदुत इत्येव। मणेण। ट इति किम्। दहिं। महुं॥

मणं। "क्लीबे स्वरान्म् सेः" [२५.] इति सेः म्। केचिद् अनुनासिकमपीच्छन्ति तदा। दहिँ। महुँ॥

कुल्ल-जलाइं अइसीअलाइँ विमलाणि पेच्छ पवहन्ति,
इअ भणिरा महिलाओ जल-केलि-छणे पयट्टाउ. ४१

हारावलि-मुत्ताउवि जलाहयाओ जलम्मि निवडन्ता
अगणिअ जले विलुलिआ कावि मयच्छी हसन्तीआ. ४२

मउवीओ तणुवीआ पेच्छ जले संचरन्ति लीलाअ
रम्माइ बहु-विहाए ठाणं अच्छर-सरिच्छाओ. ४३

४१. अतिशीतलानि विमलानि कुल्याजलानि प्रवहन्ति स्रोतोरीत्या गच्छन्तीति पश्य इति भणित्र्यः परस्परं भाषमाणा महिला युवत्यः जलकेलिक्षणे प्रवृत्ताः । कान्तैः सहेति शेषः ॥

जलाइं । अइसीअलाइँ । विमलाणि । " जश्शस इँइंणयः सप्राग्दीर्घाः " [२६.] ॥

४२. अधुना तदेव जलकेलिक्षणं षट्त्रिंशता गाथाभिः प्राह । जलैराहतास्ताडिताः अत एव जले निपतन्तीः भ्रश्यन्तीः हारावलिमुक्ता अपि आस्तां वस्त्रादिकं मुक्ताकलापमुक्ता अपि अगणयित्वा अनादृत्य हसन्ती प्रियैः सह चस्करिपरा कापि मृगाक्षी जले विलुलिता बुडिता ॥

महिलाओ पयट्टाउ । मुत्ताउ जलाहयाओ । " स्त्रियाम् उदोतौ वा " [२७.] इति जश्शसोः [प्रत्येकम्] उदोतौ सप्राग्दीर्घौ । पक्षे भणिरा । निवडन्ता ॥

४३।४५. त्रिभिर्विशेषकम् । अहिलोकवध्वाः पातालकन्यकायाः सुरवध्वा देवाङ्गनायाः तथा यक्षश्च पुण्यजनः किंनरश्च किंपुरुषस्तयोर्वध्वाः सकाशाद् रूपाधिकाः । ताभ्योपि प्रधाना इत्यर्थः । वध्वा इति जातिविवक्षया एकवचनम् । दयितास्तटस्थतरुणैः पार्श्वस्थयुवभिः इति पूर्वोक्तं भणिताः ॥ ४३. तदेवाह । मृद्व्यः कोमलच्छवयः अप्सरःसदृक्षा देवाङ्गनातुल्यास्तन्व्यो नायिका रम्याया बहुविधाया लीलायाः

पिच्छह जल-लहरीए एन्तीइ[1] उदञ्चिरीअ पडिरीआ
खेलन्ति मज्झ-लुलिआ सभराइअ-तरल-कबरीओ. ४४
अहि-लोअ-वहूए, सुर-वहूइ तह जक्ख-किंनर-वहूअ
रूवाहिआउ दइआ तडत्थ-तरुणेहि इअ भणिआ. ४५
कोवि वहूओ अइखेअराउ खे खेअरीण पच्चक्खं
रममाणीउ अकालीउ लहिअ गण्डूसम् उद्दिसिओ[2]. ४६

स्नानं रम्यया बहुविधया लीलया[1] [वा] जले संचरन्तीति पश्य इति योजनायां मृद्व्य इत्यादिषु प्रथमा। मृद्वीः अप्सरःसदृक्षास्तन्वीः पश्य जले संचरन्ति लीलयेत्यादियोजनायां तु द्वितीया ॥

४४. यत्याम् आगच्छन्त्याम् उदञ्चित्र्याम् ऊर्ध्वं यान्त्यां पतन्त्याम् अधोभवित्र्यां जललहर्यां मध्ये लुलिता गताः सफरायिताः तदाकारत्वाद्[2] मीनवद् आचरितास्तरलाश्चञ्चलाः कबर्यो वेणयो यासां तास्तथा खेलन्ति क्रीडन्ति इति पश्यत[3] ॥[4]

हसन्तीआ। तणुवीआ। "ईतः सेश्चा वा" [२८.] इति आः। पक्षे मयच्छी। मउवीओ ॥

४६. अतिक्रान्ता रूपसौन्दर्याद्याधिक्यात् पराभूताः खेचर्यो विद्याधरवध्वो यया तस्या रममाणायाः क्रीडन्त्याः अकालाया अनुकूलाचरणाद् अक्षेपिकाया [वध्वाः] सकाशात् खे गगनाङ्गणे खेचरीणां प्रत्यक्षं यथा भवति एवं गण्डूषं मुखजलं लब्ध्वा प्राप्य कोपि उद्धुषितः। मूर्तप्रेमायमाणप्रियागण्डूष[5]प्रादुर्भवत्प्रमोदतया पुलकितः। घुषिः सौत्रः ॥

लीलाअ रम्माइ बहु-विहाए। लहरीए एन्तीइ उदञ्चिरीअ पडिरीआ। वहूए वहूइ। वहूअ। वहूआ इति वा पाठः। "टाङस्ङेरद् आद् इद् एद् वा तु ङसेः"

---

१ B एतीइ. २ So B C उद्धुसिओ.

1 B omits लीलया. 2 C तथाका.° 3 B C पश्य. 4 B C repeat here महिलाओ पयट्टाउ। मुत्ताउ जलाहयाओ। स्त्रियाम् उदोतौ वा इति जश्शसोः प्रत्येकम् उदोतौ सप्राग्दीर्घौ। पक्षे भणिरा ॥. 5 C inserts प्राप्ति after गण्डूष°.

"रममाणाए कालाइ इमीए कीइ काइ अ इमाए
रे अज अजाइ रमसे?" त्ति कावि भणिउं हणीअ पिअं. ४७

जीओ तीओ मुद्धा, जाओ ताओवि तह विअड्ढाओ
तरुणीण जाण ताणवि जल-द्द्न्द-रणे पयट्टाओ. ४८

अच्छीण कज्जल-सिरी जा सा गलिआ न काण उम्मीहि?
कंपि हु तं नयण-सिरिं ता पत्ता जं जणो सिहइ. ४९

[२९.] इति प्रत्येकम् अत् आत् इत् एत् इत्यादेशाः। ङसेस्तु वा। पक्षे वहूओ इत्यादि। टादीनाम् इति किम्। सरिच्छाओ इत्यादि॥

लीलाअ। रम्माइ। बहुविहाए इत्यादि। "नात आत्" [३०.] इति स्त्रियाम् आदन्ताट्टादीनाम् आ आदेशो न॥

खेअरीण। "प्रत्यये ङीर्न वा" [३१.]। अणादिसूत्रेण प्रत्ययनिमित्तो यो ङीरुक्तः [हे० २. ४. २०] स स्त्रियां नाम्नो वा। पक्षे खेअराउ॥

४७. रममाणया क्रीडन्त्या कालया तिरस्कारपरया कया कुत्सितया अनया कया तथा अनया च अजया भर्तृप्रसादनकलाविकलत्वेन पशुप्रायया सार्धं रे अज कान्ताप्रसादनानिपुणत्वेन पशो त्वं रमसे इति पूर्वोक्तं भणित्वा कापि प्रियं जघान जलैरताडयत्॥

रममाणीउ। अकालीउ। इमीए। "अजातेः पुंसः" [३२.]। अजातिवाचिनः पुंलिङ्गात् स्त्रियां वर्तमानाद् ङीर्वा। पक्षे रममाणाए। कालाइ। इमाए॥

४८. यासां तासामपि तरुणीनां मध्ये यास्ता मुग्धा अकृत्रिममनोहराः तथा यास्ता अपि विदग्धाः कटाक्षविक्षेपादिभिः प्रियावर्जने प्रवीणा जलद्वन्द्वरणे प्रियैः सह जलकेलौ प्रवृत्ताः॥

४९. अक्ष्णां या कज्जलश्रीः अञ्जनशोभा सा कासाम् ऊर्मिभिः कल्लोलैः न गलिता। किं तु सर्वासां सा सलिलैः क्षालितेत्यर्थः॥ परं कामपि। हु इति आश्चर्यम्। ताम् अद्भुतां नयनश्रियं ता नायिकाः प्राप्ताः यां जनः काङ्क्षति। कज्जलापगमे हि नयनयोर्निःश्रीकता भ-

घणे-छाहि-कयलि-छाये हलद्दि-गोरी हलद्द-गोरीहि
विलया जलम्मि रमिआ ससाउ दुहिआउवन्नोन्नं. ५०

"तर फलिहं कट्ठ अरे, न लवसि किं अज्ज? मा लवसु अज्जो.
पइ नेसि? पई मेसु व," भणीअ इअ कावि जल-मज्झे. ५१

वति । परम् एतन्नयनानां तथाभावेपि स्वभावमनोहरत्वाद् एतानि सर्वोपि सतृष्णम् ईक्षत इत्यर्थः ॥

कीइ काइ । जीओ तीओ । जाओ ताओ । "कियत्तदोऽस्यमामि" [३३.] । एभ्यः स्त्रियां ङीर्वा । अस्यमामीति किम् । का । जाण ताण । जा सा । काण । कं तं जं ॥

५०. घना चासौ छाया च आतपाभावो घनच्छाया तया युक्ताः कदल्यो रम्भास्तासां छाया पङ्क्तिस्तस्यां जले च हरिद्रावद् गौर्यः गौरवर्णास्ताभिः सह हरिद्रागौर्यो वनिता रताः क्रीडिताः । निरुपमस्नेहयुक्तत्वाद् यकाभिर्हरिद्रागौरीभिः सार्धं ता रमन्ते तासां मन्यन्ते स्वसारो भगिन्यस्ता इव दुहितरः पुत्रिकास्ता इव वेति ॥

छाहि छाये । हलद्दि-गोरी हलद्द-गोरीहि । "छायाहरिद्रयोः" [३४.] । अनयोः आप्प्रसङ्गे स्त्रियां ङीर्वा ॥

ससाउ । दुहिआउ । "स्वस्रादेर्डा" [३५.] इति स्त्रियां डित् आः ॥

५१. अरे इति संभाषणे । हे काष्ठ नीरसत्वाद् दारो त्वं परिखां खातिं तर अतिक्रमय । सरसविचक्षणोचिते जलकेलिक्षणे किं मम पार्श्वे तिष्ठसीत्यर्थः । काष्ठं किल तीर्त्वा तटीं गच्छतीत्युक्तिलेशः । तथा किम् अर्य आर्य वा न लपसि भणिते प्रत्युत्तरं न ददासि । मा वा अर्य आर्य वा लप । तथा पते भर्तः नैषि मत्पार्श्वे नागच्छसि । मा वा पते एहि । स्वसमीहितं कुर्वित्यर्थः । इति पूर्वोक्तं कापि जलमध्ये बभाण भर्तुरग्रे उवाच ॥

1 B C हलिद्दि°.

"निग्घिणया, सढ-पिअरं, ओसर निग्घिणय, मुञ्च धिट्ठ-पिअ!"
कावि जलन्तर-कड्ढिअ-कडिल्लयं इअ भणीअ पिअं. ५२
"कत्तार, कया किमहं? सुणसु वयंसे, निरिक्खसु वयंसा!
अम्मो, अन्नाइ पिओ रमए," कीएवि इअ रुन्नं. ५३
"सहि, वर-वहु, चयसु इमं गामणिमिव खलपुणो वहूइ इह
वारिणि इमाइ रमिरं," इअ कावि सहीइ सिक्खविआ. ५४

फलिहं। "ह्रस्वोऽमि" [३६.] इति ह्रस्वः॥

कट्टं। "नान्मयात् सौ मः" [३७.] इति "क्लीबे स्वरान्म् सेः" [३.२५.] इति यो म उक्तः स न॥

५२. हे निर्घृण निःकृप हे शठानां पितः अतिशयकूटकरणाद् मायाविनाम् आद्य त्वम् अपसर मद्दृष्टिगोचराद् गच्छ। तथा हे निर्घृण धृष्टानां व्यक्तापराधानां पितस्त्वं मुञ्च मा मद्वस्त्रादिकं स्प्राक्षीः। जलस्य अन्तरं मध्यं तस्मिन् कृष्टम् अपासितं कट्यम् अधस्तनवस्त्रं येन तं प्रियं कृतव्यलीकं दयितम् इति पूर्वोक्तं कापि बभाण निरभर्त्सयत्॥

अज्ज अज्जो। पइ पई। निग्घिणया निग्घिणय। "डो दीर्घो वा" [३८.] इति डो दीर्घो वा॥

पिअ। "ऋतोऽद् वा" [३९.] इति अकारः अन्तादेशः। पक्षे पिअरं॥

५३. हे कर्तः स्रष्टः किमहं कृता। एवं प्रियापमाने सति मज्जन्मनो निरर्थकत्वात् किमहं सृष्टा। तथा हे वयस्ये सखि शृणु मद्वाक्यम् आकर्णय। तथा वयस्ये निरीक्षस्व। तथा हे अम्ब मातः अन्यस्याम् अपरकान्तायां प्रियो रमते इति अनया रीत्या कयापि रुदितम्॥

पिअरं "नाम्यरं वा" [४०.] इति अरं। पक्षे पिअ। नाम्नीति किम्। कत्तार॥

वयंसे। "वाप ए" [४१.] इति आप एत्वम्। पक्षे वयंसा॥ बाहुलकात् क्वचिद् ओत्वमपि। अम्मो॥

५४. सखि वरवधु प्रधानपत्नि इह ग्रीष्मे वारिणि जलमध्ये अ-

१ B °कड्ढिअ°, C °कढ्ढिअ°. २ B निरक्खसु, C निरिरक्खसु. ३ B गामिणि°.

"जामाउणो रमन्ते उअ वारिणि, अपुरवं खु लडहत्तं;

को अन्नो लडहो?" सम्भलीहिँ काहिंपि इअ भणिअं. ५५

"रे धुत्त-पिआ सि तुमं, जग-पिअरा गोरि-संकरा सविमो.

मा सवसु अप्प-पिअरं, तं भत्तारो किमग्घाण? ५६

नया त्वत्सपत्न्या सह रन्तारं रमणशीलम् इमं पुरोवर्तिनं प्रियम् खलप्वः कर्षकस्य वध्वा ग्रामणीः भर्ता तमिव । अकृत्यकारितया हालिकम् इत्यर्थः । त्यज मा अङ्गीकार्षीः इति अनया रीत्या कापि सख्या शिक्षिता ॥

सहि । वर-वहु । "ईदूतोर्ह्रस्वः" [४२.] ॥

गामिणि[1] । खलपुणो । "क्विपः" [४३.] इति ह्रस्वः ॥

५५. जामातरो दुहितृपतयः वारिणि रमन्ते अस्मत्पुत्रिकाभिः सह जलकेलिं कुर्वन्ति । उअ पश्य जामातॄन् । इति एकया उक्ते सति अपरा प्राह । खु आश्चर्यम् अपूर्वं लोकोत्तरम् । जातिविवक्षया एकवचनात् जामातुः । लडह इति देश्यो लटभशब्दः संस्कृतो वा सुन्दरार्थः । ततो लडहत्तं लटभत्वं वा सौन्दर्यम् । ततस्तदन्यापि आह । कोन्यः अपरो जामातुः सकाशात् लटभः प्रधानः । किं तु इत्थं यौवनमाननाद् एष एवेत्यर्थः । इति अनया रीत्या काभिरपि सम्भलीभिः तत्क्रीडावलोकनागततटस्थकुट्टिनीभिर्भणितं जल्पितम्[2] ॥

५६. त्रिभिर्विशेषकम् । अन्यस्याः सपत्न्याः । उक्षेस्तक्षादित्वात् [४. १९५] छण्ठादेशः । उक्षणे जलेन आहनने कृते सति प्रकटेन अनेन मदीयापराधेन निश्चितम् इयं मानिनी बहु किमपि कुपिता भविष्यतीति प्रसादयितुं समागते प्रियतमे इति अनया रीत्या कयापि रुदितं साश्रुपातम् उक्तम् । तदेवाह । रे त्वं धूर्तानां पिता । शाठ्याचरणाद् मायाविनां मुख्य इत्यर्थः । असि वर्तसे । अत्रार्थे जगतः पितरौ गौरीशंकरौ । आत्मानं बहुमन्यमाना बहुवचनेन निर्दिशति । वयं तुभ्यं शपामहे तच्छपथं कुर्मः । ततोसौ तद्गञ्जनाय मम त्वमेव प्रिया तस्यास्तु सेचनं मया एवमेव कृतम् इ-

[1] B गामिणि. [2] C adds परस्परं before जल्पितम्.

भत्तारा जाण वसे धन्ना इत्थीण ताण माआओ.

माआए किं जणिआ? किं महिआ माअराउ मए? ५७

देवा पिअरा सरणं. संहर कत्तार, भुअण-कत्ता, मं."

अन्नाइ छण्ठणे पिअअमम्मि कीएवि इअ रुण्णं. ५८

त्यर्थे पितृशपथं कुर्वाणस्तया ऊचे । त्वं मह्यं मा शपस्व आत्मपितरम् तच्छपथं मा कार्षीः । यतस्त्वं किम् अस्माकं भर्ता । किं तु तस्या एवेत्यर्थः ॥

५७. एवं भर्तारं निर्भर्त्स्य सनिर्वेदम् आकाशोक्तिमेवाह । भर्तारो यासां वशे आज्ञायां धन्याः कृतपुण्यास्तासां स्त्रीणां मातरो जनन्यः । न पुनस्त्वद्भर्तृकाया मम मातेत्यर्थः । तथा किं मात्रा अहं जनिता उत्पादिता । अयम् अभिसंधिः । यद्यहं तया नोत्पादिता स्यां तदा नैवं पराभवभाजनं स्याम् इति । तथा किं मातरः ।

ब्राह्मी माहेश्वरी चैन्द्री वाराही वैष्णवी तथा ।
कौमारी चर्ममुण्डा च कालसंकर्षणीति च ॥

इत्यष्टौ देवताविशेषाः । अथ वा ।

अमृताद्या ब्रह्माणी सिद्धिर्माहेश्वरी च कौमारी ।
वैष्णव्यथ वाराही चामुण्डा मातरः सप्त ॥

इत्येवं सप्त वा मया महिताः पूजिताः । किल एतन्मातृपूजनं भर्तृवाञ्छभ्याय कृतम् । तच्च नास्ति । तस्मात् तदपूजनमेव श्रेयः ।

५८. देवाः हरिहरब्रह्माणः पितरो मातृपित्राद्याः शरणम् । एवंविधदुःखदग्धाया मम त्राणं सन्तु । तथा भुवनत्रयकर्तः जगत्त्रयनिर्माणकर्तः स्रष्टः मां संहर । येन नैवैतस्माद् आधिर्भवतीत्यर्थः ॥

जामाउणो । "ऋतामुद०" [४४.] इति ऋदन्तानाम् उत् वा । बहुवचनस्य व्याप्त्यर्थत्वाद् यथादर्शनं नाम्न्यपि । पक्षे भत्तारा । अस्यमौस्विति किम् । पिआ । पिअरा । पिअरं ॥

भत्तारो । भत्तारा । "आरः स्यादौ" [४५.] इति आरः ॥

1 B C सिद्धी मा°.

“दे विन्नवेमि राया; रायाणो, देसु सव्वओ दिट्ठिं,
उअ रायाणो केवीह, केवि राया इह रमन्ते. ५९
वाणारसीइ रण्णो, कुरूण रायाउ अहिअम् अम्बु-छणो
रण्णो तिउरीए महुराए रायस्स य पयट्टो. ६०
हूणाण राइणा इह उअ रायाणो इमे पहु रमन्ते;
अङ्गाणं रण्णा राइणो तह सगेण राएण. ६१

माआओ । माआए । माअराउ । “आ अरा मातुः” [४६.] इति बाहुलकात् जनन्यर्थस्य आ देवतार्थस्य तु अरा इत्यादेशौ ॥

पिअरा । “नाम्यरः” [४७.] इत्यरः ॥

कत्ता । “आ सौ न वा” [४८.] इति आः । पक्षे कत्तार ॥

५९,७७. एकोनविंशत्या महाकुलकम् । यस्मिन् काले जलेन पूर्णं शालभञ्जिकादिकर्णादिस्थानेभ्यः प्रपतन्नीरेण निभृतं यन्त्रगृहं धारा-गृहम् यस्मिन् काले [च] जलक्षणो वारिक्रीडा भूतः संवृत्तास्तस्मिन् काले नरेन्द्रस्य श्रीकुमारपालभूपालस्य दौवारिकेण इदं पूर्वोक्तं प्र-तिपादितम् । तदेवाह ।

दे संबोधने । हे राजन् विज्ञापयामि[1] । किं विज्ञापयसि[2] । हे राजन् सर्वतो दृष्टिं देहि । समन्ताद् राजादीनां जलोक्षणम् ईक्षस्वेत्यर्थः । राजन्निति संबोधनपदं प्रतिक्रियम् अग्रेपि योज्यम् । ततस्तत्परं भूपं ज्ञात्वा आह । उअ पश्य राज्ञः । केपि राजानः इह अस्मिन् प्रदेशे रमन्ते । उअ पश्य राज्ञः । केपि राजान इह रमन्ते ॥

६०. वाराणस्याः काशेः राज्ञः सकाशात् तथा कुरूणां राज्ञः सकाशाद् अधिकं गाढतरं यथा इति एवं त्रिपुर्याश्चेदिनगर्या राज्ञो मथुराया राज्ञश्च अम्बुक्षणः प्रवृत्तः ॥

६१. हे प्रभो उअ पश्य राज्ञः । हूणा देशविशेषाः । तेषां राज्ञा

1 B विज्ञप°. 2 B C विज्ञप°.

परओ जदूण रण्णो, परओ चेदीण राइणो तह य
राइम्मि अराअम्मि अ एगागारं जले कीला. ६२
इह वारि-मज्जण-छणे राईणम् अराइणं च समभावो;
रायं अराइणं तह कीलन्तं पिच्छ राईहिं. ६३
राईहिन्तो राईसु जन्ति राईण मण-हरा विलया
इण्हिं रायाणेहिं उअ जल-कीला-पयट्टेहिं. ६४
रण्णा अराइणा वि हु उच्छालिज्जन्ति नीर-लहरीओ
मगहाण राइणो कोसलाण रण्णो अ सविहम्मि. ६५

सह इमे पुरोवर्तिनो राजानः इह अत्र प्रदेशे रमन्ते । तथा उअ पश्य राज्ञः । अङ्गानां राज्ञा शकानां राज्ञा च सह राजानो रमन्ते ॥

६२. यदूनां यादवानां राज्ञः परतः परत्र देशे तथा चेदयो देशविशेषास्तेषां राज्ञः परतश्च राज्ञि अराज्ञि च तत्पत्न्यादौ एकाकारं प्रतिपत्तिभावाशङ्कारहितत्वेन निर्विशेषं जले क्रीडा अनयोरन्योन्यं नीरैरभ्युक्षणम् अस्ति । राज्ञ इत्यत्र परतस्तसन्तस्य योगे "प्रभृत्यन्यार्थ°" [हे० २. २. ७५.] इति दिक्पञ्चमी । अतसन्तस्य तु योगे "रिरिष्टात्" [हे० २. २. ८२.] इति षष्ठी ॥

६३. इह अत्र प्रदेशे वारिणा मज्जनं स्नानं तस्य क्षणः कालस्तस्मिन् राज्ञाम् अराज्ञां च पौरजनानां समभावः मिथो जलाघातात् तुल्यत्वम् । तथा इह राजानम् अराजानं च राजभिः सह क्रीडन्तं पश्य ॥

६४. उअ पश्य इदानीं सांप्रतं जलक्रीडायां प्रवृत्तैर्व्यापृतै राजभिः सह राजभ्यः राज्ञः सकाशाद् राज्ञां मनोहरा मनोज्ञाश्चित्तावर्जिका वा वनिता वारविलासिन्यो राजसु यान्ति । राजसहिता एकान् राज्ञ उक्षित्वा अन्यान् उक्षितुम् उपगच्छन्तीत्यर्थः ॥

६५. मगधानां राज्ञः सकाशात् कोसलानां राज्ञः सविधे समीपे

कोवि जुआ सजुआणो अप्पणिआ सह पिअं जले नेउं
रूसविअप्पाणेणं अतोससी अप्पणइआवि. ६६
सव्वे अन्नेवि निवा खिवन्ति धारा-हरम्मि सव्वस्सिं
सव्वत्थ त्थी-लोए सव्वम्मि जलं तहन्नम्मि. ६७
अन्नत्थ कुन्तला, अन्नस्सिं कुसुमाइँ, अन्नहिं हारा
पिच्छ मयच्छि-जणे सव्वहिंपि रहसेण जल-रमिरे. ६८
काहिं जाहिं ताहिं इत्थीए रमइ नेस राय-वडू,
कीए जीए तीएवि विअड्डाए निहिय-चित्तो. ६९

कोसलानां राज्ञः सकाशाद् मगधानां राज्ञः सविधे राज्ञा अराज्ञापि खु निश्चितं नीरस्य लहर्यः कल्लोला उच्छाल्यन्ते ॥

६६. प्रियाम् अभीष्टां गणिकाम् आत्मना सह जले नीत्वा आत्मना रोषयित्वा सकोपां कृत्वा सयुवा तरुणमित्रपरिवृतः कोपि युवा आत्मनैव अतूतुषत् वचनवैचित्र्येण आवर्जयत् । अपिः एवार्थे ॥

६७. सर्वस्मिन् समस्ते धारागृहे सर्वस्मिन् स्त्रीलोके तथा सर्वस्मिन् अन्यत्र मित्रादिषु सर्वे अन्येपि पूर्वोक्तेभ्योऽपरेपि नृपा जलं क्षिपन्ति उच्छालयन्ति ॥

६८. अन्यस्मिन् स्कन्धादिदेशे । विसंस्थुला इति भावः । कुन्तलाः केशपाशाः । अन्यस्मिन् कुसुमानि । अन्यस्मिन् हाराः । इति रभसेन औत्सुक्येन जले रन्तरि रमणशीले सर्वस्मिन्नपि मृगाक्षिजने पश्य । इति ज्ञेयम् ॥

६९. कस्यां यस्यां तस्यामेव विदग्धायामेव कटाक्षादिन्यासनि[1]पुणस्त्रियां निहितचित्तः न्यस्तमनाः सन कस्यां यस्यां तस्याम् । अविदग्धस्त्रियाम् इत्यर्थः । एष पुरोवर्ती राजबटुः न रमते । अपिः एवार्थे ॥

---

1 B °न्यासे.

एअस्सिं ठाणे जलॅ-छणे इमस्सिं हवन्ति नक्खङ्का
सव्वेसिं अन्नेसिं जुआण जुअईण य पयासा. ७०
सव्वाणं अन्नाणवि जुआण जुअईण एत्थ हलवोलो
न हु कास तास रम्मो? केसिं तेसिं न देइ दिहिं? ७१
कासवि तास सरिच्छा किंनर-नारीइ किंनरस्स तहा
गायन्ति इत्थ रमिरा वारिणि तरुणीउ[१] तरुणा य. ७२
कस्सवि तस्स जुआणस्स काइ ताए अ एत्थ जुअईए[२]
न हु दीसइ तणु-लट्ठी जा न सरोमञ्च-कञ्चुइआ. ७३

७०. एतस्मिन् स्थाने यन्त्रगृहरूपे अस्मिन् जलक्षणे[1] सति सर्वेषां सर्वासां यूनां युवतीनां संबन्धिनो नखाङ्का नखक्षतानि अन्येषाम् अन्यासां यूनां युवतीनां च प्रकाशाः अङ्गरागापगमात् स्वपरप्रकटा भवन्ति ॥

७१. अत्र जलकेलिकाले सर्वेषाम् अन्येषां यूनां सर्वासाम् अन्यासां युवतीनामपि संबन्धी। हलवोलो देश्यः कोलाहलार्थः। ततः कोलाहलः हु निश्चितं केषां तेषां न रम्यः। किं तु सर्वेषां श्रोत्रपुटैः पेय इत्यर्थः ॥ केषां तेषां यूनां कासां तासां युवतीनां न धृतिं ददाति किं तु सर्वेषां हृदयम् आह्लादयतीति भावः ॥

७२. तथा कस्या अपि तस्याः सर्वोत्कृष्टायाः किंनरनार्याः अमररमण्यास्तथा कस्यापि तस्य सर्वप्रसिद्धस्य किंनरस्य देवगायनस्य सदृक्षा रूपवेषनिनादादिना तुल्याः रन्त्र्यो रन्तारश्च क्रीडापरास्तरुण्यस्तरुणाश्च अत्र धारागृहे वारिणि गायन्ति गानं कुर्वन्ति ॥

७३. कस्यापि तस्य यूनः कस्यास्तस्याश्च युवत्यास्तनुयष्टिः अत्र यन्त्रगृहे हु[2] निश्चितं यत्तदोर्नित्यसंबन्धात् सा न दृश्यते या न रोमाञ्चः पुलकः स एव तनुव्यापकत्वात् कञ्चुकः सह रोमाञ्चकञ्चु-

१ B C तरुणीइ. २ B C जुअईण.

1 B C जलोक्षणे. 2 B C खु.

पुं-सद्दो जास, मणं जस्स य, जल-केलि-काल-दुल्ललिओ
किस्सा तिस्सा जिस्सा सो जुवईए अणुसरेइ. ७४
कीसे तीसे जीसे पणालिआए पल्लुट्टिअं नीरं
कीए जीए तीएवि वाहिरं तं न जुअईए. ७५
काहेवि नाहि-लोए, कालावि न वा अमच्च-लोगम्मि,
कइआवि न भू-लोए जल-जन्तं एरिसं आसि." ७६

केन वर्तते सरोमाञ्चकञ्चुकिका। किं तु सर्वस्य शैत्यहर्षादिना अङ्गयष्टिः सपुलकाभूद् इति भावः॥

७४. यस्य पुम्शब्दः धर्मादिपुरुषार्थासाधनात् पुमान् इति नाममात्रम् यस्य च मनः चित्तम्। सचेतन इत्यर्थः। जलकेलेः कालस्तत्र दुर्ललितः भोगवाञ्छातत्परः स कां यां तां युवतिम् अनुसरति। पञ्चशरशराघातभीतः स्त्रीमात्रस्यापि पृष्ठानुयायी भवतीति भावः। "क्वचिद् द्वितीयादेः" [३. १३४.] इति द्वितीयायाः षष्ठी॥

७५. कस्या यस्यास्तस्याः प्रणालिकायाः सकाशाद् यद् नीरं पर्यस्तं पतितं तत् कस्या यस्यास्तस्या अपि युवत्याः न बहिरभूत् किं तु सर्वस्यास्तद् अङ्गसङ्गम् आपेत्यर्थः। "क्वचिद् द्वितीयादेः" [३. १३४.] इति पञ्चम्याः षष्ठी। पूर्वार्धे यच्छब्दो ज्ञेयः॥

७६. कस्मिन्नपि काले न अहिलोके नागसद्मनि। कस्मिन्नपि काले नैव अमर्त्यलोके त्रिदशालये। कस्मिन्नपि काले न भूलोके पृथ्वीपृष्ठे जलयन्त्रम् ईदृशम् आसीत्। अवलोकनपरविश्वलोकालक्षितसततविश्वतोमुखोच्छलितशुचिसुरभ्यमृतधाराधोरणीवहनाद् नैतत्समं बभूव॥

राया। "राज्ञः" [४९.] इति नलोपे अन्त्यस्य सौ आत्वं वा। पक्षे रायाणो॥

जाला जलेण पुन्नं जन्त-हरं, जलॅ-छणो हुओ जाहे,
दोवारिएण ताहे विन्नत्तम् इमं नरिन्दस्स. ७७

रायाणो । रण्णो । रण्णो । "जश्शस्ङसिङसां णो" [५०.] इति णो । पक्षे राया । रायाउ । रायस्स ॥

राइणा । "टो णा" [५१.] इति णा । पक्षे रण्णा । राएण ॥

राइणा । राइणो । राइणो । राइम्मि । "इर्जस्य णोणाङौ" [५२.] इति जस्य इः । पक्षे रायाणो । राएण । रण्णो । अराअम्मि ॥

अराइणं । अराइणं । "इणमू अमामा" [५३.] इति जस्य अमाम्भ्यां सह इणम् । पक्षे राईणं । रायं ॥

राईहिं । राईहिन्तो । राईसु । राईण । "ईद्भिस्भ्यसाम्सुपि" [५४.] इति जस्य ई । पक्षे रायाणेहिं इत्यादि ॥

रण्णा । रण्णो । "आजस्य°" [५५.] इति टाङसिङस्सु णा णो इत्यादेशापन्नेषु अण् । पक्षे अराइणा । राइणो । सणाणेषु इति व्यावृत्तेः रायाउ रायस्स राएण इति प्राग्[६०,६१]उक्तोदाहरणानि इह ज्ञेयानि ॥

सजुआणो "पुंस्यन°" [५६.] इति अन्नन्तस्य आणः । पक्षे यथादर्शनं "राज्ञः" [३. ४९.] इत्यादिभिः राजवत् कार्यम् । पक्षे जुआ ॥

अप्पणिआ । अप्पणइआ । "आत्मन°" [५७.] इति टाया णिआ णइआ । पक्षे अप्पाणेणं ॥

सवे । अन्ने । "अतः सर्वादे°" [५८.] इति सर्वादेः अदन्ताज्जसः डित् ए । जस इति किम् । सवस्सि ॥

सवत्थ । सवम्मि । अन्नम्मि । अन्नत्थ । अन्नस्सि । "ङेः स्सिम्मित्थाः" [५९.] ॥

अन्नहिं । सवहिं । "न वाऽनिद°" [६०.] इति हिं वा । बाहुलकात् कियत्तद्भ्यः स्त्रियामपि । काहिं । जाहिं । ताहिं । पक्षे सवस्सि । सवत्थ । सवम्मि इत्यादि । स्त्रियां तु पक्षे कीए । जीए । तीए । इदमेतद्वर्जनं किम् । इमस्सि । एअस्सि ॥

सवेसिं । अन्नेसिं । "आमो डेसिं" [६१.] इति डेसिं । पक्षे सवाणं । अन्नाण । बाहुलकात् स्त्रियामपि । केसिं । तेसिं ॥

जइआ गिम्हो पयट्टओ तइअच्चिअ किर आसि पाउसो;
जाए ताला जल-च्छणे पत्तो अच्छि-वहं खणे तहिं. ७८

कास। तास। "कितद्भ्यां डासः" [६२.] इति डासः। पक्षे कस्सि। तेस्सि॥

कास। तास। जास। "कियत्तद्भ्यो ङसः" [६३.] इति डासः। पक्षे कस्स। तस्स। जस्स। बाहुलकात् कितद्भ्याम् आकारान्ताभ्यामपि डासो वा। कास। तास। पक्षे काए। ताए॥

किस्सा। जिस्सा। तिस्सा। कीसे। जीसे। तीसे। "ईद्भ्यः स्सा से" [६४.] इति स्सा से। पक्षे कीए। जीए। तीए॥

७८. तदा ग्रीष्मकाले तस्मिन् क्षणे ग्रीष्मप्रवृत्त्यनन्तरमेव जलक्षणे नानाजलयन्त्रादिधारासारादिभिर्जलोत्सवे जाते संपन्ने सति। किल इति संभाव्यते। यदा ग्रीष्मः प्रवृत्तस्तदैव प्रावृड् अक्षिपथं प्राप्ता समस्तजनप्रत्यक्षासीद् इति। अथ च यौगपद्येन ऋतुसंभवेन ग्रीष्मकाले प्रावृड् आसीद् इति भङ्ग्योक्तम्। उत्तरसर्गार्थसूचनमपि कृतम्। वैतालीयं छन्दः॥

काहे। काला। कइआ। जाला। जाहे। ताहे। जइआ। तइआ। ताला। "ङेर्डाहे°" [६५.] इति आहे आला इति डितौ इआ च। पक्षे तहिं इत्यादि॥

इत्याचार्यश्रीहेमचन्द्रविरचितश्रीकुमारपालचरितप्राकृतद्व्याश्रयमहाकाव्यवृत्तौ चतुर्थः सर्गः समाप्तः॥

कम्हा जम्हा तम्हावि वण-निउञ्जाउ तत्थ महमहिओ
काओ जाओ ताओवि पक्खओ नीव-गन्धो तो. १

"गायन्ति किणो मोरा? कीस पिगी गाइ जम्बु-फल-मत्ता?
कम्हा वयं जिआमो?" तत्थ पउत्थेहिँ इअ लविअं. २

इमिणा इमेण एएण एदिणा किणवि जेण तेण किर
सव्व-दिसाण मुहेणं महमहिओ मालई-गन्धो. ३

१. अथ पञ्चचत्वारिंशता गाथाभिर्ग्रीष्मानन्तरभाविनीं प्रावृषं वर्णयति। ततो ग्रीष्मानन्तरं कस्माद् यस्मात् तस्मादपि। सर्वस्माद् इत्यर्थः। वननिकुञ्जात् कस्माद् यस्मात् तस्मादपि पक्षात् पार्श्वात् समीपदेशात् तत्र प्रावृषि नीपगन्धः धाराकदम्बसौरभ्यं प्रसृतः उच्छलितः॥

कम्हा। जम्हा। तम्हा। "ङसेर्म्हा" [६६.]। पक्षे काओ। जाओ। ताओ॥
तो। "तदो डोः" [६७.] इति ङसेर्डो। पक्षे तम्हा॥

२. कस्माद् मयूरा गायन्ति केकायन्ते। कस्मात् जम्बुफलैर्मत्ता पुष्टा सती पिकी कोकिला गायति मधुरं कूजति। अथ यदि एतयोः शब्दितम् उल्लसति तदा कस्माद् वयं जीवामः। एवं सति न प्राणितुं समय इति भावः। इति तत्र प्रावृषि प्रोषितैः पान्थैर्लपितं परस्परम् उक्तम्॥

किणो। कीस। "किमो डिणोडीसौ" [६८.] इति ङसेर्डिणोडीसौ। पक्षे कम्हा॥

३. येन केनापि तेन लोकप्रसिद्धेन सर्वदिशां मुखेन। केन तेने-

वायं वाएण तिणा केणावि, जिणा खु णेहि पहिएहि
परिमुक्को नीसासो भरिऊणं दइअ-रइ-केलिं. ४
मालइ-लयाइ णाए णेण य पुव्वानिलेण पहिआण
कत्तोवि कोवि कत्थवि अहूव-पुव्वो हुओ मोहो. ५
अह विन्नत्तं आरामिएण, "पेच्छसु इमं वणोद्देसं
वल्लीहि इमाहि इमो बहल-दलाहिं मणो हरइ. ६

त्याह । अनेन[1] प्राच्येन अनेन[2] अवाच्येन[3] एतेन प्रतीच्येन एतेन उदीच्येन कृत्वा । किर इति किलार्थे । स च आप्तवादे । मालतीगन्धो जातिपरिमलः प्रसृतः ॥

४. तेन केनापि वातेन वातं परिभ्रान्तम् येन कृत्वा खु निश्चित दयितारतिकेलिं प्रियासुरतक्रीडां स्मृत्वा विचिन्त्य तैः पथिकैः निःश्वासः परिमुक्तः । तथाविधपवनस्य उद्दीपनविभावत्वात् । बहिर्मुखाद् उष्णवातः परित्यक्तः ॥

इमिणा । इमेण । एएण । एदिणा । किण । जेण । तेण । तिणा । केण । जिणा ॥ "इदमेतत्कियत्तद्भ्यष्टो डिणा" [६९.] इति टाया डित् इणा वा ॥

५. तया मालतीलतया तेन च पूर्वानिलेन पथिकानां कस्मादपि कुतश्चित्कारणात् कुत्रापि उद्यानोद्देशे कोप्यनिर्वचनीयः अभूतपूर्वः असंजातचरो मोहः चित्तवैक्लव्यम् अभूत् । अपिः संदेहे ॥

णेहि । णाए । णेण । "तदो ण°" [७०.] इति स्यादौ णो लक्ष्यानुसारेण । कत्तो । को । कत्थ । "किमः कः°" [७१.] इति स्यादौ त्रतसोश्च कः ॥

६. अथ प्रावृड्विजृम्भणानन्तरम् आरामिकेण उद्यानपालकेन विज्ञप्तं श्रीकुमारपालभूपालस्य पुरः प्राञ्जलि प्रतिपादितम् । किं तत् तदेवाह । इमं प्रत्यक्षवर्तिनं वनोद्देशं काननसमीपं पश्य प्रेक्षस्व वा सावधानं विलोकय । सामान्येन वनदर्शनविषयं विज्ञाप्य विशेषेण

---

1 B C इमेन. 2 B C इमेन. 3 B अप्राच्येन. C अपाच्येन.

इमिआ पाउस-लच्छी कहइ, अयं सिरिफलो वणे अस्सिं
समए इमस्सिम् अलि-किङ्किणी-रवं कामॅ-छेत्तं व. ७
उअ अस्स जम्बु-तरुणो इमस्स दाडिमि-दुमस्स य फलाइं,
एसु रमिज्जइ आहिं सुगीहि एहिं सुगेहिं च. ८
इह उज्जाणे समए इमम्मि णं पिच्छ विहसियं नीवं,
कुडयं च इमं, णे अज्जुणे अ, ताविच्छए अ इमे. ९

वर्षासंभववृक्षलतापत्रादिसंपदं वनगतां दर्शयन् विज्ञपयति । इ-माभिः बहलदलाभिः सान्द्रपत्रपङ्क्तिभिः वल्लीभिः व्रततिभिः कृत्वा अयं वनोद्देशो मनो हरति हृदयम् आवर्जयति ॥

इमं । इमाहि । इमो । "इदम इमः" [७२.] ॥

७. अस्मिन् समये सांप्रतम् अस्मिन् वने अयं श्रीफलः बिल्वः अलयः सौरभ्यलोभलग्ना भृङ्गास्त एव तदाकारत्वात् किङ्किण्यः क्षुद्रघण्टिकास्तेषां रवो यत्र तत् तथा एवंविधं कामच्छत्रमिव । तेन कन्दर्पस्य सच्छायत्वात् । इति इयं प्रावृड्लक्ष्मीः कथयति सामर्थ्यात्स्तनयित्नुस्तनितैः प्रतिपादयति ॥

इमिआ । अयं । "पुंस्त्रियोः°" [७३.] इति न वा अयं इमिआ । पक्षे इमो ॥

८. अस्य जम्बुतरोः अस्य दाडिमीद्रुमस्य च फलानि उअ पश्य । तथा एषु फलेषु आभिः शुकीभिः कीरीभिः एभिः शुकैश्च रम्यते परस्परं क्रीड्यते ॥

अस्सिं । अस्स । "स्सिंस्सयोरत्" [७४.] । इमादेशोपि । इमस्सिं । इमस्स ॥
बाहुलकाद् अन्यत्रापि । एसु । आहिं । एहिं ॥

९. अस्मिन् समये सांप्रतम् अस्मिन्नुद्याने इमं नीपं धाराकदम्बम् इमं च कुटजं च वत्सकाख्यवृक्षविशेषं विकसितं पुष्पितम् इमान् अर्जुनांश्च ककुभान् इमान् तापिच्छांश्च तमालान् । अर्थवशाद् वचनव्यत्ययः । इति विकसितान् पश्य ॥

---

१ B रिसि°. C रिस°. २ B °वत्तं.

---

1 B C °लक्ष्मी.

लङ्गलि-वणेण णेणं फुल्लं, जूही-वणेण य इमेण,
कोहलि-वणेहि णेहिँ, इमेहि बिम्बी-वणेहिँ च. १०

भू-भागम् इणं, तह नह-भागम् इमं, परिमलेण रुन्धन्तं
इदम् इणम् इणमो अ वणं कोआसइ केअईण, उअ. ११

उअ, किंपि हु सुन्देरं पाउस-समयस्स से पयट्टस्स;
सिं कुडयज्जुण-सज्जाण परिमलो इत्थ परिमिलिओ. १२

इह। "ङेर्मेन हः" [७५.]। इदमः कृतेमात् ङेः स्थाने मेन सह हः। पक्षे इमस्सि॥

इह। इमम्मि। "न त्थः" [७६.]। इदमः ङेः त्थो न॥

१०. एतेन लाङ्गलीनां शारदीलतानां वनेन अनेन यूथिकानां माधवीलतानां वनेन च एभिः कूष्माण्डीनाम् ओषधिविशेषाणां वनैः एभिर्बिम्बीनां रक्तफलानां वनैश्च फुल्लम्। एतानि लाङ्गल्यादिवनानि पुष्पितानीत्यर्थः॥

णं। णे। णेणं। [णेहिँ] "णोम्‌शस्टाभिसि" [७७.] इति णः। पक्षे इमं। इमे। इमेण। इमेहिँ॥

११. इमं भूभागं पृथ्वीपृष्ठप्रदेशं तथा इमं नभोभागम् आकाशदेशं परिमलेन सौरभ्येण रुन्धत् व्याप्नुवद् इदम् इदम् इदं[1] च। समस्तमपीति भावः। केतकीनां वनं विकसति पुष्पाति उअ पश्य॥

इणं। "अमेणं" [७८.]। पक्षे इमं॥

इदं। इणं। इणमो। "क्लीबे स्य°" [७९.] इति सिअम्भ्यां सह इदं इणमो इणं च॥

१२. प्रवृत्तस्य प्रसृतस्य। प्रौढिं प्राप्तस्येत्यर्थः। अस्य प्रावृट्समयस्य हु निश्चितम् आश्चर्यं वा किमपि लोकोत्तरं सौन्दर्यम् अस्ति

1 B C इदम् ३ for इदम् इदम् इदम्.

से चन्दणस्स तह मयनाभीए,[१] सिं च अगरु-कलिआण
कप्पूर-पारियाण[२] य अहिअयरो मालई-गन्धो. १३
चिञ्चिणिअ[३]-तरूणेमाणेआण य कुसुम-दंसणे हरिसो
कहवि न माइ इमस्सेअस्स य आराम-लोअस्स. १४
ताण ललिआण ठाणं तस्साणङ्गस्स, लङ्गली-कुसुमं,
एआओ, एत्ताहे, एत्तो अ न एत्थ को लेइ? १५

उअ पश्य। तथा अत्र प्रावृषि एषां कुटजार्जुनसर्जानां वत्सकककुभशालाख्यद्रुमाणां परिमलः परिमिलितः पिण्डीभूतः। तद्गन्धवैवित्त्यं न ज्ञायत इत्यर्थः॥

किं। "किमः किं" [८०.]॥

१३. अस्माद् उपलभ्यमानात् तस्मात् पूर्वम् उपलब्धात् एतस्मात् आसन्नोपलभ्यमानाद् वा चन्दनात्। एषाम् अत्यासन्नोपलभ्यमानप[1]त्तनादिनगराणां तेषां लोकदृष्टमलयादि[2]देशानां वा चन्दनात्। तथा अस्यास्तस्या एतस्या वा मृगनाभेः आसां तासां वा पुरां मृगनाभेः। आभ्यस्ताभ्य एताभ्यश्च अगुरुकलिकाभ्यः। एभ्यस्तेभ्य एतेभ्यश्च कर्पूरपारिजातेभ्यः। सामर्थ्यात् चन्दनादिगन्धेभ्य[1] इत्यर्थः। मालत्या जातेर्गन्धः परिमलः अधिकतरः। प्रावृट्काले हि मालत्या अतिरुचिरप्रचुरतरसौरभ्यास्पदत्वात्॥ से चन्दणस्स इत्यादिषु "क्वचिद् द्वितीयादेः" [३.१३४.] इति पञ्चम्याः षष्ठी॥

१४. एषाम् एतेषां च चिञ्चिणिकातरूणाम् अम्लिकावृक्षाणां कुसुमदर्शने सति अस्य एतस्य आरामलोकस्य उद्यानजनस्य कथमपि केनापि प्रकारेण हर्षो न माति अति[3]वर्तते॥

१५. तस्य अनङ्गस्य तेषां ललितानां विलसितानां स्थानं पदं ला-

---

१ So B. C. २ B. °पारयाण. We with C. ३ B. C. चिंच°.

---

1 B wants °मानपत्त° up to °गन्धेभ्य. 2 C °मलयजादि°. 3 C अभिवर्तते.

एअम्मि वणोद्देसे, ईअम्मि, तहा अयम्मि ऊसलइ
इणम्, इणमो, एस फुडं सालो, जूही, सिलिन्धं च. १६
कुडयं[1] दलइ तम् एअं, एसा सा जूहिआ महमहेइ,
एसो सो कन्दलिओ वेणु-कुडङ्गोवि पडिसाहं. १७

ङ्गलीकुसुमं शारदीलताप्रसूनम् एतस्मात् [एतस्मात्] एतस्माच्च। सर्वसमीपवर्तिदेशाद् इत्यर्थः। अत्र उद्याने को न लाति। परिमल-विकासिसौन्दर्याद्यावर्जितचेताः सर्वोपि एतद् गृह्णातीति भावः॥

से। सिं। "वेदंतदेत°" [८१.] इत्यादिना इदमतद्एतदां स्थाने ङस्आम्भ्यां सह यथासंख्यं सेसिमौ। पक्षे इमाण। एआण। इमस्स। एअस्स। ताण। तस्स॥

एत्ताहे एत्तो। "वैतदो°" [८२.] इति एतदो ङसेः स्थाने त्तो त्ताहे। पक्षे एआओ॥

एत्ताहे। एत्तो। एत्थ। "त्थे च तस्य लुक्" [८३.]। एतदः त्थे परे त्तो त्ताहे एतयोश्च परयोस्तस्य लुक्॥

१६. एतस्मिन्नेतस्मिन् [एतस्मिन्] समीपवर्तिनि वनोद्देशे एष सालः अर्जुनः। एषा यूथी मागधीलता। एतत् सिलिन्ध्रं[1] च भूमि-स्फोटः स्फुटम् उल्लसति पुष्पपत्रप्रवालादिभिर्वर्धते॥

ईअम्मि। अयम्मि। "एरदी°" [८४.] इति एतदः एकारस्य ङ्यादेशे म्मौ अत्-ईतौ। पक्ष एअम्मि॥

१७. तद् एतत् पूर्वदृष्टम् अधुना अनुभूयमानं कुटजं दलति वि-कसति। एषा सा यूथिका महमहेइ[2] इति गन्धेन प्रसरति। सौरभ्येण सर्वं व्याप्नोतीत्यर्थः। एष स वेणुकुडङ्गोपि वंशगहनमपि प्रतिशाखं सर्वशाखासु कन्दलितः संजातनवाङ्कुरः॥

---

१ B कुडलं.

---

1 C शिलि°. 2 B C महमहेइत्ति for महमहेइ इति.

अह लीला-पोक्खरिणी, अह नीरं वड्डवास-मुक्कं च,
अह पवण-वेवमाणो नवो अ कलमङ्कुरुक्केरो. १८

ताविच्छो बहल-दलो अमू, अमू कमलिणी अ गय-कमला,
मत्तम् अमुं भेग-कुलं अमूसु लीला-तलाईसु. १९

निचुलाण अयम्मि वणे, इअम्मि तह सल्लई-निउञ्जम्मि,
साल-वणम्मि अमुम्मि अ परिमल-बहलो वहइ पवणो." २०

इणम् । इणमो । एस । "वैगस°" [८९.] इति एतदः सिना सह एस इणम् इणमो । पक्षे एअं । एसा । एसो ॥

एसा । सा । एसो । सो । "तदश्च तः सोऽक्लीबे" [८६.] । अक्लीबे । अक्लीब इति किम् । तम् एअं ॥

१८. असौ लीलापुष्करिणी क्रीडावापिका । वड्डुवास इति देश्यो मेघार्थे । वड्डुवासमुक्कं मेघमुक्तम् अदो नीरं च । पवनेन वेपमानः कम्पमानः नवः अधुना उद्गतः असौ कलमाङ्कुरोत्करश्च सुरभिशालिविशेषाङ्कुरपूरोस्ति ॥

१९. बहलदलः सान्द्रच्छदः असौ तापिच्छस्तमालः । तथा अमूषु लीलातडागिकासु क्रीडादीर्घिकासु गतानि प्रावृड्भावाद् नष्टानि कमलानि यस्याः सा तथा असौ कमलिनी च पद्मिनी मत्तम् अदो भेककुलं दर्दुरवृन्दं चास्ति ॥

अह ३ । "वादसोद°" [८७.] इति अदसो दस्य सो हो वा । तस्मिंश्च कृते "अतः सेर्डो" [३.२.] । "आत्" [है० २.४] इत्याप् । "क्लीबे स्वरान्म्सेः" [३.२५.] इति मश्च न भवति । पक्षे उत्तरेण मुः आदेशः ॥

अमू । अमू । अमुं । अमूसु । "मुः स्यादौ" [८८.] ॥

२०. निचुलानां वञ्जुलानाम् अमुष्मिन् वने तथा अमुष्मिन् स-

---

[1] B एसा.

"तं, तुं, तुवं, तुह, तुमं, आणेह नवाइँ नीव-कुसुमाइँ.
भे, तुब्भे, तुम्होय्हे[1], तुय्हे, तुज्झासणं[2] देह. २१

ह्लकीनिकुञ्जे गजप्रियागह्वरे अमुष्मिन् सालवने च परिमलबहलः सौरभनिचितः पवनो वहति वाति ॥

अयम्मि । इअम्मि । "म्मावय्येऔ वा" [८९.] । अदसः अन्त्यव्यञ्जनलुकि दकारान्तस्य स्थाने ङ्यादेशे म्मौ अय इअ । पक्षे अमुम्मि ॥

२१.–४५. अथ मालिनीपरस्परोक्तिप्रत्युक्तिनिवेदनेन उद्यानपालः श्रीकुमारपालभूपालं विज्ञपयति । पञ्चविंशत्या महाकुलकम् ॥

४५. पद्मावतीदेव्याः पूजने पूजानिमित्तं तिसृभिः द्वाभ्यां द्वाभ्यां गुणिते ते च ते द्वे च द्विगुणितद्वे ताभ्याम् । चतसृभिश्चेत्यर्थः । सखीभिः सह मालिन्यो मालायुक्ता अन्योन्यम् इति पूर्वोक्तं जल्पन्ति कथयन्ति[1] ॥

तदेवाह । २१ सखि त्वम् ९ । कोर्थः । सर्वा अपि यूयम् । नवानि नीपकुसुमानि आनयतेति । अत्र तंतुमादिभिः सह सखिशब्दस्य प्रत्येकं योगः । एवम् उत्तरत्रापि युष्मदादेशैः भे तुब्भे इत्यादिभिः अस्मदादेशैश्च अम्मि म्मीत्यादिभिश्च संबन्धः कार्यः । हे सख्यः यूयम् ६ आसनं पूजाविलोकनार्थागतोपवेशनार्थं विष्टरं दत्त वितरत ॥

---

१ B तुम्होम्हे. We with C. २ B तुब्भा.° We with C. तुब्भ would give us one more form तुज्झ (III. 104). It would be far-fetched to suppose that तुब्भ is the correct form but that तुज्झ is not to be formed under III. 104 since out of तुम्ह and तुज्झ that are formable from तुब्भ, तुम्ह is expressly given in III. 91 so as to indicate that तुज्झ is not to be formed. Neither in the Vṛitti of the Sûtras nor in the commentary on our text is there any indication of such a *Jñâpaka*. ज्झ and ब्भ closely resemble each other in the Mss.

---

1 B C कथयंति जल्पंति.

तुम्हे, तुज्झे ण्हायह. अहिणव-कल्हार-पत्तिआणयणे,
तं, तुं, तुमं, तुवं, तुह, तुमे, तुए, संपयं भणिमो. २२
वो, तुब्भे, तुज्झोय्हे[1], तुम्हे, तुज्झे अ, भे अ, तुय्हे अ
भणिमो, न किम् इहँ ण्हाएह पल्लले दद्दुर-भएण? २३
भे, ते, दि, दे, तइ, तए, तुमाइ, तुमए, तुमे, तुमं, तुमइ,
किं नाणिज्जइ दुव्वा पउमावइ-देवि-पूयत्थं? २४
भे, तुब्भेहिँ अ, तुज्झेहिँ अ, तह तुम्हेहिँ तुलसिआ गिज्झा
उज्झेहिँ[2] अ, उम्हेहिँ अ, तुय्हेहिँ तह य उय्हेहिं. २५

२२. हे हला यूयं यूयं स्नात स्नानं कुरुत । हे वयस्याः त्वाम् ७ अभिनवा नूतना या कह्लारस्य वनस्पतिभेदस्य पत्रिका तस्या आनयने सांप्रतं वयं भणामः आदिशामः ॥

२३. हे आल्यः युष्मान् ८ भणामः यथा इह पल्वले अल्पसरसि दर्दुरभयेन किं यूयं न स्नात । भेकभीतिं त्यक्त्वा स्नानम् आधत्तेत्यर्थः ॥

२४. हे सध्रीच्यः त्वया ११ पद्मावतीदेव्याः पूजार्थम् । किम् इति आक्षेपे । किं दूर्वा नानीयते । अपरव्यापारम् उत्सृज्य आनीयताम् इति भावः ॥

२५. हे सख्यः युष्माभिः ८ तुलसिका । सुरसाख्यः प्रसिद्धसुरभिवनस्पतिभेदः । ग्राह्या उच्चेया ॥

१ B C are both confused and wanting in this distich. B merely has वो तुब्भे तुब्भोम्हे तुज्झे य. C वो तुब्भे तुब्भोय्हे तुम्हे ब्भे अ ते अ तुय्हे य. Bm. reads the Sûtra thus: वो तुब्भे उज्झे तुय्हे उय्हे भे शसा (III. 93) where P substitutes तुब्भ for उज्झे. Metre in our text makes उज्झे impossible, and तुब्भ would give two more forms besides the right one, *viz.* तुज्झ and तुम्ह. तुज्झ appears to be the correct reading and the Sûtra should therefore read वो तुज्झ तुब्भे तुय्हे उय्हे भे शसा. In Jain Mss. ज्झ and ब्भ are very similar. २ That उज्झे° is the correct form and not उब्भे° as given by P (III. 95) is plain from the fact that we should thereby have one more form उज्झेहि which the grammar would not recognise. See note २ on 21 above.

तुब्भत्तो, तुम्हत्तो, तुज्झत्तो, केअइं तुहत्तोवि
आणाएमि तुमत्तो तहा तुवत्तो, तइत्तो अ. २६
तुय्ह, तहिन्तो, तुब्भ य, तुम्ह य, तुज्झ य सवेण्टं-[1]पिकाईं
देवीइ ढोवणत्थं तोडामो दाडिमि-फलाइं. २७
तुब्भत्तो, तुय्हत्तो, उय्हत्तो तह य तह य उम्हत्तो,
तुम्हत्तो, तुज्झत्तो, मुत्था-धूवं करावेमि. २८
तइ, [2]ते, तुहं, तुह, तुमे, तु, तुम्ह, तुव, तुम, तुमो, तुमाइ, इ, ए,
दे, दि, तहा विम्हरिअं किम् इमं पल्लल-जले ण्हाणं? २९

२६. हे हलाः त्वत् ७ भवत्या भवत्याः पार्श्वात् केतकम् आनयामि ॥

२७. हे वयस्याः त्वत् ५ भवत्या भवत्याः सकाशाद् देव्याः पद्मावत्या ढौकनार्थं बलिकरणार्थं सवृन्तानि च तानि पक्कानि च तानि [1]तथा प्रसवबन्धनपरिपाकयुक्तानि दाडिमीफलानि वयं त्रोटयामः अवचयामः ॥

२८. हे आल्यः युष्मत् ६ भवतीनां भवतीनां सकाशाद् मुस्तानां गुन्द्राणां धूपं कारयामि ॥

२९. हे सध्रीच्यः तव [2]१५ किमिदं पल्वलजले स्नानं विस्मृतम्। येन न कृतम् इति भावः ॥

---

१ B C सवेट°. २ B reads the first halves of the two stanzas 29 and 30 thus:

तइ ते तुहं तुमे तु तुम्ह तुव तुमो तुमाइ ई ए।
दे हि * * *
तुब्भ (? उब्भ) य तम्हं तुब्भ य तुब्भ य उय्ह तह उंम्ह तह तुज्झ
C तइ तं तुहं तुमे तु तुम्हं तुव तुम तुमो तुमइ ई ए।
दे हि * * *
तुब्भ य तम्हि य तुब्भ य उब्भ य उज्ज तह उम्हु उम्हे।

---

1 B यथा. 2 B has 11 for 15 which we with C.

उब्भ य, तुम्हं, तुब्भ य, उम्ह य, उय्ह, तह उज्झ, तह तुज्झ,
पुप्फञ्जलि-दाण-कए नीवावचए किम् आलस्सं? ३०
भे, तुब्भ, तु, वो, तुब्भं, तुब्भाण, तुवाण, तुम्ह, तुम्हं च,
तुम्हाण य पल्लओ विम्हरिअं किं जलाणयणं? ३१
तुज्झं[1], तुज्झ, तुमाण, तुमाण, उम्हाण[2], अविअ उम्हाणं[3]
मत्त-जलवायसुड्डावणेण जल-कलुसणं किम् इमं? ३२
तुब्भाणं, तुज्झाणं, तुहाण, तुम्हाणम्, अह तुवाणं च,
तुज्झाण, तुहाणम् इमं मत्त-वलायासु किं रमणं? ३३
तुमए, तए, तइ, तुमे, तुमाइ, तुज्झम्मि, तुम्मि, तुब्भम्मि,
तुम्हम्मि, तुहम्मि, तुवम्मि, तुमम्मि भणाम जूहि-कए. ३४

३०. हे सख्यः तव ७ पुष्पाञ्जलिदानकृते कुसुमाञ्जलिविधान-निमित्तं किं नीपानां धाराकदम्बकुसुमानाम् अवचये चुण्टने आलस्यम्। न मन्दादरत्वं कर्तुं युक्तम् इति भावः ॥

३१. हे हलाः[1] युष्माकं १० पल्वलाज्जलानयनं किं विस्मृतम् ॥

३२. हे वयस्याः युष्माकं ६ मत्तजलवायसोड्डायनेन पुष्टमद्गुक्षेपणेन कृत्वा किमिदं जलकलुषणम् । तत्संमुखं लेष्टुक्षेपणादिना पानीयाविलीकरणं नोचितम् इति भावः ॥

३३. हे आल्यः युष्माकं ७[2] मत्तबलाकासु पुष्टसारिकासु किमिदं रमणम्। पूजाप्रस्तावे न क्रीडितुं युक्तम् इति भावः ॥

३४. हे सध्रीच्यः त्वां १२ यूथीकृते मागधीनिमित्तं भणामः आदिशामः। "द्वितीयातृतीययोः सप्तमी" [३.१३५.] इत्यनेन द्वितीयायाः सप्तमी ॥

---

१ B तुब्भं. C doubtful between तुब्भं and तुज्झं. २ C तुम्हाण. We with B. ३ B अम्हाणं. We with C.

---

1 B C हल्यः. 2 B 8. We with C.

तुसु, तुज्झेसु, तुहेसु अ, तुवेसु, तुम्हेसु, तुवसु, तुब्भेसु,
तुमसु, तुमेसु अ, तुहसु अ, भिसिणि-दलाहरणम् आदिसिमो.
तुब्भासु, तुब्भसु, तहा तुम्हसु, तुम्हासु, तह य तुज्झासु,
तुज्झसु अ, आइसामो नव-जम्बु-फलोवहारम्मि. ३६
अम्मि, म्मि, अम्हि, अहयं, हम्, अहं मालूर-पल्लवे लेमि;
अम्हम्हे, अम्हो, मो, भे, वयमवि लोद्ध-कुसुमाइं. ३७
णे, णं, मि, अम्मि[1], अम्ह य, मम्ह, अहं, मं, ममं, मिमं भणह,
अम्हे, अम्हो, णे, अम्हामलय-फलेहिं जइ कज्जं. ३८
मे, मि, ममं, ममए, मइ, ममाइ, णे, तह मए, मयाइ तहा,
अम्हाहि, अम्ह, अम्हे, णे, अम्हेहि अ जवा गेज्झा. ३९

३५. हे सख्यः युष्मासु १० बिसिनीदलाहरणं पद्मिनीपत्रानयनम् आदिशामः ॥

३६. हे हलाः युष्मासु ६ नवजम्बुफलैः उपहारः पद्मावतीदेव्याः पूजनं तस्मिन् तन्निमित्तम् आदिशामः ॥

३७. हे वयस्याः अहं ६ मालूरपल्लवान् बिल्वकिसलयान् लामि गृह्णामि । हे सख्यः वयं ६ लोध्रकुसुमानि मार्जनप्रसूनानि । अर्थवशाद् वचनव्यत्यय इति लामीत्येकवचनान्तमपि बहुवचनान्तम् । लामः ॥

३८. हे आल्यः मां १० तथा अस्मान् ४ भणत यदि आमलकफलैः कार्यम् । एतद् भवत्प्रयोजनं वयमेव निष्पादयाम इति भावः ।

३९. हे सध्रीच्यः मया ९ तथा अस्माभिः ५ यवा ग्राह्या उपादेयाः ॥

---

[1] B अम्हि. We with C.

मज्झत्तोवि, महत्तो, तहा मइत्तो, तहा ममत्तोवि,
अम्हत्तो तह गिण्हेह कुडय-तरुणो पसूणाइं. ४०

मे, मइ, मम, मह, मज्झं, महं, तहा मज्झ, अम्ह, अम्हं च,
णे, णो, अम्हे, अम्हो चम्पय-कलिआउ गिज्झाओ. ४१

अम्हाणं, मज्झाणं[1], ममाण, ममाणं, महाण य, महाणं,
अम्हाण य, मज्झाणं[2] हत्थे धव-पसवं[3]-दामाइं. ४२

मि, मइ, ममाइ, मएवि अ, अम्हम्मि, ममम्मि, मे, तह महम्मि,
मज्झम्मि अ थल-नलिणी-कुसुमाहरणे निउत्तव्वं. ४३

अम्हेसु, ममेसु तहा, महेसु, मज्झेसु, तह य अम्हासु
आदिसह सल्लई-तरु-नव-कुसुमाहरण-कम्मम्मि." ४४

४०. हे सख्यः मत् ४ मम मम सकाशात् । तथा अस्मत् अस्मत् अस्माकम् अस्माकं सकाशाच्च कुटजतरोः प्रसूनानि यूयं गृह्णीत अङ्गीकुरुत ॥

४१. हे हला मम ९ तथा अस्माकं ७ चम्पककलिका हेमपुष्पककोरका ग्राह्याः ॥

४२. हे वयस्याः अस्माकं ८ हस्ते धवप्रसवदामानि शाखिविशेषप्रसूनस्रजः सन्ति ॥

४३. हे आल्यः मयि ९ स्थलनलिनीकुसुमाहरणे स्थलपद्मिनीपद्मानयननिमित्तं नियोक्तव्यम् आदेष्टव्यम् ॥

४४. हे सख्यः अस्मासु ५ सल्लकीतरुनवकुसुमाहरणकर्मणि

[1] B C मज्झाणं. [2] B मज्झाण य for मज्झाणं which we with C. [3] B C °पसम°.

इअ पउमावइ-देवीइ पूअणे मालिणीउ जम्पन्ति
तीहिं दोहिं दुगुणिअ-वेहिं च सहीहि अन्नोन्नं. ४५

सरय-समयम्मि एत्थ य मिहुण-सरूवेण पिच्छ विलसन्ति
देव, दुवे सारसया, दुण्णि[1] सुगा, वेण्णिं[1] हंसा य. ४६

गजप्रियापादपप्रसूनानयनरूपव्यापारनिमित्तं यूयम् आदिशत भणत । अत्र च महाकुलके तथाचापिशब्दाः सर्वां सर्वां प्रति समुच्चयद्योतकत्वेन नियोक्तव्याः[1] ॥

तथा अत्रैव च "युष्मदस्तं तुं तुवम्॰" [९०.] इत्यादि "सुपि" [११७.] इत्यन्तसूत्राणां तं-तुं-तुवम्-इत्यादि-अम्ह-मम-मह-मज्झ-इत्यन्तानि उदाहरणानि युष्मदस्मदोः सर्वविभक्तिसंबन्धे स्पष्टान्येव । नवरं सुपि एत्वविकल्पम् इच्छन्त्येके । तन्मते तुवसु तुमसु इत्यादि । तुब्भस्य आत्वमपि इच्छत्यन्यः । तेन तुब्भासु । तुम्हासु । तुज्झासु । अम्हस्य आत्वमपीच्छत्यन्यः । तेन अम्हासु इति विशेषः ॥

तीहिं । "त्रेस्ती[2] तृतीयादौ" [११८.] ॥

दोहिं । वेहिं । "द्वेर्दो वे" [११९.] ॥

४६. प्रावृडनन्तरं शरत्संपदं दर्शयन् आरामिकः कुमारपालनृपं विज्ञपयति । हे देव महाराज अत्र च अस्मिन् पुनः शरत्समये द्वौ सारसश्च सारसी च सारसौ । "पुरुषः स्त्रिया" [है॰ ३.१] इति पुरुषशेषे । सारसौ लक्ष्मणौ । एवम् अग्रेपि । द्वौ शुकौ कीरौ द्वौ च हंसौ सितच्छदौ मिथुनस्वरूपेण स्त्रीपुंसयुग्मरूपेण पश्य विलसतः क्रीडां कुरुतः । द्वौ इति पश्येत्यपेक्षया द्वितीया । विलसत इत्यपेक्षया च प्रथमा । एवम् अग्रेपि पश्येत्यपेक्षया द्वितीया भ्राम्यतः उड्डयन्ते सन्तीति योगे प्रथमा ॥

---

१ So B C.

---

1 B समुच्चयावद्योकत्वेन. C समुच्चयावंघातकत्वेन. 2 C त्रेस्तीस्तृ॰. We with B.

दो दो कुररा वे वे अ खञणा नह-यले, उअ, भमन्ते;
पण्णाइँ तिवण्णस्स य, उअ, तिण्णिवि जुण्ण-नीलाइं. ४७

उअ चउरो, चत्तारो, चत्तारि इमे नहम्मि उड्डन्ते,
दंसेइ सारसे इअ मुद्धा दुण्हं[1] वयंसीणं. ४८

दुण्ह[1] नयणाण सुहदा उअ माला पङ्कयाण, तासुं च
कमल-सही हंस-वहू अली-वहू पिच्छ रममाणा. ४९

४७. द्वौ द्वौ कुररौ उत्क्रोशाख्यपक्षिविशेषौ द्वौ द्वौ च खञ्जनौ खञ्जरीटौ नभस्तले उअ पश्य भ्राम्यतः। त्रिपर्णस्य च पलाशस्य त्रीण्यपि पर्णानि जीर्णान्यपि पुरातनप्रायाण्यपि नीलानि। समय-माहात्म्यात् हरितानि। सश्रीकाणीति यावत्। उअ पश्य सन्ति।

दुवे। दोण्णि। वेण्णि। दो। दो। वे। वे। "दुवे दोण्णि वेण्णि च जस्शसा" [१२०.]॥ दुण्णि[2]। विण्णि[2] इति पाठे तु "ह्रस्वः संयोगे" [१. ८४.] इति ह्रस्वः॥

तिण्णि। "त्रेस्तिण्णिः" [१२१.]॥

४८. मुग्धा अप्रगल्भा द्वयोर्वयस्ययोः सारसान् इति अनेन प्रकारेण दर्शयति। तमेवाह। चतुर इमान्[3] सारसान् नभसि उअ पश्य। उड्डयन्ते विचरन्ति॥

चउरो। चत्तारो। चत्तारि। "चतुरश्चत्तारो चउरो चत्तारि" [१२२.]॥

४९. द्वयोर्नयनयोः सुखदाः पङ्कजानां मालाः स्रजः उअ पश्य सन्ति। तासु च कमलसख्यः सहचारित्वाद् वयस्याः। हंसवधूः वरटा। अलिवधूः भ्रमरी। रममाणाः पश्य सन्ति॥

दोण्हं[4]। दोण्ह। "संख्याया आमो ण्ह ण्हं" [१२३.]॥

---

१ So B C.

---

1 So B C. 2 B C दुन्नि। विन्नि।. 3 C inserts चतुर इमान्. 4 So B C.

अखलिअ-परिमल-रिद्धिं पहिआ दट्ठूण छत्त-वण्ण-तरुं,
वच्चन्ति मोह-निद्दं मरण-सहिं भरिअ अप्प-वहुं. ५०
हाहाण समा हेट्ठे तरूण सालीण गोविआ गन्ती
खे जन्तीणं मिलिआण सुर-वहूणं गइं खलइ. ५१
अलि-मालाहि सणाहेहिं बाण-कुसुमेहि परिमल-गुरूहिं
दिट्ठेहिवि मुच्छिज्जइ दुहिणीहिं पन्थिअ-वहूहिं. ५२
सारस-मालाहिन्तो, सुग-मालाओ अ, चडय-मालाउ,
अखलिअ-गईउ धेणूउ, रक्खिमो सालि-वणमू एअं. ५३

५०. अस्खलितपरिमलऋद्धिं निरर्गलसौगन्ध्यसमृद्धिं सप्तपर्णतरुम् अयुक्छदवृक्षं दृष्ट्वा पथिका आत्मवधूं स्वभार्यां स्मृत्वा मरणसखीम् अचैतन्यादितत्कार्यकारित्वाद् वयस्यां मोहनिद्रां तमोगुणमयीं मूर्छानिद्रां व्रजन्ति आसादयन्ति ॥

५१. तरूणाम् अधः अधस्तनभागे हाहाभिर्देवगायनैस्तेषां वा समा। निरुपमनिनादोपेतत्वात्। शालीनां गोपिका गायन्ती गानं कुर्वती खे यान्तीनां व्रजन्तीनां मिलितानां क्रीडार्थं समुदितानां सुरवधूनां गतिं स्खलयति निषेधयति। दिवि गच्छन्त्योप्सरसः अत्याश्चर्यं गोपीगीतं श्रुत्वा तत्रैव तिष्ठन्तीत्यर्थः ॥

५२. अलिमालाभिः सनाथैः युक्तैः परिमलगुरुभिः सौरभाढ्यैः दृष्टैरपि बाणकुसुमैः असनप्रसूनैर्हेतुभूतैः दुःखिनीभिः स्मरद्वारा अभितापात् सकष्टाभिः। पन्थेन चरन्ति पान्थिकाः। पथिवत् पन्थशब्दोप्यस्ति। तेषां वध्वस्ताभिर्मूर्छ्यते मुह्यते ॥

५३. सारसा लक्ष्मणास्तेषां मालास्तस्यास्ताभ्यो वा। शुकाः कीरास्तेषां मालास्तस्यास्ताभ्यो वा। चटकाः कलविङ्कास्तेषां मालातस्यास्ताभ्यो वा। अस्खलिता अप्रतिहता। अनिवार्येति यावत्।

---

१ B C सत्त°.

कुङ्कुम-कलिआसुन्तो सुरहिस्स मिउस्स एन्त-पवणस्स
पसरो गिरिम्मि इह तह तरुम्मि सव्वंपि सुरहेइ. ५४
फुल्ला मुणी इह तरू; न मुणीउ तरूउ दूरगा भमरा;
वाइ मुणीण तरूणं[1] नव-परिमल-मासलो वाऊ. ५५
उद्दीविय-दढ-मयरद्धयग्गिणो वाउणो फुरन्ति रया
मुणि-मालत्तो पङ्कय-मालाहिन्तो पराय-कणा. ५६

एवंभूता गतिर्यस्या यासां वा तस्यास्ताभ्यो वा धेनोर्धेनुभ्यश्च शालिवनम् एतद् वयं रक्षामः तन्निवारणेन पालयामः । अत्र आरामिकेण स्वनियोग एव विज्ञप्तः ॥

५४. कुङ्कुमकलिकाभ्यः केसरकोरकसकाशाद् आयंश्चासौ पवनश्च तस्य अत एव सुरभेः मृदोः सुखस्पर्शस्य प्रसरः उज्जृम्भणम् इह शरदि गिरौ तथा तरौ सर्वमपि उपत्यकाधित्यकाप्रस्थादि मूलपत्रपुष्पादि सुरभयति स्वगन्धवासेन एकतानतां नयति ॥

५५. इह शरदि मुनयः अगस्तयस्तरवः फुल्लाः पुष्पिताः । अतो न मुनेस्तरोः सकाशाद् दूरगा विरलाः । किं तु मकरन्दलोभात् समीपस्था इत्यर्थः । भ्रमराः । तथा मुनीनां तरूणां नवपरिमलमांसलः नूतनसौरभसमृद्धो वायुर्वाति ॥

माला कमल-सही हंस-वहू इत्यादीनि मुणीउ तरूउ मुणीण तरूणम् इत्यन्तानि चोदाहरणानि "शेषेऽदन्तवत्" [१२४.] इत्येतद्वृत्त्यनुसारेण स्वयम् उपयुज्य परिभावनीयानि ॥

५६. उद्दीपितः वृद्धिं नीतः दृढो बलवान् मकरध्वज एव संतापकत्वाद् अग्निर्यैस्ते तथा वायवः स्फुरन्ति सर्वतः परिभ्रमन्ति । तथा उद्दीपितमकरध्वजाग्नेर्वायोः[1] वायुं प्राप्य । वायुयोगाद् इति या-

[1] B C वाउ.

[1] B वायुर्योगादिति. We with C.

चारुम्मि एत्थ पल्लल-वारिम्मि विसट्ट-पोम्म-मालाओ
दोहिंचिअ नयणेहिं होइ न तित्ती नियन्ताणं. ५७

मच्च-गणस्स सुराण य अलं खु कामो हवेइ इह सरए
कामाय पवट्टन्ते बाणं कामस्स य घडन्ते. ५८

वत् । रयाद् वेगेन मुनिमालायाः अगस्तिपुष्पपरंपरायाः मुनिमालाभ्यो वा सकाशात् [तथा पङ्कजमालायाः पङ्कजमालाभ्यो वा सकाशात्] परागकणा एतद्रजोलवाः स्फुरन्ति इतस्तत उल्लसन्ति ॥

अग्गिणो । वाउणो । "न दीर्घो णो" [१२५.] ॥

मालत्तो । मालाहिन्तो । "ङसेर्लुक्" [१२६.] । भ्यसश्च हिः" [१२७.] । न ॥

५७. अत्र शरदि चारुणि पल्वलवारिणि । विसट्ट इति देश्यम् । विकसितानि यानि पद्मानि तेषां मालाः मालाभ्यो वा सकाशाद् द्वाभ्यामेव नयनाभ्यां पद्मानि वीक्षमाणानां न तृप्तिर्भवति । न तद्दर्शनवाञ्छा व्युपरमत इति भावः ॥ मालाओ इति पश्यताम् इति संबन्धविवक्षया द्वितीया । भवतीति संबन्धविवक्षया तु पञ्चमी ।

चारुम्मि । वारिम्मि । "ङेर्डे" [१२८.] । न ॥

मालत्तो । मालाहिन्तो । मालाओ । "एत्" [१२९.] । न ॥

दोहिं । नयणेहिं । "द्विवचनस्य बहुवचनम्" [१३०.] ॥

५८. कामाय स्मरार्थं प्रवर्तमानायाम् कामाय बाणः असनः स एव विरहिमनोभेत्तृत्वाद् बाणः शरः तं घटमानायाम् उत्पादयन्त्याम् । "प्रावृट्शरत्तरणयः पुंसि" [१.३१.] इति प्राकृते पुंस्त्वम् । इह शरदि बाणाख्यपुष्पेण कृत्वा [मर्त्यगणाय सुरेभ्यश्च] विशिखं प्राप्तुं समर्थः कामो भवति ॥ शरदुपष्टम्भेन स्मरस्तान् स्ववशवर्तिनो विहितवान् इत्यर्थः ॥

मयणम्मि विरहिणीणं वहाइ रुट्ठम्मि को व न वहाय?
जं ताण वहस्स हुअं फुल्लं सेहालिअ-वणंपि. ५९

वन्दे भण्डीरस्सवि, चिरस्स फुल्लम्मि जम्मि[1] अलि-ओली·
नील-मणीण न इअरा वण-सिरि-पिट्ठीइ कवरिव्व. ६०

एइ न पहिओ पासे इमस्स असणेसु भूसिअ-वणस्स;
गन्ध-विसेहिव तेहिं बीहन्तो नस्सए दूरे. ६१

मच्च-गणस्स । सुराण । "चतुर्थ्याः षष्ठी" [१३१.] ॥

कामाय । कामस्स । "तादर्थ्यङेर्वा" [१३२.] ॥

५९. विरहिणीनां प्रोषितभर्तृकाणां वधाय विनाशाय कुपिते सति मदने । वा इवार्थे । स च संभावनायाम् । को वा क इव न वधाय न संभाव्यते । असौ यस्तासां वधाय न भविष्यतीत्यर्थः । यत् तासां वधाय फुल्लं पुष्पितं शेफालिका निर्गुण्डी तस्या वनमपि भूतम् ॥

वहाइ । वहाय । वहस्स । "वधाड्डाइश्च वा"[1] [१३३.] इति तादर्थ्यङेर्डित् आइः षष्ठी च वा ॥

६०. भण्डीरमपि वृक्षविशेषमपि चिरेण वर्णनीयसौरभादिगुणग्रामस्य असंख्यत्वाद् बहुकालेन वन्दे वर्णयामि । यस्मिन् फुल्ले पुष्पिते सति नीलमणिभ्यो न इतरा । अतिसादृश्यात् ते[2] इवैवेत्यर्थः । अल्याली भ्रमरश्रेणिः वनश्रियः पृष्ठे[3] कबरीव वेणिरिवास्ति ॥

भण्डीरस्स । चिरस्स । मणीण । पिट्ठीइ । "क्वचिद् द्वितीयादेः" [१३४.] इति द्वितीयादीनां विभक्तीनां स्थाने षष्ठी ॥

६१. अस्य प्रत्यक्षवर्तिनः असनैः बीजकैः कृत्वा भूषितं च तद् वनं च तस्य पार्श्वे न एति नायाति । किं तु गन्ध एव मारणाद्

---

१ C तंमि. We with B.

---

1 So B C. See P. 2 B C ता. 3 B पृष्ठौ. C पुष्टां.

इह कणय-पङ्कएहिं रत्तिं विज्जुज्जलेहि चउ-वीसं
अच्चिज्जन्ति जिणा तेण तेण कालेण सयराहं. ६२
उज्जाण-मण्डवेसुं गरुआअइ लोहिआइ बिम्ब-फलं;
गरुआइ लोहिआअइ एव्वारु-फलं च कच्छेसु. ६३

विषं येषां ते तथा विषवृक्षविशेषास्तेभ्य इव दूरं पथिकः तेभ्योऽसनेभ्यो बिभ्यत् त्रस्यन् नश्यति ॥

पासे । असणेसु । "द्वितीयातृतीययोः सप्तमी" [१३५.] ॥

विसेहि । तेहिं । दूरे । "पञ्चम्यास्तृतीया च" [१३६.] इति तृतीयासप्तम्यौ ॥

६२. इह शरदि विद्युद्वद् उज्ज्वलैः कनक[2]वर्णानि पङ्कजानि । "मयूरव्यंसकेत्यादयः" [हे० ३.१] इति वर्णशब्दलोपात् । कनकपङ्कजानि तैः कृत्वा रात्रौ तस्मिन् तस्मिन् काले रात्रेरेव आद्यन्तरूपे । सयराहं इति देश्यं शीघ्रार्थे । चतुर्विंशतिर्जिना अर्च्यन्ते पूज्यन्ते ॥

रत्तिं । "सप्तम्या द्वितीया" [१३७.] ॥

प्रथमार्थेपि द्वितीया दृश्यते । चउ[3]-वीसं ॥ आर्षे तृतीयापि दृश्यते । तेण तेण कालेण ॥

६३. उद्यानमण्डपेषु बिम्बाख्यफलं गुरु इव आचरति । क्यङ् । गुरूयते । अगुरु गुरु[4] भवति गुरूयति । अलोहितं लोहितं च भवति । "डाच् लोहितादिभ्यः षित्" [हे० ३.४] इति क्यङ् वा । गुरूयति । लोहितायति । तथा कच्छेषु जलप्रायेषु वाटेषु एर्वारुः कर्कटी तस्याः फलं च गुरूयते लोहितायते । एतद् एतच्च फलं समग्रस्वकारणसामग्रीवशाद् महद् अरुणं च संपद्यत इति भावः ।

[5]गरुआअइ । लोहिआइ । [5]गरुआइ । लोहिआअइ । "क्यङोर्यलुक्[6]" [१३८.] ॥

---

[1] So B C. [2] C कंचन for कनक°. [3] B चउव्वीसं. [4] B C गुरुभं°. [5] B C गु°. [6] B क्यङोर्लुक्. C क्यङोर्यलुक्.

वेवइ हसइ अ कुमुअं, पवेवए विहसए अ कासं च,
देव जलम्मि, थलम्मि अ, इह पेक्खसि, पेक्खसे[1] इत्थ. ६४
न हससि न वोवहससे जइ, ता भासेमि, किंपि वन्नेमि;
अमुणा सरेण हंसाण माणसं तंपि विम्हरिअं. ६५
बहु वन्निउं न सक्कं जाइं दीसन्ति सरय-चिन्धाइं.
चरिआइँ विप्फुरन्ते इदो अ हेमन्त-सिसिराण. ६६

६४. देव कुमारपाल भूपाल इह जले कुमुदम्। जातावेकवचनम्। कुमुदानीत्यर्थः। एवम् अन्यत्रापि। वेपते वायुवशाच्चलति। हसति। चन्द्रचन्द्रिकया विकसतीत्यर्थः। त्वं प्रेक्षसे। तथा देव अत्र स्थले कासं कासकुसुमं च प्रवेपते विहसति च त्वं प्रेक्षसे॥

वेवइ हसइ। पवेवए विहसए। "त्यादीनाम्०" इति [१३९.] इचेचौ॥

६५. हे राजन् यदि त्वं न हससि जल्पाकोयम् इति न हास्यं करोषि। न वा उपहससि अहोस्य वर्णनाचातुर्यम् इति न विप्लवयसि तदा भाषे भणामि किमपि किंचिच्च वर्णयामि श्लाघे। वर्णनमेवाह। अमुना परतो वर्तमानेन सरसा सहस्रलिङ्गाख्यसरोवरेण हंसानां तदपि सततस्वविलासास्पदत्वेन श्रेष्ठमपि मानसं देवसरो विस्मृतम्॥

पेक्खसि पेक्खसे। हससि उवहससे। "द्वितीयस्य सि से" [१४०.]॥

६६. शरद्वर्णनम् उपसंहरन् हेमन्तशिशिरयोः सार्धैकविंशत्या गाथाभिर्वर्णनम् आह। यानि शरच्चिह्नानि घनात्ययलक्षणानि दृश्यन्ते वीक्ष्यन्ते तानि बहु प्रभूतं वर्णयितुं न शक्नोमि असंख्यत्वात् सामस्त्येन श्लाघयितुं न पारयामि। तथा इतश्च अस्मिन् उद्यानप्रदेशे पुनः हेमन्तशिशिरयोश्चरितानि तत्कालप्रभावप्रभविष्णुकलकण्ठस्वरह्रासकुन्दलतादिप्रसवपुष्पफलादिलक्षणविलसितानि वि[2]स्फुरन्ति उज्जृ-

१ C पिक्खसे.

[1] B C पि°. [2] B C om. वि°.

विच्छुहिरे कलयण्ठा; सूसइरे ताण तारिसो कण्ठो;
दीसन्ते कुन्द-लयाउ; विप्फुरन्तीह रोलम्बा. ६७

इह पेक्खह, पेक्खित्था इहेह पासह, इहावि पासित्था,
लवली-लयाउ फलिणी-लयाउ फद्धा इवाफुल्ला. ६८

नोवदिसामो, नो संदिसामु, न य आदिसाम[1], किं तु इमा
गायन्ति इह सयं चिअ मिलिआ कसणेच्छु-गोवीओ. ६९

म्भन्ते । उभयोरपि लक्षणानाम् उभयत्रापि प्रायो दर्शनात् सममेव हेमन्तशिशिरयोर्वर्णनम् ॥

भासेमि । वन्देमि । "तृतीयस्य मिः" [१४१.] ॥ बाहुल्काद् मिर्वः स्थानीयस्य मेः इकारलोपश्च । सक्कं ॥

६७. तान्येवाह । कलकण्ठाः पुंस्कोकिला विक्षुभ्यन्ति मन्दाय-[2]न्ते । तेषां कलकण्ठानां तादृशो मधुरध्वनिधुर्यः कण्ठो गलः शुष्यति परुषीभवति । कुन्दलतास्तु माघ्यशाखाः पुनर्दृश्यन्ते सश्रीकतया सतर्षं जनैर्विलोक्यन्ते । इह आसु कुन्दलतासु रोलम्बाः भ्रमरा विस्फुरन्ति मकरन्दपानलोभाद् उपरि स्फुरन्ति ॥

दीसन्ति । विप्फुरन्ते । विच्छुहिरे । दीसन्ते । विप्फुरन्ति । "बहुष्वाद्यस्य न्ति न्ते इरे" [१४२.] ॥ क्वचिद् इरे एकत्वेपि । सूसइरे ॥

६८. इह अस्मिन् प्रत्यक्षवर्तिनि प्रदेशे प्रेक्षध्वम् इह प्रेक्षध्वम् इह पश्यत इहापि यूयं पश्यत । लवलीलताः फलिनील[3]ताः श्[3]यामालताः ता[3]श्च स्पर्धादि[4]व अन्योन्यस्य न्यक्चिकीर्षयेव उत्फुल्लाः कुसुमिताः ॥

पेक्खह । पेक्खित्था । पासह । पासेत्था । "मध्यमस्येत्थाहचौ" [१४३.] ॥

६९. नोपदिशामः उपचिकीर्षया भणामः । न च संदिशामः

---

[1] B C आदिसामु.

---

[1] B C मिश्रः. [2] B C मदायंते. [3] B फलिनी श्यामालता तस्याश्च. C फलिनी श्यामा तस्या लताश्च. [4] So B C. स्पर्धा इव would probably have explained more correctly. Or have we to read फद्धाइ वाफुल्ला or फद्धाइ वोप्फुल्ला (व = इव)?

तुवरामो चणएसुं, नव-सरिसव-कन्दलीसु तुवराम,

तुवरामु मूलएसुं, इअ कच्छ-त्थीण संरम्भो. ७०

हसए अ तुवरए तह लेइ अ पुंनामयाईं एस जणो,

कीस न हससि न तुवरसि न लेसि? विलया इअ लवन्ति.७१

अन्यमुखेन कथयामः । न च आदिशामः नियोगं दद्मः तर्हि कथं गायन्तीत्याह । किं तु अपि तु इह अनयोर्हेमन्तशिशिरकालयोः स्वयमेव कथितमन्तरेणापि इमाः कृष्णाश्च ते इक्षवश्च कृष्णेक्षवस्तान् गोपायन्त इति "कर्मणोऽण्" [हे० ५.१] इत्यणि कृष्णेक्षुगोप्यः इक्षुवाटरक्षिकाः स्त्रियो मिलिता एकत्रोपविष्टा गायन्ति मधुरध्वनिगीतं कुर्वन्ति ॥

७०. चणकेषु[1] हरिमन्थक[2]निमित्तं वयं त्वरामहे उद्यमं कुर्मः । नवसर्षपकन्दलीषु नूत्नसिद्धार्थककिशलयार्थं त्वरामहे । मूलकानि शाकविशेषास्तन्निमित्तं च त्वरामहे । इति भणितरीत्या कच्छस्त्रीणाम् इक्षुचणकचिर्भटिकादिवाटकरक्षकाबलानां संरम्भः उद्यमः ॥

उवदिसामो । संदिसामु । आदिसाम । तुवरामो । तुवराम । तुवरामु । "तृतीयस्य मोमुमाः" [१४४.] ॥

७१. हे सखि एष जनः इक्षुगोपिकादिस्त्रीलोकः हसति हास्यं करोति त्वरते च उद्यच्छते । तथा पुंनागानि सुरपर्णिकापुष्पाणि लाति च गृह्णाति । अतस्त्वं किं न हससि न त्वरसे न लासि । अप्रीतिकां[3] मुक्त्वा एतत् कर्तुं तवापि युक्तम् इति भावः । इति एवं वनिता लपन्ति अन्योन्यम् आभाषन्ते ॥

हसए । तुवरए । एस्थाने तु सेपाठे । हससे तुवरसे । "अत एवैच्से" [१४५.] । अत इति किम् । लेइ । लेसि । एवकारः अत एच् से एवेति विपरीतावधारणनिषेधार्थः । तेन अकारान्तादपि इच् सिश्च सिद्धौ । हससि । तुवरसि । इच उदाहरणं तु हसइ इति ज्ञेयम् ॥

---

1 B C चनके°. 2 B C °मंथनकनिमित्तं. 3 B अप्रीनिकं. C अप्रीनित्विं.

तं सि, तहा एस म्हि अ, अम्हत्थि, जुअ म्ह, सम-गुण म्हो अ;
गायामो; इअ नव-लट्ट-गोविआणं इदो वत्ता. ७२
अत्थि अहं, तुमम्, एसा, दरिसेइ न कावि कुसुम-विन्नाणं.
इअ भणिअ कावि कारइ मुचुकुन्दाओ कुसुम-हरणं. ७३
अलि-गुञ्जिअं करावइ, मालिणि-हल्लप्फलं करावेइ,
जाणावइ रइ-लीलं, मयणं भावेइ पारत्ती. ७४

७२. हे सखि त्वम् असि तथा एषा अहम् अस्मि वयं च स्मः। तथा युताः स्नेहाद् एकत्र मिलिता वयं स्मः। समगुणाः तारुण्यतारमधुरस्वरत्वादिना तुल्याश्च वयं स्मः। तथा वयं गायामः गीतं कुर्मः। इतः अस्मिन् हेमन्तशिशिरकाले नवलट्टागोपिकानां नूतनमहारजतरक्षकस्त्रीणाम् इति एवं वार्ता परस्परम् आलापाः॥

तं सि। "सिनाऽस्तेः सिः" [१४६.]॥

७३. हे सखि अहम् अस्मि। त्वम् असि। एषास्ति। परं न कापि कुसुमविज्ञानम् अद्भुतमाल्यादिग्रथनकलां दर्शयति प्रकटयति। इति एवं भणित्वा उक्त्वा [कापि] मुचुकुन्दात् वृक्षविशेषात् कुसुमाहरणं पुष्पमाल्यादिरचनाचातुर्यख्यापनाय पुष्पावचयं कारयति सखीपार्श्वाद् विधापयति॥

म्हि। म्ह। म्हो। "मिमोमैर्म्हिम्होम्हा वा" [१४७.]। पक्षे अम्हत्थि।

अत्थि। "अत्थिस्त्यादिना" [१४८.] इति च अस्तेस्त्यादिभिः सह अत्थि॥

७४. पारत्ती कुसुमविशेषः अलीनां गुञ्जितं कारयति मकरन्दपानदानेन हर्षकारित्वाद् रुतं विधापयति। मालिनीनाम् औत्सुक्यम् अपरपुष्पेभ्यः सौरभादिना विशिष्टत्वेन त्वरां कारयति। रति-

१ B अम्हि°. २ B C जुव.

तोसविअ-तरुण-गोवं तोसिअ-हरिणं इदो अ जव-गोवी
खे भामइ गीअ-झुणिं पउत्थ-सत्थं भमाडेइ. ७५
कारिअ-अलि-कुल-रोला मरुवय-माला कराविअच्छि-छणा
उअ. कारीअइ जीए जयं करावीअइ अणङ्गो. ७६
कुन्देहि कराविज्जइ, तह कारिज्जइ नवेहि लवलेहि,
जं ताण परिमल-वहो गन्धवहो मारइ पउत्थे. ७७

लीलां सुरतक्रीडां ज्ञापयति बोधयति । कामिनः कारयतीत्यर्थः । यतो मदनं भावयति । कामिषु भवन्तं भावयति प्रवर्तयति ॥

दरिसेइ । कारइ । करावइ । करावेइ । "णेरदेदावावे" [१४९.] इति णेः अत् एत् आव आवे । बाहुलकात् क्वचित् एत् न । जाणावइ । क्वचित् आवे न । भावेइ॥

७५. इतश्च एतस्मिन् प्रदेशे तोषिततरुणगोपम् आवर्जितयुवबल्लवं माधुर्यातिशयात् तोषितहरिणं गीतध्वनिं गेयस्वरं यवगोपिका खे भ्रमयति अतितारत्वाद् अम्बरे उल्लासयति प्रोषितसार्थं भ्रमयति च उद्दीपनविभावत्वाद् मोहयति ॥

तोसविअ । तोसिअ । " गुर्वादेरविर्वा " [१५०.] ॥

भमाडेइ । भ्रमेराडो वा [१५१.] । पक्षे भामइ ॥

७६. कारितः विधापितः अलिकुलस्य । रोल इति देश्यः । कोलाहलो यया सा तथा कारिताक्षिक्षणा हरितवर्णत्वात् जनितनेत्रानन्दा मरुबकमाला अस्ति उअ पश्य । सास्ति यया अनङ्गः कार्यते कामिभिः क्रियमाणः अनङ्गो यया प्रयुज्यते । तथा अनङ्गो जयं कार्यते जगत् स्ववशं कुर्वन् प्रयुज्यते ॥

७७. यत् तेषां कुन्दलवलपुष्पाणां परिमलवहः सौरभधारको गन्धवहो वायुः प्रोषितान् पान्थान् मारयति[2] मरणाख्यां दशमीम्

१ B C करावीअइ.

1 B C कुंददललवल°. 2 B C मार°.

कारेइ कं न हरिसं, कारावेइ अ न कं रउच्छाहं
हासाविअ-जुव-गोवा जुव-गोवी कारिआणङ्गा ? ७८

जाणामि न हि, न जाणमि नारङ्ग-फलाइँ वण्णिउं देव.
वण-सिरि-वहूएँ घट्टंसुआइँ सोहन्ति एआइं. ७९

अवस्थां प्रापयति तत् कुन्दैः पुष्पजातिविशेषैः कार्यते विधाप्यते । तथा तत् नवैर्लवलैः लवलीकुसुमैः कार्यते । तत् कुन्दलवलकर्तृकं[1] विधापनम्[2] इति भावः । यत्तदोर्नित्याभिसंबन्धात् तद् इति पूर्वार्धे ज्ञेयम् । यत्तदी क्रियाविशेषणे ॥

कारिअ । कराविअ । कारीअइ । करावीअइ । [कराविज्जइ ।] कारिज्जइ । " लुगावी क्तभावकर्मसु " [१५२.] ॥

७८. हासिताः कुतुककृज्जल्पनेन स्मापिता युवगोपास्तरुणबल्लवा यया सा तथा कारितः मनोहरतया जनितः अनङ्गो यया सा तथा युवगोपी कं न हर्षं कारयति कं च न रतोत्साहं कारयति । अपि तु सर्वमपि द्रष्टृलोकं प्रमोदं च सुरतप्रयत्नं च कुर्वन्तं मनोभिप्रेतत्वात् प्रयुङ्क्ते इति भावः ॥

कारिज्जइ । मारइ । कारेइ । कारिआ । " अदेल्लुक्यादेरत आः[3] " [१५३.] । अदेल्लुकीति किम् । करावीअइ[4] । आदेरिति किम् । कारिअ । इह अन्त्यस्य मा भूत् । आवेआव्यादेशयोरपि आदेरत आत्वम् इच्छन्ति । कारावेइ । हासाविअ ॥

७९. हे देव कुमारपाल भूपाल नारङ्गफलानि वर्णयितुं श्लाघितुं जानामि अवगच्छामि । न हि न पुनर्न जानामि । वर्णनमेवाह । वनस्य श्रीरेव रागजननाद् वधूस्तस्या एतानि समीपवर्तिनारङ्गफलानि । घट्टंसुआइं इति देश्यः । प्रान्तस्यूतपट्टांशुकघटीनि कौसुम्भवस्त्राणीव शोभन्ते । उत्प्रेक्षाद्योतक इवशब्दो ज्ञेयः ॥

---

[1] B कुंदललवलक°. C कुंददललवक°. [2] C विधानं. [3] Neither B nor C has आः. [4] B C कारा°.

पउमसिरि, तं भणामो, भणिमो तं लच्छि, भणिमु तं गउरि,
भणमु तमू इले, भणाम य तं गङ्गे, तं भणामु कमलच्छि; ८०
तं सिरि भणमो, भणिम तमू उमे, जए तं च भणम, कुन्द-वणं
उच्चिणह गहिअ-नामं, लवन्ति विलया इअन्नोन्नं. ८१
फलिणि-कुसुमं विहसिउं, विहसेउं लोद्धयं[1], पयट्टेइ.
हसिऊणं विहसेऊण निअ इमं अणहसेअव्वं. ८२

जाणामि । जाणमि । "मौ वा" [१५४.] इति अत आ वा ॥

८०. युग्मम् । वनिताः परस्परप्रेमप्रतिबद्धा योषितो गृहीतनाम[2] नामग्रहणपूर्वकम् इति एवम् अन्योन्यं मिथो लपन्ति जल्पन्ति । तदेवाह । हे पद्मश्रीस्त्वां भवन्तीं भणामः आदिशामः । हे लक्ष्मि त्वां भणामः । हे गौरि त्वां भणामः । हे इले त्वां भणामः । हे गङ्गे त्वां भणामः । हे कमलाक्षि त्वां च भणामः ।

८१. तथा हे श्रीस्त्वां भणामः । हे उमे त्वां भणामः । हे जये त्वां च भणामः । किं तद् इत्याह । कुन्दवनम् उच्चिनुत । एतत्कुसुमानि गृह्णीतेति भावः । अत्र युग्मे आर्यागीतिः ॥

भणामो । भणिमो । भणिमु । भणाम । भणामु । भणिम । "इश्च मोमुमे वा" [१५५.] इति अत इत्त्वं चाद् आत्वं वा । पक्षे भणमु । भणमो । भणम ॥

गहिअ । "क्ते" [१५६.] ॥

८२. फलिनीकुसुमं प्रियङ्गुलतापुष्पं विहसितुं विकासितुं लोध्रं मार्जनाख्यद्रुप्रसूनं च विहसितुं प्रवर्तते । इदम् एतत् अहसनीयं श्लाघ्यम् । हसित्वा सकपोलविकासं स्मित्वा विहस्य च सशब्दहसनं कृत्वा हे सखि पश्य ॥

[1] B C लोद्दयं.

[2] B C °नामा.

गन्धेण अहसिअव्वं विहसेहिइ इमम्, इमं च विहसिहिइ,
विहसेइ इमं, विहसइ इमं च वारुणि-वणे पुप्फं. ८३
इह हसउ पहिअ-लोओ, हसेउ उज्जाण-वालिआ-लोओ,
विहसन्त-हिओ विहसेन्त-लोअणो फलिअ-बोरीहि. ८४
जयइ अणङ्गो कह, पहु सुणाउ, विहसेज्ज[1] जइ न पुंनागो,
न य विहसेज्जा[2] लवली, होईअइ नविअ कुन्देहि ? ८५

८३. गन्धेन अहसितव्यम् अनुपहसनीयम्। श्लाघ्यम् इति यावत्। इदम् एतत् प्रत्यक्षवर्ति विहसिष्यति विकचं भविष्यति। इदं च विहसिष्यति। तथा इदं विहसति। इदं च वारुणीवने पुष्पं विहसति॥

विहसिउं। विहसेउं। हसिऊणं। विहसेऊण। अणहसेअव्वं। अहसिअव्वं। विहसेहिइ। विहसिहिइ। "एच्च क्त्वातुम्तव्यभविष्यत्सु" [१५७.] इति एत्। चकाराद् इत्वं च॥

८४. फलिताश्च ता बदर्यश्च ताभिर्हेतुभूताभिः विहसद्धृदयः तुष्यच्चेता विहसल्लोचनः विकसन्नयनः इह अस्मिन्नुद्यानप्रदेशे पथिकलोको हसतु स्मितपरो भवतु। वाटिकाऽविनाभूत उद्यानपालिकालोकश्च हसतु। यथा एताः संप्रत्युपभोगयोग्या[1] एवं यूयमपि इत्यभिसंधिना उद्यानपालिकालोकमुद्दिश्य पथिकलोको हसतु। तदभिप्रायं च ज्ञात्वा उद्यानपालिकालोको हसतु। हसने प्राप्तावसर इति भावः॥ हसउ इति "प्रैषानुज्ञावसरे कृत्यपञ्चम्यौ" [हे० ५.४] इत्यनेन अवसरे पञ्चमी॥

८५. प्रभुः कुमारपालस्वामी शृणोतु अवधारयतु। किम्। यदि पुंनागो न विहसेत् विकसेत् न च लवली विहसेत् नापि च कुन्दैर्भूयते उ-

---

१ B C °सिज्ज. २ B C °सिज्जा.

---

[1] C संत्युप°.

होइज्जइ फलिणी-कुसुमेहि, लहिज्जेज्ज केहि नच्छि-सुहं ?
केहि न लहिज्ज हरिसो ? जह दीसइ वुच्चइ तहेअ. ८६

इअ राया उज्जाणं तं कासी नयण-गोअरं सव्वं;
काही सउहे गमणं, संझा-कम्मं च काहीअ. ८७

त्पद्यते तदा कथम् अनङ्गो जयति सर्वोत्कर्षेण वर्तते। पुंनागपुष्पादि-भिरेव पुष्पशरः सर्वं स्ववशम् आधत्त इति भावः॥

विहसेइ। विहसइ। हसउ। हसेउ। विहसन्त। विहसेन्त। "वर्तमानापञ्चमी-शतृषु वा" [१५८.] इति एर्वा॥ क्वचिन्न। जयइ॥ क्वचिद् आत्वमपि। सुणाउ। विहसेज्ज। विहसेज्जा। "ज्जाज्जे" [१५९.] इति ए॥

८६. भूयते उत्पद्यते फलिनीकुसुमैः। तथा तैः कृत्वा कैर्न अ-क्षिसुखं लभ्यते कैश्च न हर्षो लभ्येत। अपि तु सर्वैः फुल्लदक्षैः स-हर्षैश्च भूयत इति यावत्। ननु न भविष्यत्येवम् इत्याह। यथा दृ-श्यते तथैव उच्यते। स्वानुभूतमेव भण्यत इति भावः॥

होईअइ। होइज्जइ। लहिज्जेज्ज। "ईअ-इज्जौ क्यस्य" [१६०.]॥ बाहुल-कात् क्वचित् क्योपि विभाषया। लहिज्ज॥

दीसइ। वुच्चइ। "दृशिवचेर्डीसडुच्चम्" [१६१.] इति क्यस्य डीसडुच्चौ॥

८७. अथ उद्यानवर्णनम् उपसंहर्तुम् आह। इति पूर्वोक्तरीत्या तत् शासनदेवताप्रसादप्रादुर्भूतसर्वर्तुकपुष्पादिसमृद्धिसंपन्नम् उद्यानं राजा श्रीकुमारपालदेवः सर्वम् अखिलं नयनगोचरं चकार। ददर्शे-त्यर्थः। ततः सौधे गमनम् अकार्षीत्। तत्र च संध्याकर्म देवपूजा-दिकं च अकार्षीत्॥

कासी। काही। काहीअ। "सी ही हीअ भूतार्थस्य" [१६२.] इति भूतार्थवि-हितायतन्यादेः सी ही हीअ॥

अह पढिअं सूएहिं, हुवीअ संझा, अहेसि अत्थमणं,
अम्ह खणो आसि, तमो हुज्जइ, ससि-उग्गमो हुज्ज. ८८

होस्सामि दुही, होहिमि दीणो, होहामि असरणो इण्हि,
इअ चिन्तन्तो विरहं सहइ रहङ्गो रहङ्गीए. ८९

"वायव्वे-ण्हाणे-ण्हाया होस्सामो, होहिमो अणज्झयणा,
होहामो कय-गेड्डी-खेड्डा, होस्साम विगय-भया; ९०

८८. अथ संध्याकर्मानन्तरं सूतैः मागधैः पठितं राज्ञः पुरः प्रतिपादितम्। किं तद् इत्याह। हे देव संध्या अभूत् अभवत् बभूव वा समपद्यत। अस्तमनं सूर्यस्य अस्ताचलेन तिरोधानम् अभूत्। अस्माकं क्षणः पठनाय अवसरः अभूत्। तथा तमः अन्धकारः अभूत्। शश्युद्गमः अभूत्। अधुना एतयोर्भवने प्राप्तः कालः॥

हुवीअ। "व्यञ्जनाद् ईअः" [१६३.]॥

अहेसि। आसि। "तेनास्तेरास्यहेसी" [१६४.]॥

हुज्जइ। हुज्ज। "जात् सप्तम्या इर्वा" [१६९.] इति सप्तम्यादेशात् ज्जात् पर इर्वा॥

८९. अथ सूता एव संध्यादिकालभाविचक्रादिचेष्टितं सप्तदशभिर्गाथाभी राज्ञे निवेदयन्ति। इदानीं सांप्रतम् अहं दुःखी सकष्टो भविष्यामि भविता वा। एवम् अग्रेपि यत्र भविष्यन्ती दर्शिता तत्र श्वस्तन्यपि ज्ञेया। दीनः करुणापात्रं भविष्यामि। अशरणो निर्नाथो भविष्यामि इति एवं चिन्तयन् पर्यालोचयन् रथाङ्गश्चक्रवाकः रथाङ्ग्या सह विरहं मिथो वियोगं सहते तितिक्षते॥

होहिमि। "भविष्यति हिरादिः" [१६६.] इति भविष्यदर्थविहिते प्रत्यये परे तस्यैव आदिर्हिः प्रयोक्तव्यः॥

९०. त्रिभिर्विशेषकम्। गवां धेनूनां संमुखम् आत्मीयात्मीयग-

१ B C संज्झा. २ B C हुज्जा.

होहाम मुक्क-मेरा, होहिम गोवाल-गुज्जरी-गाया,
होस्सामु मित्त-मिलिआ, होहामु तहेअ कय-नट्टा; ९१
होहिमु रमिरा, भमिरा होहिस्सा, निव्वुआ य होहित्था,"
इअ मुणि-वडुआ जम्पन्ति गावि-समुहं वणे जन्ता. ९२

व्यानयनार्थम् अभिमुखं वने यान्तो गच्छन्तः मुनिबटुकास्तापसकुमारका इति एवं कथयन्ति। किं तद् इत्याह। "वायव्यं तु गवीरजः" इति वचनाद् वायव्यस्नानं सुरभिखुरोत्खातपवनोल्लासितपांशुस्नानं तेन स्नाताः शुचयो भविष्यामः संपत्स्यामहे। अनध्ययनाः विकालत्वाद् पठनगुणनरहिता भविष्यामः। कृतः। गेड्डीति देश्यः। शङ्कुलाख्या वक्राग्रा यष्टिः तया आरामः क्रीडा येषां ते तथा भविष्यामः। विगतभयाः पठनगुणनायोग्यकाले रमणाद् उपाध्यायविगोपनोत्थदरवर्जिता भविष्यामः॥

९१. मुक्ता निर्जनत्वात् त्यक्ता मेरा मर्यादा यैस्ते तथा। निःशङ्का इत्यर्थः। भविष्यामः॥ गोपालगुर्जरीं भैरवरागप्रियां भाषाविशेषं गायन्ति ते गोपालगुर्जरीगायका भविष्यामः[1]। "कगच०" [१.१७७.] इति कलुकि क्वचिद् एकपदेपि संधौ दीर्घत्वे गाया इति रूपम्। मित्रमिलिताः क्रीडावसरत्वात् सखियुक्ता भविष्यामः। तथैवेति निपातसमुदायः समुच्चये। कृतनाट्याः रचितनर्तनाश्च भविष्यामः। मित्रैर्मिलित्वा नाट्यं करिष्याम इत्यर्थः॥

९२. रन्तारः नानाक्रीडनकैः क्रीडनशीला भविष्यामः। भ्रमितारः इतस्ततः पर्यटनशीला भविष्यामः। एवं च निर्वृताश्च सुखिताश्च भविष्यामः॥

होस्सामि। होहामि। होस्सामो। होहामो। होस्साम। होहाम। होस्सामु। होहामु। "मिमोमुमे स्सा हा न वा" [१६७.]। पक्षे होहिमि। होहिमो। होहिम। होहिमु॥

---

1 B omits from गोपाल° up to भविष्यामः.

"होस्सं[1] कय-नेवच्छा, काहिमि कुरले, णडालिअं काहं,
दाहिमि वासं केसेसु, दाहम् अलिअम्मि तिलयं च. ९३
पिअ-संमुहं च गच्छं, सोच्छं गीअं च, हरिसओ रोच्छं,
तारुन्न-फलं वेच्छं, देच्छं[2], मोच्छं च संतावं. ९४

होहिस्सा। होहित्था। "मोमुमानां हिस्सा हित्था" [१६८.]। पक्षे होस्सामो। होहिमो। होहामो इत्यादि॥

९३–९७. पञ्चभिः कुलकम्। वासकसज्जा नायिकाविशेषः। तद् उक्तम्

परिपाट्यां फलार्थे[1] वा नवे प्रसव एव वा।
दुःखे चैव प्रमोदे च षड् एते वासकाः स्मृताः॥ १॥
उचिते वासके स्त्रीणाम् ऋतुकालेपि वा बुधैः।
द्वेष्याणाम् अथ वेष्टानां[2] कर्तव्यम् उपसर्पणम्॥ २॥

इति नयेन वासके रतिसंभोगलालसतया अङ्गरागादिना सज्जा वासकसज्जा इति चिन्तयन्ती परिभावयन्ती प्रियार्थं शय्या प्रियशय्या तां सज्जति प्रगुणीकरोति। चिन्तामेवाह। अहं कृतनेपथ्या विरचितवेषा भविष्यामि। कुरलान् केशविच्छित्तिविशेषान् करिष्यामि। ललाटिकां चन्दनादिभिर्ललाटमण्डनं करिष्यामि। केशेषु आर्द्रालकेषु वासं दन्दह्यमानकालागुरुकर्पूरादिसुरभिद्रव्यभावनां दास्यामि। अलिके ललाटे तिलकं च कस्तूर्या विशेषं दास्यामि निवेशयिष्यामि[3]॥

९४. प्रिये संमुखं गृहं प्रविशति प्रियाभ्युपगमनदानाद्यर्थं[4] तदभिमुखं च गमिष्यामि। गीतं च प्रियेण गीयमानं श्रोष्यामि आकर्णयिष्यामि। हर्षतो रोदिष्यामि[5][3]। प्रियप्राप्तेरानन्दाश्रुवर्षं विधास्यामी-

१ B C हुस्सं. २ B C देच्छं.

[1] So B C. Should not we read फलेर्थे? [2] C चे°. [3] B drops from here up to रोदिष्यामि in the commentary on the next couplet. [4] C लक्षण for °गमन°. As for B see the preceding note. [5] C रोदयि.°

छेच्छं भेच्छं नक्खेहि पिअं, वोच्छं च, तेण भोच्छं च,

सोच्छिस्सं पिअयम-चाडुआई, मोहं च गच्छिस्सं. ९५

'हसउ अ रमउ अ तुह सहि-अणो, हसामु अ रमामु अ अहंपि,

हससु अ रमसु अ तंपि हु,' इअ भणिही मह पिओ इण्हिं.९६

सहिम् एवं च भणिस्सं, तम्बोलं देहि, देसु पुप्फं[१] च,''

इअ चिन्तन्ती वासय-सज्जा सज्जेइ पिअ-सेज्जं. ९७

त्यर्थः। तारुण्यफलं वेदिष्यामि। प्रियपरिरम्भादि अनुभविष्यामि। द्रक्ष्यामि प्रियं सप्रेम वीक्षिष्ये। संतापं च मनःखेदं मोक्ष्यामि यौवनमाननात् त्यक्ष्यामि॥

९५. नखैः करजैः कृत्वा प्रियं छेत्स्यामि भेत्स्यामि। पाटयिष्यामीत्युभयार्थः। प्रियेण सह वक्ष्यामि रहसि वदिष्यामि। तेन प्रियेण सह भोक्ष्ये च संभोगसुखं मानयिष्यामि। प्रियतमस्य वल्लभस्य चाटुकानि प्रियवचनानि श्रोष्यामि। मोहं च रतिसातास्वादवशात् किंकर्तव्यतामूढतां गमिष्यामि॥

९६. तव सखीजनः हसतु च रमतां च। बहिर्गच्छत्वित्यर्थः। अहमपि हसामि च रमे च। त्वमपि हस च रमस्व च। आवां तु इतो विजने[1] सहासं रमणं कुर्वे इत्यर्थः। इति एवम् इदानीं मम प्रियो भणिष्यति विजनकरणार्थं विदग्धत्वात् इत्थं प्रतिपादयिष्यति। अथ च प्रियोप्यागतो युष्मान् बहिः प्रेषयिष्यति तस्मात्[2] स्वयमेव गच्छतेति वैदग्ध्येन सैव सखीर्वक्ति॥

९७. ताम्बूलं पूगीफलनागवल्लीदलादिरूपं देहि मह्यं वितर। पुष्पं च। जातावेकवचनम्। कुसुमानि देहि। अहं च एवम् इति सखीं स्वपरि[3]चारिकां प्रति भणिष्यामि॥

१ B C पुप्पं.

[1] B C om. वि°. [2] C अथ च प्रियेप्यागतो युष्माद्बहिः प्रेषयिष्यामि तस्मात्. [3] B C प्रति for °परि°.

"तं रमसु, तं रमेज्जसु, तुमं रमेज्जे, रमिज्जाहि तुमंपि;
रम तंपि, वयं रमिमो, रमन्तु एआ, रमह तुब्भे. ९८
एआ हसन्तु, तुम्हे हसह, हसामो वयंपि नीसङ्कं,
दइएण रमिज्ज इमा, इमा रमेज्जा, इमा रमइ. ९९

होस्सं । "मेः स्सं" [१६९.] इति स्सं वा ॥

काहं । दाहं "कृदो हं" [१७०.] । पक्षे काहिमि । दाहिमि ॥

गच्छं । सोच्छं । रोच्छं । वेच्छं । दच्छं । मोच्छं । छेच्छं । भेच्छं । वोच्छं । भोच्छं । "श्रुगमि०" [१७१.] इत्यादिना श्रादीनां सोच्छमादयः ॥

सोच्छिस्सं । गच्छिस्सं । "सोच्छादयः०" [१७२.] इत्यादिना श्रादीनां स्थाने इजादिषु भविष्यदादेशेषु यथासंख्यं सोच्छादयः त एव आदेशा अन्त्यस्वराद्यवयववर्जा हिलुक् च वा ॥

हसउ । रमउ । हसासु । रमासु । हससु । रमसु । "दु सु मु विध्यादिष्वेकस्मिंस्त्रयाणाम्" [१७३.] विध्याद्यर्थोत्पन्नानाम् एकत्वेर्थे वर्तमानानां त्रयाणामपि त्रिकाणां यथासंख्यं दु सु मु आदेशाः ॥

देहि । देसु । । "सोर्हिर्वा" [१७४.] इति पूर्वसूत्रविहितस्य सोर्हिर्वा ॥

९८–१०५. अष्टभिः कुलकम् । पांसुलानां स्वैरिणीनाम् इति एवं संप्रति आलापो मिथो भाषणम् । कोसावित्याह । हे सखि त्वं रमस्व । त्वं रमस्व । त्वमपि रमस्व । त्वमपि रमस्व । वयं रमामहे[1] । एता रमन्ताम् । यूयं रमध्वम् । सांप्रतं स्वेच्छया रमणे प्राप्तोऽवसर[2] इत्यर्थः ॥

९९. हे हले एता हसन्तु । यूयं हसत । वयमपि निःशङ्कं स्वैरित्वान्निर्भयं हसामः । तथा दयितेन सह इयं रमते । इयं रमते [इयं रमते] ॥

---

१ B C रमिज्जसु. २ B C रमिज्जा.

---

1 B C रमामहे. 2 B C प्राप्तेऽवस°.

एसा रमिहिइ, एसा रमिज्ज, एसावि संपइ रमेज्जा,[1]

एसा रमिज्ज,[2] एसा रमउ, रमेज्जा य एसावि. १००

होज्जम्हाणं समओ, होज्जा स-च्छन्द-गो जणो एस,

ण हु होज्ज जइ पओसो, ता एस जणो कहं होज्जा?[3] १०१

होज्जइ अङ्ग-त्थम्भो, सेओ होज्जाइ, होज्ज रोमञ्चो,

होज्जा कम्पो, होइ अ वेवण्णं एण्हिम्[4] अभिसरणे. १०२

१००. हे वयस्ये संप्रति इदानीम् एषा रमिष्यते[1] स्वेच्छया क्रीडां करिष्यति। एषा रमिष्यते[1]। एषापि रमिष्यते[1]। तथा[2] एषा रमताम्। [एषा रमताम्।] एषापि रमतां च ॥

१०१. हे आलि अस्माकं समयः स्वेच्छया विचरणावसरः अभवत्। अभूत् बभूव। जज्ञे। अतः एष जनो मल्लक्षणः स्वच्छन्दगः स्वेच्छाचारी भवति भवेत् भवतु भूयात् भविता भविष्यति। तथा हु निश्चितं यदि प्रदोषो रजनीमुखं नाभविष्यत् तदा[3] एष जनः अस्मल्लक्षणः[4] कथम् अभविष्यत्। प्रदोषाभावे प्रियविरहवह्निना भस्मसात् समपत्स्यतेत्यर्थः ॥

१०२. हे सध्रीचि इदानीम् अभिसरणे प्रियसमीपगमने अङ्गस्तम्भः हर्षादिवशाद् यत्नेपि अङ्गाक्रिया भवति संपद्यते। स्वेदः श्रमादिना रोमजलस्रावो भवति। रोमाञ्चः प्रियदर्शनादे रोमहर्षः। कम्पः मा मां कश्चिद् अभिसरन्तीं द्राक्षीद् इति भयादिना गात्रस्पन्दो भवति। वैवर्ण्यं सपत्न्यादिक्षेपादिना छायाविकारश्च भवति। इदानीम् अस्माकम् अभिसरणं कुर्वतीनाम् अङ्गस्तम्भादि वर्तत इत्यर्थः ॥

---

१ B C रमिज्जा. २ B C रमेज्ज. ३ C होज्जो. We with B. ४ B C एण्हि°.

---

1 So B C. 2 C यथा. 3 B C तथा. 4 C मल्लक्षणः.

होज्जहिइ इट्ठ-गोट्ठी, होज्जा पिअ-मेलओ, दिही होज्ज,
होहिइ परमाणन्दो, होज्जाहिइ चित्त-वीसामो. १०३

होज्ज किलकिंचिअं, विब्बोओ होज्जाउ[1], विब्भमो होउ,
मोट्टाइअं च होज्जउ, होज्जा ललिअं च अम्हाणं. १०४

होज्ज न संझा, होज्जा न निसा, तिमिरंपि जइ न होमाणं,
ता होन्ता कह अम्हे," इअ संपइ पंसुलालावो. १०५

१०३. हे सखि इष्टगोष्ठी प्रेमवैदग्ध्यगर्भपरस्परालापपूर्वं प्रियेण सह एकत्र अवस्थानं भविष्यति । प्रियेण सह मेलकः संबन्धः। अन्योन्याश्लेष इत्यर्थः । भविष्यति । धृतिः संतोषो भविष्यति । परमानन्दः हर्षातिरेको भविष्यति । चित्तविश्रामः विपक्षाभावाच्चेतोदार्ढ्यं च भविष्यति ॥

१०४. हञ्जे अस्माकं किलकिंचितं[1] भवतु भवेद् वा संपद्यताम् । विव्वोको भवतु । विभ्रमो भवतु । मोट्टायितं भवतु । ललितं च भवतु । किलकिंचितादिलक्षणानि[1] च अमूनि । स्मितहसितरुदितभयरोषदुःखगर्वश्रमाभिलाषसंकरः किलकिंचितम्[1] । इष्टेप्यवज्ञा[2] विव्वोकः। वागङ्गभूषणानां व्यत्यासो विभ्रमः । प्रियकथादौ तद्भावभावनोत्था चेष्टा मोट्टायितम् । मसृणोङ्गन्यासो ललितम् ॥

१०५. हे सखि संध्या यदि नाभविष्यत् निशा यदि नाभविष्यत् तिमिरमपि यदि नाभविष्यत् तदा कथं वयं भविष्यामः । अभीष्टमेलकः संध्यादिसद्भाव एवास्माकं जीवितप्रदः संपन्न इति भावः ॥

रमेज्जसु । रमेज्जे । रमिज्जाहि । रम । "अत इज्जस्विज्जहीज्जे-लुको वा" [१७५.]। पक्षे रमसु ॥

---

१ B C हुज्जाउ.

---

1 B C किलि°. 2 C दृष्टे°.

विहसन्त-पहा-हसन्तओ, अह उइओ चन्दो, कुणन्तओ
उवहसमाणिं सरोरुहं विहसन्ति हसइंव कुमुइणिं. १०६

रमिमो । रमन्तु । रमह । हसन्तु । हसह । हसामो । "बहुषु न्तु ह मो" [१७६.] ॥

रमिज्ज ३ । रमेज्जा ३ । "वर्तमाना-भविष्यन्त्योश्च ज्ज ज्जा वा" [१७७.] । पक्षे रमइ । रमिहिइ । रमउ ॥ अन्ये त्वन्यासामपीच्छन्ति । होज्ज । होज्जा ॥

होज्जइ । होज्जाइ । होज्ज । होज्जा । होज्जाहिइ । होज्जा । होज्ज । होज्जाहिइ । होज्ज । होज्जाउ । होज्जउ । होज्जा । "मध्ये च स्वरान्ताद् वा" [१७८.] इति स्वरान्ताद्धातोः प्रकृतिप्रत्यययोर्मध्ये चकाराद् वर्तमानाभविष्यन्तीविध्यादिप्रत्ययानां च ज्ज ज्जा वा । पक्षे होइ । होहिइ । होउ ॥

होज्ज । होज्जा । "क्रियातिपत्तेः" [१७९.] ॥

होमाणं । होन्ता । "न्त-माणौ" [१८०.] इति क्रियातिपत्तेः न्तमाणौ ॥

१०६. अथ तिमिरविलसनानन्तरं सरोरुहं कमलम् उपहसन्तीम् । सश्रीकत्वात् तद् विप्लवयन्तीम् इत्यर्थः । विहसन्तीं विकासम् आसादयन्तीं हसन्तीमिव विकसद्विशददलत्वात् स्मयमानामिव कुमुदिनीं कैरविणीं कुर्वन् । विहसन्ती चासौ प्रभा च तया समुच्छलच्चन्द्रिकया कृत्वा हसन्निव हसन् हास्यं कुर्वाणश्चन्द्र उदितः उदयाचलचूलावलम्बिबिम्बः संवृत्तः । अनेन उत्तरसर्गार्थसूचनम् ॥ मागधी छन्दः । तल्लक्षणं चेदम् । ओजे चौ युजि षचौ लदलदन्तौ मागधी ॥ विषमे चौ चतुर्मात्रौ द्वौ गणौ लदलदन्तौ । समे षचौ षण्मात्रचतुर्मात्रौ च लदलदन्तौ मागधी ॥

विहसन्त । हसन्तओ[1] । कुणन्तओ[2] । "शत्रानशः[3]" [१८१.] इति प्रत्येकं न्तमाणौ ॥

---

[1] B हसंतउ. [2] B कुणंतउ. [3] B C शत्रानसः.

उवहसमाणि। विहसन्ति। हसइं। "ई च स्त्रियाम्" [१८२.] इति ई। चकारात् न्तमाणौ ॥

इत्याचार्यश्रीहेमचन्द्रप्राकृतद्व्याश्रये अष्टमस्याध्यायस्य उदाहरणप्रति-
पादनद्वारेण तृतीयः पादः संपूर्णः ॥

इत्याचार्यश्रीहेमचन्द्रविरचितश्रीकुमारपालचरितप्राकृतद्व्याश्रय-
महाकाव्यवृत्तौ पञ्चमः सर्गः समाप्तः ॥

वज्जर, थक्को सि कहिं; पज्जर, कत्तो अ एण्हिम् आओ सि;
जम्पसु, विम्हरिआ हं? सीससु, अणुसासणिज्जो सि. १
साहसु, कीए रत्तो; बोल्लसु[1], अन्नावि किं पिआ तुज्झे[2]?
सङ्घसु, किम् अहं मुक्का? चवसु, मए किं कयं विलिअं. २
पिसुणसु, किं जुत्तम् इणं? उप्पालसु, किं चिराउ दिट्ठो सि?
इअ भमर-गुञ्जिएहिं ससिणं पुच्छीअ कइरविणी. ३

१. अथैकविंशत्या गाथाभिश्चन्द्रोदयं वर्णयति । त्रिभिर्विशेषकम् । भ्रमराणां गुञ्जितानि झंकाराखास्तैः कृत्वा शशिनम् इति एवम् कैरविणी अपृच्छत् । अत्र उत्प्रेक्षार्थ इवशब्दो ज्ञेयः । ततश्चावार्तयदिव । पृच्छामेवाह । हे प्रिय कथय प्रतिपादय कस्मिन् कुत्र प्रदेशे असि त्वं स्थितः उषितः । कथय कस्माच्च कुतः प्रदेशाद् इदानीम् आगतोसि । कथय विस्मृता एतावन्तं कालं स्मृतिपथं न गताहम् । येन चिरम् अन्यत्रावस्थितोसीति भावः । एतत् सर्वं कथय । येन अनुशासनीयः इयच्चिरम् अन्यत्रावस्थानेन शिक्षणीयोसि॥

२. कथय कस्यां कान्तायां रक्तः सानुरागः । किं क्षेपे । कथय किम् अन्यापि मद्व्यतिरिक्तापि तव प्रिया वल्लभा । कथय किम् अहं मुक्ता परित्यक्ता । कथय किं मया व्यलीकम् अपराधः कृतम् ॥

३. कथय किमिदं भवदनुष्ठितं युक्तम् । कथय किं चिरात् प्रभूतकालाद् दृष्टो वीक्षितोसि ॥

---

१ B C वो°. २ C तुब्भ.

---

1 C यत:.

णिव्वरही चक्क-वहू दूरत्थ-पिए जुगुच्छिअत्ताणा
झुणिअ-रवेहिँ अदुगुच्छिअंपि भिसिणिं दुगुञ्छन्ती. ४

न बुहुक्खिओवि चक्को, निय-छाहिँ निइय, णीरवीअ बिसं,
निअ-पक्ख-वीजणेहिँ वोज्जन्तो घरणि-सङ्काए. ५

"इदितो वा" [१.] इत्यधिकारसूत्रेण अग्रेतनसूत्रेषु ये इदितो धातवस्तेषां वक्ष्यमाणा आदेशा वा भवन्ति इति एतदुदाहरणानि तत्तत्सूत्रसंबन्धीन्येव ॥

वज्जरपज्जरेत्यादय आदेशाः "कथेर्वज्जर०" [२.] इत्यादिसूत्रेण भवन्ति ॥

४. जुगुप्सितः प्रियविप्रयोगेपि अवस्थानाद् निन्दितः आत्मा यया सा । तथा जुगुप्सिताः दैन्यसूचनाद् अप्रशस्यास्ते च [1] ते रवाश्च तैः कृत्वा अजुगुप्सितामपि स्वस्य लीलागृहत्वेन अनिन्द्यामपि बिसिनीं पद्मिनीं जुगुप्समाना विकत्थमाना चक्रवधूश्चक्रवाकवल्लभा दूरस्थः अनिकटवर्ती स चासौ प्रियश्च रथाङ्गस्तस्मिन् दुःखं कथयामास ॥

णिघरही । "दुःखे णिव्वरः" [३.] दुःखविषयस्य कथेर्णिव्वरो वा ॥

झुणिअ । अदुगुच्छिअं । दुगुञ्छन्ती । जुगुप्सेर्झुण-दुगुच्छ-दुगुञ्छाः [४.] । पक्षे जुगुच्छिअ ॥

५. निजच्छायां दृष्ट्वा निजच्छायामेव गृहिणीशङ्कया प्रियाभ्रमेण निजपक्षावेव व्यजने संतापापहरणात् तालवृन्ते ताभ्यां कृत्वा वीजयन् सन् बुभुक्षितोपि बुभुक्षाक्रान्तोपि चक्रः कोकः न बिसं मृणालम् अबुभुक्षत प्रियासंगमसुखनिमग्नतया न भोक्तुम् ऐच्छत् । न कवलीचकारेति भावः ॥

[2] बुहुक्खिओ । णीरवीअ ॥ वीजणेहिँ । वोज्जन्तो । "बुभुक्षि-वीज्योर्णीरव-वोज्जौ" [५.] ॥

---

१ B चरक्को. २ B नियवि. C निअवि. ३ B C नी°.

---

[1] B om. ते रवाश्च. [2] B बहु°. C बहु°.

गायन्ता सज्झायं, झायन्ता धम्म-झाणम् अकलङ्कं,
जाणन्ता मुणिअव्वं मुणिणो आवस्सए लग्गा. ६
दिण-ताव-उद्धुमाओ सद्दहिउं दाह-पसमणिं[1] जुण्हं,
को अमय-पिज्जणिज्जं अच्छीहि न घोट्टिउं लग्गो? ७
पट्टीअ चन्दिम-रसं चन्दिम-रस-डल्लिरं चओर-कुलं;
पिअइ म्ह अलि-कुलम् अणोरुम्मिअ-सेहालिअ-परायं. ८

६. स्वाध्यायं गायन्तः मधुरध्वनिना पूर्वपठितस्वाध्यायपरावर्तनं कुर्वन्तः । अकलङ्कम् आर्तरौद्रपरिणामपरिहारान्निर्दोषं धर्मध्यानं शुभाध्यवसायविशेषं ध्यायन्तः अभ्यस्यन्तः । ज्ञातव्यं जीवाजीवादितत्त्वनवकं बोद्धव्यं जानन्तः अर्हत्प्रणीतप्रकारेण अवगच्छन्तः आवश्यकम् अवश्यकृत्यं सामायिकादिधर्मानुष्ठानं तस्मिन् मुनयः साधवो लग्नाः व्यापृताः ॥

गायन्ता । झायन्ता । "ध्या-गोर्झा-गौ" [६.] ॥

जाणन्ता । मुणिअव्वं । "ज्ञो जाण-मुणौ" [७.] ॥

७. दाहप्रशमनीं[1] वपुःसंतापनिर्वापजननीम् अमृतवत् पानीयां पातव्यां ज्योत्स्नां श्रद्धाय निश्चित्य । दिनतापः[2] देदीप्यमानमार्तण्डमण्डलोष्मा । तेन उद्ध्मातः संतापितः सन् कः अक्षिभ्यां कृत्वा न पातुं लग्नः अपि तु सर्वोपि संतापिताङ्गः सन् चन्द्रिकां सतर्षम् ईक्षितुं प्रवृत्त इति भावः ॥

उद्धुमाओ[3] । "उदो ध्मो धुमा" [८.] ॥

सद्दहिउं । "श्रदो धो दहः" [९.] ॥

८. चन्द्रिकारसं पिबतीत्येवंशीलं चन्द्रिकारसपातृ ज्योत्स्नाद्रवपानशीलं चकोरा ज्योत्स्नाप्रियास्तेषां कुलं निकुरम्बं कर्तृ चन्द्रिका-

१ B C °पसमिणं.

[1] B °शमिनीं. [2] B C omit दिन°. [3] B drops from here up to दहः.

पवणेणोव्वाय-विलेवणाउ वसुअन्त-सम-जला कुलडा,[1]
उङ्घन्ते[2] ससुर-जणे ओहीरन्ते पिए य, गया. ९
निद्दायन्तं कमलं भमरो नाइग्घिउंपि ओच्छरिओ[3]
अग्घायन्तो कुमुअं अब्भुत्तन्तोव्व मयरन्दे. १०
न्हाउं उदय-त्थिअ-ससि-सङ्घायाथक्क-जुण्ह-जल-वरिसे,
निअ-ठाणे चिट्ठन्तोवि को न सुहिओ निरप्पीअ? ११

रसम् अपिबत् । तथा अलिकुलं कर्तृ । अनुद्धानः सरसो यः शेफालिकापरागः निर्गुण्डीपुष्परजः तं पिबति स्म ॥

पिज्जणिज्जं । घोट्टिउं । पट्टीअ । डल्लिरं । पिअइ । "पिबेः पिज्ज-डल्ल-पट्ट-घोट्टाः" [१०.]॥

९. पवनेन उद्धानं शुष्कं विलेपनं यासां तास्तथा । उद्धात् शुष्यत् श्रमजलं साशङ्कगमनखेदोद्भवघर्माम्बु यासां तास्तथा कुलटाः स्वैरिण्यः श्वशुरजने पतिपित्रादिके निद्राति स्वपिति सति प्रिये च निद्राति सति गताः विटपार्श्वं प्राप्ताः ॥

अणोरुम्मिअ । उव्वाय । वसुअन्त । "उद्वाकेरोरुम्मा वसुआ" [११.] ॥

१०. निद्रात् मुकुलीभवत् कमलम् आघ्रातुमपि आस्तां स्थातुं शिङ्घितुमपि[1] भ्रमरो नावसृतः उपस्थितः । अत्रोत्प्रेक्ष्यते । आजिघ्रन् कुमुदं मकरन्दे तद्रसे स्नान् इव स्नानव्यापृत इव ॥

उङ्घन्ते[2] । ओहीरन्ते । निद्दायन्तं । "निद्राकेरोहीरोङ्घौ" [१२.] ॥

आइग्घिउं । अग्घायन्तो । "आघ्रेराइग्घः" [१३.] ॥

११. उदयस्थितः उदयशिखरिशिखर[3]गारूढः स चासौ शशी च तस्य संस्त्याना सान्द्रा अस्थिता सर्वत्रप्रसरणशीला यासौ ज्योत्स्ना चन्द्रिका सैव संतापापहरणाज्जलं तस्य वर्षो निरन्तरं निपातस्त-

१ C कुडला. २ B उघंते. C ओघंते. ३ B C उ°.

1 B C सिं°. 2 B C उघंते. 3 B °शिखर°.

उदयुट्ठिअस्स ससिणो समुहोकुंकुरिअ-किंनरीहि कओ
अमिलाण-पारिजायापव्वाइअ-कप्प-कुसुमग्घो. १२
वाअ-मुह-विहिअ-कमलो, निम्मविआझिज्जमाण-कुमुअ-सिरी,
निम्माणिअ-हरिसम् अणिज्झरन्त-रुइ-णुमिअ-सव्व-दिसो;

स्मिन् स्नात्वा अङ्गं धौत्वा निजस्थाने स्वावासे स्थितोपि सुखसाधन-विषयप्रयत्नरहितोपि को न सुखितस्तस्थौ । अपि तु सर्वोपि निर्वृतो जात इति भावः ॥

अब्भुत्तन्तो । न्हाउं । "स्नाकेरब्भुत्तः" [१४.] ॥

सङ्खाय । "समः स्त्यः खा" [१५.] ॥

अथक्क । ठाणे । चिट्ठन्तो । निरप्पीअ । "स्थष्ठा-थक्क-चिट्ठ-निरप्पाः" [१६.] । बाहुलकात् क्वचिन्न । ठिअ ॥

१२. उदयोत्थितस्य उदयाचले प्राप्तोद्गमस्य शशिनः अम्लानानि विकसितानि यानि पारिजातानि[1] पारिजातप्रसूनानि अम्लानानि कल्पस्य कल्पद्रुमस्य कुसुमानि च । तेषाम् अर्घः अञ्जलिना क्षेपः संमुखोत्थिता भक्तिवशाद् अभिमुखीभूता याः किंनर्यः किंपुरुषाङ्गनास्ताभिः कृतः ॥

उट्ठिअस्स । उक्कुकुरिअ । "उदष्ठ-कुक्कुरौ" [१७.] ॥

१३–२१. नवभिः कुलकम् । खं गगनतलं शशी आरूढः अध्यासीनः । कथंभूत इत्याह । म्लानमुखानि विच्छायाग्राणि विहितानि कमलानि येन स तथा । निर्मिता कृप्ता अक्षीयमाणा अभ्रश्यमाना कुमुदश्रीर्येन स तथा । निर्मितः हर्षो यत्रेति छादनक्रियाविशेषणम् । अक्षयन्ती ह्रासम् अनुपगच्छन्ती या रुचिर्ज्योत्स्ना तया छादिता व्याप्ता दिशो येन स तथा ॥

१ B C उदय°. २ So B C, not °कुकुरिअ°. ३ B C °रइ°.

1 B om. पारिजातानि. 2 B C om. उ°.

नूमिअ-गयणो, सन्नुमिअ-महि-अलो, ढक्किओडु-पह-पसरो,
ओम्बालिअ[1]-दीव-रुई, पव्वालिअ-माणिणी-माणो; १४

छाइअ-जणच्छि-पसरं तम-पुञ्जं सव्वओ णिहोडन्तो,
अणिवारिअ-पह-पसरो, पाडिअ-दूमिअ-पउत्थ-कुलो; १५

किरणेहि खं दुमन्तो धवलण-कुच्चय-सिरिं तुलन्तेहि,
ओहामन्तो अमओलुण्डिर-नव-रुप्पमय-कुम्भं; १६

जलम् उल्लुण्डावन्तो[2] ससि-कन्ताउ, अमयं विरेअन्तो,
पल्हत्थाविअ[3]-गुञ्झो रइ-वावड-मिहुण-हिअआओ; १७

१४. छादितं कान्त्या व्याप्तं गगनं येन स तथा । छादितमहीतलः रोचिरावृतपृथ्वीपृष्ठः । छादितोडुप्रभाप्रसरः तिरोहितनक्षत्रद्युतिविस्तारः । छादितदीपरुचिः अपह्नुतप्रदीपप्रभः । छादितः रणरणकजननाद् गोपितः मानिनीमानो येन स तथा ॥

१५. छादितजनाक्षिप्रसरं निरुद्धलोकलोचनव्यापारं तमःपुञ्जं ध्वान्तस्तोमं सर्वतः समन्तात् निवारयन् निषेधन् निपातयन् विनाशयन् वा यतोऽनिवारितः मेघादिभिरनिरुद्धः प्रभाप्रसरो यस्य स तथा । पातितं मूर्छाजननाद् अधःक्षिप्तं दावितं विरहानलोद्दीपनात् तापितं धवलितं वा पाण्डुवर्णं कृतं प्रोषितकुलं पान्थसार्थो येन स तथा ॥

१६. धवलनाय अभ्रकादिना प्रासादश्वेतीकरणाय कूर्चको मुञ्जादिमयं[1] धवलनोपकरणम् । तस्य श्रियं तोलयद्भिः अनुकुर्वाणैः किरणैः कृत्वा खं व्योमाङ्गणं धवलयन् मण्डयन् । अमृतं विरेचयतीत्येवंशीलः अमृतविरेचयिता नवस्तत्कालोद्भवो रूप्यमयो दुर्वर्णनिर्मितो योसौ कुम्भस्तं तोलयन् अनुविदधत् ॥

१७. शशिकान्तात्[2] जलं विरेचयन् क्षारयन् अमृतं विरेचयन्

१ B उमालिअ°. C ओमालिअ.° २ B C जलमोलु°. ३ B C पल्ल°.

1 B C °मयधव°. 2 B C °कांतान्.

आहोडिअ-धणुह-गुणे सर-ताडिअ-तिहुअणम्मि रइ-नाहे
दूर-विहोडिअ-सज्झस-असईणं दइअ-मेलवणो; १८
नीहार-मीसिआहिवँ, छुह-रस-वीसालिआहिव पहाहि
तिमिरोद्धूलिअ-भुवणं गुण्ठन्तो भामिआहि नहे; १९
कामि-मण-तालिअण्टिर-वम्मह-आणं जगे तमाडन्तो,
नासविअ-भओ अहिसारिआण हारविअ-लज्जाण; २०

स्रवन्। रतौ संभोगे व्यापृतानि यानि मिथुनानि तेषां हृदयेभ्यः विरेचितगुह्यः बहिःकृतान्तरङ्गाभिप्रायः। सर्वत्रात्र रेचिर्बहिर्निःसारण-[1]मात्रे। ततश्च णिग्यपि विरेचनार्थ एव भवति। विरेचनं बहिर्निःसारणम्॥

१८. ताडितः आस्फालितः धनुर्गुणः[2] कोदण्डप्रत्यञ्चा येन स तथा तस्मिन्। शरैः मदनोन्मादनमोहनतापनशोषणाख्यबाणैस्ताडितं निधुवनोन्मादादिभावजननाद् उपद्रुतं त्रिभुवनं त्रैलोक्यं येन स तथा तस्मिन् रतिनाथे सति दूरादेव ताडितम् अपास्तं साध्वसं पतिपित्रादिभयं यासां तास्तथा ताश्च ता असत्यश्च कुलटास्तासां दयिता नटविटादिका वल्लभास्तेषां मिश्रणः संपर्कजनकः। त्रिभुवनास्खलिताज्ञे मन्मथे गृहीतधनुषि पित्रादीन् अवगणय्य स्ववल्लभान् अभिसस्रुरित्यर्थः। राजभये पित्रादिभयं न किंचिद् इत्युक्तिलेशः॥

१९. नीहारमिश्रिताभिरिव श्वैत्यशैत्याभ्यां प्रालेययुक्ताभिरिव सुधारसमिश्रिताभिरिव अमन्दानन्दजननात् पीयूषद्रवसंपृक्ताभिरिव नभसि भ्रमिताभिः व्योमाङ्गणे प्रसारिताभिः प्रभाभिः कृत्वा तिमिरोद्धूलितभुवनं ध्वान्तावगुण्ठितविश्वम्[3] उद्धूलयन् व्याप्नुवन्॥

२०. कामिमनो भ्रमयति चालयति इत्येवंशीलः कामिमनोभ्रमयिता स चासौ मन्मथश्च तस्य आज्ञां जगति भ्रमयन् विस्तार-

[1] B रिचिर्बहिनिःसरणमात्रे...विरेचनं बहिर्निःसरणम्. C रिचिर्वहनिःशरणमात्रे...विरेचनं बहिर्निःसारणम्. [2] B C धनुपगु°. [3] B C °गुंडिन°.

विउडिअ-चओर-तन्हो जुण्हाए विप्पगालिअ-दिणोम्हो
नासिअ-चक्को विरहिणि-पलावणो खं ससी चडिओ. २१

यन् । नाशिता कामार्तत्वात् त्यक्ता लज्जा यकाभिस्तास्तथा तासाम् अभिसारिकाणां स्वैरिणीनां नाशितं लज्जापनोदाद् अपनीतं भयं येन स तथा ॥

२१. [ज्योत्स्नया] नाशितचकोरतृष्णः अपनीतज्योत्स्नाप्रियपिपासः । तयैव[1] च नाशितो विद्रावितो दिनोष्मा वासरसंतापो येन स तथा। नाशितः प्रियतमाया विघटितश्चक्रो येन स तथा। विरहिणीनां प्रोषितप्रियाणां नाशनः कथाशेषताकारी ॥

अमिलाण । पव्वाइअ । वाअ । "म्लेर्वा-पव्वायौ" [१८.] ॥

निम्मविआ । निम्माणिअ । "निर्मो निम्माण-निम्मवौ" [१९.] ॥

झिज्जमाण । अणिउज्झरन्त । "क्षेर्णिज्झरो वा" [२०.] ॥

णुमिअ । नूमिअ । सन्नुमिअ । ढक्किओ । ओम्बालिअ । पव्वालिअ । छाइअ ।
"छदेर्णेर्णुम-नूम-सन्नुम-ढक्कौम्बाल-पव्वालाः"[2] [२१.] ॥

णिहोडन्तो । अणिवारिअ । पाडिअ । "निवृ-पत्योर्णिहोडः" [२२.] ॥

दूमिअ । "दूङो[3] दूमः" [२३.] ॥

दुमन्तो । धवलण । "धवलेर्दुमः" [२४.] ॥ "स्वराणां स्वराः" [४.२३८] बहुलम् इति दीर्घत्वमपि । दूमिअ ॥

तुलन्तेहि । ओहामन्तो । "तुलेरोहामः" [२५.] ॥

ओलुण्डिर । उल्लुण्डावन्तो[4] । विरेअन्तो । पल्हत्थाविअ । "विरिचेरोलुण्डोल्लुण्ड-पल्हत्थाः" [२६.] ॥

आहोडिअ । विहोडिअ । [ताडिअ] । "तडेराहोड-विहोडौ" [२७.] ॥

मेलवणो । मीसिआहि । वीसालिआहि । "मिश्रेर्वीसाल-मेलवौ" [२८.] ॥

---

1 C तयैव. 2 B C °ढक्कौ°. 3 B C दूडो. 4 C ओल्लु°. We with B.

अह दोवारिअ-दाविअ-नरवइ-दंसिअ-अणेग-पाहुडओ,
आभरण-कन्ति-दक्खविअ-सुरधणू, दरिसिएभ-गई; २२
उदउग्गिअ-रवि-तेओ, उग्घाडिअ-सासिह-जण-मणाणन्दो,
संभाविओ उविन्दो इन्दो आसङ्घिओ अह वा; २३
उल्लालिअ-णेवत्थणम् उत्थङ्घिअ-कर-पुडं नमन्त-निवे
गुलुगुञ्छिअच्छि उप्पेलिअच्छिणो सणिअम् इक्खन्तो; २४

उद्धूलिअ । गुण्ठन्तो । "उद्धूलेर्गुण्ठः" [२९.]

भामिआहि । तालिअण्टिर । तमाडन्तो । "भ्रमेस्तालिअण्ट-तमाडौ" [३०.] ॥

नासविअ । हारविअ । विउडिअ । विप्पगालिअ । नासिअ । पलावणो । "न-शेर्विउड-नासव-हारव-विप्पगाल-पलावाः" [३१.] ॥

२२–२६. पञ्चभिः कुलकम् । [अथ] नृपः कुमारपालनरपतिः कनकमण्डपिकां सुवर्णनिर्मितह्रस्वमण्डपम् अधिष्ठितः अध्यासीनः । कथंभूतोसौ इत्याह । दौवारिकेण दर्शिता निवेदिता ये नरपतयस्तैर्दर्शितानि पुरो धारणात् प्रत्यक्षीकारितानि [अनेकानि] प्राभृतानि सुवर्णरत्नादिढौकनानि यस्य स तथा । आभरणानाम् उत्तमाङ्गश्रवणभुजादिदेशसंस्थकोटीरकुण्डलकेयूराद्यलंकाराणां कान्त्या दर्शितं जनानां प्रत्यक्षं विधापितं सुरधनुर्येन स तथा । दर्शिता साक्षात्कारिता इभगतिः गजपदन्यासो येन स तथा । हस्तिलीलया गच्छन्नित्यर्थः ॥

२३. उदये उद्घटितं निःशेषाशिष्टवैरिवारणशिक्षणात् सर्वत्र उल्लासितं रविवत् तेजो येन स तथा । उद्घटितो विस्तारितः सस्पृहा धनाद्यभिलाषुका ये जनास्तेषां मनांसि तेषाम् आनन्दः समीहितवसुदानात् प्रमोदो येन स तथा । एवंविधः सन् उपेन्द्रः कृष्णः संभावितः ऊहितः । वेति पक्षान्तरे । इन्द्रो वा संभावितः ॥

२४. उन्नमितम् ऊर्ध्वीकृत्य एकपार्श्वाद् अपरपार्श्वे नीतम् । उ-

---

[1] B °पार्श्वे°. We with C.

उन्नामिअ-भुमयाए चण्डारे पाहुडाइँ पेण्डविरो
नरवइ-पट्ठविआइं देवय-पट्ठाविआइं च; २५
वोक्कन्त-महामच्चो, निवो अवुक्कन्त-पणइ-मण्डलिओ,
विण्णत्ति[1]-दिन्न-कण्णो, अहिट्ठिओ कणय-मण्डविअं. २६

त्तारितम् इति यावत्। नेवत्थणमिति देश्यः। निरुञ्छनं[1] यत्र नमने त-त्तथा। सम्राट्स्वान्ततोषाय विहितोत्तरीयचेलस्फोरणम्[2] इति यावत्। उन्नमितकरपुटम् ऊर्ध्वीकृत्य योजितपाणिसंपुटं च यथा भवति ए-वम् उन्नमिताक्षान् भयादरपरीतचेतस्त्वाद् विस्फारितेक्षणान् नमतो नृपान् उन्नमिताक्षं तद्भक्त्या प्रसन्नतया कीदृशोयम् इति ज्ञातुं वि-स्तारितनेत्रं शनैर्मन्दम्। लीलयेति यावत्। ईक्षमाणः॥ गुलुगुञ्छिअ-च्छीत्यत्र समासान्तविधेरनित्यत्वाद् न समासान्तः॥

२५. नरपतिभिः कुङ्कणमालवकदेशादिदेशभूपतिभिः प्रस्थापि-तानि मनःप्रसादनाय मुत्कलितानि[3] देवताप्रस्थापितानि मन्त्रादिवशी-कृतदेवप्रेषितानि च प्राभृतानि ढौकनानि उन्नमितभ्रुवा। भ्रूक्षेपेण कृत्वेत्यर्थः। भाण्डागारे प्रस्थापयिता न्यसनशीलः॥

२६. विज्ञपयन्तः कार्यं निवेदयन्तो महामात्या यस्य स तथा। विज्ञपयन्तः प्रणयिनः प्रीतियुक्ता माण्डलिकाः[4] कतिपयदेशस्वामिनृपा यस्य स तथा। विज्ञप्तौ[5] महामन्त्रिमाण्डलिककार्याकर्णने दत्तो वि-तीर्णः कर्णो येन स तथा॥

दाविअ। दंसिअ। दक्खविअ। दरिसिए। "दृशेर्दाव-दंस-दक्खवाः" [३२.]॥
उग्गिअ। उग्घाडिअ। "उद्घटेरुग्गः" [३३.]॥
ससिह। "स्पृहः सिहः" [३४.]॥
संभाविओ। आसङ्किओ। "संभावेरासङ्घः" [३५.]॥

---

[1] B विन्नत्ति°.

---

[1] B निरुंछनं; C निरूछनं. [2] B °स्फेरण°; C °स्फुरण°. [3] B C clearly °प्रसाद-नायमुत्कलितानि, where मुत्कलितानि appears to be the supposed origin of the Gujerati मोकलेल. [4] B C °मंडलि°. [5] B C विज्ञपित्तो.

पणमिर-पणइ-पणामिअ-दिट्ठी, सो तत्थ अल्लिविअ-हरिसो,
अणचच्चुप्पिअ-हिअओ अप्पिअ-निव-खोहम् आसीणो. २७
जाविअ मुहुत्तम् एगं, पुरोहिओ जविअ-दुट्ठ-कलि-ललिओ,
दन्त-रुई-ओम्वालिअ-गयणो उच्चारही मन्तं. २८

उल्लालिअ । उत्थङ्घिअ । गुलुगुञ्छिअ । उप्पेलिअ । उन्नामिअ । "उन्नमेरुत्थङ्घोल्लाल-गुलुगुञ्छोप्पेलाः" [३६] ॥

पेण्डविरो । पट्ठविआइं । पट्ठाविआइं । "प्रस्थापेः पट्ठव-पेण्डवौ" [३७.] ॥

वोक्कन्त । अवुक्कन्त । विण्णत्ति । "विज्ञपेर्वोक्कावुक्कौ" [३८.] ॥

२७. प्रणम्रप्रणतौ सेवार्थसमागतवन्दारुसकलभूपालकृतपादपतने प्रणम्रप्रणयिषु प्रह्वप्रार्थकलोकेषु वा अर्पिता प्रसन्नतासूचनाय मनाग् न्यस्ता दृष्टिः चक्षुर्विन्यासो येन स तथा । अर्पितहर्षः स्वदर्शनप्रदानसंपादितसभाजनसंतोषः । अनर्पितहृदयः गम्भीरत्वाद् अनवतीर्णस्वाभिप्रायः स कुमारपालावनिपः । अर्पितनृपक्षोभं किम् एषोधुना नो विधास्यतीति उत्पादितप्रत्यर्थिनृपतितातिचित्तसंभ्रमं यथा भवति एवं तत्र कनकमण्डपिकायाम् आसीनः उपविष्टः ॥

पणामिअ । अल्लिविअ । अणचच्चुप्पिअ । अप्पिअ । "अर्पेरल्लिव-चच्चुप्प-पणामाः" [३९.] ॥

२८. एकं मुहूर्तं यापयित्वा उपवेशानन्तरं स्वावसरप्राप्त्यर्थं नृपस्य सावधानार्थं च क्षणमात्रं प्रतीक्ष्य यापितं स्वमहिम्ना गमितं दुष्टस्य लोकदुःखदायित्वाद् अप्रियस्य कलेः कलिकालस्य ललितं विलासो येन स तथा । दन्तरुचिभिः शशधरकरकल्पदशनरश्मिभिः प्लावितं व्याप्तं गगनं येन स तथा । पुरोहितः पृथ्वीशश्रेयोर्थं मन्त्रम् उदचारीद् अभणत् ॥

जाविअ । जविअ । "यापेर्जवः" [४०.] ॥

---

१ B उव्वा°; C उच्चा°.

हार-प्पह-पव्वालिअ-हिओ निवो, पाविओव्व अमएण,

पक्खोडिअ-चमराहिं विकोसिअच्छीहि उवसरिओ. २९

ओग्गालिर-वसहाणं, वग्गोलिर-करहयाण, वारम्मि

रोमन्थ-भङ्ग-जणणो अहासि गम्भीर-तूर-रवो. ३०

णुव्वन्तो सिरि-णिहुवय-सिरिम्, उम-कामय-सिरिं पयासन्तो,

विच्छोलिअ-भुमयाहिं[1] राया विलयाहि परिअरिओ. ३१

२९. हाराणां नानाविधमुक्ताकलापानां प्रभाभिः प्लावितं हृदयं वक्षःस्थलं यस्य स तथा । अतः उत्प्रेक्ष्यते । अमृतेन प्लावित इव व्याप्त इव । विकोशितानि वारंवारं चालनेन स्फारीकृतानि चामराणि यकाभिस्तास्तथा ताभिः । विकोशिताक्षीभिः विकसितनेत्राभिः नृपः उपसृतः[1] । चामरव्यग्रकरवनिताभिः शोभार्थं पार्श्वतः सेवित इत्यर्थः ॥

ओम्वालिअ । पवालिअ । पाविओ । "प्लावेरोम्वाल-पवालौ" [४१.] ॥

पक्खोडिअ । विकोसिअ । "विकोशेः पक्खोडः" [४२.] ॥

३०. रोमन्थं कुर्वन्ति "णिज् बहुलं नाम्नः°" [हे० ३.४] इति णिजि रोमन्थयन्ति इत्येवंशीला रोमन्थयितारः उद्गीर्य चर्वणकरिष्णवो ये वृषभा बलीवर्दास्तेषां रोमन्थयितृकरभाणां च वारे समूहे । रोमन्थनं[2] भावे घञि रोमन्थस्तस्य भङ्गः प्रतिरवसंवलिततादृग्ध्वानश्रवणेन संजातक्षोभत्वाद् विच्छेदस्तस्य जनकस्तूर्यरवो नान्दीनिनादः अथ स्वर्णमण्डपिकायां सिंहासनोपविष्टे नृपे पुरोहितमन्त्रोच्चारणचामरिकीचामरग्रहणानन्तरम् आसीत् ॥

ओग्गालिर । वग्गोलिर । रोमन्थ । "रोमन्थेरोग्गाल-वग्गोलौ" [४३.] ॥

३१. श्रियं कामयते "शीलिकामि°" [हे० ५.१] इति णे श्रीकामः स एव[3]

---

१ B °भुमयाए. We with C.

1 B उपश्रितः. We with C. 2 B रोमंथयमं. We with C. 3 B म च for स एव.

अणकम्पिर-कर-वलिअ-त्थाले आरोविउं अदोलि-सिहं
रङ्खोलिर-ताडङ्का वर-विलयारत्तिअं काही. ३२
जण-रञ्जणेहि राविउम् उव्वीसं तत्थ पणमिर-निवेहि
परिवाडिअञ्जलीहिं खे घडिआ कमल-कोसव्व. ३३

श्रीकामकस्तस्य श्रियं प्रकाशयन् उमाकामकश्रियं प्रकाशयन्। संप्रत्यपि स्वविभूत्या माधवपार्वतीपतिलक्ष्मीं प्रकटयन्नित्यर्थः । कम्पिता अभीष्टकामिनाम् अर्धाक्षनिरीक्षणार्थं चालिता भ्रुवो यकाभिस्तास्तथा ताभिर्वनिताभी राजा कुमारपालनृपः परिवृतः स्वस्वकृत्यकरणाय उपसृतः ॥

णिहुवय । कामय । "कमेर्णिहुवः" [४४.] ॥

णुवन्तो । पयासन्तो । "प्रकाशेर्णुव्वः" [४५.] ॥

३२. अकम्प्रौ अकम्पनशीलौ । निश्चलावित्यर्थः । यौ करौ हस्तौ तयोरारोपितं धृतं यत् स्थालं रत्नखचितकाञ्चनपात्रं तस्मिन् आरोप्य संस्थाप्य आरात्रिकं[1] नीराजनाय दीपकमण्डलम् । न दोलयतीति ग्रहादिभ्यो णिनि अदोलिनी स्थिरा शिखा कलिका यस्य तत्तथा तद् दोलिनौ लीलावशात् चलनशीलौ ताडङ्कौ कुण्डले यस्याः सा तथा । वारवनिता[2] वारविलासिनी अकार्षीत् । उदतारयदित्यर्थः ॥

विच्छोलिअ । अणकम्पिर । "कम्पेर्विच्छोलः" [४६.] ॥

वलिअ । आरोविउं । "आरोपेर्वलः" [४७.] ॥

अदोलि । रङ्खोलिर । "दोले रङ्खोलः" [४८.] ॥

३३. जनरञ्जनैः नीतिशालितया लोकावर्जकैः प्रणम्रनृपैः घटिताञ्जलिभिः योजितैः करसंपुटैः कृत्वा तस्यां कनकमण्डपिकायां नृपं कुमारपालनृनाथं रञ्जयितुम् आत्मनि सानुरागं कर्तुं खे शीर्षोपरिदेशे कमलकोशा इव कमलकुड्मलानीव घटिता विरचिताः ॥

रञ्जणेहि । राविउं । "रञ्जे रावः" [४९.] ॥

परिवाडिअ । घडिआ । "घटेः परिवाडः" [५०.] ॥

---

[1] B C आरत्रिकं. [2] B वरवनिता. C वरवनिता.

कणय-परिआलिएहिं रयणाहरणेहि वेढिअङ्गुलिआ
विकिणण[1]-किणण-छइल्ला पुरो निविट्ठा महाजणिआ. ३४
विकेन्तोद्धरिआ[2] इव भायन्ता अवि अबीहिरा निच्चं
भीएहि सहचरेहिं निव-दूआ दूरम् अल्लीणा. ३५

३४. कनकेन वेष्टितैर्नियमितै रत्नाभरणैर्मरकतपद्मरागादिमुद्रिकाभिः कृत्वा वेष्टिताङ्गुलयः व्याप्तानामिकाद्यङ्गुर्यैः । विक्रयेण[1]-क्रयणयोश्छेकाः महार्घप्रवालमौक्तिकमाणिक्यादिवस्तुनो मूल्येन प्रदानोपादानयोर्विचक्षणा महाजनिकाः श्रेष्ठिसार्थवाहप्रमुखपौरलोकाः पुरः युष्मत्प्रसादाद् वयं सुखिन इत्यादिनिजवार्ताप्रतिपादनाय राज्ञोऽग्रे निविष्टा आसीनाः ॥

परिआलिएहिं । वेढिअ । "वेष्टेः परिआलः" [५१.] ॥

३५. नृपदूताः प्रत्यर्थिपृथ्वीशसंदेशहारिणो भीता अपि प्रतापपराभूततपनमण्डल[2]श्रीकुमारपालभूपालालंकृततथाविधसभादर्शनात् चकिता अपि अभीताः स्वप्रभुसामर्थ्यचिन्तनात् सावष्टम्भा भीतैः सहचरैः सभादर्शनादेव क्षुब्धैः स्वानुचरैः सह दूरम् आलीनाः । प्रस्तावे सति संदेष्टव्यं विज्ञपयिष्याम इति सभाया दूरदेशे स्थिताः । एवंविधाः सन्तो विज्ञायन्ते विक्रीणदुद्धरिता इव विक्रीणत्सु सत्सु उद्धरिताः केनापि अगृहीतास्त इव[3] । यत् किल विक्रीणताम् उद्धरति तत् पृथग् भवति ॥

विकिणण[4] । किणण[5] । विकेन्तो[6] । "क्रियः किणो वेस्तु क्के च" [५२.] इति क्रीणातेः किणो वा वेः परस्य तु द्विरुक्तः क्के । चकारात् किणश्च । णेरिति[7] निवृत्तम् ॥
भायन्ता[8] । अबीहिरा । "भियो भा-बीहौ" [५३.] ॥ बाहुलकात् क्वचिन्न । भीएहि ॥

अल्लीणा । "आलीङोऽल्ली" [५४.] ॥

---

१ B C विकिणिण°. २ B C विक्कंतो°.

---

1 C विक्रयक्रयण°. 2 B °मंडन°. 3 B एव. 4 B C विकिणिण. 5 B C किणिण.
6 B C विक्कंतो. 7 B C णे इति. 8 B C भाअंता.

भत्ति-णिरिग्घिअ-हिअआ[१] मउलि-णिलीअन्त-पाणि-संपुडया
निव-पय-कमले[२]-णिलुक्कन्त-लोअणा सा सहा आसि. ३६

आसि मणि-वेइआसुं लुक्कन्तो, मणि-महीएँ लिक्कन्तो,
ल्हिक्कन्तो मणि-थम्भेसु सय-गुणो पडिकिदीइ जणो. ३७

निवइ-निलीइर-नयणा, अविराय-सिरी, विलीइर-जुआणा,
अलि-रुञ्जिअ-जइ-रुण्टिअ[३]-किङ्किणि-नीवीउ आसीणा. ३८

३६. भक्तौ नृपाराधने निलीनम् आसक्तं हृदयं यस्याः सा तथा। मौलौ मस्तके निलीयमानम् आश्लिष्यत् पाणिसंपुटं यस्याः सा तथा। राजानम् उद्दिश्य योजितहस्तेत्यर्थः। नृपपदकमले निलीयमानलोचना संश्लिष्यन्नयना सा सर्वोत्कृष्टा सभा आसीत्। अपरव्यापारं परित्यज्य सेवैकताना संवृत्तेति भावः॥

३७. मणिवेदिकासु रत्ननिर्मितवितर्दिषु निलीयमानः। मणिमह्यां निलीयमानः मणिस्तम्भेषु च निलीयमानः। प्रतिकृत्या प्रतिबिम्बेन तत्रतत्र संक्रामन् शतगुणः प्रभूतो जनः आसीत् संपन्नः॥

३८. नृपतौ निलेतृ सञ्जनशीलम्। वीक्षणपरम् इति यावत्। नयनं यासां तास्तथा। अविलीनश्रियः अभ्रष्टशरीरशोभाः विलेतारः धैर्यध्वंसाद् द्रवणशीला युवानो यकाभ्यस्तास्तथा। अलिरुतजयि रुतं यासां तास्तथा एवंविधाः किङ्किण्यः क्षुद्रघण्टिका यासु तथाभूता नीवयो यासां तास्तथा नार्यः आसीनाः। आरात्रिकादि[१] कृत्वा वारवनिताः कुमारपालनृपपार्श्वे उपविष्टाः॥

णिरिग्घिअ। णिलीअन्त। णिलुक्कन्त। लुक्कन्तो। लिक्कन्तो। ल्हिक्कन्तो। निलीइर। "निलीङेर्णिलीअ-णिलुक्क-णिरिग्घ-लुक्क-लिक्क-ल्हिक्काः" [५५.]॥

अविराय। विलीइर। "विलीङेर्विरा" [५६.]॥

रुञ्जिअ। रुण्टिअ। "रुते रुञ्ज-रुण्टौ" [५७.]॥

१ B C °या. २ B C °लि°. ३ B C °रुंडिय°.

1 B C °रत्रि°.

सग्गेवि हणिअ-विहवा, असुणिअ-दोसा, तिलोअ-सिरि-धुवणी,
कुमर-नरिन्द-सहा सा धुणिआरि-मणोरहा हूआ. ३९
हुन्ताणन्दो, अहुवन्त-संसओ, निवइम् उब्भुअन्त-मई
पहवन्तो अपरिहवो विण्णविही संधिविग्गहिओ. ४०
"देव, विवक्खीहुन्तो णिव्वडिअ-बलेण सो पहुप्पन्तो
हूओ कुङ्कुण-नाहो जहा तहा कुणसु अवहाणं. ४१

३९. स्वर्गेपि । आस्तां मर्त्यलोके । श्रुतविभवा विख्यातसमृद्धिः अश्रुतदोषा स्वपरदेशानाकर्णितास्थितिः । त्रैलोक्यश्रीर्धूयते स्ववैभवेन अभिभूयते अनयेति करणे अनटि त्रैलोक्यश्रीधवनी सा प्रागुक्त्यावर्णितस्वरूपा "ते लुग् वा" [है० ३.२] इति कुमारपालेत्यत्र उत्तरपदलोपे कुमारः। स चासौ नरेन्द्रश्च तस्य सभा धुतारिमनोरथा विष्वगवस्थितप्रासनिस्त्रिंशशक्तिशूलचक्राद्यस्त्रकलितानेकसुभटविसंकटत्वात् परास्तप्रत्यर्थिसार्थविरूपकाभिप्राया भूता संजाता ॥

हणिअ । असुणिअ । "श्रुटेर्हणः" [५८.] ॥
धुवणी । धुणिअ । "धूगेर्धुवः" [५९.] ॥

४०. भवदानन्दः नृपाग्रतोऽभिप्रेतनिवेदनात् संपद्यमानप्रमोदः। अभवत्संशयः विज्ञातस्वपरसैन्यवृत्तान्तत्वाद् अविद्यमानप्रतिपाद्यविषयसंदेहः । उद्भवन्मतिः सप्रतिभत्वाद् उल्लसद्बुद्धिः । प्रभवन् स्ववचनचातुर्येण इतरविज्ञपकेभ्यः समर्थः संजायमानः । अपरिभवः कुत्रापि असंपन्नतिरस्कारः । सांधिविग्रहिकः संधानविग्रहविनियुक्तप्रधानपुरुषः व्यजिज्ञपत् । वक्ष्यमाणं न्यवीविदत् ॥

हूआ । होन्त । अहुवन्त । अपरिहवो । "भुवेर्हो-हुव-हवाः" [६०.] ॥ क्वचिद् अन्यदपि । उब्भुअन्त ॥

४१. विज्ञप्तिकामेव गाथाषट्षष्ट्या आह । हे देव महाराज

[1] B C अ° though both have उ° in the text.

दूर-द्विआहि करिउं णिआरिअं सुर-वहूहि दीसन्ता,
संदाणन्ता, अइनिद्दुहावणा वेरि-सुहडाण; ४२
वावम्फिरा कलासुं, अमोघ-णिव्वोलणं पयासन्ता,
अपयल्लिर-असि-फलया, णीलुञ्छन्ता रिउ-दलम्मि; ४३

पृथग्भूतम् इतरोर्वीशसैन्यतो विशिष्टं स्पष्टभूतं सर्वत्र प्रकटं वा यद् बलं चतुरङ्गसैन्यं[1] तेन कृत्वा विपक्षीभवन् बलावलेपेन संपद्यमानः प्रभवन् शत्रुतिरस्कारेण समर्थः संजायमानः स लोकविख्यातः कुङ्कुणानां नाथः कुङ्कुणदेशाधीशः यथा यादृशो भूतः संपन्नस्तथा अवधानं कुरु । तद्वृत्तान्तनिशमनपरो भवेति भावः ॥

हुन्तो । "अविति हुः" [६१.] ॥

[णिवडिअ । "पृथक्स्पष्टे णिव्वडः" [६२.] ।]

पहुप्पन्तो । "प्रभौ हुप्पो वा" [६३.] । पक्षे पहवन्तो ॥

हूओ । "क्ते हूः" [६४.] ॥

४२. षड्भिः कुलकम् । हे महाराज तव योधाः कुङ्कुणं प्राप्ताः । कीदृशाः । काणेक्षितकृतम् अर्धाक्षनिरीक्षणकरणं कृत्वा दूरस्थिताभिः गगनाङ्गणगताभिः सुरवधूभिः अप्सरोभिर्दृश्यमानाः एते रणाजिरे वैरिभिरदृष्टपृष्ठा वैकुण्ठस्वर्गम्[2] आसाद्य नः पतयो भविष्यन्तीति सस्पृहं विलोक्यमाना अवष्टम्भं कुर्वन्तः चित्तधैर्यम् आदधाना वैरिसुभटानां च अतिविष्टम्भकरणाः "बहुलम् एतन्निदर्शनम्" इति चुरादिवचनाद् रामो राज्यम् अकारयद् इतिवत् स्वार्थे णिचि निश्चेष्टताजनकाः ॥

४३. कलासु शस्त्रादिशिक्षासु श्रमं करिष्णवः अभ्यासं विधातारः । अमोघं वैरिविजयेन सफलं मन्युना ओष्ठमालिन्यकरणं तत् प्रकाशयन्तः दर्शयन्तः । अशिथिलीभवनम् अलम्बनं च करिष्णवः । सप्रयत्नग्रहणाद् निश्चलाः सुस्थानस्थाश्चेत्यर्थः । एवंभूता असयश्च

1 B C वाहनं for °सैन्यं. 2 B C वैकुंत°.

कम्मन्तमत्त-मन्निअ-रिउणो, गुललन्त-सामिणो विजये,
दाउं वसुम् अझरन्ता, पहु-आदेसं च झूरन्ता; ४४

जुद्धेण भरावन्ता राम-कहं, भारहं भलावन्ता,
निअ-कुल-कमं लढन्ता, सुमरन्ता खत्तिआचारं; ४५

वीर-वरणं सरन्ता, पयरन्ता सामिणो पसायं च,
बावण्ण-वीर-कह-विम्हरावणा, वइर-पम्हुहणा; ४६

फलकाः खेटकाश्च येषां ते तथा। दल इति देश्यः सैन्यार्थे। रिपुसैन्ये निःपतनम् आच्छोटनं वा कुर्वन्तः॥

४४. क्षुरं कुर्वाणा एव क्षुरकुर्वाणमात्राणि। अत्र च क्षुरशब्देन क्षुरविधेयं शिरस्तुण्डमुण्डनादि कर्मोच्यते। अतो नापितमात्राणि मनिता रिपवो यैस्ते तथा। स्वामिनः स्वप्रभोर्विजये विजयनिमित्तं स्वकुलदेवतादि प्रति चाटु कुर्वाणाः। वसु विभूतिं दत्त्वा वर्णनापरबन्दिजनाय वितीर्य अस्मरन्तः दानशौण्डत्वाद् अजानानाः प्रभ्वादेशं स्वामिप्रदत्तशिक्षां च स्मरन्तः मनसि धारयन्तः॥

४५. युद्धेन तादृक्संग्रामेण कृत्वा रामकथां रामरावणयुद्धवृत्तान्तं स्मरयन्तो ज्ञापयन्तः। भारतं च कौरवपाण्डवयुद्धप्रतिपादकग्रन्थविशेषम्। कौरवपाण्डवयुद्धमित्यर्थः। स्मरयन्तः निजकुलक्रमं रणाङ्गणभङ्गपराङ्मुखस्वपूर्वपुरुषसमाचारं स्मरन्तः। क्षत्रियाचारं नष्टपृष्ठानुसरणपतितप्रहारपरिहाररूपं वीरव्रतं स्मरन्तः॥

४६. वीरवरणम् अनेन सह मया योद्धव्यमिति प्राकृतप्रतिसुभटयुद्धाङ्गीकारं स्मरन्तः अवबुध्यमानाः स्वामिनः प्रसादं च स्मरन्तः। द्विपञ्चाशद्वीरकथायाः शूद्रकादिवीरचरित्रस्य[3] विस्मरणाः तत्कथां विस्मरतो लोकान् प्रयुञ्जानाः। वैरस्य स्मरणाः एतैः सह अस्मद्भर्तुर्विरोध इति स्मर्तारः॥

---

१ B °मंत°. C °मित्त°. २ B सरा°. ३ B C शूद्रकावीरादिचरि°.

पम्हुसिअ-अन्न-कज्जा, विम्हारिअ-वानरिन्द-बल-ललिआ,
वीसारिअ-रिउ-मन्ता, तुह जोहा कुक्कुणं पत्ता. ४७
सीह-रव-पोक्कणा ते, कोक्कन्ता किंपि, सच्च-वाहरणा,
उव्वेल्लिर[१]-तुरय-पयल्लिरेभ-चडिआ, पसरिआ अ. ४८

४७. विस्मृतान्यकार्याः । रणरसिकतया त्यक्तापरप्रयोजना इति भावः । विस्मारितं निजानुपमपराक्रमेण लोकानां स्मृतिपथम् अवतरत् निषिद्धं वानरेन्द्रबलस्य सुग्रीवशौण्डीर्यस्य ललितं स्फूर्तिर्यैस्ते तथा । विस्मारितः विस्मरन् स्मृतिपथाद् उत्तरन् प्रयुक्तः रिपुमन्त्रः अस्माभिरेवमेवं योद्धव्यम् इत्यादिशत्रुपर्यालोचो यैस्ते तथा । अस्मद्भटारब्धानां प्रतिभटानां सर्वं युद्धकरणं विस्मृतम् इति भावः ॥

कुणसु । करिउं । "कृगेः कुणः" [६५.] । कृगेरित्यधिकारः उत्तरसूत्राष्टके ज्ञेयः॥

णिआरिअं । "काणेक्षिते णिआरः" [६६.] ॥

संदाणन्ता । अइनिट्टुहावणा[1] । "निष्टम्भावष्टम्भे णिट्टुह-संदाणं" [६७.] ॥

वावम्फिरा । "श्रमे वावम्फः" [६८.] ॥

णिव्वोलणं[2] । "मन्युनौष्ठमालिन्ये णिव्वोलः" [६९.] ॥

अपयल्लिर । "शैथिल्यलम्बने पयल्लः" [७०.] ॥

णीलुञ्छन्ता । "निष्पताच्छोटे णीलुञ्छः" [७१.] ॥

कम्मन्त । "क्षुरे कम्मः" [७२.] ॥

गुललन्त । "चाटौ गुललः" [७३.] ॥

अझरन्ता । झूरन्ता । भरावन्ता । भलावन्ता । लढन्ता । सुमरन्ता । सरन्ता । पयरन्ता । विम्हरावणा । पम्हुहणा । "स्मरेर्झर-झूर-भर-भल-लढ-विम्हर-सुमर-पयर-पम्हुहाः" [७४.] ॥

पम्हुसिअ । विम्हारिअ । वीसारिअ । "विस्मुः पम्हुस-विम्हर-वीसराः" [७५.]॥

४८. सिंहरवस्य व्याहरणाः प्रतिभटान् प्रति सिंहनादान् मु-

१ B C उव्विल्लि°.

1 So B C both here and in the text. 2 B C णिव्वोलं.

अह महमहन्त-णीहरिअ-मद-जले सिन्धुरम्मि चडिऊण
ठाणाओ नीलिओ कुङ्कुणाहिवो नीसरन्त-बलो. ४९
वरहाडिआ गढाओ रण-धाडिअ-रक्खणा भडा तस्स,
जग्गिअ-खग्गा रण-जागरा य आअड्डिआ तत्तो. ५०

ल्पन्तः। किम् अपरे मृता[1] इदानीम् इत्यादि व्याहरन्तो जल्पन्तः। सत्यव्याहरणाः स्ववचनप्रतिपन्नार्थनिर्वाहकत्वाद् अवितथभाषकाः। प्रसृत्वराः सत्वरं गमनशीला ये तुरंगमाः प्रसृमराश्च य इभाः कुञ्जरास्तेषु आरूढाः स्थिताः। प्रसृताः परबलमनु प्रचलिताश्च॥

पोक्कणा। कोक्कन्ता। वाहरणा। "व्याहृगेः कोक्क-पोक्कौ" [७६.]॥

उव्वेल्लिर। पयल्लिर। पसरिआ। "प्रसरेः पयल्लोव्वेल्लौ[2]" [७७.]॥

४९. अथ युष्मद्योधप्रसरणानन्तरं प्रसरद्गन्धं निःसृतं गण्डादिस्थानसम्पर्काद् निर्गतं मदजलं यस्य स तथा तस्मिन् सिन्धुरे कुञ्जरे आरुह्य स्थानात् स्वपत्तनमध्याद् निःसरत् पृष्ठतो निर्गच्छद् बलं सैन्यं यस्य स तथा कुङ्कुणाधिपो मल्लिकार्जुनाख्यनृपः निःसृतः॥

महमहन्त। "महमहो गन्धे" [७८.]॥

५०. गढेति देश्यो दुर्गे। तस्माद् निःसृताः। रणान्निःसृतानां कातरतया संग्रामाङ्गणान्निर्गतानां रक्षणाः तद्व्याघातपरापरसुभटनिवारकत्वेन त्रायकाः। जागरिताः शत्रुप्रहाराय कोशेभ्यो निःकाशिता इत्यर्थः। खड्गा यैस्ते तथा। जाग्रर्तीत्यचि जागराः रणाय जागराः सावधानाश्च तस्य कुङ्कुणाधीशस्य भटास्ततः दुर्गनिर्गमानन्तरं व्यापृताः परस्परं युद्धाय प्रवृत्ताः॥

णीहरिअ[3]। नीलिओ। नीसरन्त। वरहाडिआ। धाडिअ। "निःसरेर्णीहर-नील-धाड-वरहाडाः" [७९.]॥

जग्गिअ। जागरा। "जाग्रेर्जग्गः" [८०.]॥

[1] C सृ°. B doubtful between सृ° and मृ°. [2] B C पयल्लोविल्लौ. [3] B C णीहरिआ.

समरम्मि वावरन्ता, साहट्टिअ-पर-बला, असंवरिआ,
अणसाहरिअ-प्पेम्मामरीहि सन्नामिआ वरिउं. ५१
आदरिअ-वीर-वरणा, सारन्ते पहरिउं पयट्टा य,
अणओहिअ-भड-माणा, ओरसिआ इव सिवस्स गणा. ५२
ओअरिअ दीहिआओ अचयन्तीकय-तरन्त-सुहडेहिं
तीरन्ताणवि पारन्तएहिं तेहिं कयं जुज्झं. ५३

५१. समरे व्याप्रियमाणाः प्रवर्तमानाः संवृतं युगपद् अभिघातप्रवृत्तत्वेन भयजननात् पिण्डीकृतं परबलं यैस्ते तथा। असंवृताः भयाभावाद् यथेच्छं विचरिताः। असंवृतम् उच्छलत् प्रेम यासां ताः असंवृतप्रेमाणस्ताश्च ता अमर्यश्च ताभिर्वरितुं वरणं कर्तुम् आदृताः अङ्गीकृताः॥

आअड्डिआ। वावरन्ता। "व्याप्रेराअड्डः" [८१]॥

साहट्टिअ। असंवरिआ। अणसाहरिअ। "संवृगेः साहर-साहट्टौ" [८२.]॥

५२. आदृतवीरवरणाः। अनेन परबलवीरेण सह मया योद्धव्यम् इति कृतप्रतिज्ञा इत्यर्थः। अनवतीर्णः अभ्रष्टः भटमानः सुभटाभिमानो येषां ते तथा। प्रहरतः प्रहारान् ददतः प्रहर्तुं प्रवृत्ताः। एवं च मर्त्यासंभाव्यतथाविधयुद्धविधानाद् मन्यन्ते शिवस्य गणा इव अवतीर्णाः स्वर्गलोकाद् आयाताः॥

सन्नामिआ। आदरिअ। "आदृगेः सन्नामः" [८३.]॥

सारन्ते। पहरिउं। "प्रहृगेः सारः" [८४.]॥

५३. अशक्नुवत्कृताः असमर्थीकृताः शक्नुवत्सुभटा यैस्ते तथा तैः शक्नुवतामपि मध्ये शक्नुवद्भिस्तैः कुङ्कुणाधिपभटैः दीर्घिकातः

सक्कन्तो, अणथक्किअ-सलहिअ-सर-वरिसणो निवो ताण
मणि-खचिअ-कणय-वेअडिअ-माढिओ पहरिउं लग्गो. ५४
दिन्नम् असोल्लिअ-मंसासणाण अणपउलिअं तओ मंसं
अरि-पयण-पयावेणं तेणं सर-मिल्लिरेण रणे. ५५

अवतीर्य युद्धं कृतम् । समरतूर्यनिर्घोषश्रवणप्रवृद्धोत्साहत्वेन तदैव स्नानाद्यपहाय संग्रामः प्रारब्ध इति भावः ॥

अणओहिअ । ओरसिआ । ओअरिअ । "अवतरेरोह-ओरसौ" [८९.]॥

५४. शक्नुवन् इतरसुभटापेक्षया समर्थः । अफक्कितम् अनीचैर्गतम् । सर्वोत्कृष्टमित्यर्थः । अत एव श्लाघितं शरवर्षणं यस्य स तथा । मणिभिः खचितः कनकेन खचितो माठी यस्य स तथा । मणिस्वर्णनिर्मितसंनाह इत्यर्थः । [नृपः] ताण इति द्वितीयायाः षष्ठी [३.१३४] इति तान् गूर्जरसुभटान् प्रहर्तुं लग्नः ॥

अचयन्तीकय । तरन्त । तीरन्ताण । पारन्तएहिं । सक्कन्तो । "शकेश्चय-तर-तीर-पाराः" [८६.] ॥

अणथक्किअ । " फक्कस्थक्कः " [८७.] ॥

सलहिअ । " श्लाघः सलहः " [८८.] ॥

खचिअ । वेअडिअ । " खचेर्वेअडः " [८९.] ॥

५५. अरीणां पचनो दाहकः प्रतापो यस्य स तथा तेन शरमोक्षणशीलेन रणे तेन नृपेण अपक्वमांसस्य अशनानां भक्षकाणां गृध्रादीनाम् अपक्वं मांसं ततः शरमोक्षणानन्तरं दत्तम् । अनेके सुभटास्तेन व्यापादिताः सन्तो गृध्रादिभक्षा अभूवन्निति भावः ॥

असोल्लिअ । अणपउलिअं । पयण । "पचेः सोल्ल-पउलौ" [९०.] ॥

[1] B सरसतूर्यनिघो°. C ममतूर्यनिर्घो°. [2] B C माढियं°. [3] B C °पउल्लौ. We with A.

उस्सिक्किअ-सङ्केणं, पच्छा अवहेडिउं निअंपि दलं

अणच्छड्डिअ-कुल-धम्मं सीह-ज्झुणी तेण रेअविओ. ५६

णिल्लुञ्छिअ[1]-भय-पसरो, धंसाडिअ-भयम् इभं समारूढो,

मुञ्चन्तो बाणे, णिव्वलीअ[2] सो कोह-दुहिअप्पा. ५७

जूरवणेहि उमच्छन्तेसुं जय-सिरि-अवञ्चिओ समरे,

नाह, अवेहविरेहिं पाईक्केहिं[3] न वेलविओ; ५८

५६. मुक्तशङ्केन अवगणितपरपक्षभयेन तेन नृपेण अमुक्तकुलधर्मम् अत्यक्तक्षत्रियाचारं निजमपि। दलेति देश्यः सैन्ये। तत् पश्चाद् मुक्त्वा। अतिवीर्यात् स्वबलस्य अग्रे भूत्वेत्यर्थः। सिंहध्वनिर्मुक्तः। अयम् अहं युष्माकं कृतान्त इह आगत इति अस्मद्बलस्य निकटीभूय रणे जगर्जेत्यर्थः॥

५७. मुक्तभयप्रसरः मुक्तभयं तथाविधानेकास्त्रपातेपि निर्भीकम् इभं समारूढः क्रोधदुःखितात्मा रोषाग्निसंतप्तगात्रः स नृपः बाणान् मुञ्चन्[1] दुःखम् अमुञ्चत्॥

मिल्लिरेण। उस्सिक्किअ। अवहेडिउं। अणच्छड्डिअ। रेअविओ। णिल्लुञ्छिअ[2]। धंसाडिअ। मुञ्चन्तो। "मुचेश्छड्डावहेड-मेल्लोस्सिक्क-रेअव-णिल्लुञ्छ-धंसाडाः" [९१.]॥ णिव्वलीअ[3]। "दुःखे णिव्वलः[4]" [९२.]॥

५८. त्रिभिर्विशेषकम्। हे नाथ कुमारपाल नृप कुङ्कुणाधीशः रचितव्यूहे विहितरचनाविशेषे गूर्जरसैन्ये प्रदेशम्[5] अरचयत्। प्रतिभटपरासनेन आत्मसैन्यस्य अवकाशं चकारेत्यर्थः। तथा निजां यशोलक्ष्मीं समारचयत्। कीदृशः। वञ्चयत्सु विप्रतारकेषु वञ्चकैः। अतिच्छलयुद्धकुशलैरित्यर्थः। तैः सह समरे सति जयश्रिया अव-

---

१ B निल्लुंठिअ. C निल्लुंछिअ. २ C णिव्व°. ३ C पायक्के°.

---

[1] C adds सन्. [2] B निल्लुंडिअ. C निल्लुंछिअ. [3] B C णिव्वलीय. [4] B C णिव्वलः. [5] So B C, and not प्रवेशम्.

उग्गहिअ-जय-पइण्णो, अवहिअ-वूहम्मि गुज्जर-दलम्मि
विडविड्डीअ पएसं तक्कालं रइअ-रोमञ्चो; ५९

सारविए रण-छेत्ते[1] उवहत्थिअ-आउहेहिँ जुज्झन्तो
केलाइआउहो सो निअं समारीअ जस-लच्छिं. ६०

पहु-कज्ज-समारंचणेण[2] सिञ्चिओ तुह बलेण बाणेहिं
सीभर-सिम्पिअ-वसुहो मय-सेअणओ इभो तस्स. ६१

ञ्चितः। अवञ्चयितृभिः अवञ्चनाशीलैः पदातिभिः न वञ्चितः न विप्रलब्धः। छलयुद्धे प्रकटयुद्धे च अस्यैव जयोभूदित्यर्थः॥

५९. रचितजयप्रतिज्ञः कृतपरबलभङ्गाङ्गीकारः। तत्कालं युद्धावसरे रचितरोमाञ्चः विहितपुलकः

६०. रणक्षेत्रे समारचिते काष्ठकण्टकपाषाणाद्यपनयनेन समीकृते[1] समारचितायुधैः उत्तेजिताश्वैः सह समारचितायुधो युध्यमानः संप्रहरन्॥

जूरवणेहि। उमच्छन्तेसुं। अवञ्चिओ। अवेहविरेहिं। वेलविओ। "वञ्चेर्वेहव-वेलव-जूरवोमच्छाः" [९३.]॥

उग्गहिअ। अवहिअ। विडविड्डीअ। रइअ। "रचेरुग्गहावह-विडविड्डाः"[९४.]॥

६१. हे महाराज प्रभुकार्यसमारचनेन स्वामिकार्यविधायकेन तव बलेन बाणैः कृत्वा तस्य कुङ्कणाधीशस्य शीकरैर्नासाप्रमुक्तपृषत्कैः सिक्ता वसुधा येन स तथा मदेन सप्रस्थानक्षरन्मदजलेन सेचकः भूतलस्य उक्षकः इभः सिक्तः। प्रोत इति भावः॥

सारविए। उवहत्थिअ। केलाइअ। समारीअ। समारंचणेण[2]। "समारचेरुवहत्थ-सारव-समार-केलायाः" [९५.]॥

सिञ्चिओ। सिम्पिअ। सेअणओ। "सिचेः सिञ्च-सिम्पौ" [९६.]॥

---

१ C °छन्ते. We with B. २ B C समाचरणेण.

---

1 B adds सति. 2 B C समाचरणेण.

पडिसुहडे पुच्छन्ता, गज्जन्ता ढिक्कमाण-वसहव्व,
अह बुक्किआ[1] तुह भडा कुङ्कुण-देसाहिवं दट्ठुं. ६२
अग्घिअ-वम्मा, छज्जिअ-सिरक्कया,[2] मण्डलग्ग-सहिअ-करा,
रेहिअ-सेन्ना, रीरिअ-रणङ्गणा, राइआ ते अ. ६३
आउड्डिअ-रह-चक्कं, खुप्पन्त-हयं, णिउड्डमाणेभं,
बुड्डन्त-भडं, करि-रुहिर-मज्जणे ताण आसि रणं. ६४

६२. गर्जद्वृषभा इव सदर्पनिनदद्वृवेन्द्रा यथा गर्जन्तो निनादं कुर्वाणाः सन्तः प्रतिसुभटान् पृच्छन्तः अथ हस्तिनि शरवर्षानन्तरं तव भटाः कुङ्कुणदेशाधिपं दृष्ट्वा अयमसाविहास्त इति विज्ञाय गर्जिताः हतोयं जितमस्माभिरित्यादि सदर्पं निनदिताः ॥

पुच्छन्ता । "प्रच्छः पुच्छः" [१७.] ॥

गज्जन्ता । बुक्किआ । "गर्जेर्बुक्कः" [१८.] ॥

ढिक्कमाण । "वृषे[2] ढिक्कः" [१९.] ॥

६३. राजितवर्माणः प्रदीप्रसंनाहा राजितशिरस्काः शोभितशिरस्त्राणा मण्डलाग्रराजितकराः खड्गविभ्राजितहस्ता राजितं सैन्यं यैस्ते तथा राजितरणाङ्गणास्ते तव भटा राजिताश्च ॥

अग्घिअ । छज्जिअ । सहिअ । रेहिअ । रीरिअ । राइआ । "राजेरग्घ-छज्ज-सह-रीर-रेहाः" [१००.] ॥

६४. मज्ज्यते अस्मिन् इति मज्जनं करिरुधिरं च तद् मज्जनं च[3] तस्मिन् । यावति करिरुधिरे मज्ज्यते तावतीत्यर्थः । करिणां रुधिराणि तेषु मज्जने बुडने सति वा। मग्नरथचक्रं बुडितरथपादं मज्जद्धयं मज्जदिभं मज्जद्भटं रणं तेषां गूर्जरकुङ्कुणभटानाम् आसीत् जातम् ॥

१ C चुक्किआ. २ C सरिक्क°.

1 C चुक्किआ. 2 So B C and A too, though the vritti appears to consider वृषेः as the reading. 3 B om. तद् मज्जनं च.

आरोलिअ-सर-माला-वमालणो मल्लिअज्जुणो राया
पुञ्जिअ-पहु-लज्जिर-गुज्जरेहि जीहाविओ तेहि. ६५
ओसुक्कन्तो तेअण-गिराहि सो खत्त-धम्म-लुहण-भडे
उग्घुसिअ-सेल्ल-रोसाणिआसिणो केवि सिक्खविही. ६६
लुञ्छन्ता घम्म-जलं कज्जल-पुञ्छिअ-मुहव्व तेण भडा
पर-तेअ-पुंसणेणं फुसिअ-जसा हक्किआ केवि. ६७

आउड्डिअ । खुप्पन्त । णिउड्डमाण[1] । बुड्डन्त । मज्जणे । "मस्जेराउड्ड-णिउड्ड[2]-बुड्ड-खुप्पाः" [१०१.] ॥

६५. पुञ्जिता राशीकृता याः शरमालास्तासां पुञ्जको विस्तारकः मल्लिकार्जुनो राजा पुञ्जिता भयवशात्[3] पिण्डीभूता अत एव प्रभोः स्वस्वामिनो लज्जितारः कथं वयम् एवंविधा मुखं दर्शयिष्याम इति लज्जनशीला ये गूर्जरास्तैः लज्जितः कथम् एतैर्भृत्यमात्रैर्युध्ये इति लज्जमानः तैस्तथाभूतैर्लज्जितो लज्जां प्रापितः ॥

आरोलिअ । वमालणो । पुञ्जिअ[4] । "पुञ्जेरारोल-वमालौ" [१०२.] ॥

लज्जिर । जीहाविओ । "लस्जेर्जीहः" [१०३.] ॥

६६. तेजन्यः अमर्षजनिका या गिरः उक्तयस्ताभिः रे रे क्षत्रिया मा पलायध्वम् इत्यादिवाग्भिः । संस्कृते सनम् अन्तरेण गुप्तिजादीनाम् अप्रयोग इति ओसुक्कन्तो इत्यस्य धात्वन्तरेण अर्थः कथ्यते । दीपयन् । यन्मते सनम् अन्तरेणापि प्रयोगस्तन्मते तेजमान इत्यपि भवति । स मल्लिकार्जुननृपो मृष्टाः उत्तेजिताः । सेल्लेति देश्यः । कुन्ता यैस्ते तथा । ते च मृष्टासयश्च ते तथा तान् क्षत्रधर्ममार्जनभटान् क्षत्रियाचारनिर्मलीकारकसुभटान् कानपि अशिक्षयत् शस्त्रैरताडयत् ॥

ओसुक्कन्तो । तेअण । "तिजेरोसुक्कः" [१०४.] ॥

६७. घर्मजलं स्वेदोदबिन्दून् मृजन्तः वस्त्रादिना उत्पुंसयन्तः ।

[1] So B C. See next note. [2] B C om. °णिउड्ड° though they give the example णिउड्डमाण. A gives it. [3] B C भटावशात्. [4] B om. पुञ्जिअ.

पहु-नामापुसंणो[१] धम्माहुलणो वेरि-नाम-मज्जणओ
तं मूरीअ गइन्दं गुज्जर-लोओ अवेमइओ. ६८
सूडिअ-सुहडो, सूरिअ-तुरंगमो, विरिअ-बाण-पसरो य,
मुसुमूरिअ[२]-सिरताणो, करञ्जिओ कुङ्कुणाहिवई. ६९
पविरञ्जिआतवत्तो, नीरञ्जिअ-विजय-वेजयन्तीओ
सो लूण-सीस-कमलो कओ तुहाभञ्जिअ-भडेहिं. ७०

जेष्यत्यधुनास्मान् असाविति विच्छायवदनत्वाद् उत्प्रेक्ष्यन्ते । कज्जलमृष्टमुखा इव अञ्जनलिप्तानना इव । मृष्टयशसः अपासितकीर्तयो भटाः परतेजोमार्जनेन शत्रुप्रतापविध्वंसकेन तेन मल्लिकार्जुननृपेण निषिद्धाः अग्रतो विचरन्तः सिंहनादेन निरस्ताः ॥

६८. प्रभुनाम्नः अमार्जनः तादृश्यपि संग्रामे संमुखीनत्वाद् अनुत्पुंसकः । प्रकटीकारक इत्यर्थः । धर्ममार्जनः क्षत्रधर्मानपासकः । वैरिनाममार्जकः वैरिविनाशेन तन्नाम्नोपि ध्वंसकः । अभग्नो गूर्जरलोकः अस्मद्बलवीरजनः तं प्राग्व्यावर्णितस्वरूपं गजेन्द्रं मल्लिकार्जुननृपहस्तिनम् अभाङ्क्षीत् शस्त्रैरभैत्सीत् ॥

लुहण । उग्घुसिअ । रोसाणिअ । लुञ्छन्ता । पुञ्छिअ । पुंसणेणं । फुसिअ । अपुसणो । अहुलणो । मज्जणओ । "मृजेरुग्घुस-लुञ्छ-पुञ्छ-पुंस-फुस-पुस-लुह-हुल-रोसाणाः" [१०५.] ॥

६९. भग्नसुभटः रणाङ्गणनष्टपदातिवर्गो भग्नतुरंगः ध्वस्तहयो भग्नबाणप्रसरः खण्डितशरप्रपञ्चो भग्नशिरस्त्राणः लूनशिरस्कश्च कुङ्कुणाधिपतिर्भग्नः शस्त्रैर्भिन्नः ॥

७०. भग्नातपत्रः छिन्नच्छत्रो भग्नविजयवैजयन्तीकः छिन्नविजयसुवार्तो[1]र्ध्वीकृतपताकः स मल्लिकार्जुननृपः लूनशीर्षकमलः तव

१ B C °पुसुणो though they have °पुसणो in the commentary. २ B मुसमू°. We with C.

1 B °सूचार्थो°. C °सूवार्तो°.

नय-पडिअग्गिर, अणुवच्चिओ[3] सि दाहिण-दिसाइ तुमम् इण्हि
विढविअ-कुङ्कुण-सत्तङ्ग-संपओ, अज्जिअ-जसोह ! ७१

पहु, सिरि-नयर-सिरीए जुज्जसि, जुप्पसि तिलङ्ग-लच्छीए,
जुञ्जसि कञ्चि-सिरीए, भुञ्जन्तो दाहिणिं इण्हि. ७२

सिन्धु-वई तुह चमढण-वेलिल्लो, तुमइ दिन्न-चङ्कणओ,
न जिमइ दिवसे, जेमइ निसाइ, पच्छिम-दिसाइ तह. ७३

अभग्नभटैः महासंग्रामविमर्देपि अपराङ्मुखैर्वीरैः कृतः विहितः । व्यापादित इत्यर्थः ॥

मूरीअ । अवेमइओ । सूडिअ । सूरिअ । विरिअ । मुसुमूरिअ[1] । करञ्जिओ । पविरञ्जिअ । नीरञ्जिअ । अभञ्जिअ । "भञ्जेर्वेमय-मुसुमूर-मूर-सूर-सूड-विर-पविरञ्ज-करञ्ज-नीरञ्जाः" [१०६.] ॥

७१. हे नयानुव्रजित[2] नीत्यनुगमनशील अर्जिता आत्मसात्कृता कुङ्कुणानां सप्ताङ्गसंपत् स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलरूपलक्ष्मी- र्येन स तथा । अत एव अर्जितयशओघ, असि त्वं दक्षिणदिशा अनुव्रजितः अनुगतः । दक्षिणदिक्स्वामी संवृत्त इत्यर्थः ॥

पडिअग्गिर । अणुवच्चिओ[3] । "अनुव्रजेः पडिअग्गः" [१०७.] ॥

विढविअ । अज्जिअ । "अजेर्विढवः" [१०८.] ॥

७२. हे प्रभो कुमारपालनृप दक्षिणाम् अवाचीं दिशम् इदानीं भुञ्जानः उपभोगयन् श्रीनगरश्रिया युनक्षि युक्तो वर्तसे । तिलङ्गल- क्ष्म्या युनक्षि । काञ्चीश्रिया च युनक्षि । दक्षिणदिग्विजयात् तद- न्तर्वर्तिदेशस्वामित्वम् आप्तोसीति भावः ॥

जुज्जसि । जुप्पसि । जुञ्जसि । "युजो जुञ्ज-जुज्ज-जुप्पाः" [१०९.] ॥

७३. तथा तव भोजनस्य वेला विद्यते यस्य स भोजनवेलावान् ।

१ B °वज्जिओ. We with C.

[1] So B C. A has मुसमू°. [2] So B C and not °व्रजितः, though B once read °व्रजित । =°व्रजितः? [3] B om. the example. C °वच्चिओ which we follow. The author of the *Dhuṇḍhikā* also has °वच्चइ, not °वज्जइ.

तम्बोलं न समाणइ, कम्मण-कालेवि नण्हए जवणो,
विसए अ नोवभुञ्जइ भएण तुह, वसुह-कम्मवण ! ७४
मणि-गढिअ-कणय-घडिआहरणे उव्वेसरो[1] वर-तुरङ्गे
संगलिअ लक्ख-सङ्खे पेसइ तुह रिउ-असंघडिओ. ७५
हरिस-मुरिआणणो सो, महि-मण्डण, कासि-रीडणो राया
टिविडिक्कइ तुह वारं हय-चिञ्चिअ[2]-हत्थि-चिञ्चइअं. ७६

भवतो वेलाधर इत्यर्थः। त्वया दत्तभोजनः जीवत्वसौ वराक इत्यनुकम्पया वितीर्णग्रासमात्रजनक[1]देशः पश्चिमदिशः सिन्धुपतिः प्रतीचीदिक्संबन्धिस्वामी दिवसे न भुङ्क्ते[2] निशायां भुङ्क्ते । स्वाम्य[3]-साक्षात्कारे[4] वेलाधरा रात्रौ[2] भुञ्जत इति स्थितिः ॥

७४. हे वसुधोपभोजक पृथ्वीपालक तव भयेन हेतुना जवनः जवन[5]देशाधीशः ताम्बूलं न भुङ्क्ते। भोजनकालेपि न भुङ्क्ते। विषयांश्च शब्दादीन् देशान् वा नोपभुङ्क्ते। सर्वं ताम्बूलास्वादनादि मुक्त्वा केवलं[6] त्वदाराधनोपायान् अधीत इत्यर्थः ॥

भुञ्जन्तो । चमढण । चड्डणओ । जिमइ । जेमइ । समाणइ । कम्मण । अण्हए । "भुजो भुञ्ज-जिम-जेम-कम्माण्ह-समाण-चमढ-चड्डाः" [११०.] ॥

उवभुञ्जइ । कम्मवण । "वोपेन कम्मवः" [१११.] ॥

७५. रिपुभिः असंघटितः भवद्विपक्ष[7]पृथग्भूतः सन् उव्वेश्वरः[8] मणिघटित[9]कनकघटिताभरणानि संघट्य मेलयित्वा लक्षसंख्यान् । प्रभूतान् इत्यर्थः। वरतुरंगमांश्च तव प्रेषयति भवन्निमित्तम् उपढौकयति॥

गढिअ । घडिअ । "घटेर्गढः" [११२.] ॥

संगलिअ । असंघडिओ । "समो गलः" [११३.] ॥

७६. हे महीमण्डन धरित्रीभूषक हर्षेण प्रसन्नो मयि महाराज

१ C उव्वेसरो. We with B. २ C °वि°.

[1] B om. °क°. [2] B om. from भुङ्क्ते up to रात्रौ both inclusive. [3] BC साम्य°. [4] C °त्कारे वेला°. [5] So BC. [6] BC केवलत्व°. [7] C °विपक्षे. [8] C उव्वेश्वरः. We with B. [9] B °घट्टित.° We with C.

चिञ्चिल्लिओ अखुट्टिअ-भत्तीइ तुमम्मि मगह-देस-निवो
उक्खुडिअ-पुव्व-गव्वो अतुट्टिअं पाहुडं देइ. ७७

अखुडिअ-गमणम्, अतोडिअ-मदम्, अतुडिअ-लक्खणं महेभ-कुलं
अणिलुक्कन्त-सिणेहो गउडो पेसीअ तुज्झ कए. ७८

लुक्किअ-जसम् उल्लूरिअ-पयावम् उल्लुकिअ-मेइणिं काही
घोलन्ती तुह सेणा भय-घुलिअं कन्नउज्जेसं. ७९

इति प्रमोदेन स्फुटिताननः विकसितमुखः काशेर्मण्डनः शोभाजनकः । वाराणसीस्वामीत्यर्थः । स सर्वप्रसिद्धः तव हयैर्मण्डितं शोभितं तत्तथा तच्च तद्धस्तिमण्डितं च तत्तथाभूतं द्वारं मण्डयति । मध्यम् आविशन् प्रत्यहं दौवारिकेण निषिद्धः प्रायः सिंहद्वारमेव अलंकरोतीत्यर्थः ॥

मुरिअ । " हासेन स्फुटेर्मुरः " [११४.] ॥

७७. त्वयि अतुडितभक्त्या अखण्डितबहुमानेन मण्डितो भूषितः तुडितपूर्वगर्वः गलितप्राच्याभिमानो मगधदेशनृपः अतुडितं निरन्तरं प्राभृतं रत्नादिढौकनं ददाति तुभ्यं प्रयच्छति ॥

मण्डण । रीडणो । टिविडिकइ । चिञ्चिअ । चिञ्चइअं । चिञ्चिल्लिओ । " मण्डेश्चिञ्च-चिञ्चअ-चिञ्चिल्ल-रीड-टिविडिक्काः " [११५.] ॥

७८. अतुडितस्नेहः अनपगतप्रीतिः गौडः गौडदेशाधिपतिस्तव कृते अतुडितगमनम् अखण्डितपादन्यासम् अतुडितमदं निरन्तराविनिवृत्तदानप्रवाहम् अतुडितलक्षणं संपूर्णलक्षणोपेतं महेभकुलं प्रैषीत् प्राहिणोत् ॥

७९. हे नृप तव सेना घूर्णमाना चलन्ती सती तुडितयशसं विगलितकीर्तिं तुडितप्रतापं गततेजसं तुडितमेदिनीकं भग्नावनिम् ।

तुज्झ पहल्लिर-सिविरे, घुम्माविअ-ढंसमाण-कुम्मम्मि,
दिट्ठेवि, दसण्ण-वई विवट्टमाणो भए मरही. ८०

अणकढिअ-दुद्ध-सुइ-जस, पयाव-घम्मट्टिआरि-जस-कुसुम,
तुह गण्ठिअ-वूहेणं विरोलिओ तस्स पुर-जलही. ८१

बाहुलकाद् अत्र कप्रत्ययाभावः। भयघूर्णितं साध्वसचकितं कन्यकुब्जेशम् अकार्षीत् ॥

अखुड्डिअ। उक्खुडिअ। अतुट्टिअं। अखुडिअ। अतोडिअ। अतुडिअ। अणिलुकन्त। लुक्किअ। उल्लूरिअ। उलुकिअ। "तुडेस्तोड-तुट्ट-खुट्ट-खुडोक्खुडोल्लुक-णिलुक्क-लुक्कोल्लूराः" [११६.] ॥

८०. हे भूपते तव घूर्णितश्चलितो विवर्तमानः धराधस्तिष्ठन् कूर्मो येन स तथा तस्मिन् घूर्णयितृ विचरणशीलं यच्छिबिरं स्कन्धावारस्तस्मिन् दृष्टेपि। आस्तां युध्यमाने। दशार्णपतिः भये विवर्तमानः सन् अम्रियत प्राणान् अमुचत् ॥

घोलन्ती। घुलिअं। पहल्लिर। घुम्माविअ। "घूर्णो घुल-घोल-घुम्म-पहल्लाः" [११७.] ॥

ढंसमाण। विवट्टमाणो। "विवृतेर्ढंसः" [११८.] ॥

८१. हे अक्कथितदुग्धशुचियशः अभ्यनावर्तितक्षीरनिर्मलकीर्ते प्रतापघर्मक्कथितारियशःकुसुम तेजस्तापग्लापितरिपुकीर्तिपुष्प तव ग्रथितव्यूहेन दृब्धेन सेनानिवेशेन कर्त्रा तस्य दशार्णपतेः पुरमेव अतिविस्तीर्णत्वात् जलधिः मथितः रत्नाश्वगजादिलिप्सया विलोडितः। तन्नगरं विलुण्टितम् इत्यर्थः ॥

अणकढिअ। अट्टिअ। "क्वथेरट्टः" [११९.] ॥

गण्ठिअ। "ग्रन्थो गण्ठः" [१२०.] ॥

मन्थिअ-दहिणो तुप्पंव घुसलिआ तस्स नयरओ कणयं
गिण्हन्तेहिं तुह सेणिएहि अवअच्छिआ अम्हे. ८२
तस्स चमूवा समरे णुमज्जिआ तुह भडेहि णिव्वरिआ
णिज्झोडणेहि णिल्लूरणावि अणल्लूरिअ-पयावा. ८३
छिन्दिअ-छत्त-दुहाविअ-सिरक्क-णिच्छल्लिउत्तमङ्गाण
उद्दालिआ दसण्णाण सिरी चालुक्क-सुहडेहिं. ८४

८२. हे धराधीश मथितदध्नः तुप्प इति देश्यत्वाद् नवनीतं तदिव तस्य दशार्णपतेः मथिताद् नगरात् कनकं तव सैनिकैस्तैः प्रसिद्धैर्गृह्णद्भिः आददानैर्वयं ह्लादिता हर्षिताः ॥

विरोलिओ। मन्थिअ। घुसलिआ। "मन्थेर्घुसल-विरोलौ" [१२१.]॥
अवअच्छिआ। "ह्लादेरवअच्छः" [१२२.]॥

८३. हे महाराज तस्य दशार्णपतेः छेदनशीलैः प्रतिभटानां विदारकाः अत एव अच्छिन्नप्रतापा अखण्डिततेजसोपि चमूपाः सैनिकास्तव छेदनैर्विदारकैर्भटैश्छिन्नाः सन्तः समरे निषण्णाः स्थिताः। मृता इत्यर्थः। ये छेदना अच्छिन्नप्रतापाश्च ते कथं छिन्ना इति विरोधाभासः अपिशब्दार्थः॥

णुमज्जिआ। "नेः सदो मज्जः" [१२३.]॥

८४. छिन्नानि विदारितानि च्छत्राणि येषां ते च छिन्नाः शिरस्का येषां ते च छिन्नानि उत्तमाङ्गानि येषां ते च तथा। तेषां दशार्णानां दशार्णदेशक्षत्रियाणां श्रीः सप्ताङ्गसंपत् चौलुक्यसुभटैः आच्छिन्ना गृहीता॥

णिव्वरिआ। णिज्झोडणेहि। णिल्लूरणा। अणल्लूरिअ। छिन्दिअ। दुहाविअ। णिच्छल्लिअ। "छिदेर्दुहाव-णिच्छल्ल-णिज्झोड-णिव्वर-णिल्लूर-ल्लूराः" [१२४.]॥

१ C सिण्णएहिं. २ B णिच्छो°. C णिछो°. ३ B C छिंदअ°. ४ B C °सिरि°.

1 B C घुसलिअं. 2 B C अवअच्छइ.

ति-हुअण-जस-ओअन्दण-रिउ-आच्छेदण-चमूइ पहु तुज्झ
मलिऊण दलं तिउरीसरस्स परिहट्टिओ माणो. ८५
चड्डिअ-नक्का मड्डिअ-महा-तडा खड्डिआखिलारामा
पन्नाडिअॅ-द्रह-पङ्का तुज्झ चमूए कया रेवा. ८६
पय-मढिअ-पंसु-मसिणे चुलुचुलॅमाणाणिलेण कय-फन्दे
रेवा-तड-लय-गहणे निव्वलिओ तुह बल-निवेसो. ८७

८५. हे प्रभो तव । त्रिभुवनयशस आच्छेदना शत्रुभ्यो हठाद्ग्राहिका अत एव रिपूणाम् आच्छेदना ध्वंसिका या चमूः सेना तया त्रिपुरीश्वरस्य चेदिनगरीशस्य बलं सैन्यं मृदित्वा मानो मृदितः भग्नः ॥

उद्दालिआ । ओअन्दण । आच्छेदण । "आङा ओअन्दोद्दालौ" [१२५.] ॥

८६. मृदितनक्रा पिष्टजलचरजीवविशेषा मृदितमहातटा विदारितबृहत्कूला मृदिताखिलारामा भग्नानेकोद्याना मृदितह्रदपङ्का विलोडितान्तस्थितनदकर्दमा रेवा नर्मदा तव चम्वा कृता ॥

८७. पादाभ्यां मृदितो यः पांसुस्तद्वद् मसृणे कोमले स्पन्दमानानिलेन किंचिद्बृहद्वातेन कृत्वा कृतस्पन्दे विहितमनाक्कम्पे रेवातटलतागहने तव बलनिवेशः स्कन्धावारो निष्पन्नः संजातः ॥

मलिऊण । परिहट्टिओ । चड्डिअ । मड्डिअ । खड्डिअ । पन्नाडिअ । मढिअ । "मृदो मल-मढ-परिहट्ट-खड्ड-चड्ड-मड्ड-पन्नाडाः" [१२६.] ॥

चुलुचुलॅमाण । फन्दे । "स्पन्देश्चुलुचुलः" [१२७.] ॥

१ B C चुलचुल°.

1 C °वारोप. 2 B खडिअ. 3 B चुल्चुल°. C चुलुचलु°.

नीपाइअ-जयं-कज्जं अविअट्टिअ-विक्कमं बलं तुज्झ
अविलोट्टिअ-जय-महुराहिवस्स फंसावेही विजयं. ८८
अविसंवाइ-परिक्खा तणु-पक्खोडण-झडन्त-पंसु-कणा
णीहरिअ-नक्क-चक्कं तुह तुरया जँउर्णम् उत्तिन्ना. ८९
रिउ-अक्कन्दावणयं अखिज्जमाॅणं-हयम् अजूरिएभकुलं
अविसूरन्त-चमूवं पत्तं महुराइ तुह सेन्नं. ९०

८८. निष्पादितजयकार्यं प्रसाधितप्रत्यर्थिभङ्गप्रयोजनम्। अविसंवदितः समरसंमर्देपि निर्व्यूढो विक्रमः शौर्यं यस्य तत् तथा [तव] बलम्। अविसंवदितः अतिपराक्रमित्वाद् निश्चितो जयो यस्य स तथा। स चासौ मथुराधिपश्च तस्य विजयं विसमवादयत्। तत्सैन्यं तं जिगायेत्यर्थः॥

निव्वलिओ। नीपाइअ। "निरः पदेर्वलः" [१२८.]॥

८९. हे नृप तव अविसंवादिनी अविघटनशीला परीक्षा एते शस्त्रैर्भिन्ना अपि सुभटान् रणाङ्गणे न पातयन्तीति विचारो येषां ते तथा। तनुशदनेन वपुर्धूननेन शीयमानाः पतन्तः पांसुकणा येभ्यस्ते तथा तुरगाः। आक्रन्दितम् उपरिष्टात् तुरगगमनेन सकरुणं शब्दितं नक्राणां चक्रं समूहो यस्यां सा तथा तां यमुनां कालिन्दीम् उत्तीर्णाः परं पारं प्राप्ताः॥

अविअट्टिअ। अविलोट्टिअ। फंसावेही। अविसंवाइ। "विसंवदेर्विअट्ट-विलोट्ट-फंसाः" [१२९.]॥

पक्खोडण। झडन्त। "शदो झड-पक्खोडौ" [१३०.]॥

९०. हे क्षोणीपते तव रिपूणाम् आक्रन्दनकम् आक्रन्दविधाय-

---

१ B °जइ°. २ B C फंसाविहीं. ३ B C नी°. ४ B C जउण°. ५ B अखिज्जमाहयमजूरि°. C अखिज्जमणेहयमजूरि° It would be admissible to read अखिज्जमाणहयजूरि° (= अखिज्जमाणहय + अजूरि°.)

1 C निव्यूढो. 2 B मधुरा°. 3 B C फंसाविही.

उत्थङ्घिअ-वारेहिं रुन्धिअ-मग्गेहि हक्कमाणेहिं

कुज्झन्तेहिं तुह सेणिएहिं जूराविआ रिउणो. ९१

तुह जायन्त-पवेसे सिन्ने, जम्मन्त-परिहवो तत्तो,

तडिअ-भओ महुरेसो न तङ्कवीआजि-संरम्भं. ९२

ताड्डिअ-कणय-चएणं विरल्लिअं थिप्पिऊण तुह सेन्नं

महुरेसो तणिअ-दिही रक्खीअ निअं पुरिं महुरं. ९३

कम् अखिद्यमानहयम् अखिन्नेभकुलम् अखिद्यमानचमूपं सैन्यं मथुरायां प्राप्तम्। सुखसुखेन तत् तस्यां गतम् इत्यर्थः॥

णीहरिअ। अक्कन्दावणयं। "आक्रन्देर्णीहरः"[1] [१३१.]॥

अखिज्जमाणं[2]। अज़ूरिए। अविसूरन्त। "खिदेर्जूर-विसूरौ" [१३२.]॥

९१. हे नरेन्द्र तव रुद्धद्वारैः वेष्टितप्रतोल्यादिनगरमुखैः अत एव रुद्धमार्गैः निषिद्धवर्त्मभिः। निवारितलोकप्रचारैरित्यर्थः। निषेधद्भिः प्रतिभटान् निवारयद्भिः क्रुध्यद्भिः सकोपैः सैनिकैः रिपवः क्रोधिताः क्रोधं प्रापिताः॥

उत्थङ्घिअ। रुन्धिअ। "रुधेरुत्थङ्घः" [१३३.]॥

हक्कमाणेहिं। "निषेधेर्हक्कः" [१३४.]॥

कुज्झन्तेहिं। जूराविआ[4]। "क्रुधेर्जूरः" [१३५.]॥

९२. हे महीपाल तव जायमानप्रवेशे सैन्ये सति ततः सैन्यात् जायमानपरिभवः अल्पसैनिकत्वाद् उत्पद्यमानतिरस्कारः। अत एव ततभयः प्रभूतसाध्वसः मथुरेशः[5] आजिसंरम्भं समराटोपं नातनिष्ट न चकार॥

जायन्त। जम्मन्त। "जनो जा-जम्मौ" [१३६.]॥

९३. तर्हि किं चकारेत्याह। हे नरेन्द्र ततकनकचयेन कृत्वा

[1] B आक्रंदेणीहरः. [2] B om. this example. C अखिज्जमाण. [3] So B C and A. [4] B C जूराविअ. [5] B मधु°.

सग्गल्लिअन्त-जस-भर, जङ्गल-वइणोवसप्पिउं दिण्णा
तुह रिउ-झङ्खावण-घण-पयाव-संतप्पिएण गया. ९४

जस-ओअग्गिअ-ति-हुअण, तेण कया भत्ति-वाविअ-मणेण
असमाणिअ-गुण, वइरं समाविउं तुज्झ विन्नत्ती. ९५

तंतं[1] तव सैन्यं तृप्त्वा संतोष्य मथुरेशस्ततप्रभृतिः विहितचित्तसौस्थ्यः सन् निजां पुरीं मथुराम्[2] अरक्षत्॥

तड्डिअ। तड्डवीअ। तड्डिअ। विरल्लिअं। तणिअं। "तनेस्तड-तड्ड-तड्डव-विरल्लाः" [१३७.]॥

थिप्पिऊण। "तृपः स्थिप्पः" [१३८.]॥

९४. हे स्वर्गोपसर्पद्यशोभर त्रिदिवोल्लसत्कीर्तिनिकर उपसर्पितुं त्वाम् आश्रयितुं जङ्गलपतिना सपादलक्षाधिपेन रिपूणां संतापको यो घनप्रतापः प्राज्यं त्वदाज्ञानङ्गीकारेण[3] विरोधकं[4] यत् तेजस्तेन संतप्तेन सता तव गजा दत्ताः॥

अल्लिअन्त। उवसप्पिउं। "उपसर्पेरल्लिअः" [१३९.]॥

झङ्खावण। संतप्पिएण। "संतप्येर्झङ्खः[5]" [१४०.]॥

९५. हे यशोव्याप्तत्रिभुवन असमाप्ताः अनिष्ठिताः। असंख्याता इत्यर्थः। गुणा यस्य स तथा तस्य संबोधनम्। तव वैरं समाप्य त्वदाज्ञाङ्गीकारेण विरोधं निष्ठां नीत्वा वैरं समाप्तुं निष्ठां नेतुं वा भक्तिव्याप्तमनसा तेन जङ्गलपतिना विज्ञप्तिः कृता॥

ओअग्गिअ। वाविअ। "व्यापेरोअग्गः" [१४१.]॥

असमाणिअ। समाविउं[6]। "समापेः समाणः" [१४२.]॥

---

[1] B C तं for तंतं. [2] B मधु°. [3] B C om. °न°. [4] B C विरोधं. [5] So emended from संतपे झंख: of B, and संतपे डंख: of C. A संतापेर्झंखः. See Pischel, foot-note *ad loc.* See also sûtra IV. 150 *infra*. [6] B °उ. C °ओ.

तइ पिल्लिओ तुरुक्को, ढिल्ली-नाहो गलत्थिओ तह य,
अड्डक्खिओ अ कासी, रिउ-घत्तणॅ, छुह महाएसं. ९६
सोल्लिज्जइ जह लुद्धो तह मं णोल्लेसु रिउ-हुलॅण-कज्जे;
कं कं परीसि न तुमं? किणावि खिविआ न तुज्झाणा. ९७
गुलगुञ्छिऊण हत्थं, उत्थङ्घिअ तज्जणिं भणामि इमं,
हक्खुविअं तुमएच्चिअ मह दुग्गं वेरि-उक्खिवण! ९८

९६. एकादशभिर्गाथाभिर्विज्ञप्तिकामेवाह । हे रिपुक्षेपण वैरिनिरासक त्वया तुरुष्को म्लेच्छाधिपतिः क्षिप्तः । तथा ढिल्लीनाथः योगिनीपुरेश्वरश्च क्षिप्तः । काशिः वाराणसीशश्च क्षिप्तः । यः कश्चिद् आत्ममानी नृपः स सर्वस्त्वया तिरस्कृत इत्यर्थः । मम जङ्गलपतेरादेशं क्षिप विसृज । मम निरोपं ददस्वेत्यर्थः ॥

९७. हे क्षोणीपते यथा लुब्धः स्वसेवकः क्षिप्यते सर्वस्मिन् कार्ये नियुज्यते तथा रिपुक्षेपणकार्ये स्वशत्रुतिरस्कारप्रयोजने मां क्षिप नियुङ्क्ष्व । तथा कं कं त्वं न क्षिपसि । अपि तु सर्वमपि शत्रुवर्गं निरस्यसि । अत एव केनापि तवाज्ञा न क्षिप्ता । सर्वोपि त्वन्निरोपपरः संवृत्त इत्यर्थः ॥

पेल्लिओ । गलत्थिओ । अड्डक्खिओ । घत्तण । छुह । सोल्लिज्जइ । णोल्लेसु । हुलण । परीसि । खिविआ । "क्षिपेर्गलत्थाड्डक्ख-सोल्ल-पेल्ल-णोल्ल-छुह-हुल-परी-घत्ताः" [१४३.] ॥

९८. हे वैर्युत्क्षेपण अरातिनिरासक त्वयैव मम दुर्गं कोट्टः उत्क्षिप्तम् उत्पाटितम् । नान्योस्य संमुखमपि निरीक्षितुं क्षम इत्यर्थः । इदम् एतत् हस्तम् उत्क्षिप्य ऊर्ध्वीकृत्य तर्जनीं प्रदेशिन्यङ्गुलीं च उत्क्षिप्य भणामि सकलभूपालमण्डलीप्रत्यक्षं प्रतिपादयामि ॥

१ B डि°. २ B °लुगु°. ३ B गुलु°.

1 So B C.

अल्लत्थिअ-विजय-धजा उब्भुत्तिअ-गुरु-करा तुहं करिणो
उस्सिक्कन्ति गिरिंपि हु, रिउ-णीरव, कं न अक्खिवसि? ९९

कमवसइ जुण्ण-कोलो, लुट्टइ सेसो, सुअन्ति दिक्करिणो,
कुम्मोवि लिसइ, अणवेविरम्मि तइ पहु महीधरणे. १००

आयम्बमाण-हिअया आयज्झन्तीउ विलविरा रण्णे
झङ्खन्त-सिरू तुह रिउ-वहूउ दइए वडवडन्ति. १०१

९९. रिपून् आक्षिपति तिरस्करोति । "कर्मणोऽण्" [हे० ५.१] इत्यणि रिप्वाक्षेपस्तत्संबोधनम् । तव उत्क्षिप्तविजयध्वजाः ऊर्ध्वीकृतविजयवैजयन्तीकाः । उत्क्षिप्तगुरुकराः उल्लालितबृहच्छुण्डादण्डाः करिणः । हु इति संभावयामि । गिरिमपि उत्क्षिपन्ति उत्पाटयन्ति । अतस्त्वं कं नाक्षिपसि । यस्य तव एवंविधा दन्तिनः स त्वं सर्वमपि विजयस इत्यर्थः ॥

गुलगुञ्छिऊण । उत्थङ्घिअ । हक्खुत्तिअं । उक्खिवण । अल्लत्थिअ । उब्भुत्तिअ । उस्सिक्कन्ति । "उत्क्षिपेर्गुलगुञ्छोत्थङ्घाल्लत्थोब्भुत्तोस्सिक्क-हक्खुवाः" [१४४.] ॥

णीरव । अक्खिवसि । "आक्षिपेर्णीरवः" [१४५.] ॥

१००. हे प्रभो अवेपितरि अकम्प्रे निश्चले महीधरणे पृथ्वीप्राग्भारधारके त्वयि सति जीर्णकोलः आद्यवराहः स्वपिति । शेषः फणिपतिः स्वपिति । दिक्करिणो दिग्गजाः स्वपन्ति । कूर्मः कमठः स्वपिति । एतत्कार्यस्य भवता करणाद् एते निश्चिन्ताः संवृत्ता इत्यर्थः ॥

कमवसइ । लोट्टइ । सुअन्ति । लिसइ । "स्वपेः कमवस-लिस-लोट्टाः" [१४६.] ॥

१०१. हे नरेन्द्र तव वेपमानहृदयाः साध्वसवशात् कम्पमान-

---

१ B C अब्भु°. २ B °णीवर. ३ B लसइ. ४ B °म्ब°. ५ B C आयब्भं°.

---

1 B गुलु°. 2 B C अब्भु°.

मयं-लिम्पिअ-वसुहा तुह न णडन्ति गया, विरन्ति न य तुरया;
अणगुप्पन्त-परक्कम, अवहावसु. को तुह दुइज्जो? १०२
सन्दुमइ घरं, सन्धुक्कइ पुरम्, अब्भुत्तए तहोज्जाणं,
तुज्झ पयावग्गि-पलीविआण सव्वंपि तेअविअं. १०३

मानसाः। वेपमानाः कायेपि वेपथुभृतः। विलपिन्यो विलपनशीलाः। विलपच्छिशवो रुदद्बालका रिपुवध्वः अरण्ये दयिते विलपन्ति। हा नाथा युष्मान् विना कथं वयं प्राणान् धरिष्याम इति दयितविषयान् विलापान् कुर्वन्तीत्यर्थः॥

अणवेविरम्मि। आयम्बमाण[1]। आयज्झन्तीउ[2]। "वेपेरायम्बायज्झौ[3]" [१४७.]॥

विलविरा। झङ्खन्त[4]। वडवडन्ति। "विलपेर्झङ्ख-वडवडौ" [१४८.]॥

१०२. हे अगुप्यत्पराक्रम स्थिरशौण्डीर्य[5][6] तव मदलिप्तवसुधाः दानसिक्तभूमयो गजा न गुप्यन्ति प्रधानत्वाद् रणसंमर्देपि न व्याकुलीभवन्ति। तुरगाश्च न गुप्यन्ति अतः कृपस्व। मयि प्रसीदेत्यर्थः। यस्मात् कस्तव द्वितीयः। न कश्चिन् तव प्रतिपक्षभूतोस्तीति भावः॥

लिम्पिअ। "लिपो लिम्पः" [१४९.]॥

णडन्ति। विरन्ति। अणगुप्पन्त। "गुप्येर्विर-णडौ" [१५०.]॥

अवहावसु। "कृपोऽवहो णिः" [१५१.]॥

१०३. हे महीश तव प्रतापाग्निना प्रदीप्तानां प्रज्वलितानां गृहं प्रदीप्यते तथा[7] पुरं प्रदीप्यते तथा उद्यानं प्रदीप्यते। किं बहुना। सर्वमपि प्रदीप्तम्। त्वच्छत्रूणां[8] चन्दनविलेपनचन्द्रिकाद्यपि संतापहेतुः संवृत्तम् इत्यर्थः॥

---

1 B आयम्ब°. 2 C आयब्भतीउ. We with B. 3 B °रायम्बावज्झो. C °रायम्भायब्भो. 4 C डंखंत. 5 C °डेस्व°. 6 B °शोडीर्य. 7 B om. तथा पुरं प्रदीप्यते. 8 C तच्छ°.

जइ संभावसि सग्गे, लुब्भसि अह वा अहिन्द-लोगम्मि,

खउरइ इन्दो, पड्डुहइ वासुगी ता खु अक्खोह. १०४

आरभिअ मए भत्तिं आढविअं पहु तुमम्मि दासत्तं.

आरम्भिअं खु निव्वाहिस्सं; कत्तो उवालम्भो? १०५

पच्चारन्ति न गरुआ झङ्खण-जोग्गोवि मारिसम्मि जणे.

जइ कहवि अभत्तो हं वेलवणिज्जो तुह अहं तो[1]. १०६

सन्दुमइ । सन्धुक्कइ । अब्भुत्तए । पलीविआण । तेअविअं । "प्रदीपेस्तेअव-सन्दुम-सन्धुक्काब्भुत्ताः" [१५२.] ॥

१०४. हे अक्षोभ निःप्रकम्प यदि त्वं स्वर्गे स्वर्गनिमित्तं लुभ्यसि गार्ध्यं करोषि । अथवा अहीन्द्रलोके नागलोकनिमित्तं लुभ्यसि तदा । खु इति संभावयामि । इन्द्रः क्षुभ्यति । वासुकिः शेषः क्षुभ्यति । किमयम् अत्रापि न[1] स्थातुं दास्यतीत्यसावसौ क्षोभं वहतीत्यर्थः ॥

संभावसि । लुब्भसि । "लुभेः संभावः" [१५३.] ॥

खउरइ । पड्डुहइ । अक्खोह । "क्षुभेः खउर-पड्डुहौ" [१५४.] ॥

१०५. हे प्रभो भक्तिं सेवाम् आरभ्य त्वयि दासत्वम् आरब्धम् । ननु आरब्धमपि न[2] निर्वाहयिष्यसीत्याह । आरब्धम् अङ्गीकृतं च दासत्वम् । खु इति निश्चितम् । निर्वाहयिष्यामि । ततः कुत उपालम्भः । न कथमपि एवं मम वचनीयता भविष्यतीति भावः ॥

आरभिअ । आढविअं । आरम्भिअं । "आङो रभे रम्भ-ढवौ" [१५५.] ॥

१०६. किंच हे नराधिप गुरुका युष्मत्सदृशा महीयांसः उपाल॰

---

1 C तो.

---

1 B न । स्था॰. C नः स्था॰. 2 C om. न.

इअ विन्नत्तिं सोउं राया जम्भायन्त-जणम्मि[१] निसीहे

लच्छि-विअम्भिअ-णिसुढिर-सयणे णिव्वाओ लोअण-वीसामे[३].

म्भयोग्येपि निर्भर्त्सनार्हेपि मादृशे जने नोपालभन्ते न विरूपकं प्रतिपादयन्ति। परं यद्यहं तव कथमपि अभक्तः अवज्ञापरस्तदा उपालम्भनीयः शिक्षणीयः[२] ॥

उवालम्भो। पच्चारन्ति। झङ्खुण। वेलवणिज्जो। "उपालम्भेर्झङ्ख-पच्चार-वेलवाः[३]" [१९६.] ॥

१०७. इति पूर्वोक्तप्रकारेण विज्ञप्तिं सांधिविग्रहिकोक्तविज्ञपनं श्रुत्वा निशम्य जृम्भमाणः[४] निद्रातुकामत्वात्[५] जृम्भां गृह्णन् जनो यत्र तस्मिन् निशीथे अर्धरात्रे लक्ष्म्या विजृम्भितं यत्र तत्तथा। महार्घम्[६] इत्यर्थः। तच्च तन्नम्रं च निम्नमध्यं यच्छयनं शय्या तस्मिन् राजा कुमारपालभूपो लोचनयोर्विश्रामे खेदापनोदनिमित्तं विश्रान्तः। सुप्वापेत्यर्थः। पादाकुलकं छन्दः ॥

जम्भायन्त। "अवेर्जृम्भो जम्भा" [१९७.] ॥ अवेरिति किम्। विअम्भिअ।

णिसुढिर। "भाराक्रान्ते नमेर्णिसुढः" [१९८.] ॥

णिव्वाओ। वीसामे। "विश्रमेर्णिव्वा" [१९९.] ॥

इत्याचार्यश्रीहेमचन्द्रविरचितश्रीकुमारपालचरितप्राकृतद्व्याश्रयमहाकाव्यवृत्तौ षष्ठः सर्गः समाप्तः ॥

---

१ C °म्मि. २ C °विअंभणिअ°. ३ B C °वीसामो.

---

[1] B C °र्ह.° [2] B C शिष्य°. [3] B C °वेलवा. [4] C °मानो. [5] C निद्रानुकारित्वात्. [6] C °र्थ°.

ओहाविअ-सयल-बलो, उत्थारिअ-अन्तरङ्ग-रिउ-वग्गो,
त्थुन्दिअ-करणो[1] राया निद्दन्ते चिन्तम् इअ काही. १

अक्कमिआ विसएहिं, टिरिटिल्लिन्ता[2] पुरन्धि-सेवाए,
ही ढुण्ढुल्लन्ति भवे चकम्मविआ कुकम्मेहिं. २

१. अथ प्रबोधकाले परमश्रावकसमुचितां स्त्रीविरक्तव्यासक्तगुणदोषस्त्रीजुगुप्सास्थूलभद्रादिमहर्षिजिनवचनतदुक्तानुष्ठाननिरतप्रशंसापक्षपरामृष्टिस्तवश्रुतदेवताप्रभावव्यावर्णनरूपां चिन्तामेव चतुरशीत्या गाथाभिराह। आक्रान्तानि स्वबलेन पराभूतानि सकलबलानि समस्तप्रत्यर्थिपार्थिवसैन्यानि येन स तथा। आक्रान्तान्तरङ्गरिपुवर्गः विजितमदमानमनोभवसंमदक्रोधलोभरूपान्तरारातिसमूहः। आक्रान्तकरणः वशीकृतेन्द्रियो राजा कुमारपालभूपो निद्रान्ते स्वापविरामे इति वक्ष्यमाणां चिन्ताम् अकार्षीत्॥

२. कथंकथं चिन्ताम् अकरोद् इत्याह। विषयैः शब्दरूपरसगन्धस्पर्शैराक्रान्ताः वशीकृताः पुरंध्रीसेवया सीमन्तिनीसंभोगेन हेतुना भ्राम्यन्तः पर्यटन्तः कुकर्मभिः ज्ञानावरणीयादिभिर्भ्रमिताः भ्रमं प्रापिता जीवाः। हीति खेदे। भवे चातुर्गतिकसंसारे भ्रमन्ति विचरन्ति॥

ओहाविअ। उत्थारिअ। त्थुन्दिअ। अक्कमिआ। "आक्रमेरोहावोत्थारत्थुन्दाः[2]" [१६०.]॥

[1] B C छिंदि°. [2] C °तिल्लिंता.

[1] B C छुंदिअ. [2] B C °च्छंदाः or °त्थंदाः. We with A.

काम-गह-भमडिएहिं भमाडिओ भम्मडेइ को न भवे?
गय-काम-झण्टणो पुण तलअण्टइ[1] सिद्ध-भूमीसु. ३

ढण्ढल्लिअ-भुमयं भुमिअ-धणू, जग-झम्पणो, गुमिअ-आणो,
जं न फुमावइ मयणो अफुसिअ-बुद्धी खु सो धन्नो. ४

ढुमइ[2] पुरे, ढुसइ वणे, परइ थलीसुं, परीइ जल-मज्झे,
अभमिअ-चित्तो इत्थीहि[3] णीइ धन्नो पसम-रज्जं. ५

३. कामग्रहेण भ्रान्तैः भ्रान्तिम् आर्तैर्नीलपटादिदर्शनिकैः कृत्वा भ्रान्तः मोहम् उपगतः को भवे न भ्राम्यति अपि तु तादृशः प्राणी सर्वोपि संसारे सरतीत्यर्थः । गतं कामभ्रमणं मन्मथमोहो यस्य स तथाविधः पुनः सिद्धभूमिषु सिद्धक्षेत्रेषु भ्रमति गच्छति ॥

४. भ्रान्तभ्रु चलितनेत्रोर्ध्वरोमपद्धति यथा भवति एवं भ्रमितं विश्ववशीकरणाय चलितं धनुर्येन स तथा । अत एव जगद्भ्रमणः भुवनभ्रान्तिकारको भ्रमिताज्ञश्च सर्वत्र विलसितशासनो मदनो यं कमपि पुरुषं न भ्रमयति न चालयति सः अभ्रमितबुद्धिः निश्चलमतिः खु निश्चितं धन्यः प्रशस्यः ॥

५. स्त्रीभिरभ्रान्तचित्तः अमूढमनाः सन् पुरे भ्राम्यति वने भ्राम्यति स्थलीषु[1] भ्राम्यति जलमध्ये च भ्राम्यति । शीलप्रभावाद् न क्वापि देवतादिकृतं स्खलितं संपद्यत इत्यर्थः । किं बहुना । सकलानर्थहेतुस्त्रीव्यावृत्तमनस्त्वाद् वनं परमपदं लब्ध्वा धन्यः प्रशमराज्यं गच्छति । निरुपमसुखहेतूपशमैकतानः संपद्यत इति भावः ॥

टिरिटिल्लन्ता । ढुण्ढुल्लन्ति । चक्कम्मविआ । भमडिएहिं । भमाडिओ । भम्मडेइ । झण्टणो । तलअण्टइ । ढण्ढल्लिअ । भुमिअ । झम्पणो । गुमिअ । फुमावइ ।

१ B तण°. C तणअंटइ. २ B दु°. ३ C अच्छीहि.

1 B om. स्थलीषु भ्राम्यति.

सोच्चिअ सोक्खम् अइच्छइ, पसमं उक्कसइ, अक्कसइ सग्गं,[1]
मोक्खंपि[2] हु अणुवज्जइ, अईइ न हु जो जुवइ-सङ्गं. ६

तारुण्णे णिम्महिए, अवज्जसन्तेसु हाणिम् अक्खेसु,
ही पच्चड्डइ वुड्ढोवि न पसमं काम-पच्छन्दी. ७

णीणन्ति मित्त-भज्जं, रम्भन्ति सुअं, वहुंपि पदअन्ति,
णीलुक्कन्ति च गुरु-गेहिणिंपि काम-वस-परिअलिआ. ८

अक्कुसिअ । दुमइ[1] । टुसइ[2] । परइ । परीइ । अभमिअ । "अमेष्टिरिटिल्ल-ढुण्ढुल्ल-ढण्ढल्ल-चक्कम्म[3]-भम्मड-भमड-भमाड-तलअण्ट-झण्ट-झम्प-भुम-गुम-फुम-फुस-ढुम-ढुस-परी-पराः" [१६१.] ॥

६. हु इति निश्चितं यो युवतिसङ्गं न गच्छति । रमणीं न सेवत इत्यर्थः । स एव सौख्यं गच्छति । प्रशमं गच्छति । स्वर्गं गच्छति । किं बहुना । मोक्षं चिदानन्दरूपपरमपदमपि गच्छति ॥

७. तारुण्ये यौवने गते गलिते सति अक्षेषु इन्द्रियेषु च हानिं ह्रासं गच्छत्सु प्राप्नुवत्सु सत्सु । हीति खेदे । वृद्धोपि जराजर्जरित-तनुः पुरुषोपि कामं विषयाभिलाषं गच्छति याति इत्येवंशीलः कामगामी सन् न प्रशमं गच्छति । तादृशोपि कामविह्वलो न परत्र[4] हितम् आचरतीत्यर्थः ॥

८. कामवशगताः मन्मथपारतन्त्र्यप्राप्ता मित्रभार्यां गच्छन्ति । सुतां स्वपुत्रिकां गच्छन्ति । वधूं स्नुषामपि गच्छन्ति । किं बहुना । गुरोः पितृकल्पस्यात्मोपाध्यायस्य गेहिनीं कलत्रमपि गच्छन्ति च । लोकधर्मविरुद्धं तस्यास्तस्याः[5] सीमन्तिन्याः सेवनं कुर्वन्तीत्यर्थः॥

---

१ B C मग्गं. २ B सोक्खं. We with C.

---

1 B दु°. 2 B टुसइ. 3 B °चक्कमभमडतलअंट°, omitting भमड and भमाड. C °चक्कमभम्मडभमाडतलअंट° omitting भमड. We with A. 4 C परहितं for परत्र हितं. 5 B तस्याः for तस्यास्तस्याः.

महिलाण वसे परिअल्लिऊण, वोलन्त-हरिअम् इह पावा
अवसेहन्ति तिरिच्छीओ[1]वि अवहरिउज्जल-विवेआ[2]. ९

जे णिरिणासिअ-मेरा वम्मह-वस-गा समं न णिवहन्ति,
अहिपच्चुइआ[3] नूणं ते मुहिआ कम्म-भूमिम्मि. १०

महिलाण पेम्म-संगयम् आगच्छन्तीण जो न अब्भिडइ
उम्मत्थइ नाण-सिरी तस्सब्भागच्छइ विवेओ. ११

९. महिलानां वशे गत्वा । तत्परतन्त्रीभूयेत्यर्थः । गच्छद्ध्रीकं भ्रश्यल्लज्जं यथा भवति एवं गतोज्ज्वलविवेकाः नष्टविशदकृत्याकृत्यविचाराः । अत एव पापाः कुत्सितकर्माचरणाद् अधमाणः इह जगति तिरश्चीः गोगर्दभ्यादिका अपि । आस्ताम् उभयलोकविरुद्धा मानुषीः । गच्छन्ति कामयन्ते ॥

१०. गतमेराः नष्टमर्यादा मन्मथवशगाः स्त्रीसंभोगपरा ये शमं रागाद्यभावं न गच्छन्ति कर्मभूमौ आर्यक्षेत्रे नूनं निःसंदेहं ते मुधा आर्यक्षेत्रोत्पत्त्येकसाध्यस्य शमस्य असाधनान्निरर्थकम् आगता उत्पन्नाः ॥

णीइ । अइच्छइ । उक्कसइ । अक्कसइ । अणुवज्जइ । अईइ । णिम्महिए[2] । अवज्जसन्तेसु । पच्चड्डइ । पच्छन्दी । णीणन्ति । रम्भन्ति । पदअन्ति । णीलुक्कन्ति । परिअलिआ । परिअल्लिऊण । वोलन्त । अवसेहन्ति । अवहरिउ[3] । णिरिणासिअ । णिवहन्ति । " गमेरई-अइच्छाणुवज्जावज्जसोक्कुसाक्कुस-पच्चड्ड-[4]पच्छन्द-णिम्मह-णी-णीण-णीलुक्क-पदअ-रम्भ-परिअल्ल-वोल-परिअल-णिरिणास-णिवहावसेहावहराः " [१६२.] ॥

११. प्रेम्णा संगतं सप्रेम यथा भवति एवम् आगच्छन्तीनां रन्तुं

---

१ C °ओवि. २ B °विवेय. ३ B °पचुइआ.

---

1 C आर्यो°. 2 B णिस्सहिए. 3 C °ओ. 4 B °वज्जसोक्कुसाक्कस°. C °वज्जसोक्कुसाक्कुस°. A °वज्जसोक्कुसपच्चड° omitting two letters. In the text and the examples both B and C have उक्कसइ and अक्कसइ.

न भवे पच्चागच्छइ अपलोट्टिअ-माणसो जुवइ-सङ्गे
पडिसाय-मणो परिसामिएहि कहिओवसम-मग्गो. १२
सक्कुड्डुण-कुसलाणं उब्भावन्तीण केवि रमणीण
किलिकिंचिअ-मोट्टाइअ-कोट्टमिएहिं न खेड्डन्ति. १३

ढौकमानानां महिलानां यो न संगच्छते न संयुक्तो भवति। महिलासु न रज्यतीत्यर्थः। तस्य ज्ञानश्रीः अभ्यागच्छति संमुखम् आढौकते। विवेकश्च अभ्यागच्छति। सकलसमीहितपदविज्ञानप्रेक्षापूर्वकारितापात्रम् असौ संजायत इत्यर्थः॥

अहिपच्चुइआ। आगच्छन्तीण। "आङा अहिपच्चुअः" [१६३.]॥

संगय। अब्भिडइ। "समा अब्भिडः" [१६४.]॥

उम्मत्थइ। अब्भागच्छइ। "अभ्याङोम्मत्थः" [१६५.]॥

१२. युवतिसङ्गे अप्रत्यागतमानसः प्रतिनिवृत्तचित्तः शान्तमनाः कषायानुपप्लुतस्वान्तः शान्तैः शमयुक्तैश्च कथितोपशममार्गः उपदिष्टप्रशमवर्त्मा न भवे प्रत्यागच्छति। रागद्वेषाद्यनर्थहेतुवामाभिष्वङ्गनिवृत्तत्वाज्जरामरणाविषयपरमपदम् आसादयतीत्यर्थः॥

पच्चागच्छइ। अपलोट्टिअ। "प्रत्याङा पलोट्टः" [१६६.]॥

पडिसाय। परिसामिएहि। उवसम। "शमेः पडिसा-परिसामौ" [१६७.]॥

१३. रमणकुशलानां सुरतक्रीडानिपुणानां रममाणानां भोगिभिः सह क्रीडन्तीनां रमणीनाम् "निर्विशेषं न सामान्यम्" इति रमिः क्रीडामात्रेणयुक्तो विशेषक्रीडने वर्तते। अतो रतरतरतैरिति। कोर्थः। किलिकिंचितमोट्टायितकुट्टमितैः कृत्वा केपि नीरागाः केचन महा-

१ B C किलि°. २ C कोड°. We with B. ३ B C खिड्ड°.

1 B °प्रद°. 2 So B C A. See Pischel. 3 B C किलि°.

रममाणीओ रामा णीसरणिज्जं अवेल्लणिज्जं च

अग्घविअ-वम्महाओ को अग्घाडइ सिणेहेण? १४

मायाइ उद्धुमाया, अहिरेमिअ[1]-तुच्छयाइ अङ्गुमिआ,

चवलत्त-पूरिआओ को तुवरइ दट्ठुम् इत्थीओ? १५

त्मानो न रमन्ते । नानाकामचेष्टाविशिष्टास्ता न सेवन्त इत्यर्थः । तत्र स्मितहसितरुदितभयरोषगर्वदुःखश्रमाभिलाषसंकरः किलकिंचितम् । प्रियकथादौ तद्भावभावनोत्था चेष्टा मोट्टायितम् । अधरादिग्रहाद् दुःखेपि हर्षः कुट्टमितम् । संस्कृतैरेव किलकिंचितादिशब्दैः किलकिंचेत्यादिसिद्धौ रमेरेतदादेशविधानम् अनेकधा शब्दव्युत्पत्तिरिति न्यायप्रदर्शनार्थम् । प्राकृते रमणमात्रेपि च एते प्रयुज्यन्त इति ज्ञापनार्थं वेति ॥

१४. रमयतीति "प्रवचनीयादयः" इति [हि० ५. १] कर्तरि अनीये रमणीयं कमनीयरूपपुरुषम् अरमणीयं जराकुष्ठाद्यभिभूतपुरुषं च रममाणाः सेवमानाः पूर्णमन्मथाः आङ्गिकसात्त्विकविकारकरणविचक्षणत्वाद् अन्यूनमनसिजा रामाः कः स्नेहेन पूरयति । गम्यागम्यविचारविकलासु तासु न कोपि विचक्षणोऽनुरागम् आधत्त इति भावः ॥

सङ्खुड्डुण । उब्भावन्तीण । किलिकिंचिअ[1] । मोट्टाइअ । कोट्टुमिएहिं[2] । खेड्डुन्ति । रममाणीओ । णीसरणिज्जं । अवेल्लणिज्जं । "रमेः सङ्खुड्ड-खेड्डोब्भाव-किलिकिंच[7]-कोट्टुम[8]-मोट्टाय-णीसर-वेल्लाः" [१६८.] ॥

१५. मायया पूर्णभृताः । पूर्णतुच्छतया समग्रागाम्भीर्येण पूर्णाः । चपलत्वपूर्णाः अस्थैर्यव्याप्ताः स्त्रीर्द्रष्टुं कस्त्वरते । न कोपि विद्वान् सस्पृहम् अवलोकितुम् उद्यच्छत इत्यर्थः ॥

---

[1] So B C, and not अहिरे°.

[1] B C किलि°. [2] B C कुट्ट°. [3] C चेति. [4] B C °कुष्टा°. [5] B C °लि°. [6] B कुट्टमि°. C कुडुमि° (which is doubtless miscopied from कुट्टमि°.) [7] B C A किलि°. [8] So we with B C and A.

तूरन्ति, अतूरन्तंपि हु जअडावन्ति, तुरिअ-मयणाओ
अहह हलिद्दी-राया खिरन्त-सेएहिँ अङ्गेहिं. १६

पच्चडमाण-सरीरा[1] झरन्त-खालव्व पज्झरिअ-रमणा
धीरा अणिड्डुअन्तेवि[2] णिच्चलावेइ ही महिला. १७

अग्घविअ । अग्घाडइ । उद्धुमाया । अहिरेमिअ[1] । अङ्गुमिआ । पूरिआओ ।

" पूरेरग्घाडा[2]ग्घवोद्धुमाङ्गुमाहिरे[3]माः " [१६९.] ॥

१६. त्वरितमदनाः उल्लसितमनोभवा हरिद्रावद् रागो यासां तास्तथा । अस्थिरप्रेमानुबन्धाः । अहहेति खेदे । तादृश्योपि कष्टं क्षरत्स्वेदैः सात्त्विकविकारवशात् स्विन्नैरङ्गैः कृत्वा त्वरन्ते स्वयं भोगिसंभोगाय उत्सहन्ते । अत्वरमाणं संभोगानुद्यतं[4] पुमांसं त्वरयन्ति तथाविधविलासकरणेन प्रेरयन्ति ॥

तुवरइ । जअडावन्ति । " त्वरस्तुवर-जअडौ " [१७०.] ॥

तूरन्ति । अतूरन्तं । " त्यादिशत्रोस्तूरः " [१७१.] ॥

तुरिअ । " तुरोऽत्यादौ " [१७२.] ॥

१७. क्षरच्छरीरा निर्गच्छत्स्वेदोदबिन्दुप्रवाहतनुः । क्षरत् वहद् यत् । खालेति देश्यः । अशुचिजलनिर्गमस्थानम् । तदिव क्षरितं रमणं स्मरकूपिका यस्याः सा तथा । महिला अक्षरतः अनार्द्रहृदयानपि धीरान् । हीति खेदे । क्षारयति आर्द्रहृदयान् करोति । सत्त्वाच्चालयतीति यावत् ॥

खिरन्त । पच्चडमाण । झरन्त । पज्झरिअ । अणिड्डुअन्ते । णिच्चलावेइ । " क्षरः खिर-झर-पज्झर-पच्चड-णिच्चल-णिड्डुआः[5] " [१७३.] ॥

१ C पव्वड°. २ B °ड्डु°. C °ड्डु°.

1 So B C and not अहिरे°. 2 C °डोग्घ°. We with B A. 3 Here B C and A read °हि° all right. 4 B C संभोगानुद्यतं. 5 B C °आ.

उच्छल्लिअ[1]-परिफाडिअ-भेगोवम-रमणि-रमण-रमिराण

सत्ती विअलइ, थिप्पइ कन्ती, बुद्धी अ णिडुहइ[2]. १८

तस्स विसट्टउ हिअयं, सयहुत्तं दलउ बुद्धि-कोसल्लं,

जो लिहइ वलिअ-भत्तंव वम्फि-लालं रमणि-अहरं. १९

१८. पूर्वम् उच्छलितः परिवृत्तः पश्चात् परिस्फाटितः । विदारितोदरदेश इत्यर्थः । यो भेको मण्डूकस्तेन उपमा सादृश्यं यस्य तत् तथा । एवंविधं यद् रमणीरमणं तद्रन्तारो रमणशीलास्तेषाम् । तादृशवराङ्गसक्तानाम् इत्यर्थः । शक्तिर्बलं विगलति भ्रश्यति । कान्तिर्विगलति बुद्धिश्च विगलति । उपलक्षणमात्रम् एतत् । अन्यदपि कम्पादि स्त्र्यादिसक्तानां संजायते । यद् उक्तम् ।

कम्पः स्वेदः श्रमो मूर्छा भ्रमिर्ग्लानिर्बलक्षयः ।
राजयक्ष्मादिरोगाश्च भवेयुर्मैथुनोत्थिताः ॥

उच्छल्लिअ[1] । " उच्छल उच्छल्लः[2] " [१·७४.] ॥

विअलइ । थिप्पइ । णिडुहइ[3] । " विगलेस् थिप्प-णिडुहौ[4] " [१७५.] ॥

१९. वलितभक्तमिव वान्तभोजनमिव । वलिन्यः अधःपतनशीला लाला यत्र तत् तथाविधं रमण्यधरं सुन्दरीदशनच्छदं यो लेढि पिबति । तस्य पुरुषस्य शतकृत्वः शतवारान्[5] हृदयं दलतु भेदम् आप्नोतु । बुद्धिकौशलं च दलतु । तथाविधाकार्यनिरतस्य चैतन्यपाण्डित्यादि विफलम् इत्यर्थः ॥

विसट्टउ । दलउ । वम्फि । वलिअ । " दलि-वल्योर्विसट्ट-वम्फौ " [१७६.] ॥

१ B doubtful between च्छ and त्थ. C च्छ. २ B °ड्डु°. C °डु°.

1 B C doubtful between च्छ and त्थ. 2 B doubtful between च्छ and त्थ. C च्छ. A distinctly उच्छल उत्थल्लः. 3 B °ड्डु°. C °डु°. 4 B °ड्डु°. C °डु°. A °ड्डु°. 5 B C शतं.

अणफुडिअ-इन्दवारण-रम्मा रामा, अफिट्ट-कडुअत्ता.
रे हिअय फुट्ट, चुक्कसि किं मग्गा ताहि भुल्लविअं? २०
अब्भंसि-दूसिअच्छं अफिडिअ-केहम्[1] आणणं महेलाण;
रच्चइ[2] तत्थवि मूढो नसिअ-मई णिवहिअ-विवेओ. २१
सेहइ सीलं, पडिसन्ति धी-गुणा, संजमोवि अवहरइ,
णिरिणासइ सुअम्, अवसेहइ सच्चं जुवइ-सत्ताण. २२

२०. अभ्रष्टम् अविदीर्णं यद् इन्द्रवारणं विशालाफलं तद्वद् रम्या बहिर्मनोहराः । अभ्रष्टं कटुकत्वम् अन्तरमधुरपरिणामो यासां तास्तथा रामाः । तस्मात् हे हृदय भ्रष्ट दुःशीलस्वभाव ताभिर्भ्रंशितं सत् किं मार्गाद् भ्रश्यसि । तथाभूतासु तासु अनुरागम् उत्सृज्य धर्मध्यानैकतानं हे मनो भवेत्यर्थः ॥

२१. अभ्रष्टदूषिकाक्षम् अनपगतमलनेत्रम् अभ्रष्टकफम् अप्रच्युतश्लेष्म महेलानाम् आननम् । परं तत्रापि तादृशेपि आनने नष्टमतिर्नष्टविवेको मूढो रजति । तदवलोकनचुम्बने रागम् आधत्त इत्यर्थः ॥

अणफुडिअ । अफिट्ट । फुट्ट । चुक्कसि । भुल्लविअं । अब्भंसि । अफिडिअ ।
"भ्रंशेः फिड-फिट्ट-फुड-फुट्ट-चुक्क-भुल्लाः" [१७७.] ॥

२२. युवतिसक्तानां स्त्रीलम्पटानां शीलं सदाचारो नश्यति प्रयाति ।

शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा ।
ऊहापोहोर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः ॥ इति ।

---

[1] B °वसु°. C °वहु°. [2] C रयइ (=रच्चइ ?)

---

[1] C °ची°. [2] C °ड्डु°. [3] B °ति. [4] B C °चुंबनं. [5] B om. this example.
[6] B C om. फुट्ट. We with A, which however फुट्टु. [7] B भुल्ला. We with C.

ओवासइ न विवेओ थी-सङ्गे इअ गुरूहि संदिसिअं;
अप्पाहामो ता तत्त-पिच्छिरो ताउ को निअइ? २३
जे भावि-पुलअणा,[1] भूअ-देक्खणा,[2] वट्टमाण-सच्चवणा,
तेहि निअच्छिअ भणिअं, मा इत्थीओ पुलोएह. २४

ते नश्यन्ति। संयमः शुभानुष्ठानमपि नश्यति। श्रुतं सिद्धान्तो नश्यति। सत्यं च नश्यति। न किंचिदपि परत्र परित्राणहेतुः शुभं तेषां संभवतीति भावः॥

नसिअ। णिवहिअ। सेहइ। पडिसन्ति। अवहरइ। णिरिणासइ। अवसेहइ। "नशेर्णिरि[1]णास-णिवहावसेह-पडिसा-सेहावहराः" [१७८.]॥

२३. स्त्रीसङ्गे योषित्संपर्के विवेकः युक्तायुक्तविचारो नावकाशते नावकाशं लभते इति गुरुभिः अस्मत्पूर्वाचार्यैः संदिष्टम् अस्माकं पुरः प्रतिपादितम्। तस्मात् तत्त्वद्रष्टा विज्ञातपरमार्थः कस्ताः स्त्रीः पश्यतीति वयमपि संदिशामः मुक्त्यर्थिनं प्रतिपादयामः॥

ओवासइ। "अवात् काशो वासः" [१७९.]॥
संदिसिअं। अप्पाहामो। "संदिशेरप्पाहः" [१८०.]॥

२४. भाविनो भविष्यदर्थस्य दर्शनाः द्रष्टारः। भूतदर्शनाः अतीतार्थवीक्षकाः। वर्तमानदर्शनाः विद्यमानार्थविलोकयितारः। त्रिकालवेदिन इत्यर्थः। एतैर्महात्मभिर्दृष्ट्वा सकलाकुशलकारणं स्त्रिय इति विज्ञाय भणितम्। किम्। स्त्रीर्मा पश्यत। यदि स्वस्य क्षेममम् अभिलषेत तदा स्त्रीणां विलोकनमपि मा कुरुतेत्यर्थः॥

---

१ B पुण°. २ So B C, though in the sûtra they read दे°.

1 B C and A °णिरणास°. In the text and examples B C have णिरि°.
2 B C °लपत.

अवयच्छन्तोवि जणो नोअक्खइ कामिणिं अवक्खन्तो;[1]

न गुरुं चज्जइ, नन्नं पासइ, जं तीइ पासत्थो. २५

असरीरिणम् अवअक्खइ, अवआसइ सील-जाइ-रहिअंपि;

अवयज्झिऊण तं पि हु जो इत्थि छिवइ, तस्स नमो ! २६

२५. कामिनीं पश्यन् सस्पृहं वीक्षमाणो[1] जनः पश्यन्नपि

यकृच्छकृन्मलश्लेष्ममज्जास्थिपरिपूरिताः ।

स्नायुस्यूता बहीरम्याः स्त्रियश्चर्मप्रसेविकाः ॥

इत्यादिकामिनीस्वरूपं जानन्नपि न पश्यति न मनस्यवधारयति । यस्मात् तस्याः कामिन्याः पार्श्वस्थः संभोगाय समीपवर्ती न गुरुं पश्यति । नान्यं मातापित्रादिकं पश्यति । तदेकतानो न गुर्वादिकं गुरुत्वादिना मन्यत इत्यर्थः । यद् उक्तं

न देवान् न गुरून् नापि

इत्यादि ॥

२६. अशरीरिणं गलिताङ्गोपाङ्गं[2] पश्यति सानुरागदृष्ट्या विलोकते[3] । शीलजातिरहितमपि पश्यति । तदपि एवंविधमपि योषिदसंघट्टितम् हु इति निःसंदेहम् दृष्ट्वा[4] यः स्त्रियं स्पृशति आलिङ्गति तस्मै नमः । उपहासपरोयं नमस्कारः । तेन निर्विवेकचूडामणेस्तस्य धिक्कारोस्त्वित्यर्थः ॥

पिच्छिरो । निअइ । पुलअणा । दक्खणा[1] । सच्चवणा । निअच्छिअ । पुलोएह । अवयच्छन्तो । उअक्खइ[5] । अवक्खन्तो । चज्जइ । पासइ । अवअक्खइ । अवआसइ । अवयज्झिऊण । " दृशो निअच्छ-पेच्छावयच्छावयज्झ-वज्ज-सव्वव-देक्खोअक्खावक्खावयक्ख-पुलोअ[6]-पुलअ-निआवआस-पासाः " [१८१.] ॥

१ C अवि°.

[1] B C °क्ष्य°. [2] C मलि°. [3] B drops from विलोकते to दृष्ट्वा. [4] So B C. [5] B C अरकइ. [6] B °देखोअरकोवरकवयरकपुलोपुलअ°. C °देरकोअरकावरकावयरकपुलोपुलअ°. A drops this and the following sûtras.

फासिज्जइ[1] कविकच्छू, फंसिज्जइ[2] अहव कुविअ-वग्घीवि,
फरिसिज्जइ न उणे[3]त्थी; धम्म-सरीरं हणइ छिहिआ. २७
आलिहइ नरम् अणालुङ्खणिज्जमवि नीअ-रच्चणी नारी.
मूढाण रिअइ सावि हु हिअए पविसन्त-कामम्मि. २८
नारीउ हिअय, पम्हुस मा, ताओ पम्हुसन्ति पर-लोअं;
रो[4]अन्ति धम्म-बीजं, न य रोहइ चड्डिअं तं च. २९

२७. कपिकच्छूः स्पृश्यते । अथवा कुपिता व्याघ्यपि स्पृश्यते । शरीरमात्रानर्थकारिण्योरेतयोः स्पर्शो वरम् इत्यर्थः । न पुनः स्त्री स्पृश्यते । यतो धर्मशरीरम् अत्रामुत्र अनेककल्याणप्रदसुकृततनुं स्पृष्टा सती हन्ति विनाशयति ॥

२८. नीचर[2]ञ्जनी हीनकृतप्रेमानुबन्धा सती नारी अस्पर्शनीयं न्यग्जातीयमपि नरं स्पृशति । परं मूढानाम् प्रविशन् स्थितिम् आमादयन् कामो यत्र तस्मिन् । कामोद्रेकयुक्त इत्यर्थः । हृदये सापि अगम्यगामुकापि प्रविशति पदम् आदधाति । रच्चणीत्यत्र "त्रज-नृत-मदां च्चः" [४.२२५] इति बहुवचनाद् रञ्जेर्जस्य च्चत्वम् ॥

छिवइ । फासिज्जइ । फंसिज्जइ । फरिसिज्जइ । छिहिआ । आलिहइ ॥ अणालुङ्खणिज्ज । "स्पृशः फास-फंस-फरिस-छिव-छिहालुङ्खालिहाः" [१८२.] ।
रिअइ । पविसन्त । "प्रविशे रिअः" [१८३.] ॥

२९. रे हृदय स्वान्त नारीर्मा स्पृश मा स्प्रष्टुम् अभिलष । यतस्ता नार्यः परलोकं प्रमुष्णन्ति । स्पर्शमात्रेण परभवहितं पुंसां निघ्नन्तीत्यर्थः । तथा ता धर्मबीजं पिंषन्ति चूर्णयन्ति । तच्च धर्मबीजं पिष्टं सत् न प्ररोहति । न स्वर्गापवर्गफलदायि भवतीत्यर्थः ॥

पम्हुस । पम्हुसन्ति । "प्रान्मृश-मुषोर्म्हुसः" [१८४.] ॥

---

१ B पा°. २ B C पं°. ३ C उण°. ४ B C रोच°.

1 C अपा. 2 C °रत्तनी. 3 B नाः. C वः. 4 B C च्चत्वम्. 5 B °म्ह°.

णिरिणासिअ-मेरं, णिरिणज्जिअ-हिरिअं च, णिवहिअ-गुणं च,
पीसिअ-सीलं नारिं, भुक्किर-सुणइंव को सिहइ? ३०

विलयाहि असाअड्डिअ-हिअओ अणकड्डिओ अ विसएहिं,
अभ्भिअ-निव्वाण-सिरी सो धन्नो थूलभद्द-मुणी. ३१

कामेण करिसिअ-सरेणावि अणाइञ्छिओ अणच्छेइ
मह मणम् अयञ्छिरेहिं गुणेहि सिरि-थूलभद्द-मुणी. ३२

३०. पिष्टमेरां ध्वस्तमर्यादां पिष्टह्रीकां परास्तलज्जां च। पिष्टा गुणा गाम्भीर्यादयो यया सा तथा ताम्। पिष्टशीलां विदारितसदाचारां च नारीं भषित्री भषणशीला या शुनकी कुक्करी तामिव कः काङ्क्षति। न कोपि विवेकी तदङ्गसङ्गम् अभिलषतीति भावः॥

रोञ्चन्ति। चड्डिअं। णिरिणासिअ। णिरिणज्जिअ। णिवहिअ। पीसिअ। "पिषेर्णिवह-णिरिणास-णिरिणज्ज-रोञ्च-चड्डाः" [१८५.]॥

भुक्किर। "भषेर्भुक्कः" [१८६.]॥

३१. वनिताभिरकृष्टहृदयः अनावर्जितचित्तः। विषयैश्च शब्दादिभिरकृष्टः। तद्वशं न गत इति यावत्। कृष्टनिर्वाणश्रीः समीपीकृतमोक्षलक्ष्मीः स तथाविधाहारनिवासवेश्यासंप्राप्तावपि मथितमन्मथमानलेन प्रसिद्धः स्थूलभद्रमुनिर्धनं धर्मरूपं लब्धा धन्यः॥

३२. कृष्टशरेणापि मनोभेदाय आकर्णानीतेषुणापि कामेन नाकृष्टः न वशीकृतः श्रीस्थूलभद्रमुनिः कर्षृभिः कर्षणशीलैः। आवर्जकैरिति यावत्। गुणैः कृत्वा मम मनः कर्षति आवर्जयति॥

---

१ C सिरि°. २ B वलआ°. C विलआ°. ३ B °ड्डि°. C °ठि°. ४ C °ड्डि°.

---

[1] B om. या. [2] B कुक्कारी. We with C. [3] B C रोच°. [4] So we with B C and A. [5] B C अणकृष्ट°. [6] C °नि°. [7] C °ब्ध्वा. [8] B कामेनाकृष्टः. C कामनाकृष्टः.

अक्खोडिआसि-तिक्खं धन्नो बंम्हं[1] चरिंसु-वइर-रिसी
ढुण्ढुल्लण-कुसला जस्स तुल्लम् अज्जवि गमेसन्ति. ३३

ढण्ढोलिआगमत्थं, घत्तिअ तत्तं, गवेसिअप्पाणं,
एक्कोच्चिअ वइर-रिसी परिअन्तिअ-परम-बंम्ह[1]-सिरी. ३४

बंम्ह[1]-सिरीइ सिलिसिअं तव-सिरि-सामग्गिअं च आजम्मं
नाण-सिरीए अवयासिअं च वइरं नमंसामो. ३५

असाअड्ढिअ[1] । अणकड्ढिओ । अच्छिअ । करिसिअ । अणाइच्छिओ । अणच्छेइ । अयच्छिरेहिं । " कृषेः कड्ढ-साअड्ढा[2]ञ्चाणच्छायञ्छाइञ्छाः[3] " [१८७.] ॥

३३. कोशात् कृष्टासिवत् तीक्ष्णं ब्रह्मचर्यं चरितवान् अनुष्ठितवान् वज्रर्षिर्धन्यः । यस्य तुल्यं गवेषणकुशला अद्यापि गवेषयन्ति। गवेषणेन अदर्शनं गम्यते । ततश्च अद्ययावत् तत्सदृशं न पश्यन्तीत्यर्थः । चरिंसु इत्यत्र आर्षत्वात् क्तवतुः स्थाने इंसुः ॥

अक्खोडिअ । " असावक्खोडः " [१८८.] ॥

३४. आगमार्थं गवेषयित्वा निभाल्य तत्त्वम् आगमार्थरहस्यं गवेषयित्वा आत्मानं स्वस्वरूपं च गवेषयित्वा एक एव वज्रर्षिः श्लिष्टपरमब्रह्मश्रीः अङ्गीकृतसर्वोत्कृष्टब्रह्मचर्यलक्ष्मीकः । यथा आबाल्यतो वज्रर्षिः श्रामण्यं प्रपेदे तथा नान्य इत्यर्थः ॥

ढुण्ढुल्लण । गमेसन्ति । ढण्ढोलिअ[4] । घत्तिअ । गवेसिअ । "गवेषेर्ढुण्ढुल्ल-ढण्ढोल-गमेस-घत्ताः" [१८९.] ॥

३५. आजन्म ब्रह्मश्रिया श्लिष्टं तपःश्रिया श्लिष्टं च ज्ञानश्रिया श्लिष्टं च कर्णाभ्यटनैकादशाङ्गीपाठात्। वज्रं वज्रस्वामिनं नमस्यामः॥

१ B C व°.

1 C °ड्ढि°. 2 B °ड्ढा°. 3 B °इञ्छा. 4 B C ढंढोलि.

मक्खन्तंव सुहाए चोप्पडमाणंव चन्दण-रसेण
के मुक्खं आहन्ता गयसुकुमालं न वम्फन्ति? ३६
जो अहिलङ्घइ धम्मं, मुक्खं अहिलङ्घए, महइ सुक्खं,
सो वच्चउ सिहणिज्जं सिरि-गोअम-सामिणो मग्गं. ३७
अविलुम्पिअ-भव-सुक्खो, जीव-दयं जम्मओवि कङ्खन्तो,
अज्जवि सामइअ-जसो, भवाविहीरो जयइ अभओ. ३८

परिअन्तिअ । सिलिसिअं । सामग्गिअं[1] । अवयासिअं । "श्लिषेः सामग्गावयास-परिअन्ताः[2]" [१९०.]॥

३६. सुधया म्रक्षयन्तम् इव चन्दनरसेन म्रक्षयन्तम् इव स्वचरितावदातेन परमनिर्वृति[3]जननात् तद्विलेपनं कुर्वन्तम् इव मोक्षं काङ्क्षन्तः के गजसुकुमालं न काङ्क्षन्ति अपि तु सर्वेपि तत्सदृशीभवितुम् अभिलषन्तीत्यर्थः ॥

मक्खन्तं । चोप्पडमाणं । "म्रक्षेश्चोप्पडः" [१९१.] ॥

३७. यो धर्मं काङ्क्षति मोक्षं काङ्क्षति सौख्यं च काङ्क्षति स धर्माद्यर्थी पुरुषः काङ्क्षणीयम् आत्मनिस्ताराय भव्यैरभिलषणीयं श्रीगौतमस्वामिनो मार्गं धर्माचारं काङ्क्षतु इच्छतु । अनेनैव[4] तल्लाभात् ॥

३८. न काङ्क्षितं भवसौख्यं येन स तथा । जन्मतोपि जन्मप्रभृत्यपि जीवदयां दीनानाथजन्तुजातप्राणरक्षां काङ्क्षन् अद्यापि सर्वार्थसिद्धिप्राप्तेः पश्चादपि । संप्रत्यपीति यावत् । प्रतीक्षितं जगत्यवस्थितं यशो यस्य स तथा । भवे न प्रतीक्षते भवाप्रतीक्षः[5] । संसारोद्विग्न इत्यर्थः । अभयकुमारमुनिर्जयति ॥

आहन्ता । वम्फन्ति[6] । अहिलङ्घइ । अहिलङ्खए । महइ । वच्चउ । सिहणिज्जं[7] । अविलुम्पिअ । कङ्खन्तो । "काङ्क्षेराहाहिलङ्घाहिलङ्ख-वच्च-वम्फ-मह-सिह-विलुम्पाः[8]" [१९२.] ॥

---

1 B सामग्गियं. 2 So B C. A °परिअन्ताः. 3 B °निवृति°. C °निवृत्ति°.
4 B अनैव. 5 B अविभवाप्रतीक्ष. C भवने प्रतीक्षते अविभावप्रतीक्ष. 6 B वफंति.
7 B C सिहि°. 8 B कांक्षेराहाहिलंघवच्चवरपुमह°.

विरमालिअ[1] संसारे जेण पडिक्खाविआ समय-सत्था,
जयइ सुधम्मो तच्छिअ-कम्मो चच्छिअ[2]-कुतित्थि-मओ. ३९
सिव[3]-रम्पण-मिच्छा-दिट्ठि-रम्फणो, तक्खिऊण अवमग्गे,
विअसाविअ-सिद्धन्तो भयवं जम्बू-मुणी जयइ. ४०
कोआसिअ-गहिअ-वओ, दर-वोसट्टिअ-सरोज-हसिर-मुहो,
अणगुञ्जाविअ[4]-स-कुलो भयवं पहव-प्पहू जयइ. ४१

३९. संसारे प्रतीक्ष्य स्थित्वा येन समयशास्त्राणि सिद्धान्तग्रन्थाः। द्वादशाङ्गानीत्यर्थः। प्रतीक्षितानि स्थापितानि। कृतानीत्यर्थः। यत्तदोर्नित्याभिसंबन्धात् सः तष्टानि चूर्णितानि कर्माणि येन स तथा। तष्टकुतीर्थिमदः मृदितकुमताभिमानः सुधर्मा सुधर्मस्वामिगणभृत् जयति। सत्था इत्यत्र "वाक्यर्थवचनाद्याः" [१. ३३.] इति पुंस्त्वम्॥

सामइअ। अविहीरो। विरमालिअ। पडिक्खाविआ। "प्रतीक्षेः सामय-विहीर-विरमालाः" [१९३.]॥

४०. शिवस्य तक्षणा विनाशका ये मिथ्यादृष्टयस्तेषां तक्षणो वित्रासकः। अपकृष्टा मार्गाः[2] कुमतानि तान् तक्षित्वा उपमृद्य विकाशितसिद्धान्तः प्रकटितागमो भगवान् पूज्यो जम्बूमुनिः जम्बूस्वामिमहर्षिर्जयति॥

तच्छिअ। चच्छिअ[3]। रम्पण। रम्फणो। तक्खिऊण। "तक्षेस्तच्छ-चच्छ-रम्प-रम्फाः" [१९४.]॥

४१. विकसितो दीप्तः सन् गृहीतव्रतः अङ्गीकृतचारित्रः। विकासितं वा अनेकशिष्यकरणेन विस्तारितं गृहीतं व्रतं येन स तथा। दरम् ईषद् विकसितं स्फुटितं यत् सरोजं तद्वत् हसितृ स्मेरं मुखं

१ B °स°. २ C वच्छिअ°. ३ B C सिवि°. ४ B C अणु°.

1 So B C. 2 C inserts अपामार्गाः (=अपमार्गाः?) after मार्गाः. 3 C व°. B drops the example.

अणडिम्भन्तॅ-ल्हसाविअ-कुतित्थिअं, थिरम्, असंसि जिण-वयणं
जर-मरण-वोज्जिराणं भव-डरिआणं हरउ तासं. ४२

सो वज्जइ न भवाओ, गुरूहिँ साहूहिँ णुमिअ-सम्मत्तो,
णिमिअ-मणो जिण-समए कयावि जो न हु पलोट्टेइ. ४३

यस्य स तथा । अह्रासितस्वकुलः अलज्जितनिजक्षत्रियवंशस्तादृग्वी-रव्रतेन तत्त्वं विज्ञाय प्रव्रज्याङ्गीकारात् भगवान् प्रभवप्रभुः प्रभवसूरिर्जयति ॥

विअसाविअ । कोआसिअ । वोसट्टिअ । "विकसेः कोआस-वोसट्टौ" [१९५.] ॥

हसिर । अणगुञ्जाविअ । "हसेर्गुञ्जः" [१९६.] ॥

४२. अस्रस्ताः स्वमताद् अभ्रष्टाः सन्तः स्रंसिता भ्रंशम् आपिताः कुतीर्थिका येन तत् तथा । स्थिरं ध्रुवं महाविदेहादिक्षेत्रेषु सर्वदा सद्भावात् अतएव असंसि न कथमपि स्रंसते जिनवचनं जरामरण-त्रस्तानां भवत्रस्तानां त्रासं भयं हरतु ॥

अणडिम्भन्त । ल्हसाविअ । असंसि । "स्रंसेर्ल्हस-डिम्भौ" [१९७.] ॥

४३. गुरुभिः धर्माचार्यैः । कैर्गुरुभिः । साधुभिः । न्यस्तसम्यक्त्वः आरोपितसम्यक्त्वः न्यस्तमनाश्च सन् जिनसमये हु निश्चितं यः कदापि न पर्यस्यति न विपरीतो भवति स भवाद् न बिभेति । परमपदप्राप्तिहेतुसम्यक्त्वार्हत्समयनिश्चलमनस्त्वाद् न भीतिं करोतीत्यर्थः ॥

वोज्जिराणं । डरिआणं । तासं । वज्जइ । "त्रसेर्डर-वोज्ज-वज्जाः" [१९८.] ॥

णुमिअ । णिमिअ । "न्यसो णिम-णुमौ" [१९९.] ॥

---

1 C अणु°. 2 B °दा°. 3 B C आपिता. 4 B om. तत्. 5 B C भ्रंसे°. 6 B C पर्यवस्यति.

पल्लट्टिअ-पावा पल्हत्थिअ-कलिणो अ नीससण-जोग्गे
विग्घेवि अझङ्खिरया णिल्लसिअ-जिणागमा हुन्ति. ४४
ऊसलिअ-गुणोसुम्भिअ-संजम-पुलआअमाण-हिअयस्स
गुञ्जोल्लिअ-जिण-वयणस्सारोअइ कस्स नो नाणं? ४५
उल्लसिअ-भिसन्त-सिरी, भासिर-नाणेण गसिअ-मिच्छत्तो,
मोहाघिसिअ[1]-विवेओ, जिण-मयम् ओवाहए[2] धन्नो. ४६

४४. पर्यस्तपापाः क्षिप्ताशुभप्रकृतयः। पर्यस्तकलयश्च परास्तपरस्परविरोधाः। निःश्वसनयोग्येपि दुःखदायित्वात् कदुष्णबाष्पजननार्हेपि विघ्ने अनिःश्वसितारः अनिःश्वसनशीलाः। धीरा इति यावत्। उल्लसितजिनागमाः स्वान्तोद्बुद्धार्हत्समया भवन्ति ॥

पलोट्टेइ[1]। पल्लट्टिअ। पल्हत्थिअ[2]। "पर्यसः पलोट्ट-पल्लट्ट-पल्हत्थाः" [२००.] ॥

नीससण। अझङ्खिरया। "निःश्वसेर्झङ्खः" [२०१.] ॥

४५. उल्लसिता उद्भूता गुणाः क्षान्त्यादयो यस्य स तथा। स चासौ उल्लसितसंयमश्च प्रकटीभूतचारित्रः स तथा। स चासौ उल्लसद्धृदयश्च धर्मोत्साहमानमनाश्च स तथा। तस्य उल्लसितजिनसमयस्य अन्तःपरिस्फुरिताहत्सिद्धान्तस्य कस्य न ज्ञानम् उल्लसति। अपि तु तादृक्षस्य सर्वस्य सम्यगवबोधः प्रादुर्भवतीति भावः ॥

४६. उल्लसिता प्रादुर्भूता भासमाना दीप्यमाना श्रीः धर्मसाधनसंपद् यस्य स तथा। भास्वरज्ञानेन दीप्रसम्यगवबोधेन ग्रस्तमिथ्यात्वः मथितमिथ्यादर्शनः मोहेन अज्ञानेन अग्रस्तः[4] विवेको युक्तायुक्तकारिता[5] यस्य स तथा। धन्यः पुण्यवान् जिनमतम् अवगाहते परिभावयति ॥

---

१ B °घ°. २ B C ओहावए.

---

1 B C पलोट्टिअ. 2 B पल्ल°. 3 B °पल्ल°. 4 B ग्रस्तो. 5 B C om. युक्ता°.

ओगाहिअ-जिण-वयणो, गुण-ठाण-वलग्गिओ, चडइ मुक्खं
भव-सुह-अणगुम्मडिओ अगुम्मिओ मोहणिज्जेहिं. ४७
अहिऊलइ कम्म-गणं, आलुङ्खइ इन्धणं जहा डहणो,
वलणिज्ज-हरण-बुद्धी गिण्हन्तो भयवओ वयणं. ४८

णिल्लसिअ[1] । ऊसलिअ । ऊसुम्भिअ । पुलआअमाण । गुञ्जोल्लिअ । अरोअइ[2] ।
उल्लसिअ । "उल्लसेरूसलोसुम्भ-णिल्लस-पुलआअ-गुञ्जोल्लारोआः" [२०२.] ॥

भिसन्त । भासिर । "भासेर्भिसः" [२०३.] ॥

गसिअ । अघिसिअ । "ग्रसेर्घिसः" [२०४.] ॥

४७. अवगाहितजिनवचनः परिभाविताईद्भाषितः । गुणस्थानानि मिथ्यात्वादीनि तेषु आरूढः । आद्ये सर्वदावस्थानाद् आरोहो न घटत इति उत्तरोत्तरगुणस्थानेषु कृतावस्थान इत्यर्थः । भवसुखेन अमुग्धः अमोहितो वा । मोहयन्तीति मोहनीयाः स्त्र्यादिविषयास्तैर-मोहितः अमूर्छितो मोक्षम् आरोहति[3] अध्यास्ते ॥

ओवाहए[4] । ओगाहिअ । "अवाद्गाहेर्वाहः" [२०५.] ॥

वलग्गिओ । चडइ । "आरुहेश्चड-वलग्गौ" [२०६.] ॥

अणगुम्मडिओ । अगुम्मिओ । मोहणिज्जेहिं । "मुहेर्गुम्म[5]-गुम्मडौ" [२०७.] ॥

४८. ग्राह्यग्रहणबुद्धिः उपादेयार्थोपादानमतिः अत एव भगवतः अर्हतो वचनं सकलोपादेयमूर्धमुकुटं भगवत्सिद्धान्तं गृह्णन् अङ्गीकुर्वन् । तदुपदिष्टं समाचरन्नित्यर्थः । कर्मगणं ज्ञानावरणादिव्रातं[6] दहति भस्मसात् करोति । विनाशयतीति यावत् । इन्धनं यथा दहनो दहति ॥

---

1 B निल्ल°. 2 C आरो°. 3 C अपरोहति. 4 B उहावए. C ओहावए. 5 B drops °गुम्म°. 6 C °वराणादि°.

पिङ्गिअ[2]-संजम-भारा, निरुवारिअ-पवयणे अणुसरन्ता,
अहिपच्चुअन्ति मुत्तिं जोअं घि[1]त्तूण सील-धणा. ४९
गेण्हिअ वयाइँ, घेत्तुं घेत्तव्वं वोत्तुम् अविअ वोत्तव्वं
जे उज्ज[2]आ खु, ताणं वोत्तूण गुणे कयत्थु म्हि. ५०

अहिऊलइ । आलुङ्खइ । डहणो । "दहेरहिऊलालुङ्खौ" [२०८.] ॥

४९. गृहीतसंयमभारान् अङ्गीकृतव्रतभरान्[1] गृहीतप्रवचनान् सूत्रतोऽर्थतश्च विज्ञातद्वादशाङ्गान् अनुस्मरन्तः । सफलजन्मान एत इति भावनया पूर्वमहर्षीन् ध्यायन्त इत्यर्थः । शीलं चारित्रं धनं येषां ते शीलधना मुनयो योगं परमसमाधिं गृहीत्वा आसाद्य मुक्तिं निर्वृतिं गच्छन्ति ॥

वलणिज्ज । हरण । गिण्हन्तो । पिङ्गि[2]अ । निरुवारिअ । अहिपच्चुअन्ति । "ग्रहो वल-गेह्ण-हर-पङ्ग-निरुवाराहिपच्चुआः[3]" [२०९.] ॥

५०. व्रतानि गृहीत्वा ग्रहीतव्यम् अर्हत्प्रणीतोपादेयतत्त्वं ग्रहीतुं ज्ञातुं वक्तव्यं सदुपदेशादिप्रतिपाद्यमपि च वक्तुं भणितुं ये निश्चितम् उद्यताः । स्वपरोपकारकरणतत्परा इति यावत् । तेषां गुणान् क्षान्त्यादीन् उक्त्वा कृतार्थः कृतकृत्योस्मि ॥

घेतूण । घेत्तुं । घेत्तव्वं । "क्त्वातुमतव्येषु[4] घेत" [२१०.] ॥ क्वचिन्न भवति । गि[5]ण्हिअ ॥

वोत्तुं । वोत्तव्वं । वोत्तूण । "वचो वोत्" [२११.] ॥

---

१ So B C. २ B उज्जुवा.

---

1 B om. अङ्गीकृतव्रतभरान्. 2 So B C throughout. A °पङ्ग°. 3 B C पच्चुआ. We with A. 4 B C °येषु. 5 B C गि°.

भोत्तूणं भोत्तव्वं, भोत्तुं निव्वुइ-सुहाइँ, मोत्तु-मणा,

मोत्तव्वारम्भं मोत्तूण, महन्ता तवस्सन्ति. ५१

सोअ-वसा रोत्तूणवि रोत्तु-मणा विम्हरन्ति रोत्तव्वं

दट्ठूण जाण मुत्तिं, अरहन्ताणं नमो ताणं. ५२

जे दट्ठव्वे दट्ठुं, इन्दो काहीअ लोअण-सहस्सं

दंसण-तत्तिं काउं, अरहन्ताणं नमो ताणं. ५३

५१. भोक्तव्यं शुभाशुभम् अनुभवनीयं भुक्त्वा संवेद्य। निर्वृति-सुखानि भोक्तुं संवेदयितुम्। मोक्तव्यारम्भं हेयव्यापारं मुक्त्वा परित्यज्य। मोक्तुमनसो निर्वरीतुकामा महान्तः महामुनयस्तपस्यन्ति। बाह्याभ्यन्तर[1]भेदभिन्नं द्वादशविधं तपः कुर्वन्ति ॥

५२. शोकवशात् स्वबन्धुवियोगसमुद्भवदुःखपरतन्त्रत्वाद् रुदित्वापि रोदनं कृत्वापि रोदितुमनसः रोदनपरायणचेतसः प्राणिनः येषां मूर्तिं वपुर्दृष्ट्वा रोदितव्यं विपन्नस्वबान्धवादिकं विस्मरन्ति न स्मृतिपथम् आनयन्ति तेभ्योऽर्हद्भ्यो नमः नमस्कारोस्तु ॥

भोत्तूणं । भोत्तव्वं । भोत्तुं । मोत्तु । मोत्तव्व । मोत्तूण । रोत्तूण । रोत्तु । रोत्तव्वं । "रुद-भुज-मुचां तोन्त्यस्य" [२१२.] ॥

५३. यान् द्रष्टव्यान् लोकातीतसौभाग्यादियुक्तत्वाद् वीक्षणीयान् द्रष्टुं दर्शनाय लोचनसहस्रम् इन्द्रः अकरोत् अकार्षीत् चकार वा। दर्शनमपि किमर्थम् इत्याह। दर्शनेन निर्निमेषवीक्षणेन तृप्तिम् आत्मनः संतोषं कर्तुम्। तेभ्योऽर्हद्भ्यो नमः ॥

दट्ठूण । दट्ठव्वे । दट्ठुं । "दृशस्तेन ट्ठः" [२१३.] ॥

---

[1] B °रा°.

काऊणं कायव्वं कम्मं काहिन्ति[1] जे ण पुणरुत्तं,
जग-बोहम्[2] इच्छिराणं अरहन्ताणं नमो ताणं. ५४

जो अणुगच्छइ, जच्छइ, छिन्दिउम्[3] अच्छइ तणुं च, तेसिंपि
अणभिन्दिअ[4]-भावाणं अरहन्ताणं नमो ताणं. ५५

सविहे न जाण कुज्झइ, जुज्झइ, मुज्झइ भवे अगिज्झन्तो
देही; बुज्झइ, सिज्झइ, अरहन्ताणं नमो ताणं. ५६

५४. कर्तव्यं सकलकर्मक्षयं कृत्वा ये पुणरुत्तम् इति भूयोपि न कर्म[1] करिष्यन्ति कर्तारो वा। वीतरागत्वात् न[2] मुक्तिम् अपहाय बुद्धवत् स्वदर्शनतिरस्कारनिवारणाय इह जन्म आसाद्य पुनरपि कर्म भन्त्स्यन्तीत्यर्थः। तेभ्यो जगद्बोधम् एषितृभ्यः अभिलाषुकेभ्योर्हद्भ्यो नमः॥

काहीअ। काउं। काऊणं। कायव्वं। काहिन्ति। "आ[3] कृगो भूतभविष्यतोश्च" [२१४.]॥

५५. योनुगच्छति भक्त्या पृष्ठलग्नः प्रयाति। तथा यो यच्छति सादरं स्ववस्तु ददाति। यस्तु तनुं छेत्तुम् आस्ते। तेष्वपि अभिन्नभावेभ्यो निर्विशेषमनस्केभ्यस्तेभ्यो जगत्प्रसिद्धेभ्योर्हद्भ्यो नमः॥

इच्छिराणं। अणुगच्छइ। जच्छइ। अच्छइ[4]। "गमिष्यमासां छः" [२१५.]॥

छिन्दिउं। अणभिन्दिअ। "छिदि-भिदो न्दः" [२१६.]॥

५६. येषां सविधे समीपे भवे अगृध्यन् गार्ध्यम् अगच्छन्। संसारविरक्तो भवन्निति यावत्। देही जन्तुर्न क्रुध्यति न[5] कोपं ग-

१ B दाहि॰ न्ति. २ B ॰वो॰. ३ B drops छिन्दिउम् अच्छइ. ४ B C ॰य॰.

1 B om. कर्म. 2 C ननु. 3 So B C. A आ कृ॰ changed to आः कृ॰. 4 B om. अच्छइ. 5 B om.

रुन्धिअ-करणं, रुम्भिअ-पवणं, रुज्झिअ-मणं, अपडिएहिं
झायव्वाण मुणीहिं अरहन्ताणं नमो ताणं. ५७
सडिअ-रया, कढिअ-मला, वड्ढिअ-तव-तेअ-वेढिअङ्गा य
जाणज्जवि वर-मुणिणो, अरहन्ताणं नमो ताणं. ५८

च्छति। तथा न युध्यते न युद्धं करोति यतो न मुह्यति न मोहम् उपगच्छति। मोहमूलत्वात् क्रोधयुद्धयोः। किंतु बुध्यते[2] अवगततत्त्वो भवति। तथा च सति सिध्यति सिद्धो भवति। तेभ्योर्हद्भ्यो नमः॥

कुज्झइ। जुज्झइ। मुज्झइ। अगिज्झन्तो। बुज्झइ। सिज्झइ। "युध-बुध-गृध-क्रुध-सिध-मुहां ज्झः" [२१७.]॥

५७. रुद्धकरणम्। रुद्धपवनम्। रुद्धमनः कृतेन्द्रियोच्छ्वासनिः[1]-श्वासचित्तनिरोधं यथा भवति एवम् अपतितैः ध्यानाद् अस्खलितैर्मुनिभिर्ध्यातव्येभ्यस्तेभ्यः प्रसिद्धेभ्योर्हद्भ्यो नमः॥

रुन्धिअ। रुम्भिअ। रुज्झिअ। "रुधो न्ध-म्भौ च" [२१८.]॥

५८. सन्नरजसः गलितबध्यमानकर्माणः। क्वथितमलाः भस्मीकृतबद्धकर्माणः। यतो वृद्धं वृद्धिं गतं यत् तपस्तेजस्तेन वेष्टितं व्याप्तम् अङ्गं येषां ते तथा च वरमुनयः अद्यापि दुःखकालेपि[7] वर्तन्ते येषाम् अर्हताम्। यन्मतसंस्थिता इत्यर्थः। तेभ्योर्हद्भ्यो नमः॥

अपडिएहिं। सडिअ[8]। "सद-पतोर्डः" [२१९.]॥

कढिअ। वड्ढिअ। "क्वथ-वर्धां ढः" [२२०.]॥

वेढिअ। "वेष्टः" [२२१.]॥

---

[1] B om. [2] C °ति. [3] C वु. [4] B °निश्वा°. [5] B C वध्य°. [6] B C °व°. [7] B C दुःखमाकालेपि. The emendation is conjectural. [8] B अडिअ.

दुक्कड-संविल्लिअओ[१] भव-पासोव्वेढणोज्जओ लोओ
उव्वेल्लिज्जइ जेहिं, अरहन्ताणं नमो ताणं. ५९
जे झाउं संपज्जइ अणखिज्जिर-सिज्जिराण सा सिद्धी,
ते वच्चामो सरणं नच्चिर-मच्चिर-मणा सिद्धे. ६०
आणन्द-रोविराणं जेसु नवन्ताण होइ नोव्वेवो,
धाइ समुहं च मुत्ती, ताण नमो सव्व-सिद्धाणं. ६१

५९. दुष्कृतेन अशुभकर्मणा संवेष्टितो व्याप्तः । परं भवपाशोद्वेष्टने संसारबन्धनमोक्षणे उद्यतः कृतप्रयत्नो लोको यैरुद्वेष्ट्यते बन्धनमुक्तः क्रियते तेभ्योऽर्हद्भ्यो नमः ॥ दुक्कड इत्यत्र आर्षत्वात् तस्य डः ॥

संवेल्लिअओ । "समो ल्लः" [२२२.] ॥

उव्वेढण । उव्वेल्लिज्जइ । "वेष्टः" [२२३.] ॥

६०. यान् ध्यात्वा स्मृत्वा अखेत्तृस्वेत्तृणाम् अखेदनस्वेदनशीलानाम् । खेदस्वेदरहितानाम् इति यावत् । अस्माकं सा सिद्धिः तत् सिद्धत्वं संपद्यते । तान् सिद्धान् नर्तितृ नर्तनशीलम् । भक्तिवशाद् उत्कलिकाकलितम् इत्यर्थः । तथा मदितृ तोषणशीलं मनो येषां ते तथाभूता वयं शरणं व्रजामः ॥ झाउम् इत्यत्र सेवर्नाक्रियापेक्षया प्राक्काल्यम् न संपद्यते इत्यपेक्षया । तच्च भावितमेवेति[1] ॥

संपज्जइ । अणखिज्जिर । सिज्जिराण । "स्विदां ज्जः" [२२४.] ॥

वच्चामो । नच्चिर । मच्चिर । "व्रज-नृत-मदां च्चः" [२२५.] ॥

६१. यान् आनन्दरोदितॄणां हर्षाश्रुमोचनशीलानां सतां नमतां नमस्कुर्वतां न उद्वेगो भवति । किंतु यान् नमतां मुक्तिः संमुखम्

१ So B C.

[1] B भावित्तमे॰. C भावितिमे॰.

कुपहे धावन्ति,[1]अखादिमं च खादन्ति, तेहिवि समं जो

धावइ खाइ अ तंपि हु [2]बोहन्ते झामि आयरिए. ६२

कम्माइँ वोसिरन्ता, अतुट्टिरेणं तवेण सक्कन्ता,

अफुडिअ-अचलिअ-महिमा आयरिआ दिन्तु ते बोहिं. ६३

अभिमुखं च धावति सत्वरम् आयाति । तेभ्यः सर्वसिद्धेभ्यो नमः ॥
जेसु इति "द्वितीयातृतीययोः सप्तमी" [३. १३५.] इति सप्तमी ॥

रोविराणं । नवन्ताण । "रुद-नमोर्वः" [२२६.] ॥

उव्वेवो । "उद्विजः" [२२७.] ॥

६२. ये कुपथे अमार्गे । अनीताविति यावत् । धावन्ति । तथा ये खाद्यते यत् तत् खादं तस्य भावः खादत्वं न विद्यते खादत्वं यस्य तत् तथा अखाद्यं वस्तु खादन्ति । तैरपि समं यो धावति कुपथे गच्छति खादति अभक्षणीयं भक्षयति च । हु इति निश्चितम् तमपि तादृशमपि प्राणिनं स्वयम् [1]अधर्मम् अधर्मविप्रलब्धं च । अस्मादृशम् इत्यर्थः । बोधयतो धर्मदेशनया सन्मार्गे प्रवर्तयत आचार्यान् ध्यायामि संस्मरामि ॥

धाइ । खाइ । खाद-धावोर्लुक् [२२८.]॥ बहुलाधिकाराद् वर्तमानाभविष्यद्विध्याद्येकवचन एव । तेनेह न । धावन्ति । अखादिमं । खादन्ति ॥ कचिन्न । धावइ ॥

६३. कर्माणि व्युत्सृजन्तः आत्मनो दूरीकुर्वन्तः । ननु अनादिकालालीनकर्मणां कथं व्युत्सर्ग इत्याह । [2]अत्रोटिना अच्छिद्रुरेण । संपूर्णेनेति यावत् । तपसा शक्नुवन्तः सामर्थ्यं बिभ्रतः । अस्फुटितः अन्यौजसा अखण्डितः अत एव अचलितः अकम्पितः । स्थिर इत्यर्थः । महिमा माहात्म्यं येषां ते तथा । ते सर्वप्रसिद्धा आचार्या बोधिं जिनधर्मावाप्तिं ददतु प्रयच्छन्तु ॥

---

१ B drops अखादिमं च खादन्ति. २ B C वो°.

---

1 C स्वयमधर्मधर्मविप्र°. 2 B C अत्रोटिता.

फुट्टिअ-मोहो लोओ चल्लइ अपमिल्लिअ-व्वओ मोक्खे
जेहिं, अपमीलिअच्छं पेच्छामो ते उवज्झाए. ६४
अणउम्मिल्लिअं[1]-नाणोम्मीलणआं[2], हरिस-पसविरा लोए
सुअ-जलम् ओज्झाया पवरिसन्तु, वित्थरिअ[3]-गुण-भरिआ. ६५

वोसिरन्ता । "सृजो रः" [२२९.] ॥

अतुट्टिरेणं । सक्कन्ता । "शकादीनां द्वित्वम्" [२३०.] ॥

६४. यैः कृत्वा स्फुटितः विदारितो मोहो येन स तथा । अपमीलितव्रतः उद्बुद्धचारित्रः । लोको मोक्षे चलति गच्छति । तान् उपाध्यायान् अपमीलिताक्षं निर्निमेषनयनं यथा भवति एवं पश्यामः । उपाध्यायदर्शने वयं सतृष्णा इत्यर्थः ॥

अफुडिअ । अचलिअ । फुट्टिअ । चल्लइ । "स्फुटि-चलेः" [२३१.] ॥

६५. अनुन्मीलितम् अनुद्भूतं यज्ज्ञानं तस्य उन्मीलना व्यञ्जकाः । हर्षं प्राणिप्रमोदं प्रसवितारः जननशीलाः । विस्तृताः सर्वत्र प्रसृता ये गुणास्तैर्भृताः निचिता उपाध्याया लोके जनमध्ये श्रुतमेव निर्मलपावित्र्यहेतुत्वात् जलं प्रवर्षन्तु । निर्वृतिफलोत्पत्तये अस्मभ्यं प्रयच्छन्त्वित्यर्थः ॥

अपमिल्लिअ[1] । अपमीलिअ । अणउम्मिल्लिअ । उम्मीलणआ[4] । "प्रादेर्मीलेः[5]" [२३२.] ॥

पसविरा । "उवर्णस्यावः" [२३३.] ॥

वित्थरिअ । भरिआ । "ऋवर्णस्यारः" [२३४.] ॥

पवरिसन्तु । "वृषादीनामरिः" [२३५.] ॥

१ B C °अ°. २ B C °णओ. ३ C विच्छ°.

[1] B om. this and the following example. [2] C निवृत्ति°. [3] B C om. this example. [4] C °णओ. B उम्मीलः for उम्मीलणआ । प्रादेर्मीलेः ॥. [5] C °लः. From the previous note B's reading also appears to be °लः. We with A and Pischel.

नो रूसइ, नो तूसइ, जेऊण मणं लयम्मि जो नेन्तो[1]
मोत्तुं भवं, विणीअं तं साहु-जणं नमंसामि. ६६
उप्पाइअ-सद्दहणो असद्दहाणेवि[2] देइ जो बोहिं,
संसार-नासिरो हं तं साहुंचिय विहेमि गुरुं. ६७
पञ्चवि अरहन्ताई परमेट्ठी झाह, झाअह किम् अन्नं?
होऊण निव्विकप्पा, पसम-रया होइऊण[3] तहा. ६८

६६. यो भवं मोक्तुं त्यक्तुं मनो जित्वा वशीकृत्य लये साम्यावस्थायां नयन् सन् नो रुष्यति अमित्रे रोषं न करोति । नो तुष्यति मित्रे तोषं न करोति । तं विनीतं जितेन्द्रियं साधुजनं नमस्यामि ॥

रूसइ । तूसइ । " रुषादीनां दीर्घः " [२३६.] ॥

जेऊण । नेन्तो । मोत्तुं । " युवर्णस्य गुणः " [२३७.] ॥ क्वचिन्न । विणीअं ॥

६७. अश्रद्दधाने जिनप्रणीतजीवादिपदार्थे तथेति प्रत्ययरहितेपि उत्पादितश्रद्दधानः जनितास्तिक्यबुद्धिर्यो बोधिं ददाति । संसाराद् नशिता नशनशीलोहं तमेव साधुं गुरुं विदधामि ॥

सद्दहणो । असद्दहाणे । " स्वराणां स्वराः " [२३८.] ॥ क्वचिन्नित्यम् । देइ । नासिरो । विहेमि ॥

रूसइ[1] । तूसइ । " व्यञ्जनाद् अद् अन्ते " [२३९.]

६८. भो भव्याः निर्विकल्पाः एते ध्येया नवेति संशयरहिता भूत्वा तथा प्रशमरता उपशमपरा भूत्वा पञ्चापि अर्हदादीन् ध्यायत ।

१ B C नेन्तो. २ B om. असद्दहाणे°. ३ So B C. See III. 157.

1 B C put रूसइ । तूसइ । "व्यञ्जनाद् अद् अन्ते" after विणीअं । and before सद्दहणो &c. A, Pischel and the Bombay edition all read स्वराणां स्वराः । व्यञ्जनाददन्ते ॥.

जिणउ कलिं अघ-चिणिअं, धुणिअ-सिरं सुणिअ[१] गुण-गणा थुणिआ[२]
इन्देहिवि, जग-पुणणी[३] सुअ[४]-देवी, सयल-अघ-लुणणी. ६९

सो हुणइ भप्प[५]-मज्झे, ख-पुप्फम् उच्चेइ, पङ्कयाइँ थले
तह उच्चिणेइ, मोत्तुं सुअ-देविं महइ जो अन्नं. ७०

किमन्यं हरिहरादिकं ध्यायत । हरिहरादिध्यानम् अपहाय अर्हद्ध्यानपरा भवतेति भावः ॥

झाह । झाअह । होऊण । होईऊण[1] । "स्वराद् अनतो वा" [२४०.] ॥

६९. श्रुतगुणगणा सकलजनश्रवणगोचरप्राप्तवरप्रदानादिगुणनिचया इन्द्रैरपि आस्ताम् अन्यैः धुतशिरो यथेत्येवं स्तुता श्लाघिता जगतः पवनी पावित्र्यजनिका सकलाघस्य लवनी विच्छेदिका श्रुतदेवी अघेन चितं स्फीतं कलिं कलहं जयतु । आश्रितम् अस्मादृशं निर्मत्सरं विदधात्वित्यर्थः ॥

७०. स पुरुषो भस्ममध्ये जुहोति हवनं करोति । खपुष्पम् उच्चिनोति । तथा पङ्कजानि स्थले उच्चिनोति । यः श्रुतदेवीं मुक्त्वा अन्यां महति पूजयति काङ्क्षति वा । श्रुतदेवीतोन्यासां देवतानाम् आराधनं भस्महुतादिकल्पम् इत्यर्थः ॥

जिणउ । चिणिअं । धुणिअ । सुणिअ । थुणिआ । पुणणी । लुणणी । हुणइ । "चि-जि-श्रु-हु-स्तु-लू-पू-धूगां णो ह्रस्वश्च" [२४१.] ॥ बाहुलकात् क्वचिद् वा । उच्चेइ । उच्चिणेइ ॥

---

१ B °य°. २ B थुहिय. ३ B C °पुलणी. ४ B C सुय°. ५ C भम्भ°.

---

[1] So B C. The *Dhuṇḍhikā* has: एच्च क्त्वातुमूतव्य° [III. 157]। अत् । इ । होऊण । होइऊण ।

लक्खेहिंपि हुणिज्जइ हुव्वइ कोडीहिँ अहव मन्ताणं;
सुअ-देवआ[१] थुणिज्जइ न जा, न ता चिव्वए नाणं. ७१

तेण चिणिज्जइ नाणं, जिव्वइ मोहो, जिणिज्जए कालो,
सुअ[२]-देवी अन्नेहिवि थुव्वन्ता सुव्वए जेण. ७२

स-जसं सयं सुणिज्जइ, लुव्वइ कम्मं, लुणिज्जए पावं,
पुव्वइ[३] अप्पाप्प[४]-कुलं पुणिज्जए, महिअ सुअ-देविं. ७३

भव-भय-धुव्वन्तेहिं पवण-धुणिज्जन्त-तूल-तरलस्स
फलम् आउअस्स चिम्मइ सुअ-देवीए पसाएण. ७४

७१. मन्त्राणां लक्षैर्हूयते। अथ वा कोटिभिर्हूयते। कामपि देवताम् उद्दिश्य होमः क्रियते। परं न यावच्छ्रुतदेवता[१] स्तूयते न तावत् ज्ञानं चीयते वृद्धिम् उपैति। अत्र कर्मकर्तरि क्यात्मनेपदे॥

७२. येन आस्तां यत् स्वयं स्तूयते अन्यैरपि स्तूयमाना श्रुतदेवी श्रूयते[२] तेन पुरुषेण ज्ञानं चीयते स्फीतीक्रियते। मोहः अज्ञानं जीयते पराभूयते तथा कालो मृत्युश्च जीयते अचिराद् मोक्षप्राप्तेः॥

७३. महित्वा पूजयित्वा श्रुतदेवीम् स्वयशः स्वयं श्रूयते। स्वयं श्रोतव्यतया श्लाघ्यं यशस्तेन लभ्यत इत्यर्थः। कर्म लूयते। पापं लूयते। आत्मा पूयते पवित्रः क्रियते। आत्मकुलं पूयते। अर्चकपुरुषेणेति शेषः॥

७४. भवभयेन धूयमानैः कम्पमानपुरुषैः पवनेन धूयमानं यत् तूलं रूतं[३] तद्वत् तरलं चञ्चलं तस्य आयुषः फलं श्रुतदेव्याः प्रसादेन चीयते उपचितं क्रियते। परम[४]पुरुषार्थमहानन्दः प्राप्यत इत्यर्थः॥

१ B C °या. २ B °य°. C °इ°. ३ C पव्वइ. ४ B C अप्पाअप्प°.

1 B श्रु°. 2 B स्तूयते. 3 B C रू°. 4 C चरम°.

चिव्वइ अह न चिणिज्जइ[1], जिव्वइ अहवा जिणिज्जए नावि,
सुव्वइ अह न सुणिज्जइ, हुव्वइ न हुणिज्जए अहवा; ७५
थुव्वइ अह न थुणिज्जइ, पुव्वइ णाइं पुणिज्जए अहवा,
लुव्वइ अह न लुणिज्जइ, धुव्वइ न धुणिज्जए अहवा; ७६
खम्मइ अह न खणिज्जइ, हम्मइ नो वा हणिज्जए[3] जेण
सव्वंपि तस्स सहलं सुअ-देवि-विइण्णं[4]-पुण्णस्स[5]. ७७

७५. त्रिभिर्विशेषकम्। येन चीयते अध्यात्मादिषु उपचितेन भूयते। अथ वा न चीयते। जीयते। इन्द्रियादिषु वशिना भूयत इत्यर्थः। अथ वा नापि जीयते। श्रूयते गुरुमुखात् सर्वशास्त्रेषु श्रवणं क्रियते। अथ न श्रूयते। हूयते हवनं क्रियते अथ वा न हूयते॥

७६. स्तूयते देवतादिषु स्तवनं क्रियते। अथ न स्तूयते। पूयते जलादिना पवित्रेण भूयते। अथ वा न पूयते। लूयते अशुभलवनं क्रियते। अथ न लूयते। धूयते पापरजःप्रकम्पनपरेण भूयते। अथ वा न धूयते॥

७७. खन्यते निध्यादिनिमित्तं भूम्यादिखननं क्रियते। अथ न[1] खन्यते। हन्यते शत्रुविनाशनं क्रियते नो वा हन्यते। परं श्रुतदेवीवितीर्णपुण्यस्य तस्य। अपिरेवार्थे। सर्वमेव सफलम्। यत् किंचित् कुर्वतोपि श्रुतदेवीप्रसादात् सर्वं समीहितं तस्य संजायत इत्यर्थः॥

हुणिज्जइ हुव्वइ। थुणिज्जइ[2] थुव्वन्ता[3]। चिव्वए चिणिज्जइ। जिव्वइ[4] जिणिज्जए। सुव्वए[5] सुणिज्जइ। लुव्वइ लुणिज्जए। पुव्वइ पुणिज्जए। धुव्वन्तेहिं धुणिज्जन्त। चिव्वइ चिणिज्जइ। जिव्वइ जिणिज्जए। सुव्वइ सुणिज्जइ। हुव्वइ हुणिज्जए। थुव्वइ

१ B om. °इ जिव्वइ अहवा जिणिज्ज°. २ C नु. ३ B हणज्जइ. ४ C °न्न°. ५ B C °पुन्न°.

1 B om. अथ न to क्रियते. 2 B om. थुणिज्जइ. 3 B C put थुव्वन्ता before सुव्वए. 4 B om. जिव्वइ जिणिज्जए. 5 B om. सुव्वए.

खम्मइ कुबोह-सेलो, खणिज्जए मूलओवि पाव-तरू,
हम्मइ कली, हणिज्जइ कम्मं सुअ-देवि-झाणेण. ७८
सुअ-देविं झाअन्तो अव्वाहय-भत्ति-निच्चल-मणेण
हम्मइ संसार-दुहं, मोहं हन्तूण हन्तव्वं. ७९
दुब्भउ गाई, वुब्भउ भारो, लिब्भउ खडं च तेणं खु,
पवयण-गाई-बोहि[1]-क्खीरं न दुहिज्जए जेण. ८०

थुणिज्जइ । पुव्वइ पुणिज्जए । लुव्वइ लुणिज्जइ । धुव्वइ धुणिज्जए । "न वा कर्मभावे व्वः क्यस्य च लुक्" [२४२.] ॥

चिम्मइ चिव्वइ चिणिज्जइ । "म्मश्चेः" [२४३.] ॥

७८. श्रुतदेवीध्यानेन कृत्वा पुरुषेण कुबोध एव सन्मार्गरोधकत्वात् शैलः खन्यते विदार्यते । पापमेव अशुभफलदायित्वात् तरुः मूलतोपि खन्यते । कलिः राटिर्हन्यते क्षिप्यते । कर्म ज्ञानावरणादि हन्यते ॥

७९. अव्याहता अखण्डिता या भक्तिस्तस्यां निश्चलं यद् मनस्तेन कृत्वा श्रुतदेवीं ध्यायन् सन् हन्तव्यम् अपायजनकत्वाद् ध्वंसनीयं मोहम् अज्ञानं हत्वा संसारदुःखं हन्ति मोहमूलत्वात् संसारदुःखस्य ॥

खम्मइ । खणिज्जइ । हम्मइ । हणिज्जए । खम्मइ । खणिज्जए । हम्मइ । हणिज्जइ । "हन्खनोऽन्त्यस्य" [२४४.] ॥ बाहुलकात् हन्तेः कर्तर्यपि । हम्मइ ॥ क्वचिन्न । हन्तूण । हन्तव्वं ॥

८०. येन प्रवचनरूपा गौरेव गौः बोधिमेव क्षीरं न दुह्यते क्षार्यते । तेन पुरुषेण खु इति निश्चितम् गौर्दुह्यताम् । भार उह्यताम् । खटस्तृणानि लिह्यताम् । कर्तव्यकरणविकलस्य तस्य आभीरभारवाहकबलीवर्दभाव एव परमार्थत इति भावः ॥

१ B C °बोहि°.

1 B °इ. 2 B C चिणिज्जए. 3 B C °इ. 4 B °इ. 5 B गौरेवेव. 6 C °स्तृणेमे.

जेण वहिज्जइ हिअए[1] सुअ-देवी, तेण रुब्भए कम्मं,

रुन्धिज्जइ कलि-ललिअं, लिहिज्जए अमयम् आकण्ठं. ८१

डज्झइ[2] भवो, डहिज्जइ पावं, ताणं खु बज्झइ[3] न धम्मो,

बन्धिज्जइ[4] जेहि थुई पवयण-देवीइ भावेणं. ८२

भावाउ जाणुरुज्झइ, अणुरुन्धिज्जइ थवाउ[5], पूआए

उवरुज्झइ, उवरुन्धिज्जइ तवओ[6], सा जयउ वाणी. ८३

८१. येन हृदये श्रुतदेवी उह्यते धार्यते तेन पुरुषेण कर्म रुध्यते निवार्यते। कलिललितं कलिकालविजृम्भितं रुध्यते। अमृतम् आकण्ठं लिह्यते आस्वाद्यते। निर्वृतेन भूयत इत्यर्थः॥

दुब्भइ दुहिज्जए। वुब्भइ वहिज्जइ। रुब्भए रुन्धिज्जइ। लिब्भइ लिहिज्जए। "ब्भो दुह-लिह-वह-रुधामुच्चातः" [२४५.]॥

८२. यैर्भावेन प्रवचनदेव्याः स्तुतिर्बध्यते ग्रथ्यते। खु इति निश्चितम्। तैः पुरुषैर्भवो दह्यते भस्मसात् क्रियते। विनाश्यत इति यावत्। पापं दह्यते तथा धर्मो न बध्यते कर्मान्तरेण नावष्टभ्यते॥ ताणं इति तृतीयायाः षष्ठी॥

डज्झइ डहिज्जइ। "दहो ज्झः" [२४६.]॥

बज्झइ[4] बन्धिज्जइ। "बन्धो न्धः[5]" [२४७.]॥

८३. सा वाणी वाग्देवता जयतु सर्वोत्कर्षेण वर्तताम्। या भावाद् अन्तरङ्गबहुमानतः अनुरुध्यते प्रसाद्यते। सुप्रसन्ना क्रियत इति यावत्। स्तवाद्[6] अनुरुध्यते। पूजाया अर्चनाद् उपरुध्यते अनुकूल्यते। तपसो द्वादशविधतपश्चरणाद् उपरुध्यते॥

---

१ B C हियए सुय°. २ B डब्भइ. ३ B C व°. ४ B व°. ५ C थवाअ. ६ B तवड.

[1] B om. this example. [2] B om. this example. [3] B बध्यते. [4] B व°.
[5] B बंधो वः. C बंधो वः. We with A. [6] B स्तावत्.

भत्ती-संरुज्झन्ता, संरुन्धिज्जन्तआण मोहेण
न कहवि अवगम्मन्ती, सुअ-देवी देउ मह बोहिं. ८४
भण्णन्ती सुअ-देवित्ति, भणिज्जन्ती ति-लोअ-माअत्ति,
कम्मेण व भावेणाणुगम्ममाणा, दिसउ कज्जं. ८५
भत्तीए कीरन्तीइ अहीरन्तीइ सइ हरिज्जन्ती,
वेडी-करिज्जमाणा तीरन्ते मोह-जलहिम्मि; ८६

८४. भक्त्या संरुध्यमाना आत्मायत्तीक्रियमाणा। तथा मोहेन संरुध्यमानैर्न कथमपि अवगम्यमाना ज्ञायमाना श्रुतदेवी मह्यं बोधं सर्वपदार्थविषयविज्ञानं ददातु॥

अणुरुज्झइ अणुरुन्धिज्जइ। उवरुज्झइ उवरुन्धिज्जइ। संरुज्झन्ता संरुन्धिज्जन्तआण। "समनूपाद् रुधेः" [२४८.]॥

८५. श्रुतदेवतेति भण्यमाना उत्कीर्त्यमाना त्रिलोकमातेति भण्यमाना। वेति चार्थे। कर्मणा पूजादिक्रियया भावेन अन्तरङ्गब-हुमानेन अनुगम्यमाना आश्रीयमाणा भगवती सरस्वती कार्यं प्रस्ता-वाद् मम कुमारपालस्य विधेयं दिशतु आज्ञापयतु॥

अवगम्मन्ती। भण्णन्ती। भणिज्जन्ती। अणुगम्ममाणा। "गमादीनां द्वित्वम्" [२४९.]॥

८६. अथ कुमारपालभूपस्य कर्तव्यम् उपदिशतीति मनोरथा-नन्तरोपस्थितश्रुतदेवतादर्शनं गाथाषट्केनाह। षड्भिः कुलकम्। अथ प्रयोजनपृच्छानन्तरं प्रशमाक्रान्तस्य उपशमव्याप्तस्य नृपोत्कृष्टस्य भूपपुंगवस्य कुमारपालस्य श्रुतदेवी प्रत्यक्षा दृष्टिगोचरासीत्।

१ B C °याण for °आण. २ B C °लोयमायत्ति.

१ B °याण. २ B C भन्नंती.

अजरिज्जन्त-मयंपि हु जीरन्त-मयं जयंपि पकुणन्ती,
पतरिज्जन्त-भवोदहि-सेऊवम-चरण-रेणु-कणा; ८७

जेहि विढप्पइ कित्ती, विढविज्जइ जेहि उज्जलं नाणं,
अज्जिज्जइ जेहि सिरी, सव्वेहिवि तेहि[1] झायव्वा; ८८

सव्वं णव्वइ जेहिं[2] अणज्जमाणा बुहेहि तेहिंपि,
अमुणिज्जन्त-सरूवा सिद्धेहिवि[3] वाहरिज्जन्ती; ८९

किंभूता । अह्रियमाणया अन्येनानपास्यमानया । निश्चलयेति यावत् । क्रियमाणया विधीयमानया भक्त्या अन्तरङ्गबहुमानेन कृत्वा सदा ह्रियमाणा आवर्ज्यमाना । आत्मसात् क्रियमाणेत्यर्थः । मोहोऽज्ञानम् तदेव जलधिस्तस्मिंस्तीर्यमाणे लङ्घ्यमाने वेडा प्रवहणं क्रियमाणा । संसाराद् उत्तितीर्षुभिराश्रीयमाणेत्यर्थः ॥

८७. हु इति निश्चितम् जगदपि न जनमात्रम् अजीर्यमाणमदमपि अभ्रश्यमानाभिमानमपि जीर्यमाणमदम् । विनयपरम् इत्यर्थः । प्रकुर्वती विदधाना प्रतीर्यमाणः आराधकैर्विलङ्घ्यमानो यो भवोदधिस्तत्र निस्तारकत्वात् सेतूपमाश्चरणरेणुकणा यस्याः सा तथा ॥

८८. यैः कीर्तिरर्ज्यते आसाद्यते यैरुज्ज्वलं निर्मलं ज्ञानम् अर्ज्यते यैः श्रीरर्ज्यते तैः पुरुषैः सर्वैरपि ध्यातव्या ॥

८९. यैः सर्वमपि ज्ञायते तैरपि बुधैरज्ञायमाना एवंस्वरूपेत्यबुध्यमाना । सिद्धैरपि अणिमाद्यैश्वर्यसंपन्नपुरुषैरपि अज्ञायमानस्वरूपा व्याह्रियमाणा भण्यमाना । श्रुतदेवताध्यानेनैव कीर्तिज्ञाने संपद्येते इत्यर्थः ॥

[1] C तेहि. [2] B C जेहि. [3] B सव्वेहिवि. C सद्धेहिवि.

[1] B अह्रियमाणया । ऽन्येनानपा°. C अह्रियमाणयोऽन्यानानपा°. [2] B C °सत्. [3] C °कुत्वात्.

वाहिप्पन्ताढप्पन्त-मङ्गले गिण्हणिज्ज-अभिहाणा,
आढविअ-थुईहि सया सिप्पन्ती, भत्ति-घिप्पन्ती; ९०
सुर-वहु[1]-छिप्पन्त-पया, छिविज्जमाणा थुईहि सुअ[2]-देवी,
पसमाप्फुण्णस्स[3] निवोक्कुसस्स[4] अह आसि[5] पच्चक्खा. ९१

९०. व्याह्रियमाणं नैमित्तिकादिना भण्यमानम् आरभ्यमाणं बन्धवादिना क्रियमाणं च यन्मङ्गलं शुभकार्यं तस्मिन् गृह्यमाणाभिधाना त्वत्प्रसादान्निर्विघ्नं[1] भवत्विति उत्कीर्त्यमाननामा । आरब्धस्तुतिभिः भक्तजनकृतस्तवनैः कृत्वा सदा स्निह्यमाना स्निहेरन्तर्भूतण्यर्थत्वात्[2] स्नेहवती क्रियमाणा । सिच्यमाना स्तावकेन[3] आत्मनि आर्द्रहृदया क्रियमाणा । भक्त्या गृह्यमाणा आत्मसात् क्रियमाणा । न दुराराधेत्यर्थः ॥

९१. सुरवधूभिः स्पृश्यमानौ प्रणामावसरे भालेन घृष्यमाणौ[4] पादौ यस्याः सा । तथा स्तुतिभिः कविस्तोत्रैश्च स्पृश्यमाना विषयीक्रियमाणा ॥

कीरन्तीइ । अहीरन्तीइ । हरिज्जन्ती । करिज्जमाणा । तीरन्ते । अजरिज्जन्त । जीरन्त । पतरिज्जन्त । "हृ-कृ-तृ-ज्रामीरः[6]" [२५०.] ॥

विढप्पइ विढविज्जइ अज्जिज्जइ । "अर्जेर्विढप्पः" [२५१.] ॥

णव्वइ । अणज्जमाणा । अमुणिज्जन्त । "ज्ञो णव्व-णज्जौ" [२५२.] ॥

वाहरिज्जन्ती वाहिप्पन्त । "व्याहृगेर्वाहिप्पः" [२५३.] ॥

आढप्पन्त आढविअ । "आरभेराढप्पः" [२५४.] ॥

सिप्पन्ती । "स्नेह-सिचोः सिप्पः" [२५५.] ॥

गेण्हणिज्ज घेप्पन्ती[5] । "ग्रहेर्घेप्पः[6]" [२५६.] ॥

---

१ B C °बहु°. २ B C सुय°. ३ B °पुण्णस्स. C °पुणस्स. ४ B °कुसस्स. ५ B हासि.

---

1 B C °दार्दानिर्वि°. 2 B C °तेनर्थत्वा° for °ण्यर्थत्वा°. 3 C स्तव°. 4 B घृस्य-माणौ. C घृस्यमाणौ. The emendation is conjectural. 5 C घि°. 6 B C A. °र्घि°.

अणंथक्कन्त-गिराए अमयासाराणुहारिणीइ तदो[1]
इअ उत्तं देवीए वच्छल्लेणं महन्देणं. ९२
तइ इन्दो निच्चिन्दो विहरदु अन्देउरम्मि सो दाव;
इन्दस्स ताव मित्तं हवेसि महि-सामिआ तुमयं. ९३

छिप्पन्त छिविज्जमाणा । "स्पृशेश्छिप्पः" [२५७.] ॥[1]
अप्फुण्ण[2] । उक्कुसस्स । "क्तेनाप्फुण्णादयः" [२५८.] ॥

९२. ततो नृपप्रत्यक्षानन्तरं महता वात्सल्येन अनुकूलतया देव्या श्रुतदेवतया[3] । अमृतस्य आसारः वेगवद्वर्षस्तम् अनुहरति सदृशी-करोतीत्येवंशीला णिनि श्याम् अनुहारिणी तया अफक्कन्ती[4] अन्तरा अत्रुट्यन्ती या गीर्वाक् तया कृत्वा इति वक्ष्यमाणम् उक्तम् ॥

अणथक्कन्त । "धातवोर्थान्तरेपि" [२५९.] ॥ केचित् कैश्चिद् उपसर्गैर्[5][6]नित्यम् । अणुहारिणीइ[7] ॥

[इति] प्राकृतभाषा समाप्ता ॥

तदो । "तो दोऽनादौ शौरसेन्याम् अयुक्तस्य" [२६०.] ॥ अयुक्तस्येति किम् । उत्तं ॥

९३. उक्तमेव गाथाष्टकेनाह । त्वया कृत्वा । तावद् इति अभ्यु-

१ B अन°.

1 B C स्पृश्य°. We with A. 2 B आपुन्न । उक्कोसस्स । क्तेनापुन्नदयः ।. C अ-फुन्न । उक्कोसस्स । क्तेनापुन्नादयः ।. A reads the sútra thus: क्तेनाफुन्नादयः ।. We with Bm. and Pischel. 3 B °देवया. 4 B C अप°. 5 B C उपसर्गे. 6 After उपसर्गे which it reads for उपसर्गैः C differs from B up to the end of the Sarga, giving a different commentary from the latter. See Note at the end of the Sarga. 7 B has अणुहारिणीइ twice.

हंहो मणस्सि रायं जं अव भयवंति विन्नवेदि भवं,

रक्खिवज्जसु तेण तुमं जिण-वइणा मेइणी-मघवं. ९४

अय्यावत्ते सयले कद-कज्जो तं खु थाम-सिरि-णाह

जिण-नाध-सुमरणे इधम् अज्जिद-इह-लोअ-पर-लोअ. ९५

पगमे । ततश्च अभ्युपगतम् एतत् । स विश्वप्रसिद्ध इन्द्रो निश्चिन्तः। एतदरातीनां सकलदानवानां त्वया हननाद् निःशङ्कः सन् अन्तः-पुरे विहरतु रमताम् । तथा तुमयम् इति अयं त्वम् । अथ वा युष्मदः सिना सह तुमयम् इति कश्चित् तदा तुमयम् इति त्वम् । हे महीस्वामिन् पृथ्वीपते इन्द्रस्य तावद् मित्रं बान्धवो भवसि संजातः । भवसीति सत्सामीप्ये[1] [है०. ५. ४] इत्यादिना वर्तमाना ॥

महन्देणं[2] । निच्चिन्दो । अन्देउरम्मि । "अधः क्वचित्" [२६१.] ॥

दाव ताव । "वादेस्तावति" [२६२.] ॥

९४. मनस्विन् अभिमानिन् हंहो राजन् भवान्, अव भगवन् इति, यं विज्ञपयति भक्तिपूर्वं वदति । तेन जिनपतिना मेदिनीमघवन् रक्ष्यस्व त्रायस्व । तेन तव पालनं क्रियताम् इति यावत् ॥

महि-सामिआ । मणस्सि । "आ आमन्त्र्ये सौ वेनो नः" [२६३.] ॥

रायं । "मो वा" [२६४.] ॥

भयवं । भवं । "भवद्भगवतोः" [२६५.] ॥ क्वचिद् अन्यत्रापि । मघवं ॥

९५. स्थामश्रीः पराक्रमलक्ष्मीः तस्या नाथ इह अस्मिन् जगति जिननाथस्मरणे सति अर्जितेहलोकपरलोक सफलीकृतेहपरभव खु निश्चितं सकले आर्यावर्ते समस्तार्यजनपदेषु त्वं कृतकृत्यः निष्पन्न-प्रयोजनः ॥

---

[1] B तत्सा°. C wanting. We with D, A (है० ५. ४). [2] B महंदेण.

तायध समग्ग-पुहविं, तायह सग्गंपि, भोदु तुह भद्दं;
होदु जयस्सोत्तंसो तुह कित्तीए अपुरवाए. ९६
सत्तीइ अपुव्वाए होदूण हरिव्व हविय सेसोव्व
होत्ता भरहोव्व तुमं एग-च्छत्तं कुणसु रज्जं. ९७
करियावणि-उद्धारं, गुरु-भावं गडुय, कडुय बलि-बन्धं,
गच्छिय लच्छिम् उविन्दो भोदि भवं, भोदु इन्द-समो. ९८

अय्यावत्ते कज्जो । "न वा र्यो य्यः" [२६६.] ॥

सिरि-णाह जिण-नाध । "थो धः" [२६७.] । अपदादावित्येव[1] । थाम ॥

९६. हे नरेन्द्र समग्रपृथिवीं त्रायस्व पालय । स्वर्गं दिवमपि त्रायस्व । तथा तव भद्रं भवतु । तव अपूर्वया लोकोत्तरया कीर्त्या कृत्वा जगत उत्तंसः शिरःशेखरश्च भवतु ॥

इधम्[2] इह । तायध तायह । "इह-हचोर्हस्य" [२६८.] ॥

भोदु होदु । "भुवो भः" [२६९.] ॥

९७. अपूर्वया शक्त्या पराक्रमेण कृत्वा हरिः इन्द्रः कृष्णो वा स इव भूत्वा संपद्य शेषः अनन्तः स इव भूत्वा भरतः आद्यश्चक्री स इव भूत्वा च त्वम् एकच्छत्रं राज्यम् आधिपत्यं कुरु ॥

अपुरवाए अपुव्वाए । "पूर्वस्य पुरवः" [२७०.] ॥

होदूण । हविय । होत्ता । "क्त्व इय-दूणौ" [२७१.] ॥

९८. अवनेः उद्धारं द्विपद्विपज्ज्यो रक्षणं कृत्वा गुरुभावं[3] गत्वा बलिनां बन्धं कृत्वा लक्ष्मीं गत्वा आसाद्य च भवान् उपेन्द्रो भवति । यतः सोपि कृतप्रलयकालसमुद्रमग्नपृथिव्युद्धारः बलिबन्धने संजातमहाप्रमाणः विहितबलिदानवबन्धः समासादितलक्ष्मीकश्चेति । तथा भवतु भवान् इन्द्रसमः । परमैश्वर्येण अधुना शक्रकल्पः संजायताम् इति भावः ॥

---

[1] B D °दादिसे°. [2] B D इध. [3] D °वं गौरवं ग°.

अम्हेहि तुह पसंसा किज्जदि, अन्नेहि किज्जदे न कहं,

किती रमिस्सिदि[1] तुहा सग्गादु रसातलादोवि. ९९

दाणिं तुह तुट्ठा, ता देमि वरं इअ तुमंम्मि जुत्तम् इमं,

जुत्तं णिमं खु, मग्गसु, इह किं णेदंति मा चिन्त. १००

भणिओ निवो किम् एदं तिहुयण-रज्जंपि तुमइ तुट्ठाए,

तुज्झय्येव पसाया सुरीओ हञ्जेत्ति भणन्ति. १०१

करिअ । गड्डुअ । कड्डुअ । गच्छिअ । "कृ-गमो डडुअः" [२७२.] ॥

भोदि । "दिरिचेचोः" [२७३.] ॥

९९. हे महाराज अस्माभिः । सकललोकनमस्करणीयाभिरित्यर्थः । तव प्रशंसा श्लाघा क्रियते अतः कथम् अन्यैर्विबुधैः न क्रियते । अपि तु विधीयत एव । तथा तव कीर्तिः आ स्वर्गाद् आ रसातलादपि स्वर्गं रसातलं च व्याप्य रमिष्यते विचरिष्यति ॥

किज्जदि । किज्जदे । " अतो देश्च " [२७४.] ॥ अत इति किम् । भोदि ॥

रमिस्सिदि[2] । "भविष्यति स्सिः" [२७५.] ॥

सग्गादु । रसातलादो । "अतो ङसेर्डादो-डादू" [२७६.] ॥

१००. हे नृप इदानीं तव तुष्टा । तस्मात् त्वयि वरं ददामीति युक्तम् इदम् । युक्तं भगवत्या वरवितरणम् । परम् अहं कथं याञ्चां करोमीत्याह । खु इति निश्चितम् युक्तम् इदम् । ममपार्श्वाद् याचनं समुचितम् इति भावः । अतो मार्गय वरं याचस्व । इह मयि विषये किम् एतद् इति मा चिन्तय । अस्याः सकाशात् किं वरमार्गणेन इतीदं मा पर्यालोचयेति भावः ॥

दाणिं । "इदानीमो दाणिं" [२७७.] ॥

ता । "तस्मात् ताः" [२७८.] ॥

१०१. हे भगवति त्वया तुष्टया किम् एतद् वरप्रदानमात्रम् । न किंचिद् इत्यर्थः । यतस्त्रिभुवनराज्यमपि । आस्तां पृथिवीपतित्वमा-

१ B D रमिस्सदि; C रम्मिसिदि.

1 B D सर्गो°.　2 B D रमिस्सदि ।.

हीमाणहे देवि तुमं सि दिट्ठा, हीमाणहे हं चकिदो भवादो,
णं अम्महे किंवि[1] भणोपदेसं[2] हीही भणन्तावि समन्ति जेण. १०२

त्रम् इति नृपो भणितः विज्ञपयितुम् आरब्धवान् । तथा तवैव प्रसादात् सुर्यो देव्यः हञ्जेत्ति हे चेटिका इति भण्यन्ते चेटिकावद् आहूयन्त इत्यर्थः ॥

जुत्तमिमं जुत्तं णिमं । किं णेदं किमेदं । "मोन्त्याण्णो वेदेतोः" [२७९.] ॥
तुज्झय्येव । "एवार्थे य्येव" [२८०.] ॥
हञ्जेत्ति । "हञ्जे चेट्याह्वाने" [२८१.] ॥

१०२. हीमाणहे इति आश्चर्ये[1] । देवि[2] श्रुतदेवते त्वं दृष्टा विलोकिता असि भवसि । हीमाणहे इति निर्वेदे । अतः निर्विण्णत्वाद् अहं भवात् चकितस्त्रस्तः । णमिति नन्वर्थे । अम्महे इति हर्षे । ततः हे भगवति ननु सहर्षं कमपि कंचन उपदेशं भण आदिश । येन उपदेशेन कृत्वा । हीहीति विदूषकाणां हर्षद्योतने । ततो हीही भणन्तः हर्षेण हीहीशब्दं कुर्वन्तः निरन्तरं हसनशीला विदूषका अपीत्यर्थः । शाम्यन्ति उपशमिनो भवन्ति । भण उपदेशम् इत्यनेन उत्तरसर्गार्थसूचनम् । इन्द्रवज्रा छन्दः ॥

हीमाणहे । हीमाणहे । " हीमाणहे विस्मय-निर्वेदे " [२८२.] ॥
णं । " णं नन्वर्थे " [२८३.] ॥
अम्महे । "अम्महे हर्षे" [२८४.] ॥
हीही ॥ "हीही विदूषकस्य" [२८५.] ॥

"शेषं प्राकृतवदिति[3]" [२८६.] । शौरसेन्यां यत् कार्यम् उक्तं ततोन्यत् प्राकृतवदिति । अतः जेणेति "टा-आमोर्णः" [३.६.] । "टा-ण-शस्येत्" [३.१४.] च प्रवर्तते ॥

[इति] शौरसेनी भाषा समाप्ता ॥

इत्याचार्यश्रीहेमचन्द्रविरचितश्रीकुमारपालचरितप्राकृतद्व्याश्रय-
महाकाव्यवृत्तौ सप्तमः सर्गः समाप्तः ॥

---

१ C किंपि. २ C भणोवएसं.

---

1 B D आश्चर्य. 2 D हे देवि. 3 A प्राकृतवत्.

कधिदे शुभोवदेशे शलश्शदीए तदो अपस्खलिदे
भव-कस्ट-गिम्ह-पदहण-विघस्टणे शुस्टु-मेघेव. १
अदिशुस्तिदं निविस्टे[1] चदुस्त-वग्गं विवय्यिद-कशाए
शावय्य-योग-लहिदे शाहू शाहदि अणञ्ञ-मणे. २

१. ततः नृपविज्ञप्तिकानन्तरं भवकष्टमेव ग्रीष्मप्रदहनं निदाघसंतापस्तस्य विघट्टने अपनयने सुष्टुमेघ इव वर्षुकजलद इव। अप्रस्खलितः अबाधितः शुभोपदेशः सरस्वत्या कथितः प्रतिपादितः॥

कधिदे। शुभोवदेशे। "अत एत् सौ पुंसि मागध्याम्" [२८७.]॥

शलश्शदीए। "र-सोर्ल-शौ" [२८८.]॥

अपस्खलिदे। कस्ट। "स-षोः संयोगे सोऽग्रीष्मे" [२८९.]॥ अग्रीष्म इति किम्। गिम्ह॥

विघस्टणे। शुस्टु। "ट्ट-ष्ठयोः स्टः" [२९०.]॥

२. उपदेशमेव एकाशीत्या गाथाभिराह। अतिसुस्थितम् अतिसमाहितं यथा भवति एवं निविष्टः धर्मध्याननिरतः अत एव विवर्जितकषायः[1] क्रोधादिरहितः। सावद्ययोगरहितः सपापव्यापारवर्जितः। अनन्यमनाः मोक्षैकतानमानसः साधुः संयतः चतुर्थवर्गं निर्वाणं साधयति निष्पादयति। आत्माधीनम् आधत्त इति यावत्॥

अदिशुस्तिदं। चदुस्त। "स्थ-र्थयोः स्तः" [२९१.]॥

विवय्यिद। शावय्य-योग। "ज-द्य-यां यः" [२९२.]॥

---

१ B D निविट्टे; C निविष्टे.

---

1 D विवर्जितः.

पुञ्ञे निशाद-पञ्ञे सुपञ्जले यदि-पधेण वञ्जन्ते
शयल-यय-वश्चलत्तं गश्चन्ते लहदि पलम-पदं. ३

श-पल-विव‌ꣳका-लहिदे पेस्कन्ते सव्वम् ओल्ल-दिस्टीए
मिद-पियम् आचस्कन्ते चिष्ठदि मग्गम्मि मो‌ꣳकस्स. ४

एदस्स वधं कलिमो भत्तिं एदाह इदि मदी जाहँ[1]
ताणं दोण्हंपि हगे हिदेत्ति बुद्धी पेउहव्वा[2]. ५

३. पुण्यः सुकृती निशातप्रज्ञः कुशाग्रीयबुद्धिः सुप्राञ्जलः कौटिल्यरहितः यतिपथेन साधुमार्गेण व्रजन् प्रयान् सकलजगद्वत्सलत्वं त्रिजगदानुकूल्यं च गच्छन् समाचरन् सन् पुरुषः परमपदं मुक्तिं लभते प्राप्नोति ॥

अणञ्ज-मणे । पुञ्ञे । पञ्ञे । सुपञ्जले । "न्य-ण्य-ज्ञ-ञ्जां ञ्जः" [२९३.] ॥

वञ्जन्ते । "व्रजो जः" [२९४.] ॥

गश्चन्ते । "छस्य श्चोनादौ" [२९५.] ॥ लाक्षणिकस्यापि । वश्चलत्तं ॥

४. स्वपरविवक्षारहितः शत्रौ मित्रे च समभावः । अत एव सर्वं समस्तलोकम् आर्द्रदृष्ट्या सकरुणदृशा प्रेक्षमाणः विलोकयन् मितं प्रियं च आचक्षाणः वदन् मोक्षस्य मार्गे पदव्यां तिष्ठति ॥

विव‌ꣳका । मो‌ꣳकस्स । "क्षस्य ‌ꣳकः" [२९६.] ॥

पेस्कन्ते । आचस्कन्ते । "स्कः प्रेक्षाचक्षोः" [२९७] ॥

चिष्ठदि । "तिष्ठश्चिष्ठः" [२९८.] ॥

५. एतस्य वधं कुर्मः भक्तिम् एतस्य कुर्मः इति मतिः आत्मानं प्रति एवं बुद्धिर्ययोः । ताणं दुण्हमिति षष्ठीसप्तम्योः अर्थे प्रत्ययभेदात् तयोर्द्वयोरपि विषये अहं वयं वा इति हिता बुद्धिः प्रयोक्तव्या ।

---

[1] None of the three MSS. have taken care to distinguish all cases of *anunâsika* by the particular concave mark. [2] B. D. पउदव्वा.

पञ्ञान राचिञ्ञा गुन-निधिना रञ्ञा अनञ्ञ-पुञ्ञेन
चिन्तेतव्वं मतनाति-वेरिनो किल विजेतव्वा. ६
सुद्धाकसाय-हितपक-जित-करन-कुटुम्ब-चेसटो योगी
मुक्क-कुटुम्ब-सिनेहो न वलति गन्तून मुक्ख-पतं. ७

अहमेवायं वयमेव एते इत्यनुकूलः अभेदभावः करणीय इत्यर्थः। अत्र भक्तिकरणमतौ इति उपमानार्थः । अन्यथा भक्तिं चिकीर्षौ सर्वस्यापि आत्मभावो भवत्येव। ततश्च यथा भक्तिं चिकीर्षौ आत्म-भावस्तथा जिघांसावपि कर्तव्य इति भावः॥

एदस्स एदाह। "अवर्णाद्वा ङसो डाहः" [२९९.]॥

जाहँ[1] ताणं। "आमो डाहँ वा" [३००.]॥

हगे। "अहं-वयमोर्हगे" [३०१.]॥

"शेषं शौरसेनीवत्" [३०२.]। मागध्यां यदुक्तं ततोन्यत् शौरसेनीवद् द्रष्टव्यम्। अतः हिदेत्ति। "तो दोऽनादौ°" [४.२६०.] इति तस्य दः॥ पयोदव्वा। "अधः क्वचित्" [४.२६१.] इति तस्य दः॥

[इति] मागधी भाषा समाप्ता॥

६. प्राज्ञानां राज्ञा विचक्षणाधीशेन गुणनिधिना गाम्भीर्यौदार्यधैर्यादिशेवधिना। न अन्यः पुण्यो यस्मात् स तथा। तेन राज्ञा नृपेण मदनादिवैरिणः आन्तराः षट् शत्रवः किल इति प्रसिद्धौ विजेतव्याः अभिभवनीया इति चिन्तयितव्यं पर्यालोच्यम्॥

पञ्ञा। "ज्ञो ञ्ञः पैशाच्याम्" [३०३.]॥

राचिञ्ञा। [रञ्ञा।] "राज्ञो वा चिञ्" [३०४.]॥

अनञ्ञ-पुञ्ञेन। "न्य-ण्योर्ञ्ञः" [३०५.]॥

गुन। वेरिनो। "णो नः" [३०६.]॥

मतनाति। विजेतवा। "त-दोस्तः" [३०७.]॥

किल। "लो लः" [३०८.]॥

७. शुद्धं निर्मलम् अकषायं क्रोधादिरहितं हृदयं यस्य। अत

1 B C D जाणं.

यन्ति कसाया नत्थून यन्ति नद्धून सव्व-कम्माइं
सम-सलिल-सिनातानं उज्झित-कत-कपट-भरियान. ८

यति अरिह-परम-मन्तो पढिय्यते[१], कीरते न जीव-वधो,
यातिस-तातिस-जाती ततो जनो निव्वुतिं याति. ९

एव करणानि इन्द्रियाणि तान्येव आत्मनो मोहजननात् कुटुम्बं तस्य चेष्टा स्वस्वविषये व्यापारः। जिता परास्ता करणकुटुम्बचेष्टा च येन स तथा। मुक्तकुटुम्बस्नेहः परित्यक्तबन्धुवर्गानुरागः योगी शुभध्यानैकतानः संयमी मोक्षपदं गत्वा प्राप्य न वलते न संसारे समायाति॥

सुद्धाकसाय। "श-षोः सः" [३०९.]॥

हितपक। "हृदये यस्य पः" [३१०.]॥

कुतुम्ब कुटुम्ब। "टोस्तुर्वा" [३११.]॥

गन्तून। "क्त्वस्तूनः" [३१२.]॥

८. शम एव कोपसंतापहारकत्वात् सलिलम्। तेन स्नातानाम्। निर्धूतान्तरकुवासनामलानाम् इत्यर्थः। उज्झिता त्यक्ता कृतकपटा[1] दर्शितालीकस्नेहत्वाद् रचितनिकृतिः भार्या यैस्तेषां पुरुषाणां कषाया नष्ट्वा तान् मुक्त्वा यान्ति गच्छन्ति सर्वकर्माणि च नष्ट्वा यान्ति॥

नत्थून। नद्धून। "ट्वून-त्थूनौ ष्ट्वः" [३१३.]॥

चेसटो। सिनेहो। सिनातानं। भरियान। "र्य-स्न-ष्टां रिय-सिन-सटाः क्वचित्" [३१४.]॥

९. यदि अर्हताम् इत्युपलक्षणम्। अर्हदादीनाम् इत्यर्थः। परममन्त्रः। पञ्चपरमेष्ठिनमस्कार इति भावः। पठ्यते परावर्त्यते। जीववधश्च न क्रियते। ततः अर्हदादिमन्त्रगुणनात् जीववधविरतेर्वा यादृशतादृशजातिः हीनोत्तमकुलोपि जनो निर्वृतिं याति॥

पढिय्यते[2]। "क्यस्येय्यः" [३१५.]॥

---

१ B D पठि°.

---

1 B C कृतकपटपटा. 2 B C पठि°.

अच्छति रञ्ञे सेलेवि अच्छते दृढ-तपं तपन्तोवि;
ताव न लभेय्य मुत्कं याव न विसयान तूरातो. १०
तूरातु नेन घेप्पति मुत्ति-सिरी नाइ योग[1]-किरियाए
चत्तारि-मङ्गलं-पभुति[1]-मन्तम् उक्खोसमानेन. ११

कीरते । "कृगो डीरः" [३१६.] ॥

यातिस । तातिस । "यादृशादेर्दुस्तिः" [३१७.] ॥

याति । "इचेचः" [३१८.] ॥

१०. अरण्य आस्ते शैलेपि आस्ते दृढं तीव्रं तपस्तप्यमानोपि कुर्वन्नपि । परं तावद् न मोक्षं लप्स्यते प्राप्स्यति यावद् विषयाणाम् । "क्वचिद् द्वितीयादेः" [३.१३४] इति पञ्चम्याः स्थाने षष्ठी । अतः विषयेभ्य इत्यर्थः । न दूरात् । विषयेषु यावद् न विरज्यतीत्यर्थः ॥

अच्छति । अच्छते । "आत् तेश्च" [३१९.] ॥ आत इति किम् । याति ॥

लभेय्य । "भविष्यत्येय्य एव" [३२०.] ॥

११. चत्तारिमङ्गलम् इति पदं प्रभृति यस्य चत्तारिमङ्गलं अरहन्तामङ्गलं इत्यादिदण्डकस्य स तथा । स चासौ मन्त्रश्च तम् उद्घोषता उच्चरता तेन सर्वोत्कृष्टपुरुषेण तया योगक्रियया अर्हदादिध्यानानुष्ठानेन कृत्वा दूराद् मुक्तिश्रीः गृह्यते । अनासन्नापि सिद्धिः आत्मसात् क्रियत इति भावः ॥

तूरातो । तूरातु । "अतो ङसेर्डातो-डातू" [३२१.] ॥

नेन । नाए । "तदिदमोष्टा नेन स्त्रियां तु नाए" [३२२.] ॥

"शेषं शौरसेनीवत्" [३२३.] । पैशाच्यां यद् उक्तं ततोन्यत् शौरसेनीवत् ज्ञेयम् । तदुदाहरणानि चात्र स्वयम् अभ्यूह्यानि ॥

योग-किरियाए । पभुति । "न क-ग-च-जादि॰" [३२४.] इत्यनेन कगचजादीत्यादिषट्शम्यन्तइत्याद्यन्तसूत्रैर्यदुक्तं तत् न भवति ॥

[इति] पैशाची भाषा समाप्ता ॥

---

१ B C जोग.

1 B C D पभिति.

वॅन्थू[1] सठासठेसुवि आलम्पित-उपसमो अनालम्फो
सव्वञ्ञ-लाच-चलने अनुझायन्तो हवति योगी. १२
झॅच्छर[2]-डमरुक-भेरी-ढक्का-जीमूत-गफिर-घोसावि
बम्ह-नियोजितम् अप्पं जस्स न दोलिन्ति सो धॅञ्ञो[3]. १३
उब्भिय-बाह, असारउ सव्वुवि, म भमि कु-तित्थिअ-पॅट्टॅ[4] मुहिआ,
परिहरि तृणु जिम्वँ सव्वुवि भव-सुहु, पुॅत्ता तुह मइ एउ कहिआ. १४

१२. सर्वज्ञराजचरणान् अनुध्यायन् योगी अशठेषु अमायाविषु शठेष्वपि बन्धुः हितपरत्वाद् बान्धवकल्पः आलम्बितोपशमः आश्रितशान्तभावः। अनारम्भः विवर्जितसावद्यव्यापारः अनालम्भो वा परित्यक्तजीववधो भवति ॥

उक्खोसमानेन। वन्थू। आलम्पित[1]। अनालम्फो। सव्वञ्ञ-लाच। "चूलिकापैशाचिके तृतीय-तुर्ययोराद्य-द्वितीयौ" [३२५.] ॥

सव्वञ्ञ-लाच-चलने। "रस्य लो वा" [३२६.] ॥

१३. झच्छरश्च[2] अडाउजेति प्रसिद्धः। डमरुकश्च भेरी च दुन्दुभिः ढक्का च पटहः। तेषां जीमूतवद् ये गम्भीरा मन्द्रा घोषाः शब्दा अपि। आस्तां रूपादयः। ब्रह्मनियोजितम् आत्मानं यस्य न दोलयन्ति न चालयन्ति। शब्दादिविषया यदात्मानं परमतत्त्वलीनं न क्षोभयन्तीति यावत्। स धन्यः ॥

झच्छर[3]। डमरुक। भेरी। ढक्का। जीमूत। गफिर। घोसा। नियोजितं। "नादियुज्योरन्येषाम्" [३२७.] ॥

"शेषं प्राग्वदिति" [३२८.] ॥ धञ्ञो इत्यत्र "न्यण्योर्ञः" [४.३०५.] ॥

[इति] चूलिकापैशाचिकभाषा समाप्ता ॥

१४. हे पुत्र त्वं मया ऊर्ध्वबाहु यथा भवति एवमीदृक् एवंविधं

१ C D वंधू. २ B C त्सच्छर. ३ B C धन्नो. ४ C पठें D पट्टे. ५ B पुत्ता ह मइ एहउ.

1 B आलंविता. 2 B C त्सच्छर°. 3 B C त्सच्छर°.

गङ्गहे जॅम्बुँणहे भीतरु[1] मेल्लइ, सरसइ-मज्झि हंसु जइ झिल्लइ,
तय सो केत्थुवि रमइ पहुत्तउ जित्थु ठांइ[2] सो मुक्खु निरुत्तउ. १५

केणवि जोग-पओगेण कहवि हु घरि रुद्धे सव्वेहिँवि वारिहिँ
जोअन्तहेवि निहेलण-नाहहु घर-सव्वस्सुवि निज्जइ चोरेहिं.१६

कथितः । किं तत् तद् आह । सर्वमपि पुत्रमित्रकलत्रादिकम् असारं संसारदुःखात्राणतया तुच्छम् । तथा कुतीर्थिकपृष्ठेन मुधा मा भ्रम । परमपुरुषार्थलिप्सुः पाषण्ड्याश्रितो मा भूद् इति भावः । तथा तृणमिव सर्वमपि भवसुखं स्रक्चन्दनवनितादिविषयशर्म परिहर । मा अत्र इच्छां कृथा इत्यर्थः । वदनकं छन्दः ॥

बाह । अप्पेॅं । "स्वराणां स्वराः प्रायोपभ्रंशे" [३२९.] ॥

पुत्ता । कहिआ । "स्यादौ दीर्घ-ह्रस्वौ" [३३०.] ॥

असारउ । सव्वु । तृणु । सव्वु । भव-सुहु । "स्यमोरस्योत्" [३३१.] ॥

१५. गङ्गायाः इडाया यमुनायाः पिङ्गलाया भीतरु इति शीघ्रादित्वाद् अभ्यन्तरं हंसः आत्मा मुञ्चति । ततः सरस्वत्यां सुषुम्णायाम् । मध्यमायाम् इति यावत् । हंसो यदा झिल्लइ इति तक्षादित्वात् स्नाति । तदा स हंसः कुत्रापि कस्मिन्नपि स्थाने प्रभूतः प्राप्तः सन् रमते क्रीडति । यत्र सः अनाख्येयः मोक्षः महानन्दः । निरुत्तउ इति शीघ्रादित्वाद् निश्चिन्तस्तिष्ठति । यद् उक्तम् मध्यमा सुषुम्णाख्याता सिद्धिनिर्वाणकारणम् इति । इडापिङ्गलामध्यम् अपास्य यदा आत्मा सुषुम्णाभ्यन्तरम् आसादयति तदा सर्वत्र समभावत्वाद् मुक्तिम् आप्नोतीत्यर्थः ॥

इडा गङ्गेति विज्ञेया पिङ्गला यमुना नदी ।
मध्ये सरस्वतीं विद्यात् प्रयागः संगमो मतः ॥

इति वाक्याद् गङ्गादीनाम् इडादिपर्यायत्वं बोद्धव्यम् ॥

हंसु । सो । सो । मोक्खु । "सौ पुंस्योद् वा" [३३२.] ॥ पुंसीति किम् । भीतरु ॥

१६. केनापि अनाख्येयेन योगप्रयोगेण बाह्यविनिवृत्तिरूपसमा-

१ B C भित्तरु. २ D ठाइ.

करणाभासहुँ मणु उत्तारओ,[१] करणाभासेहिँ मुक्खु न कसु हि वि;
आसणु सयणुवि सव्वहो करणेहिँ, करणहुँ मुक्खु तो निरु सव्वस्सुवि.

धिविधानेन हेतुना कथमपि महता प्रयत्नेन सर्वैरपि आत्मनो बाह्यार्थं प्रति प्रवृत्तिहेतुत्वाद् द्वारैरिव द्वारैः। करणैरित्यर्थः। कृत्वा गृहे शरीरे रुद्धे नियन्त्रितेपि परं द्योतमानादपि जाग्रतोपि। सावधानादपीत्यर्थः। निहेलणेति[1] देश्यो गृहे। तस्य नाथः आत्मा तस्माद् गृहस्य शरीरस्य सर्वस्वमपि तत्स्थात्मगत[2]समस्तज्ञानादिकमपि न तु स्तोकस्वं चौरैः रागादिभिर्नीयते गृह्यते। रागादियुक्तस्य तादृगपि ध्यानं न स्वार्थसंसिद्धये अलं भवतीति भावः। यत्र किल गृहे द्वाराणि स्थगितानि भवन्ति गृहपतिश्च जाग्रद् भवति तत्र नान्यचौरावकाशः। रागद्वेषादिचौरास्तु एवमपि प्रभवन्तीति ज्ञानादिरक्षणाय रागद्वेषादय एव हन्तव्या इति भावार्थः॥

केण। पओगेण। "एट्टि" [३३३.]॥

घरि। रुद्धे। "ङिनेच्च" [३३४.]॥

सव्वेहिँ। वारिहिँ। "भिस्येद् वा" [३३५.]॥

जोअन्तहे। निहेलण-नाहहु। "ङसेर्हे-हू" [३३६.]॥

१७. भो लोकाः करणाभासेभ्यः यथोक्तपद्मासनादिविपरीतासनेभ्यः मनः उत्तारयत व्यावर्तयत। तानि मा कुरुतेत्यर्थः। हि यस्मात् कारणात् करणाभासैः कृत्वा न कस्यापि मोक्षः निर्वृतिर्भवति। तथा सर्वस्य योगिनः करणैः प्रशस्तपद्मासनादिभिः कृत्वा आसनं लगंडादिभिश्च कृत्वा शयनं निद्रा भवति। ततः तस्मात् करणेभ्यः सर्वस्यापि निरु इति निश्चितम् मोक्षः। निषिद्धासनपरिहारेण कर्मक्षपणार्थं पद्मासनादीनि कुर्वन् मुक्तिम् आप्नोतीत्यर्थः॥

करणाभासहुं। "भ्यसो हुं" [३३७.]॥

कसु। सव्वहो। सव्वस्सु। "ङसः सु-हो-स्सवः" [३३८.]॥

१ B C °ओ D °उ. The text requires °हु.

1 B C D निहलणेति. 2 D तत्स्वात्म°.

विसयहँ पर-वस मच्छहु मूढा, बन्धुहुँ सहिहुँवि घङ्घलि वूढा;
दुहुँ ससि-सूरिहि मणु संचारहु, बन्धुहँ सहिहँव वढ विणु सारहु.१८
गिरिहेँवि आणिउ पाणिउ पिज्जइ, तरुहेँवि निवडिउ फलु भक्खिज्जइ,
गिरिहुँव तरुहुँव पडिअउ अच्छइ, विसयहिं तहवि विराउ न गच्छइ.
जइ हिम-गिरिहि चडेविणु निवडइ, अह पयाय-तरुहिवि ईक्क[1]-मणु,
निक्कइअवें विणु समयाचारेण विणु मण-सुद्धिएँ लहइ न सिवु जणु.

१८. भो मूढाः विषयाणां परवशाः बन्धूनां बान्धवानां सखीनां मित्राणामपि । घङ्घलेति शीघ्रादित्वात् झगटके । मोहे इत्यर्थः । क्षिप्ताश्च पतिता माध्वम् । तर्हि किं कुर्म इत्याह । द्वयोः शशिसूरयोः इडापिङ्गलयोः मनः संचारयत शुभभावाय तदन्तर्निवेशयत । तथा "तृतीयायाः षष्ठी" [३. १३४] इति तृतीयायाः षष्ठी । अतो बन्धुभिः सखिभिश्च विना । वढेति शीघ्रादित्वात् मूढाः सारयत । धातूनाम् अनेकार्थत्वात् तिष्ठत ॥

विसयहं । "आमो हं" [३३९.] ॥

बन्धुहुं । सहिहुं । बन्धुहं । सहिहं । "हुं चेदुद्भ्याम्" [३४०.] ॥ प्रायोधिकारात् क्वचित् सुपोपि हुं । दुहुं ॥

१९. गिरेरपि आनीतं पानीयं पीयते तरोरपि निपतितं फलं भक्ष्यते । तथा गिरिभ्यस्तरुभ्यो वा पतित्वा आस्ते तथापि विषयेषु न विरागं गच्छति। वनवासः कालिंजरगिर्यादिप्रयागवटवृक्षादिपातोपि च सुकरः । विरागवासना पुनर्दुःकरेति भावः ॥

२०. यदि हिमगिरौ आरुह्य अथ प्रयागतरौ प्रयागवटेपि आरुह्य एकमनाः । पतने कृतनिश्चय इत्यर्थः । निपतति तथापि निष्कैतवेन समयाचारेण विना मनःशुद्ध्या च विना न शिवं जनो लभते । गिरितरुभ्यः पातः केवलम् अङ्गभङ्गाय । सिद्धान्तोक्तानुष्ठानरागद्वेषराहित्ये च मुक्तये ज्ञेये इति भावार्थः ॥

[1] D एक्क°.

विणसइ माणुसु विसयासत्तिं डज्झइ तरु-गण जिम्वँ दावग्गिण,

विसु जिम्वँ विसय पमिल्लिउ दूरें, अच्छहु चित्तें जोअ-विलग्गेण. २१

विसय म पसरु निरङ्कुसु दिज्जउ लोअहो, विसएहिँ मणु कड्डिज्जइ;

मणु थम्भेविणु पवणि निजोजहु, मण-पवणिहिँ रुद्धहिँ सिज्झिज्जइ.

गिरिहे । तरुहे । गिरिहुं । तरुहुं । हिम-गिरिहि । पयाय-तरुहि । "ङसि-भ्यस्-ङीनां हे-हुं-हयः" [३४१.] ॥

निक्कइअवें । समयाचारेण । "आट्टो णानुस्वारौ" [३४२.] ॥

२१. यथा दावाग्निना तरुगणा दह्यन्ते विनाश्यन्ते तथा विषयासक्त्या मनोज्ञशब्दादिलाम्पट्येन कृत्वा मानुषो विनश्यति । तथा विषं यथा विषयान् दूरेण प्रमुच्य योगविलग्नेन समाधिलीनेन चित्तेन आध्वं तिष्ठत ॥

मण-सुद्धिएँ । विसयासत्तिं । दावग्गिण । "एँ चेदुतः" [३४३.] ॥ एवम् उतोपि दृश्याः ॥

माणुसु । तरु-गण । विसु । विसय । "स्यम्-जश्शसां लुक्" [३४४.] ॥

२२. भो लोकाः निरङ्कुशं निरर्गलं यथा भवत्येवं विषयाणां प्रसरः युष्माभिः मा दायि । विषया निरुध्यन्ताम् इत्यर्थः । ननु विषयप्रसरदाने किं भविष्यति इत्याह । विषयैर्मनः कृष्यते । स्वस्मिन् सतृष्णं क्रियत इत्यर्थः । तर्हि किं कुर्म इत्याह । मनः स्तम्भित्वा नियम्य पवने इडापिङ्गलान्तर्वहमानवायौ नियुङ्क्त । मनसा पवनम् अवष्टभ्नीतेत्यर्थः । यतः मनःपवनयो रुद्धयोः मिथः अवष्टब्धयोः सिध्यते मुक्तीभूयते ॥

विसय । "षष्ठ्याः" [३४५.] ॥

लोअहो । "आमन्त्र्ये जसो होः" [३४६.] ॥

विसएहिँ । मण-पवणिहिँ । रुद्धहिँ । "भिस्सुपोर्हिं" [३४७.] ॥

नाडिउ इड-पिङ्गल-पमुहाओ जाणेव्वाओ पवणेणं रुद्धा
ताउ न जाणइ जो सव्वाओ जोगिअ-चरिअएँ चरइ सु मुद्धा. २३

गयण-ढलन्त-सुधा-रस-निकहे अमिअ पिअन्तिहु जोगिअ-पन्तिहु
ससहरु वम्भि धरन्तिहु कच्छवि भउ नोपज्जइ जर-मरणत्तिहु.२४

२३. इडापिङ्गलाप्रमुखा नाड्यः शरीरे अनेकशिरासद्भावेपि त्रिकालज्ञानहेतुत्वेन प्रधानत्वाद् वामदक्षिणमध्यमा धमनयः पवनेन पार्थिवादिवायुपञ्चकेन रुद्धाः प्रत्येकं सार्धघटिकाद्वयं यावद् अवष्टब्धा ज्ञातव्याः । तथा चोक्तम् ।

नाडीमध्ये तथा भुक्तिः सार्धं तु घटिकाद्वयम् ।
घटिकार्धेन भवेद् भूतम् एवं वा लक्षयेद् बुधः ॥

एकैका नाडी सार्धं घटिकाद्वयं संततं वहति । तत्रापि पञ्चापि पार्थिवादिवायवः स्वस्वभुक्तिं भुञ्चते । सा च कियती भवति । पञ्चानामपि प्रत्येकं घटिकार्धं भुक्तिर्भवति । भवन्ति च पञ्चघटिकार्धानि सार्धघटिकाद्वये इति अस्यार्थः । ता इडाद्या नाडीः सर्वाः समस्ता यो न जानाति स पुरुषो योगिकचर्यया योगिनाम् आचारेण मुधा निरर्थकं चरति । नाडीपवनसंयोगपरिज्ञानविकलेन बहु क्लिश्यतापि योगः साधयितुं न शक्यते इति भावः ॥

नाडिउ । पमुहाओ । जाणेव्वाओ । ताउ । सव्वाओ । "स्त्रियां जश्शसोरुदोत्" [३४८.] ॥

जोगिअ-चरिअए । "ट ए" [३४९.] ॥

२४. गगनं ब्रह्मरन्ध्रम् दशमद्वारम् इति यावत् । तस्मात् ढलन्तीति तक्षादित्वात् [४.३९५] क्षरन् वहन् सुधारसो यस्यां सा तथा । सा चासौ नीका च इडाख्या वामनासिका । तस्याः सकाशात् तत्संबन्धि वा अमृतं पिबन्तीनाम् आस्वादयन्तीनां शशधरम् इडाख्यां नासिकां ब्रह्मणि दशमद्वारे धरन्तीनाम् अमृतक्षारणाय निवेशयन्तीनां यो-

१ B C D जाणेवाओ. २ B D चरिए.

वज्जइ वीणा अदिट्ठिहि तन्तिहि, उट्ठइ रणिउ हणन्तउँ ठाणइं;
जहि वीसाम्वुँ लहइ तं झायहु मुत्तिहे कारणि चप्फल अन्नइं. २५

जो जहाँ होतउ सो तहाँ होतउ सत्तुवि मित्तुवि किहेँवि हु[1] आवउ;
जहिँवि[2] हु तहिँवि हु मग्गे लीणा एक्कएँ दिट्ठिहि दोन्निवि जोअहु.२६

गिपङ्क्तीनां क्वापि कस्मिन्नपि स्थाने जरामरणार्तिभ्यो भयं न भवति। उक्तरीत्या अमृतपानं योगिनां मुक्तये संपद्यते इति भावः॥

निक्कहे। "ङस्-ङस्योर्हे" [३९०.]॥

पिअन्तिहु। जोगिअ-पन्तिहु। धरन्तिहु। जर-मरणत्तिहु। "भ्यसामोर्हुः" [३९१.]॥

२५. अदृष्टायाम् इन्द्रियाविषयभूतायां तन्त्र्यां नाडीलक्षणे गुणे वीणा शरीरलक्षणा वल्लकी वाद्यति। परब्रह्मलीनस्य योगिनः स्वयमेव अभिहन्यत इति भावः। ततः स्थानानि उरःकण्ठप्रभृतीनि घ्नत् ताडयत् रणितम् उत्तिष्ठते प्रयत्नम् अन्तरेण उल्लसति। अनाहतो ध्वनिः उत्पद्यत इति यावत्। तथा तदेव रणितं यत्र यस्मिन् स्थाने विश्रामं लभते तद् ध्यायत। ब्रह्मरन्ध्रे मनो नियुङ्क्तम् इत्यर्थः। किमित्येवं कार्यत इत्याह। मुक्तेः कारणे अन्यानि तपउपसर्गसहनप्रभृतीनि कष्टानुष्ठानानि[1] चप्फलेति शीघ्रादित्वात् चाटुफलानि उपचारवाक्यानि असत्यानि वाक्कूटानि। सिद्धिसाधने असमर्थानीति भावः॥

अदिट्ठिहि। तन्तिहि। "ङेर्हिं"[2] [३९२.]॥

ठाणइं। अन्नइं। "क्लीबे जश्शसोरिं" [३९३.]॥

हणन्तउं। "कान्तस्यात उं स्यमोः" [३९४.]॥

२६. यः यस्मात् भवन् जायमानः स तस्मात् कस्मादपि। किंचिदपि कारणम् आश्रित्येति भावः। शत्रुरपि मित्रमपि भवन् संपद्यमानः। हीति स्फुटम्। आवतु प्रतिकूलम् अनुकूलं प्रकर्तुं समीपम् आगच्छतु। परं यस्मिन्नपि तस्मिन्नपि मार्गे लीनाः यदपि तदपि

१ The commentator's text read हि for हु. See commentary. २ B C जहेंवि.

1 B C कष्टानि. 2 A डेहिं. D डेहिं.

कासुवि जासुवि तासुवि पुरिसहों कहेंवि हु जहेंवि हु तहेंवि हु नारिहें
त्रं हितु वयणु चविज्जइ थोवउँ ध्रुं परिणम्वँइ समत्त-पयॅरेहिं. २७

तं वोल्लिअइ जु सच्चु पर, इमु धम्मक्खरु जाणि;
ऍहों परमत्था, एहु सिवु, ऍह सुह-रयणहँ खाणि. २८

जिनशिवादिदर्शनम् आश्रिता इत्यर्थः । एकया दृष्टया समभावेन द्वे अपि शत्रुमित्रे द्योतयतेति । धातूनाम् अनेकार्थत्वात् पश्यत । हुशब्दौ पादपूरणे । एवम् अग्रगाथायामपि हुशब्दाः ॥

जहां । तहां । "सर्वादेर्ङसेर्हां" [३५५.] ॥

किहे । "किमो डिहे वा" [३५६.] ॥

जहिं । तहिं । "ङेर्हिं" [३५७.] ॥

२७. कस्यापि यस्यापि तस्यापि पुरुषस्य अयम् आत्मीयः अयम् अन्यः इत्यभिप्रायपरिहारेण मनुष्यमात्रस्य । सर्वस्येत्यर्थः । कस्या अपि यस्या अपि तस्या अपि नार्याः तद् हितं वचनम् अहिंसाप्रधानो धर्मः क्रियताम् इत्युपदेशः स्तोकं मितं कथ्यते यत् समस्तप्रकारैः करणकारणानुमितिरूपैः परिणमति रोचते ॥

कासु । जासु । तासु । "यत्तत्किंभ्यो ङसो डासुर्न वा" [३५८.] ॥

कहे । जहे । तहे । "स्त्रियां डहे" [३५९.] ॥

२८. यद् वचः अहिंसादिकं सत्यम् अविसंवादि तत् परं केवलं कथ्यते[1] । इति इदं धर्माक्षरं धर्मरहस्यं जानीहि अवगच्छ । तथा एष परमार्थः उत्तमार्थः । एतत् शिवं मङ्गलम् । एषा च सुखान्येव काम्यत्वाद् रत्नानि तेषां खनिः आकरः । यत् सत्यम् उच्यते इति सर्वत्रापि संबन्धः ॥

---

१ C D परिणमइ. This nasal mark (ँ) is not intended to make the vowel अ nasal but is intended to affect the consonant व् and to produce the nasal वँ which is known in Grammar in the vârtika यवलपरे यवला वा and in the example किँव् ह्वलयति. (See ८. ४. ३९७.)

---

1 C कथ्यते इदानीम्.

एइ सुसावग ओइ मुणि, पिच्छह, तवहिँ तवाइं;
आयहोँ जम्महोँ एहु फलु, नायइँ विसय-सुहाइं. २९
साहुवि लोउ तडप्फडइ, सव्वुवि पण्डिउ, जाणु,
कवणुवि एहु न चिन्तवइ काइँवि जं निव्वाणु. ३०

त्रं। ध्रुं। तं। जु। "यत्तदः स्यमोर्ध्रुं त्रं" [३६०.] ॥

इमु। "इदम इमुः क्लीबे" [३६१.] ॥

एहो। एहु। एह। "एतदः स्त्री-पुं-क्लीबे एह एहो एहु" [३६२.] ॥

२९. एतान् सुश्रावकान् अमून् मुनीन् पश्यत। किं पश्याम इत्याह। एते सुश्रावकाः अमी मुनयस्तपांसि एकासनकनिर्विकृति[1]-काचाम्लोपवासरूपाणि तप्यन्ते कुर्वन्ति। अथवा युक्तमेवैतद् यद् एते एवम् अनुतिष्ठन्ति। यतः अस्य जन्मनः परमपुरुषार्थसाधकस्य मानुषत्वस्य एतत्तपस्तपनरूपं फलं साध्यम् एतत्फलपरमपुरुषार्थहेतुत्वात्। न इमानि विषयसुखानि फलम्। परमपुरुषार्थविघातकत्वात् ॥

एइ। "एइर्जश्शसोः" [३६३.] ॥

ओइ। "अदस ओइ" [३६४.] ॥

आयहो। आयइँ। "इदम आयः" [३६५.] ॥

३०. सर्वोपि लोकः तडप्फडइ इति तक्षादित्वात् चपलायते मोक्षनिमित्तं प्रयतते। तथा सर्वोपि पण्डितः विचक्षणोस्तीति त्वं हे नृप जानीहि। परं कोपि एतद् न चिन्तयति न विचारयति। यत् किं[2]मिति किंस्वरूपं निर्वाणम् इति ॥

साहु। सव्वु। "सर्वस्य साहो वा" [३६६.] ॥

कवणु। काइं। "किमः काइं-कवणौ वा" [३६७.] ॥

---

[1] B C °निर्वृकृति°. [2] D किमपि.

सव्वहों कासुवि उवरि तुहुँ एँहुं चिन्तसु निम्मोह,
तुम्हे म निवडहुं भव-गहणि, तुम्हइँ सुहिआ होह. ३१
तुम्हे निक्खउ अप्पु जिँम्वँ, तुम्हइँ जिँम्वँ अप्पाणु,
पइँ अणुसासउँ, पसमु करि, तइँ नेउं अक्खउ ठाणु. ३२
पइँ करिअव्वी जीव-दय, तइँ बोल्लेवउ सच्चु,
पइँ सुहु तइँ कल्लाण तउ, तउ होहिसि कय-किच्चु. ३३
सेवेअव्वा साहु पर तुम्हेंहिं इह जम्मम्मि;
तुज्झु समत्तणु तुध्र खम तउ संजमु चिन्तेमि. ३४

३१. षड्भिः कुलकम् । श्रुतदेवी कुमारपालं प्रति प्राह । हे महाराज अहं युष्माकं बान्धवः स्वजन इति भणित्वा एतद् वक्ष्यमाणं सर्वेषु कथयत यूयम् उपदिशत । किं तद् इत्याह । हे निर्मोह अज्ञानरहित भव्यलोक त्वम् एतद् इदं सर्वस्य कस्यापि उपरि । स्वपक्षे परपक्षे चेत्यर्थः । चिन्तय परिभावय । किं तद् इत्याह । यूयं भवगहने संसारकान्तारे मा निपतत निमज्जत । तथा यूयं सुखिताः कर्माष्टककृतकष्टरहिता भवत ॥

३२. तथा अहम् आत्मानं यथा युष्मान् निरीक्ष्य, युष्मान् यथा आत्मानं निरीक्ष्य । आत्मपरौ समभावेन दृष्ट्वेत्यर्थः । त्वाम् अक्षयं स्थानं परमपदं नेतुं त्वामेव अनुशास्मि शिक्षयामि । किं तद् इत्याह । प्रशमं सर्वत्र समभावं कुरु ॥

३३. तथा त्वया जीवदया कर्तव्या । त्वया सत्यं च कथयितव्यं वक्तव्यम् । ततो जीवदयादेः त्वयि सुखं त्वयि कल्याणं शिवं भविष्यति । ततः कृतकृत्यः विहितपरमपुरुषार्थः भविष्यसि ॥

३४. तथा इह जन्मनि युष्माभिः परं केवलं साधवः महर्षयः

१ B C एहुं. २ B C D निवडउ.

कलि-मलु तुज्झु पणासिही, तउ वच्चेही पावु,

मुक्खुवि तुध्र न दूरि ठिउ, करि धम्मक्खरि ढावु. ३५

तुम्हहं मुक्खु न दूरि ठिउ जइ संजमु तुम्हासु;

हउं तुम्ह बन्धवु इअ भणिवि एँहु जम्पहु सव्वेसु. ३६

अम्हे निन्दउ कोवि जणु, अम्हइं वण्णउ कोवि;

अम्हे निन्दहुं कंवि नवि, नम्हइं वण्णहुं कंवि. ३७

सेवितव्याः पर्युपास्याः। तथा तव सम्यक्त्वं तव क्षमां तव संयमं च चिन्तयामि सुसाधुसेवया अहं परिभावयामि ॥

३५. तथा धर्माक्षरे धर्मप्रतिपादके सिद्धान्ते ढावु इति शीघ्रादित्वात् ग्रहं प्रतिबन्धं कुरु। एवं च त्वत् भवतः सकाशात् कलिमलम् इहजन्मभवं पापं प्रण(न ?)ङ्क्ष्यति। तथा त्वत् पापम् अनन्तपूर्वभवकृतं दुष्कृतं व्रजिष्यति। ततश्च त्वत् मोक्षोपि न दूरे स्थितः। अपि तु समासन्न एव आस्ते। धर्मप्रभावादेव कलिमलनाशः परमपदवीप्राप्तिश्च जायत इत्यर्थः ॥

३६. तथा यदि युष्मासु संयमश्चारित्रं तदा युष्मत् युष्माकं वा मोक्षो न दूरे [स्थितः] ॥

तुहुं। "युष्मदः सौ तुहुं" [३६८.] ॥

तुम्हे। तुम्हइं। तुम्हे। तुम्हइं। "जश्शसोस्तुम्हे तुम्हइं" [३६९.] ॥

पइं। तइं। पइं। तइं। पइं। तइं। "टा-ङ्यमा पइं तइं" [३७०.] ॥

तुम्हेहिं। "भिसा तुम्हेहिं" [३७१.] ॥

तुज्झ। तुध्र। तउ। तुज्झु। तउ। तुध्र। "ङसि-ङस्भ्यां तउ-तुज्झ-तुध्राः" [३७२.] ॥

तुम्हहं। "भ्यसाम्भ्यां तुम्हहं" [३७३.] ॥

तुम्हासु। "तुम्हासु सुपा" [३७४.] ॥

हउं। "सावस्मदो हउं" [३७५.] ॥

३७. षड्भिः कुलकम्। हे कुमारपाल नृप इणपरीति शीघ्रादित्वात्

---

१ D पणंसिही. २ B C ढाउ.

---

1 B C तुहं. 2 B C तुध्रा.

मइँ मिल्लेवा भव-गहणु मइँ थिर एही बुद्धि;
मत्था हत्थउ सु-गुरु मइँ, पावउँ अप्पहो सुद्धि. ३८

अम्हेँहिँ केणवि विहि-वसिण एँहु मणुअत्तणु पत्तु;
मज्झु अदूरे होउ सिवु, महु वच्चउ मिच्छत्तु. ३९

अम्हहँ मोह-परोहु गउ, संजमु हुउ अम्हासु,
विसय न लोलिम महु कराहिँ, म कराहि इअ वीसासु. ४०

अनया रीत्या अनेन भण्यमानप्रकारेण आत्मानं शिक्षय संबोधय। रीतिमेव आह। अस्मान् कोपि जनः निन्दतु जुगुप्सताम्। अस्मान् कोपि जनः वर्णयतु श्लाघताम्। परं वयं नापि कमपि निन्दामः नापि कमपि वर्णयामः। निन्दितरि द्वेषं स्तोतरि रागं च न कुर्म इत्यर्थः॥

३८. मया भवगहनं मोक्तव्यम् इत्येषा मयि स्थिरा अविनश्वरा बुद्धिः। तथा सुगुरुः मां मस्तके हस्तयतु प्रसन्नमना मच्छिरसि हस्तं विदधातु। ततश्च अहम् आत्मनः शुद्धिं नैर्मल्यं प्राप्नोमि॥

३९. अस्माभिः केनापि विधिवशेन शुभकर्मयोगेन एतद् मनुजत्वं प्राप्तम्। तथा मत् मत्सकाशाद् मम वा शिवम् अदूरे निकट एव भवतु। मत् मम वा मिथ्यात्वं व्रजतु। मिथ्यात्वविनाशेन निःश्रेयसं संजायताम् इत्यर्थः॥

४०. अस्मत् अस्मत्सकाशात् अस्माकं वा मोहप्ररोहः अज्ञानोद्भवो गतः विनष्टः। अस्मासु संयमः भूतः संजातः। विषयाश्च न लोलत्वं मम कुर्वन्तीति विश्वासं विश्रम्भं मा कार्षीः। विचित्रा हि कर्मणां गतिः इति चतुर्थपुरुषार्थं साधयिष्यता विषयाणाम् अवकाशः कथंचिदपि न देय इति भावः॥

रे मण करसि कि आलडी, विसया अच्छहु दूरि,

करणइँ अच्छह रुन्धिअइँ, कड्ढउँ सिव-फलु भूरि. ४१

इणपरि अप्पउ सिक्खविसु, तुह अक्खहुँ परमत्थु,

सुमरि जिणागम, धम्मु करि, संजमु वच्चु पसत्थु. ४२

४१. रे मनः किं किमर्थम् आलिं परस्त्र्यादिप्रार्थनरूपानर्थं करोषि। आलिं मा कार्षीरित्यर्थः। तथा रे विषयाः यूयं दूरे आध्वं मद्गोचरे मा आगमत। रे करणानि च रुद्धानि नियन्त्रितानि यूयम् आध्वम्। किमित्येवं नियोग इत्याह। अहं भूरि प्रभूतं शिवफलं कर्षामि आत्मसात् करोमि ॥

४२. तथा जिनागमान् स्मर धर्मं धर्मानुष्ठानं कुरु कुरुष्व वा। प्रशस्तं संयमं च सर्वविरतिं व्रजेति च तव वयं परमार्थम् आचक्ष्महे।

अम्हे। अम्हइं। अम्हे। अम्हइं। "जश्शसोरम्हे अम्हइं" [३७६.] ॥

मइं। मइं। मइं। "टा-ङ्यमा मइं" [३७७.] ॥

अम्हेहिं। "अम्हेहिं भिसा" [३७८.] ॥

मज्झु। महु। "महु मज्झु ङसिङस्भ्याम्" [३७९.] ॥

अम्हहं। अम्हहं। "अम्हहं भ्यसाम्भ्याम्" [३८०.] ॥

अम्हासु। "सुपा अम्हासु" [३८१.] ॥

करहिं। "त्यादेराद्यत्रयस्य बहुत्वे हिं न वा" [३८२.] ॥

करहि। "मध्यत्रयस्याद्यस्य हिः" [३८३.]। पक्षे करसि ॥

अच्छहु। "बहुत्वे हुः" [३८४.]। पक्षे अच्छह ॥

कड्ढउं। "अन्त्यत्रयस्याद्यस्य उं" [३८५.] ॥

अक्खहुं। "बहुत्वे हुं" [३८६.] ॥

सुमरि। करे। वच्चु। "हि-स्वयोरिदुदेत्" [३८७.] ॥

संजम-लीणहों[1] मोक्ख-सुहु निच्छइँ होसइ तासु

पिय वलि कीसु भणन्तिअउ णाइँ पहुच्चेंहि[2] जासु. ४३

सच्चइँ वयणइँ जो ब्रुवइ, उवसमु वुञ्जइ पहाणु,

प्रस्सदि सत्तुवि मित्तु जिम्वँ, सो गृण्हइ निव्वाणु. ४४

तवँ-छुरेँ छोल्लहु अप्पणा कम्म खुडुकन्ताइं

साहुहुँ पासहु सुद्धि-गर सुघें[3] गृण्हिअ वयणाइं. ४५

४३. हे कुमारपाल नृप । इति संबोधनपदम् अग्रेपि आसर्गान्तं योजनीयम् । हे प्रिय वलिः क्रिये हे वल्लभ तव अहम् अवतारणकं विधीये इति भणन्त्यः रागवृद्धये प्रतिपादयन्त्यो वनिताः यस्य न प्रभवन्ति समाधिध्वंसनाय न समर्थाः संजायन्ते । संयमलीनस्य व्रतपरस्य तस्य निश्चयेन निःसंदेहं मोक्षसुखं भविष्यति ।

होसइ । "वर्त्स्यति स्यस्य सः" [३८८.] ॥

कीसु । "क्रियेः कीसु" [३८९.] ॥

पहुच्चहिं । भुवः पर्याप्तौ हुच्चः[1]" [३९०.] ॥

४४. सत्यानि वचनानि यो ब्रूते प्रधानम् उपशमं च यो व्रजति शत्रुमपि मित्रं यथा यः पश्यति स निर्वाणं गृह्णाति आत्मसात् करोति ।

ब्रुवइ । "ब्रूगो ब्रुवो वा" [३९१.] ॥

वुञ्जइ । "व्रजेर्वुञः" [३९२.] ॥

प्रस्सदि । "दृशेः प्रस्सः" [३९३.] ॥

गृन्हइ । "ग्रहेर्गृन्हः" [३९४.] ॥

४५. साधूनां पार्श्वात् । साधुभ्य इत्यर्थः । शुद्धिकराणि ।

पुव्विं दुच्चिन्नाणं दुपडिक्कन्ताणं कम्माणं वेइत्ता ।

मुक्खो न च्छिअवेइत्ता तवसावाज्झोसइत्ता वा ।

१ C लीणस्महो. २ B C D पहुच्चइ. ३ B C सुखें; D सुखे.

1 B C D हुव्वः.

स-भला जीविदु कि न करहा, मन वच्चह अकयत्थ,

पुलय-पफुल्लिअ मणि धरह गुरु-अण-कधिद्-सुअत्थ. ४६

गुरु-बय-अॅम्वँलइँ[१] निवु छिवह भत्तिं सिर-कमलेण,

प्रिउ बोलहु पिउ आचरहु तासुजि उवएसेण. ४७

इत्यादिकर्ममलापासनोपायप्रतिपादकसदुपदेशान् सुखेन गृहीत्वा प्राप्य आत्मीयानि खुड्डुक्कन्ताइं इति अवतरन्ति स्खलन्ति शल्याय-मानानि वा। आत्मनि अवस्थितिं बध्नन्ति बाधां कुर्वन्ति महाव्य-थाजननाद् अन्तःप्रविष्टतोमरादिकल्पानीति क्रमेण तात्पर्यार्थः। कर्माणि तपःक्षुरेण यूयं तक्ष्णुत तनूकुरुत। विनाशयतेति यावत्॥

छोल्लहु। "तक्षादीनां छोल्लादयः" [३९५.]। आदिग्रहणाद् देशीयेषु ये क्रियाव-चना दृश्यन्ते ते उदाहार्याः। यथा खुड्डुक्कन्ताइं। इत्यादि॥

४६. यूयं सफलं जीवितं किं न कुरुत। अपि तु विधत्तेत्यर्थः। तथा अकृतार्थाः असाधितधर्मार्थाः। मन इति देश्यः निषेधार्थः। तथा च प्रयोगः॥ मन विरमउ तुह गुण-गहणि मज्झ जीह मय काल॥ ततो मा व्रजत संसारं पर्यटत। कथं जीवितं सफलं भव-तीत्याह। पुलकैः रोमाञ्चैः प्रफुल्लिताः संजातपुष्पोद्गमा इव गुरुजन-कथितान् धर्माचार्योक्तान् श्रुतार्थान् आगमोक्तजीवाजीवादिपदा-र्थान् मनसि धरत वहत। चित्ताद् मा विस्मारयतेति भावः॥

४७. यूयं शिरःकमलेन भक्त्या गुरुपदकमलानि नित्यं स्पृशत। प्रणामं कुरुतेत्यर्थः। तथा तस्यैव गुरोरेव उपदेशेन शिक्षया प्रियं सर्वस्यापि अनुकूलं कथयत। प्रियं च आचरत अनुतिष्ठत॥

सुद्धि-गर। सुधैं। सभला। जीविदु। कधिद। गुरु-बय। "अनादौ स्वरादसंयु-क्तानां क-ख-त-थ-प-फां ग-घ-द-ध-ब-भाः" [३९६.]॥ अनादाविति किम्। अकयत्थ। सुअत्थ। भत्तिं॥ प्रायोधिकारात् क्वचिन्न। पफुल्लिअ।

---

१ B C कमलइ; D कमलइ.

वाया-संपयँ व्रास जिम्वँ धरहिं जि संपइ-लुद्ध
ते गुरु परिहरि विवइ-गर, आवइ-डरिआ मुद्ध. ४८

जेम्वँइ तेम्वँइ करुण करि, जिम्वँ तिम्वँ आचरि धम्मु,
जिहवि हु तिहवि हु पसमु धरि, जिध तिध तोडहि कम्मु.४९

किम्वँ जम्मणु, केम्वँय मरणु, किह भवु, किध निव्वाणु;
एहउ तेण परिजाणियइ जसु जिण-वँयण[1] पँम्वाँणु[2]. ५०

ॲम्वँलइं। कमलेण। "मोनुनासिको वो वा" [३९७.]॥
प्रिउ। पिउ। "वाधो रो लुक्" [३९८.]॥

४८. संपल्लुब्धो व्यासो यथा [ये] वाक्संपदं व्याख्याने वाग्मितां धरन्ति। धनलिप्सया जनरञ्जनाय व्याख्यान्तीत्यर्थः। तान् विपत्करान् असदुपदेशदानेन संसारदुःखजनकान् मुग्धान् मुक्तिप्रतिकूलाचरणान् मूर्खान् गुरून् हे आपत्त्रस्त जन्मजरामरणादिविपत्तिभीत परिहर मा अङ्गीकुरु॥

व्रास। "अभूतोपि क्वचित्" [३९९.]॥
संपइ। विवइ। आवइ। "आपद्विपत्संपदां द इः" [४००.]॥ प्रायोधिकारात् संपय॥

४९. यथा तथा येन तेन प्रकारेण करुणां प्राणिषु दयां कुरु। यथा तथा धर्मम् आचर अनुतिष्ठ। यथापि तथापि प्रशमं धर। यथा तथा कर्म त्रोटय छिन्द्धि। हुशब्दौ पादपूरणे॥

५०. कथं केन प्रकारेण जन्म भवति। कथं मरणम्। कथं भवश्चातुर्गतिकसंसारः। कथं निर्वाणं च। ईदृक् एवंविधं जन्मादि तेन परिज्ञायते यस्य जिनवचनं समस्तार्थप्रतिपादकः अर्हत्सिद्धान्तः प्रमाणं तथेति प्रतीतो भवति॥

[1] D वयण. [2] B C पमाणु.

जेहउ केहउ होइ तरु तेहउ फल-परिणामु;

कइसउ जइसउ तइसउवि मन करि मिच्छा-धम्मु. ५१

अइसउ भणमि; समत्तु करि थक्का जेत्थुवि तेत्थु,

जत्तुवि तत्तुवि रइ करसु सुह-गर परइ तहेत्थु. ५२

जाम्वँ न इन्दिय वसि ठवइ ताम्वँ न जिणइ कसाय;

जाउँ कसायहँ न किउ खउ ताउँ न कम्म-विघाय. ५३

जेम्वँइ । तेम्वँइ । जिम्वँ । तिम्वँ । जिह । तिह । जिध । तिध । किम्वँ । केम्वँय । किह । किध । "कथं-तथा-यथां थादेरेमेमेहेधा डितः" [४०१.] ॥

५१. यादृक् कीदृक् तरुर्भवति तादृक् फलपरिणामः फलनिष्पत्तिर्भवति । अतः कीदृशं यादृशं तादृशमपि मिथ्याधर्मम् । मन इति निषेधे । मा कुरु । यथा कटुकवृक्षस्य कटुकं फलं मधुरवृक्षस्य मधुरं फलम् तथा मिथ्याधर्मस्य दुर्गतिरूपं कटुकं फलं सुधर्मस्य सुगतिरूपं च फलम् इति मिथ्याधर्मम् अपहाय सद्धर्मम् आचरेति भावः ॥

एहउ । जेहउ । केहउ । तेहउ । "यादृक्तादृक्कीदृगीदृशां दादेर्डेहः" [४०२.] ॥

५२. अहम् ईदृक् भणामि । किं तद् इत्याह । यत्र तत्रापि देशे काले वा स्थितः सम्यक्त्वं कुरु । तथा परस्मिन् अन्यजन्मनि तथा अत्र इह जन्मनि शुभकरां पुण्यजनिकां रतिम् । तीर्थकरादिषु अनुरागम् इत्यर्थः । यत्र तत्रापि स्थितः कुरुष्व ॥

कइसउ । जइसउ । तइसउ । अइसउ । "अतां डइसः" [४०३.] ॥

जेत्थु । तेत्थु । जत्तु । तत्तु । "यत्र-तत्रयोस्त्रस्य डिदेत्थ्वत्तु" [४०४.] ॥

एत्थु । "एत्थु कुत्रात्रे" [४०५.] ॥ केत्थु इति प्राक्पुरोप्युदाहृतम् आस्ते ॥

५३. यावद् इन्द्रियाणि वशे स्वतन्त्रतायां प्राणी न स्थापयति ध-

---

[1] A यथातथां. [2] C तनः. [3] D शुद्धधर्म°.

ताम्वँहि कम्मइँ दुद्धरइँ जाम्वँहि तवु नवि होइ;
जेवडु फलु तवि साहिअइ तेवडु मुणइ न कोइ. ५४
जेत्तुलु मोक्खे सोक्खडा तेत्तुलु केत्थुवि णाइं[१];
एत्तुलु केत्तुलु देवहंवि अवरुप्परहु सुहाइं. ५५
तसु केवडउ विवेगु, भणि, जसु मणि एवडु ढावु;
न करावउँ न करउँ कमवि, सुघे अच्छउँ नीराउ. ५६

रति तावत् कषायान् क्रोधादीन् न जयति पराभवति । ध्वंसयतीति यावत् । यावच्च कषायाणां क्षयो न कृतस्तावत् न कर्मविघातः । इन्द्रियजयपूर्वकः कषायजयः । तत्पूर्वकश्च कर्मक्षय इति भावः ॥

५४. तावत् कर्माणि दुर्धराणि दुर्जयानि यावत् तपो नापि नैव भवति । यावच्च यत्परिमाणं फलं तपसा साध्यते जन्यते तावत् तत्परिमाणं कोपि न जानाति । सर्वज्ञं विना न कोप्यपरस्तपःफलं सामस्त्येन ज्ञातुम् ईश इति भावः ॥

जाम्वँ । ताम्वँ । जाउं । ताउं । ताम्वँहिं । जाम्वँहिं । "यावत्तावतोर्वादेर्म उं महिं" [४०६.] ॥

५५. यावद् मोक्षे सौख्यं तावत् कुत्रापि नास्ति । तत् किं संसारे सौख्यं क्वापि नास्तीत्याह देवानामपीति । देवानां देवीनां च परस्परस्य मिथः इयत् कियत् । स्तोककालम् इत्यर्थः । सुखानि । देवानामपि सुखानि परिमितकालक्षयीणि मुक्तिसुखं तु शाश्वतम् इति भावः ॥

जेवडु । तेवडु । "वा यत्तदोतोर्डेवडः" [४०७.] । पक्षे । जेत्तुलु । तेत्तुलु ॥

अवरुप्परहु । "परस्परस्यादिरः" [४०९.] ॥

५६. कमपि कंचिदपि सावद्यव्यापारं न कारयामि नान्येन वि-

१ B C केत्थवि णाइ.

अक्खहुँ; तसु नमि गुरु-जणहो तव-तेएँहि दुसहस्सु,

बहुहुँवि मिच्छा-दंसणहँ जो मउ दलइ अवस्सु. ५७

बम्भु अणन्नाइसु चरइ जो अणवराइस-चित्तु,

प्राइव प्रावइ तहिँजि भवि सो निव्वाणु पवित्तु. ५८

धापयामि। न करोमि नात्मना वितनोमि। करणकारणयोरुपलक्षणत्वाद् नान्यमपि सावद्यं व्यापारं कुर्वन्तम् अनुजानामि। अतएव सुखेन नीरागः सन् आसे वर्ते इति यस्य मनसि इयान् एतावन्मात्रः ढावु इति आग्रहो निर्बन्धः तस्य पुरुषस्य भण कियान् किंपरिमाणो विवेकः। न तद्विवेकस्य मितिरस्तीति भावः॥

एत्तुलु। केत्तुलु। केवडउ। एवडु। "वेदं-किमोर्यादेः" [४०८.]॥

५७. बहूनामपि मिथ्यादर्शनानां बौद्धादिकुमतानां मदम् अवश्यं यो दलयति राजसभायां विदग्धसभ्यसमक्षं दर्पम् अपनयति। [तसु] "द्वितीयायाः षष्ठी" [३.१३४] इति षष्ठी[1]। अतः तं तपस्तेजसा दुस्सहम् अजय्यं गुरुजनं नम प्रणिपत इति आचक्ष्महे वयं भवन्तं प्रतिपादयामः॥

सुधेँ। जणहो। "कादिस्थैदोतोरुच्चारलाघवम्" [४१०.]॥

अच्छउँ। अक्खहुँ। तेएँहिँ। बहुहुँ। दंसणहँ। "पदान्ते उं-हुं-हिं-हंकाराणाम्" [४११.]॥

५८. अनन्यादृशं रागाद्यकलुषितत्वाद् अनन्यसमं चित्तं यस्य स तथाभूतो यः अनन्यादृशं लोकोत्तरं ब्रह्म शीलं चरति अनुतिष्ठति प्रायः बाहुल्येन स जन्तुस्तस्मिन्नेव भवे पवित्रं निर्वाणं प्राप्नोति॥

बम्भु। "म्हो म्भो वा" [४१२.]॥

अणन्नाइसु। अणवराइस। "अन्यादृशोन्नाइसावराइसौ" [४१३.]॥

---

1 B C षष्ठीत्यतं.

पाइम्व भवि सुहु दुल्लहउँ, पग्गिम्व जण सुह-लुद्ध,
तं संतोसामएँण विणु पाउ पमग्गहिँ मुद्ध. ५९
रयण-त्तउ फुडु अणुसरहु अन्नह मुत्ति कहंति;
भण्डइ लब्भहिँ पउर धण, अनु किं नहउ पडन्ति. ६०
कउ वढ भमिअइ भव-गहणि? मुक्ख कहन्तिहु होइ?
एँहु जाणेवउँ जइ मणसि तो जिण-आगम जोइ. ६१

५९. प्रायः बाहुल्येन भवे सुखं दुर्लभम्। जनाश्च प्रायः सुखलुब्धाः। तच्च सुखं संतोषामृतेन विना प्रायो मुग्धाः हेयोपादेयपरिज्ञानविकला मार्गयन्ति गवेषयन्ति। अनुत्तरसुख१सुखदुःखसमानमहामुनि२ संतोषाभासमुक्त्यर्थितीर्थान्तरीय३व्युदासार्थं प्रायःशब्दाः॥

प्राइव। प्राइम्व। पग्गिम्व। प्राउ। "प्रायसः प्राउ-प्राइव-प्राइम्व-पग्गिम्वाः" [४१४.]॥

६०. रत्नत्रयं ज्ञानदर्शनचारित्राणि स्फुटम् अनुसरत यूयम् आश्रयत। अन्यथा रत्नत्रयं विना कथं मुक्तिरिति। इतिः वाक्यपरिसमाप्तौ। अत्रार्थे युक्तिं दर्शयन् आह। भाण्डेन क्रयाणकेन कृत्वा प्रचुराणि धनानि क्रेतव्यकर्पूरकस्तूरिकासुवर्णादिवस्तूनि लभ्यन्ते पुंसा आसाद्यन्ते। अन्यथा किं नभसः पतन्ति। भाण्डं विना न तानि संपद्यन्त इति भावः॥

अन्नह। अनु। "वाऽन्यथोनुः" [४१५.]॥

६१. कुतः कस्मात् कर्मणः भवगहने भ्रम्यते पर्यट्यते। कुतश्च मोक्षो भवति। इति एतद् ज्ञातुं वढेति शीघ्रादित्वात् मूढ यदि मन्यसे ततस्तदा वा जिनागमान् द्योतय इति धातूनाम् अनेकार्थत्वाद् गवेषय। अर्हत्समयं विना भवहानोपायः शिवसंप्राप्त्युपायश्च न ज्ञायत इति भावः॥

चञ्चल संपय, ध्रुवु मरणु, सव्वुवि एम्व भणेइ,
मिलिवि समाणु महामुणिहिं पर संजमु न करेइ. ६२
म करि मणाउवि मणु विवसु, मं करि दुक्कय-कम्मु,
वायारम्भुवि मा करहि जइ किर इच्छसि सम्मु. ६३
तित्थिवि अच्छउ अहव वणि अहवइ निअ-गेहेवि;
दिवेंदिवें[1] करइ जु जीव-दय सो सिज्झइ सव्वोवि. ६४
तवें सहुँ संजमु नाहिं जसु, एम्वइ गम्वइ जु दीह,
पच्छइ-तावु न जो करइ, तासु फुसिज्जइ लीह. ६५

कउ । कहन्तिहु । "कुतसः कउ कहन्तिहु" [४१६.] ॥

तो । "ततस्तदोस्तोः" [४१७.] ॥

६२. संपत् चञ्चला । मरणं ध्रुवं निश्चितम् । एवं सर्वोपि भणति । परं महामुनिभिः समं मिलित्वा संबन्धम् अवाप्य संयमं न करोति ॥

६३. मनागपि विवशं विषयलाम्पट्यपरं मनः मा कुरु । दुष्कृत-कर्म सपापव्यापारं च मा कुरु । वागारम्भमपि सावद्यवचनप्रतिपादनमपि मा कार्षीः यदि किल इति प्रसिद्धौ शर्म मुक्तिसुखम् इच्छसि ॥

ध्रुवु । एम्व । समाणु । पर । मणाउ । मं । "एवं-परं-समं-ध्रुवं-मा-मनाक एम्व-पर-समाणु-ध्रुवु-मं-मणाउ" [४१८.] ॥ प्रायोग्रहणात् म मा ॥

६४. तीर्थेपि आस्तां प्रयागादौ वसतु । अथवा वने सर्वसङ्गं मुक्त्वा वनस्थस्तपस्तप्यताम् । अथवा निजगेहेपि आस्ताम् । परं दिवादिवा प्रतिदिनं यो दयां करोति स सर्वोपि सिध्यति मुक्तो भवति । मुक्तिं प्रति जीवदयैव कारणं न तीर्थाद्यवस्थानम् इत्यर्थः ॥

६५. यस्य तपसा सह संयमो न हि अस्ति । तथा एवमेव सं-

---

[1] D दिविदिवि.

सिज्झउ सो नरु एम्वहिँ[1] जि एत्तहि[2] माणुस-जम्मि,
जो पडिकूलिवि कृव करइ पच्चल्लिउ[3] गय-धम्मि. ६६

जइ संसारहो[4] विच्चि ठिउ वुन्नउ वुत्तु सो एहु;
पवण-वहिल्लउँ अप्पणउ मणु वढ सुथिरु करेहु. ६७

यमगहितः यो दिवसानि गमयति । तथा यः पश्चात्तापं धिङ् मां धर्मरहितम् इत्यात्मनिन्दां न करोति तस्य जन्तोः रेखा साधुमध्ये गणना मृज्यते । तादृशः साधुमध्ये न गण्यत इति भावः ॥

किर । अहवइ । दिवेदिवे । सहुं । नाहिं । "किलाथवा-दिवा-सह-नहेः किराहवइ-दिवे-सहुं-नाहिं" [४१९.] ॥ प्रायोधिकारात् अहव ॥

६६. यः प्रत्युत किंतु गतधर्मे निःपुण्ये प्रतिकूलेपि वैरिण्यपि कृपां करोति स नरः इतः अस्मिन् मानुषजन्मनि इदानीमेव सिध्यतु सिद्धिम् आप्नोतु । तेन सिद्धिः प्राप्तैवेत्यर्थः ॥

एम्वइ । पच्छइ । एम्वहिँ[1] । जि । एत्तहि[2] । पच्चलिउ । "पश्चादेवमेवैवेदानीं-प्रत्युते-तसः पच्छइ-एम्वइ-जि-एम्वहिँ[3]-पच्चलिउ-एत्तहे" [४२०.] ॥

६७. यदि संसारस्य वर्त्मनि स्थितः प्राणी विषण्णः जन्मजरामरणादिव्यसनैर्निर्वेदम् आपन्नस्तदा सत्यम् एतद् उक्तः मया इदं प्रतिपादितः । किं तद् इत्याह । हे मूढ पवनवत् शीघ्रम् आत्मीयं मनः सुस्थिरं हु इति निश्चितम् कुर्याः । मनसि नियन्त्रिते सति महानन्दसंपत् संपत्स्यत इति भावः ॥

विच्चि । वुन्नउ । वुत्तु । "विषण्णोक्त-वर्त्मनो वुन्न-वुत्त-विच्चं" [४२१.] ॥

वहिल्लउं । अप्पणउ । वढ । "शीघ्रादीनां वहिल्लादयः" [४२२.] ॥

---

१ B C D एम्वहि. २ D एत्तहे. ३ B पच्चलिउ. C पव्वलिउ. ४ B C संसारहु. D संसारहुं.

---

1 B C D एम्वहि. 2 D एत्तहे. 3 B C एम्वहि. We with A D.

निअम-विहूणा रत्तिहिवि खाहिँ जि कसरक्केहिँ,
हुहुरु पडन्ति ति पावँ-द्रहि भमडहि भव-लक्खेहिँ. ६८
तव-परिपालणि जसु मणुवि मक्कड-घुग्घिउ देइ,
आहर-जाहर भव-गहणि सो घइँ न हुँ प्राम्वेइ. ६९
सग्गहो केहिँ करि जीव-दय; दमु करि मोक्खहोँ रेसि
कहि कसु रेसिं तुहुँ अवर कम्मारम्भ करेसि. ७०

६८. नियमविहीना अभिग्रहरहिता ये रात्रावपि कसरत्कैः खादन्ति कसरत्कशब्दं कुर्वाणा भक्षयन्ति ते पापमेव दुरवगाहत्वात् ह्रदः तस्मिन् हुहुरु इति हुहुरुशब्दपूर्वं पतन्ति निमज्जन्ति । भवलक्षेषु[1] भ्राम्यन्ति च । रात्रिभोजनात् पापं ततश्चातुर्गतिकसंसारे परिभ्रमणं भवतीति भावः ॥

६९. यस्य मनः तपःपरिपालने मर्कटस्य घुग्घिकाम् इति तच्चेष्टाम् । औत्सुक्यम् इति यावत् । ददाति वितरति । स पुरुषः । घइम् इति पादपूरणे । भवगहने हु इति निश्चितम् एहि रे याहि रे[2] इति गमनागमनक्रिया न प्राप्नोति । मुक्तो भवतीत्यर्थः ॥

हुहुरु । घुग्घिउ । "हुहुरु-घुग्घादयः शब्दचेष्टानुकरणयोः" [४२३.] । आदिग्रहणात् आहर । जाहर ॥

घइं । "घइमादयोनर्थकाः" [४२४.] ॥

७०. स्वर्गस्यार्थे त्वं जीवदयां कुरु । मोक्षस्यार्थे च दमम् उपशमं कुरु । तथा त्वं कस्य अर्थे किंनिमित्तम् अपरान् कर्मारम्भान् करोषीति कथय । न कोपि अन्योर्थः आत्मनः सुखार्येत्यर्थः ॥

1 B C °भवलक्षेपु च भ्रा°. 2 B C D याहिरा.

कसु तेहिं परिगहु, अलिउ कासु तणेण कहेसु,

जसु विणु पुणु अवसें न सिवु अवस तमु इकसि लेसु. ७१

काय-कुडुल्ली निरु अथिर, जीवियडउ[1] चलु एहु,

ए जाणिवि भव-दोसडा असुहउ भावु चएहु. ७२

७१. कस्यार्थे परिग्रहः हस्त्यश्वरथपादातधनधान्यादिरूपसंग्रहः। अलीकं कूटभाषणं च कस्यार्थे इति कथय। दुर्गतिहेतुत्वात् एते सुखाय क्रियमाणे अपि आत्मनो दुःखायैवेत्यर्थः। तर्हि किं गृह्णामीत्याह। जसु इति द्वितीयायाः षष्ठी [३.१३४] इति षष्ठी। अतः यं विना पुनः अवश्यं निश्चितं शिवं मुक्तिः न भवति। अवश्यं तं मुक्तिसाधनम् उपशमादिकम् एकशः लाहि। एकवारमपि चेत् तं भवान् गृहीतवांस्तदा मुक्तिः स्वाधीनेति भावः॥

केहिं। रेसि। रेसिं। तेहिं। तणेण। "तादर्थ्ये केहिं-तेहिं-रेसि-रेसिं-तणेणाः" [४२५.] इति तादर्थ्ये पञ्च निपाताः॥

विणु। पुणु। "पुनर्विनः स्वार्थे डुः" [४२६.]॥

अवसें। अवस। "अवश्यमो डें-डौ" [४२७.]॥

एक्कसि। "एकशसो डिः" [४२८.]॥

७२. कायकुटीरं निरु निश्चितम् अस्थिरं विनश्वरम्। जीवितकं प्राणधारणं च एतत् चलम्। एते कायजीवितचापल्यरूपे भवदोषौ ज्ञात्वा अशुभं भावं त्यज। अशुभभावत्यागे न एते भविष्यत इत्यर्थः॥

कुडुल्ली। जीवियडउ। दोसडा। "अ-डड-डुल्लाः स्वार्थिककलुक्च" [४२९.]॥

---

१ C जीविवड. D जीविअडउ.

---

1 B यवियडउं. C जीवियडउं. D जविअडउ.

ते धन्ना कन्नुल्लडा[1], हिअउल्ला ति कयत्थ,

जे खणि-खणिवि नवुल्लडअ घुण्टहिँ धरहिँ सुअत्थ. ७३

पइंठी[2] कन्नि जिणागमहाेँ वत्तडिआवि हु जासु,

अम्हारउँ तुम्हारउँवि एहु ममत्तु न तासु. ७४

७३. ये कर्णकाः क्षणेक्षणे । अपीति पादपूरणे । नवान् श्रुतार्थान् पिबन्ति सुगुरुसमीपे शृण्वन्ति । यानि च हृदयकानि धरन्ति श्रवणानन्तरं स्थिरीकुर्वन्ति ते कर्णका धन्याः । तानि च हृदयकानि कृतार्थानि । विधेयविधानात् ते कृतकृत्या इत्यर्थः ॥

कन्नुल्लडा । हिअउल्ला । नवुल्लडअ । "योगजाश्चैषाम" [४३०.] इति अडडुल्लानां योगभेदेभ्यो ये स्युस्ते डडअड्डत्यादयः स्वार्थे भवन्ति ॥

७४. यस्य कर्णे जिनागमस्य वार्तिकापि वचनमात्रमपि प्रविष्टा श्रुता तस्य पुरुषस्य एतत् इदं वस्तु अस्मदीयम् एतद् युष्मदीयमपि । अपिः स्वार्थे । एवं न ममत्वं प्रतिबन्धो भवति ॥

पइंठी । "स्त्रियां तदन्ताड्डीः" [४३१.] इति प्राक्तनसूत्रद्वयोक्तप्रत्ययान्तेभ्यो डीः ॥

वत्तडिआ । "आन्तान्ताड्डाः"[3] [४३२.] इति डाः । "अस्येदे" [४३३.] इति अस्य इः ॥

अम्हारउं । तुम्हारउं । "युष्मदादेरीयस्य डारः" [४३४.] ॥

---

१ B C D कन्नुल्लुडा. २ C पइट्ठी.

---

[1] B कन्नुल्लुडा. C D कन्नुल्लुडा. [2] C D पइट्ठी. [3] All the three MSS. read the following before "अस्येदे" instead of Sûtra 432:—स्त्रियां तदंताड्डा इति अप्रत्ययांताड्डाः । तदंताच्च ।.

जीवु जित्तुलु जिअइ जिय-लोइ, जइ तित्तुलु दमु करइ,
गणइ विहवु एत्तुलु न केत्तुलु, तो इत्तहे[1] नाणु लहि जाइ लोइ
तेत्तहि निरुत्तउ. ७५

भल्लत्तणु जइ महसि[2], भल्लप्पणु पसमेण;

जइ करिएव्वउं पसमु, विजउ तो करेव्वउं करणहं[3];
जइ अ करेवा करण-विजउ, तो मणु निच्चलु धरहु;
निच्चलु मणु पुणु धरहु करिउ जउ राग-दोसहं;
तह विजउ करहि रागाइअहं अविचलु सामाइउं करिवि;
अविचलु सामाइउं करहि निम्ममत्तु निम्मलु करवि. ७६

७५. जीवो यावन्तं कालं जीवति जीवलोके यदि तावन्तं कालं दमं करोति विभवं च एतावत् कियत् न गणयति। तृणायापि न मन्यत इति भावः । तदा अत्रैव ज्ञानं लब्ध्वा तत्र लोके सिद्धलोके निरुत्तउ इति निश्चितम् याति । निर्वृतो भवतीत्यर्थः । मात्रानामकं छन्दः ॥

जित्तुलु । तेत्तुलु। एत्तुलु । केत्तुलु । "अतोर्डेत्तुलः" [४३५.] ॥

एत्तहे । तेत्तहे । "त्रस्य डेत्तहे" [४३६.] ॥

७६. भल्लेति शीघ्रादित्वात् भद्रम् तस्य भावो भद्रत्वम् भद्रता वा । यदि त्वं काङ्क्षसि तदा भद्रत्वं प्रशमेन लभसे । ननु स एव नास्ति अतस्तदुपायो वाच्य इत्याह । यदि प्रशमः कर्तव्यस्तदा करणानां विजयः कर्तव्यः । ननु तद्विजयेप्युपायं न विद्म इत्याह । यदि च करणविजयः कर्तव्यस्तदा मनो निश्चलं विषयेषु अगामुकं यूयं धरत बिभृत । ननु तत् स्थिरं कथं बिभृम इत्याह । रागद्वेषयोर्जयं

१ D एत्तहे. २ D °महसि लहसि लहसि भल्लप्पण. ३ B °हउं. C °हउ.

अन्तु करेप्पि निरानिउ कोहहो, अन्तु करेप्पिणु सव्वह माणहो,

अन्तु करेविणु माया-जालहो, अन्तु करेवि, नियत्तसु, लोहहो.७७

जइ चएवं मणसि संसारु सिव-सुक्ख भुञ्जण तुरिउ,

तो किर सङ्गु मुञ्चणहिं करि मणु,

तह सुह गुरु सेवणहं, निम्ममत्तु अइ दढु करेविणु. ७८

कृत्वा मनः पुनः निश्चलं धरत। रागद्वेषजय एव मनोनिश्चलताकारणम् इत्यर्थः। ननु तद्विजयमपि कथं करोमीत्याह। तथा अविचलं सामायिकं कृत्वा रागादीनां विजयं कुरु। ननु तदपि कथं रचयामीत्याह। निर्ममत्वं निर्मलं कृत्वा अविचलं सामायिकं कुरु। एकस्मिन्नपि वृत्ते हेतुहेतुमद्भूतानि बहूनि वाक्यानि। तेषु च संबोध्यस्य सामान्यविवक्षया एकत्वं विशेषविवक्षया च बहुत्वम् इति तत्क्रियायामपि काङ्क्षसि धरतेत्यादौ एकवचनबहुवचनानि न विरुद्धानीति। वस्तुवदनककर्पूरयोर्योगे सार्धं छन्दः॥

भल्लप्पणु। "त्व-तलोः प्पणः" [४३७.]। प्रायोधिकारात् भल्लत्तणु॥

करिएव्वउं। करेव्वउं। करेवा। "तव्यस्य इएव्वउं-एव्वउं-एवाः" [४३८.]॥

लहि। करिउ। करिवि। करवि। "क्त्व इ-इउ-इवि-अवयः" [४३९.]॥

७७. निरानिउ इति निश्चितम् क्रोधस्य अन्तं विनाशं कृत्वा सर्वस्य मानस्य अन्तं कृत्वा मायैव जालं सुगतिगमननिरोधकत्वात्[1] आनायः तस्य अन्तं कृत्वा लोभस्य अन्तं कृत्वा निवर्तस्व तिष्ठ। कषायरहितो भवेति भावः। वदनकं छन्दः॥

करेप्पि। करेप्पिणु। करेविणु। करेवि। "एप्प्येप्पिण्वेव्येविणवः" [४४०.]॥

७८. यदि संसारं त्यक्तुं मन्यसे अभिलषसि शिवसौख्यं च

[1] C विरोधकत्वात्.

चित्तु करेवि अणाउलउँ, वयणु करेप्पि अचप्पलउं,

कम्मु करेप्पिणु निम्मलउँ, झाणु पजुअसु निच्चलउं. ७९

जमणु गमेप्पि, गमेप्पिणु जन्हवि, गम्पि सरस्सइ, गम्पिणु नर्मद,

लोउ अजाणउ जं जलि बुड्डइ नं पसु, किं नीरइं सिव-सर्मद. ८०

मोक्तुं संवेदयितुं त्वरितः उत्सुकः तदा किल इति आप्तवादे । सङ्गं पुत्रमित्रकलत्रादिस्वजनसंबन्धं मोक्तुं तथा शुभं गुरुं सेवितुं निर्ममत्वं च कर्तुं मनः अतिदृढम् अतिनिश्चलं कुरु । निर्ममत्वं वा अतिदृढम् अतिनिश्चलं कर्तुं मनः कुरु । अभिलषस्वेत्यर्थः । एवं मनसि कृते संसारोच्छेदो मुक्तिप्राप्तिश्च ध्रुवं भविष्यतीति भावः । मात्रा छन्दः ॥

७९. चित्तम् अनाकुलं विषयैः अनुपप्लुतं कर्तुं वचनम् अचप्पलउं इति सत्यं कर्तुम् कर्म कायव्यापारं निर्मलं निष्पापं कर्तुम् ध्यानं निश्चलं प्रयुङ्क्ष्व । धर्मध्याने निश्चले सति मनोवाक्कायसंयमो भविष्यतीति भावः । झंवटकं छन्दः ॥

चएवं । भुञ्जण । भुञ्जणहिं । सेवणहं । करेविणु । करेवि । करेप्पि । करेप्पिणु । "तुम एवमणाणहमणहिं च" [४४१.] । चकारात् एप्पि-एप्पिणु-एवि-एविणवः ॥

८०. यमुनां गत्वा जाह्नवीं गत्वा सरस्वतीं गत्वा नर्मदां च गत्वा यत् अज्ञाता युक्तायुक्ताविवेचनशीलो लोकः पशुरिव महिषादितिर्यगिव जले बुडति निमज्जति तत् किं नीराणि शिवशर्मदानि । न तज्जलानि स्वमध्यपातिभ्यः सदास्वान्तःस्थितेभ्यो मत्स्यादिभ्य इव मुक्तिशर्म प्रयच्छन्तीति भावः । वदनकं छन्दः ॥

[[1] गमेप्पि । गमेप्पिणु । गम्पि । गम्पिणु । "गमेरेप्पिण्वेप्प्योरेर्लुग्वा" [४४२.]॥ अजाणउ । "तृनोणअः" [४४३.] । तृन्प्रत्ययस्य अणअः ॥]

---

1 This part of grammar is not given in B C D.

नाइ निवेसिउ, नेउ लिहिउ, नावइ टङ्कुक्किण्णु,

जणि पडिबिम्बिउ, जणु सहजु, करि जिणु मणि उ(ओ?)इण्णु.८१

लिङ्गु अतत्रउँ जइ नो कृवा, लहइ कृवालु निव्वुदि, नृवा.८२

८१. निवेशितः स्थापितः तम् इव । लिखितः कुड्यादौ चित्रितः तम् इव । टङ्कभिः उत्कीर्णः प्रस्तरे विलिखितः तम् इव । प्रतिबिम्बितः दर्पणादौ लब्धप्रतिबिम्बः तम् इव । सहजः स्वभावः तम् इव च जिनं मनसि अवतीर्णं कुरु । दोहकं छन्दः ॥

नं । नाइ । नउ । नावइ । जणि । जणु । "इवार्थे नं-नउ-नाइ-नावइ-जणि-जणवः" [४४४.] ॥

८२. हे नृप यदि कृपा प्राणिषु दया नास्ति तदा लिङ्गं दर्शनिनां वेषधारणम् अतत्रम् अप्रधानम् । दुर्गतौ पततः कृपां विना न तेन परित्राणं किमपि भवतीति भावः । ननु कृपापरस्यापि समीहितसिद्धिर्न भविष्यतीत्याह । कृपालुः निर्वृतिं लभते समासादयति । सुमनोरमा छन्दः ॥

इह अपभ्रंशोदाहरणेषु क्वापि क्वापि पूर्वं लिङ्गव्यभिचारो दर्शितोस्ति अतस्तत्सिद्ध्यर्थम् अत्र "लिङ्गम् अतन्त्रम्" [४४५.] इति लक्षणं वचोभङ्ग्यन्तरेण उक्तम् ॥

निव्वुदि । "शौरसेनीवत्" [४४६.] इत्यनेन अपभ्रंशे शौरसेनीवत् कार्यम् । अतः "तो दोऽनादौ शौरसेन्याम्" [४.२६०.] इत्यादिना तस्य दः । एवम् अन्यदपि ऊह्यम् ॥

अपभ्रंशभाषा समाप्ता ॥

---

१ B C D नं.

---

१ C निर्वृतिं.

इअ सव्व-भास-विनिमय-परिहिँ परम-तत्तु सव्वुवि कहिवि,
निअ-कण्ठ-माल ठवि नृव-उरसि गइ अ देवि मङ्गलु भणिवि. ८३

८३. अधुना श्रुतदेवताया उपदेशं समर्थयन् स्थानगमनपूर्वं च तस्याः परमार्हतश्रीकुमारपालभूपतिं प्रति प्रसादातिशयं प्रकटयन् तदुदीरितमङ्गलव्याजेन च महाकाव्यपरिसमाप्तौ ग्रन्थकारो मङ्गलम् आह। इति पूर्वोक्तयुक्त्या सर्वभाषाणां प्राकृतादिभाषाणां विनिमया व्यत्ययाः। परिहिँ इति शीघ्रादित्वात् गीतयस्ताभिः कृत्वा सर्वमपि परमतत्त्वं कथयित्वा निजकण्ठमालां च नृपोरसि श्रीकुमारपालभूपकण्ठकन्दले स्थापयित्वा विन्यस्य देवी श्रुतदेवता मङ्गलं त्वं जिनप्रवचनप्रोत्सर्पणां कुर्याश्चिरं नन्द्या इत्यादि श्रेयोभिधायकं वाक्यं भणित्वा गता निजभुवनं संप्राप्ता॥

प्राकृतादिभाषाकार्याणाम् अन्योन्यं तेषु तेषु प्रागुदाहरणेषु विनिमयो दर्शितः। स च न सूत्रं विना सिध्यति। अतः विनिमयेतिपदेन पर्यायान्तरेण। "व्यत्ययश्च" [४४७.] इति सूत्रं विनिमयार्थम् उक्तम्॥

उरसि। "शेषं संस्कृतवत् सिद्धम्" [४४८.]। शेषं यद् अत्र प्राकृतादिभाषासु अष्टमाध्याये नोक्तं तत् सप्ताध्यायीनिबद्धसंस्कृतवदेव सिद्धम्। अतः यथा उरस्शब्दस्य ङ्याम् उरे उरम्मि भवतः तथा क्वचिद् एतदपीति। एवम् अन्योदाहरणेष्वपि रूपविशेषो ज्ञेयः॥

अष्टमस्याध्यायस्य उदाहरणप्रतिपादनद्वारेण चतुर्थः पादः संपूर्णः॥

एवं च व्याकरणाष्टमाध्यायलक्ष्यभूताः प्राकृतादिभाषाः समर्थिताः

इति शुभम्॥

इत्याचार्यश्रीहेमचन्द्रविरचितश्रीकुमारपालचरितप्राकृतद्व्याश्रयमहाकाव्यवृत्तौ

अष्टमः सर्गः समाप्तः॥

तत्समाप्तौ च समाप्तं चेदं वृत्तितः प्राकृतद्व्याश्रयमहाकाव्यम् ॥

संतापापहृदर्शनं शिवकलादानोदिताशंसनं
विश्वार्घ्यामृतदायिपादभजनं रत्नाकरानन्दनम् ।
श्रीकल्पद्रुमसोदरं कुवलयामोदप्रमोदोद्धुरं
कामोल्लासि कुरङ्गहारि सकलं भात्यत्र चान्द्रं कुलम् ॥ १ ॥

तस्मिन् सोभयदेवसूरिरभवत् कुप्राङ्गवृत्तिस्ततः
संविग्नो जिनवल्लभो युगवरो विद्यालितारम्बरम् ।
तत्पट्टे जिनदत्तयोगितिलकः सन्मार्गपद्मार्यमा
ख्यातः श्रीजिनचन्द्रसद्गुरुरतः सौभाग्यभङ्ग्येकभूः ॥ २ ॥

विज्ञाः केचन लक्षणेऽथ कतिचित् तर्केपरेप्यागमे
काव्येन्ये च समग्रशास्त्रचतुराः प्रायेण नामून् विना ।
व्यक्तं नूनमिदं विधिर्बहुविधैः शास्त्रैर्विजाप्यासमान्
प्राज्ञान् राजसभास्वलम्भयदतो यान् जैत्रपत्राण्यरम् ॥ ३ ॥

भृङ्गायमाणपदपुष्कर राजहंसा
वर्णप्रतापजितपुष्कर राजहंसाः ।
श्रीजैनचन्द्रपदपङ्कजराजहंसा-
स्ते जज्ञिरे जिनपतिप्रभवोऽथहंसाः ॥ ४ ॥

चातुर्विद्यक्रमाढ्या विजिततदमृतक्षीर[1]भूर्निग्रहस्यो-
त्सर्गाख्यद्वन्द्वशृङ्गा स्तनितवरतपोभावना दानशीलाः ।
दुःप्रापाः स्वल्पपुण्यैः स्थगितपरगवीस्फूर्तिकीर्तिप्रपञ्चा
येषां पादप्रसादाद्भवति सुरगवी कामितार्थाय पुंसाम् ॥ ५ ॥

विष्वग्व्यतिष्ठितजिनालयदम्भदब्ध-
प्रालेयशैलजनितोत्तरदिग्वितर्काः ।
संघो[2]पदं दधति संप्रति जैनपत्यं
ते श्रीजिनेश्वरयुगप्रवरा मुनीशाः ॥ ६ ॥

---

1 C D क्षीर. 2 D सेघे पदं.

तेषामादेशमासाद्य कामकल्पद्रुमोपमम् ।
मूर्च्छोच्छेदसुधासारं श्रेयःश्रेयोदुनन्दनम् ॥ ७ ॥

नासिद्धं न विपक्षगामि च नवा नैकान्तिकं साधनं
येषां सत्प्रतिपक्षकं न विषयेसौवेपि नो बाधितम् ।
जात्युद्भावननिग्रहच्छलपरव्याघातविश्राणकं
दृष्ट्वा यानपरे श्रयन्ति समितौ धीरा बताज्ञापराः ॥ ८ ॥

दत्तो मुदा तैर्जिनरत्नसूरि-
क्षमाधिपैर्बोधमणिप्रदीपः ।
श्रीप्राकृतद्व्याश्रयगेहगर्भ-
स्थितं यदादर्शयदर्थजातम् ॥ ९ ॥

श्रीमज्जिनेश्वरयतीश्वरदत्तदीक्षा-
शिक्षोत्र पूर्णकलशो गणिरल्पबुद्धिः ।
अन्योपकारिषु पदं परिलब्धुकामो
वृत्त्यानया किमपि तत् प्रकटीचकार ॥ १० ॥

साहित्यतर्कागमशब्दविद्या-
शाणानिशातीकृतबुद्धिधारः ।
चिच्छेद लक्ष्मीतिलको गणिर्मे
सब्रह्मचारी स्खलितोक्तिवल्लीः ॥ ११ ॥

यदत्र वितथं किंचित् बुद्धिमान्द्यात् प्रजल्पितम् ।
प्राज्ञैर्मयि कृपां कृत्वा तच्छोध्यं शुद्धमानसैः ॥ १२ ॥

नीराज्यार्केण पूर्वं मरकतघटिते भाजने व्योम्नि धृत्वा
पुष्पाण्यृक्षाणि सार्चिः[2] कुमुदवनसुहृन्माङ्गलिक्यप्रदीपम् ।
धाता शान्त्यै विधत्ते सकलदिगधिपानलं[3] यावदेषा
स्तात्तावन्मौक्तिकस्रग् बुधहृदि विवृतिः प्राकृतद्व्याश्रयस्य ॥ १३ ॥

---

[1] य आद॰? [2] सार्चिःकु॰? [3] ॰पानामलं?

38

समर्थिता विक्रमराजवर्षे
हयान्तरिक्षज्वलनेन्दुसंख्ये ।
पुष्यार्कशस्यामलफाल्गुनैका-
दशीतिथौ व्याश्रयवृत्तिरेषा ॥ १४ ॥

मानं त्रिंशदधिकद्विचत्वारिंशच्छतान्यभूत् ।
प्रत्यक्षरं गणनयामुष्यावृत्तेरनुष्टुभाम् ॥ १५ ॥

॥ ग्र० ५२१ निखिलग्रन्थाग्रं ४२३० ॥ समाप्तमिति ॥ छ ॥

संवत् १५७१ वर्षे कार्तिकवदि चतुर्दशीबुधे सालीवाडामध्ये वास्तव्यपण्डितवीठलसुतपण्डितलटकणलिखितम् ॥ छ ॥

यादृशं पुस्तकं दृष्ट्वा तादृशं लिख्यते मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयताम् ॥ छ ॥

शुभं भवतु । कल्याणमस्तु ॥ छ ॥

संवत् १५७० वर्षे श्रीअणहिल्लपुरनगरे श्रीखरतरगच्छे श्रीजिनसागरसूरिपट्टे श्रीजिनसुन्दरसूरिपट्टपूर्वविलसहस्रकरावतार-श्रीजिनहर्षसूरिशिष्यैः श्रीकमलसंयमोपाध्यायैः श्री-प्राकृतव्याश्रयवृत्तिर्लेखयांचक्रे ॥ छ ॥

---

1 °विलसत्सह°

Various Readings of the Manuscripts D.

पृष्ठे.	पङ्क्तौ.	Printed Text.	MS. D.
३	३	अत्र	अथ
,,	५	°धेयप्रयो°	°धेयसंबन्धप्रयो°
,,	१०	ज्ञातिकुलं	ज्ञातकुलं
,,	१२	°प्रातीहा°	°प्रतिहा°
४	१	जीवो	जीवे
,,	,,	°तारिसय°	°तारिसय°
,,	२	°लोय-नि°	°लोगनि°
,,	७	°ण्णिाच्चिं	°ण्णिचि
,,	२२–२५	विदुषाम् ॥२॥अह...... भविष्यति ॥ अत्थि	विदुषाम् ॥ २ ॥ अत्थि
५	१२	अणहिल°	अणहिल्ल°
,,	१७	°कुर्कुरं	°कुकुरं
,,	२०	°कत्वात्	°कात्
,,	२२	अधुना	अथ
६	५	उज्ज्वलत्वाच्च अनादर्शा आदर्शाः	उज्ज्वलत्वाच्चानादर्शा आदर्शाः
,,	१४	°त्वम् । सा तस्या°	°त्वम् । तस्या°
,,	१८	अनेके अनेके च	अनेकोनेकश्च
,,	२१	सहइ ।	सिहइ ।
७	१५	°कत्वात्	°कात्
८	१७	कारुण्यात्	कारणात्
,,	१८	°त्वेन सं°	°त्वेन खु इति सं°
,,	२४	इति राः ।	इति रा ।
,,	२५	आर्षे तु	आर्षे तु
१०	१५	°नाभ्यश्च अधि°	°नाभ्यश्चाभ्यधि°
,,	१९	ताश्च जनश्च	ताश्च ता जनश्च
१२	९	°सने शक्तिः	°सने प्रकटिता शक्तिः
,,	२३	°ज्ञा विश्वेर्न वा°	°ज्ञा विश्वेन वा°
१३	१२	वन्दनमा°	वन्दमा°
१४	११	पुण्यं	तारुण्यं

पृष्ठे.	पङ्क्तौ.	Printed Text.	MS. D.
१५	५	°कुमार°	°कुमर°
,,	१४	अत्र	अत्र च
१६	१४	कुङ्कुण°	कुक्कण°
१७	६	दक्खिखण्ण°	दक्खिन्न°
१८	४	णलाडं°	णडालं°
,,	२२	°धारणां	°धारणं
,,	२३	निलाड णलाडं ।	निडाल णडालं ।
१९	६	वुहं-चुडं गउअ-चण्डंव ।	वुहवुन्द्रं गउअवद्रव ।
,,	७	मध्यमलोके	मध्यलोके
,,	१८	°शालिनी [प्रज्ञा] प्रतिभा । तस्याः	°शालिनी प्रज्ञा तस्याः
,,	२०	°द्भुतावबो°	°द्भुतबो°
,,	२१	चण्डम् ।	°वन्द्रं ।
,,	२२	चण्डमिव ।	चद्रमिव ।
,,	२३	चुडं चण्डं । चण्ड	वुन्द्रं । वन्द्र°
२०	१५	अहिण्णु ।	अहिण्णू ।
२१	१३	°स्य सकष्टस्य	°स्य कष्टस्य
,,	१५	निर्मूलकाषंकषितत्वात्तन्ना	निमूलकाषंकषितत्वान्ना°
२२	१८-२१	अलाबूलता......। वाला°	अलाबूलतावाला°
२३	४	दिन्नग्घो	दिण्णग्घो
,,	१४	पंठितम् ।	पठितम् ।
,,	१९	द्वाविंशत्या गाथा°	द्वाविंशतिगाथा°
२४	१	दिस°	दिसि
,,	२	°यरिएहि	°यरिएहिं
,,	४	हवन्ति	हवन्ति
,,	८–११	पवित्रश्चेति ॥ ...... सामय ।	पवित्रश्चेति सामय ।
,,	१४	°संस्कारकारिणः	°संस्कारकारिणः
,,	२५, २६	°रातः ई ॥ ...... उत्वम् ।	रात उत्वम् ।
२५	१	°सारिणि	°सारिणि
,,	५	रमेसु	रमिंसु
,,	१४	°तलानि चतु°	°तलानि यानि चतु°
,,	१५–१७	सतृष्णं दिनं ...... जागरिता	सतृष्णंदिगरिता

पृष्ठे.	पङ्कौ.	Printed Text.	MS. D.
२७	५	°हलद्दि......हलिद्दि°	°हलिद्दि......हलद्द°
,,	२१	अहरिद्रारागो निबिडस्नेहः का°	अहरिद्रारागो निबिडस्नेहका°
,,	२३	अत्र	अथ
२९	१	°रुई	°रुई
,,	३	पटलं,	पडलं।
,,	४	°निज्झरिणीसुं न्हाऊण	°निज्झरणीसुं ण्हाऊण
,,	,,	वम्हाणी.	वम्हाणा।
,,	७	वासे लोके	वासलोके
,,	८	पाताल इव	पाताले इव
,,	१८	निर्झरिणीषु	निर्झरिणीषु
३०	६	एरिसिआओ	एरिसिआओ
,,	१८	द्विजा रविं......त्वां च	द्विजा रविं त्वां च
३१	५	ईदृश्यः। न कीदृश्योपीत्यर्थः।	ईदृश्योपीत्यर्थः।
३२	१	°वाहु°	°वाहु°
३३	२	नमिरा.	नविरा।
,,	७	°पदार्थपरि	पदार्थसार्थपरि°
,,	९	शतपत्रां°	सितपत्रां°
,,	१३–१७	तत्संनियोगे ह्रस्वश्च......लस्य द्विः।	तत्संनियोगे च लस्य द्वि।
,,	२०	°निरोपणे	°निरोपे
३४	१६	स्थूणा स्तम्भस्तत्संनिभा	स्थूणास्तम्भसंनिभा
३६	३	निवुत्त......निअत्तो,	निअत्त......निवुत्तो।
,,	८	संमान	सन्मान°
,,	१०	धृष्टाधृष्टानां प्रगल्भाप्रगल्भानां	धृष्टानां प्रगल्भानां
,,	१९	कामवशवर्तित्वेन	कामवर्तित्वेन
३७	६	मुइङ्गि...मिइङ्ग.	मुअङ्गि...मिअङ्ग।
३८	११	धरण्यां	धरिण्यां
,,	१५	मुइङ्ग मिइङ्ग।	मुअङ्ग मिअङ्ग।
३९	१	°रिउ-विलास	°रिउसरिविलास°
४०	५	त्रि षट्क	त्रिक षट्क
४१	५	देव्वा	दिव्वा°
,,	८	पराक्रमत्वेन	पराक्रमवत्त्वेन

पृष्ठे.	पङ्क्तौ.	Printed Text.	MS. D.
४२	९	मनोहरसर°	मनोहरः सर°
,,	२३	°पुटदलनं गो°	°पुटं दलनं च गो°
४३	६	समासः ।	सः ।
,,	१०	°र्वे आदेशः ।	°र्वादेशः ।
४४	६	सुउमाल°	सुकुमाल°
,,	२०	एत् ।	एद्वा ।
४५	१९	°रस्य उलूखलश्च लोहस्य उलूख°	°रस्योदूखलश्च लोहस्योदूखलश्च
४६	१८	करे सन् अवगतः ऊ°	करे गतः सन् ऊ°
४७	६	°नत्तंचर°	°नक्कंचर°
,,	९	°श्लाघ्या	°श्लाघा
४८	४	°जउंण°	°यउंण°
,,	६	वक्ष्यमाण°	पूर्वोक्त°
,,	२३	नत्तंचर ।	नक्कंचर ।
,,	२४	,,	,,
४९	४	लायंण्ण°	लायण्ण°
,,	११	°गजवरः	°गजो
,,	१२	°च्छापेन च्युतो°	°च्छापेनाक्रोशेन च्युतो°
५०	२	मयगलो	गयवरो
,,	१०	°कासित°	°काशित°
५१	२	मयावत्थं.	गयावत्थं ।
,,	११	दुग्गः ।	दुग्ग ।
५३	१०	मृतककपाल°	मृत्कपाल°
,,	२३	अत्युन्नतत्वेन	अत्युच्चत्वेन
५४	१४	अतुच्छाः	अतुच्छं
,,	१८	सटा°	शटा°
५५	४	°घुसणुमींस°	°घुसणुम्मींस°
५६	१–३	°विणिम्मिअ......सिढिलिअ°	°विणिम्मिअ सिढिलिअ°
५८	३	निसढाइ°	निसिढाइ°
,,	७	°धोरणी°	°धोरिणी°
,,	१७	°प्रसिद्धनैषेधिकी	°प्रसिद्धः निषेधिकीं
६२	१	सोवओग°	सोवओअ°

पृष्ठे.	पङ्क्तौ.	Printed Text.	MS. D.
६४	५	प्रयुज्यन्ते ।	प्रयुज्यन्ते स्म ।
,,	१५	सुवर्णमणि°	सुवर्णदुर्वर्णमणि°
६६	९	स्नुषाभिः [पाषाण......रिव] दृष्टाः ।	स्नुषाभिर्दृष्टाः नर्तनरामणीयकविलोकनलोलुपत्वेन निर्निमेषनिश्चलत्वादिना तथावस्थानात् पाषाणपुत्तिकाभिरिवेत्युत्प्रेक्ष्यते ॥
,,	१६	°त्रिगूढं......द्विगूढ°	°त्रिमूढं......द्विमूढ°
६७	२४	सिरायां	शिरायां
६९	१६, १७	आरात्रि°	आरत्रि°
७०	४	सइ	सय
७१	१२	ये जीवास्तेषां	ते जीवाश्च तेषां
,,	१४	मुक्तपदवी°	मुक्तिपदवी°
७२	३	°नउलाण ।	°निउलाण ।
,,	६	यत उक्तम् ।	यदुक्तं ।
,,	८	मुप°	णुप°
,,	२१	सोमि	सामि
,,	२७	सान्द्र°	सार्द्र°
७३	५	पम्हा पम्हसेवि	पम्हसा पम्हसंपि
,,	१०	अट्टानां स्त°	अट्टानां हट्टानां स्त°
,,	१८	°सत्थाइ ।	°सत्थाइं ।
,,	२१	अनुष्ठितमिवे°	अनुष्ठितमेवे°
७५	१३	पम्हहा पम्हसे	पम्हहा पम्हसं
,,	१९	सारिक्खं ।	सरिक्खं ।
७६	३	वदनकं	पचचाद्दोवदनकमिति वदनकं
७९	१४	माने हेतु°	मानहेतु°
,,	२२	निर्वापणात्	निर्वापनात्
८१	१६	तुर्यांशो	खंडशो
८२	१२	इट्ट ।	इट्टा ।
८३	१५	°जाज्वल्यमानज्वलन°	°जाज्वलज्ज्वलन°

पृष्ठे.	पङ्क्तौ.	Printed Text.	MS. D.
८४	६	स्पर्धा यत्र अन्दोलने तद्	स्पर्धा अभिभवेच्छा यत्र तद्
८५	१९	°काश्मीराः	°कश्मीराः
८६	६	शौटीर्यं	शौंडीर्यं
८८	१३	°तीर्थे वा	°तीर्थे हे
८९	४	कुरवयं	कुरुवयं
,,	१४	सूक्ष्मस्थस्य क्ष्मस्य	सूक्ष्मस्थक्ष्मस्य
,,	१९	दुःखोत्पादकेषु अन्तःपातो यस्य तत् तादृशं कुरवकं	दुःखोत्पादे कष्टविधानेन्तप्रायं मृत्युकल्पं कुरवकं
९०	१५	युष्मत्प्रिया नागमिष्यन्तीति	युष्मत्प्रेयानागमिष्यतीति
,,	१६	चन्द्राणि	वन्द्राणि
९१	६	अचन्द्र इति किम् । चन्द्र ।	अवन्द्र इति किम् । वन्द्र ।
९२	१४	पथिकानां वनं	पथिकानां पान्थानां वनं
९३	९	°गुणाख्या°	गुणख्या°
९५	७	येषां [तेषां] पूरितः	येषां ते तथा तेषां पूरितः
९७	४	°कढिण	कढण
,,	१४	°सहना प्रिया वज्रकठिनहृदया कापि	सहना वज्रकठिनहृदया कापि प्रिया
९९	७	कसण	कसणा
,,	१७	प्रियः	प्रेयान्
१००	३	आणालव्व	आलाणव्व
,,	,,	कुरवया दढयरं	कुरुवया दढतरं
,,	९	°स्थानं क्र°	°स्थानं य क्र°
,,	१५	°त्कण्ठादिज°	°त्कण्ठाधिज°
,,	१८	सुराष्ट्रं तयोर्युवत्यो	सुराष्ट्रा तयोर्युवतयो
,,	२२	सजणा ।	सयणा
१०१	१९	विशंकट°	विसंकट°
,,	२२	तिलककुसुमं	तिलकं कुसुमं
१०२	७	रम्भं	रव्भं
,,	१३	अङ्गनाश्रेष्ठे	अङ्गनाप्रधाने
१०३	४	चलणे	चरणे
,,	७	पूर्वकृता°	पूर्वं कृता°

पृष्ठे.	पङ्क्तौ.	Printed Text.	MS. D.
१०४	३	°पेम्मेहिं पीअसीओ	°पेमेहिं पेअसीउ
,,	२४	[इत्थी] त्थी ।	त्थी इत्थी ।
१०५	२३	तिर्यञ्च°	तिर्यच°
१०६	२	सढो	सठो
१०७	१३	गृहीता ।	गृहीता आलिङ्गिता ।
१०८	३	म्मि	म्हि
१०९	४	बाहुल्लच्छीहि	बाहुल्लच्छीइ
,,	२५	गर्विन्	गर्ववन्
११०	१०	°प्रयोगं	°योगं
१११	१	एक्क°	एक°
,,	३	अवरि°	उवरि°
,,	२५	मन्मथेन........	मन्मथेन रतेच्छया मिश्रः
११२	५,६	...रमितः कामितः ।	प्रियो रतिमिश्रया सुरताभिलाषयुतया कयापि रतः कामितः ।
,,	२५	°चरितद्वया°	°चरितप्राकृतद्वया°
११४	६	चेअ	चेव
,,	१०	हन्दि ।	हन्दि ५
,,	१९	नूनस्व°	नूनां स्व°
,,	२१	पुष्प्यन्तीति ।	पुष्पतीति ।
११५	८	लक्षणे ।	लक्ष्मणे ।
,,	१४	बले ।	बले २
११६	८	स्मृत°	स्रत°
११७	३	हु	खु
,,	१६	श्रुत°	स्रत°
११८	५	मिलाणा	गिलाणा
११९	४	पत्तेअं मित्ताइं	पत्तेय मत्ताइ अ
,,	६	°अंति ।	°अंति ।
,,	११	। स प्रियः	। प्रियः
,,	१३	सोल्लुण्ठम् ।	सोल्लण्ठम् ।
,,	१७	वयस्याश्च	वयस्यश्च

पृष्ठे.	पङ्क्तौ.	Printed Text.	MS. D.
११९	२२	°सरिअंति	°सरिअमिति
१२०	४	जंवि	जंपि
,,	१४	हु । खु ।	हु ४ खु ४
,,	१५	ऊ ।	ऊ ४
,,	२३	वणे ।	वणे ४
१२१	१	एकेक°	एकेक°
,,	५	पश्य ।	पश्ये ।
१२२	३	सिरिसा°	सिरसा°
,,	४	किं	कं
,,	७	टा-आमो°	टामो°
,,	८	प्रियालैः	पियालैः
,,	१५	कृष्टः	आकृष्टः
१२३	४	नीहरिआ	णीहरिआ
१२४	६	धारीए.	धाराए ।
,,	१५	वेएणं ।	वेगेणं
,,	१९	तम् आश्चर्य°	तं तत्राश्चर्य°
,,	२०	°जलयन्त्रनिर्गम°	°यन्त्रजलनिर्गम°
१२६	२१	दंपतिभि°	दंपतीभि°
१२७	१६	दहिणो । महुणो ।	दहिणो २ । महुणो २ ।
१२८	१४	प्रियैः	प्रियेण
१२९	६	उद्विसिओ	उद्धसिउ ।
,,	११	सफरा°	शफरा°
,,	२०	°गण्डूषप्रादु°	°गण्डूषप्राप्तिप्रादु°
१३१	२१	भणिते प्रत्यु°	भणितेपि प्रत्यु°
१३३	१८	भणितं जल्पि°	भणितं परस्परं जल्पि°
१३५	१४	पूर्वोक्तं प्रति°	पूर्वोक्तं विज्ञपितं प्रति°
,,	१६	विज्ञाप°	विज्ञप°
१३८	९	जलक्षणे	जलोक्षणे
१४०	१३	राइणो ।	राइणो राइणो ।
१४५	१७	पुष्पति	पुष्प्यति
१४६	२	पारियाण	पारयाण

पृष्ठे.	पङ्क्तौ.	Printed Text.	MS. D.
१४६	३	चिश्विणिअ°	चिश्वणिअ°
,,	१३	मलयादि°	मलयजादि°
,,	२०	चिश्विणिका°	चिश्वणिका°
,,	२१	एतस्य आ°	एतस्य च आ°
१४७	१४	[एतस्मिन्]	एतस्मिन्
,,	२०	ईति	इत्ति
१४९	११	जल्पन्ति कथयन्ति ।	कथयन्ति जल्पन्ति ।
,,	१४	°यतेति ।	°यत ।
१५०	१८	सुरसाख्यः प्रसिद्ध°	सुरसाख्यप्रसिद्ध°
१५१	४	ढोवणत्थं	ढोअणत्थं
१५२	७	३३–३५.	Omits three verses, 33,34 and 35.
,,	१८	युष्माकं ७	युष्माकं ८
१५३	१७	°नान्तम् । लामः ।	°नातमिति लामः ।
१५५	५	°पादपप्रसूना°	°पादपाप्रलप्रसूना°
,,	७	समुच्चयद्यो°	समुच्चयावद्यो°
१५६	१	कुरुरा	कुररा
,,	७	कुरुरौ	कुररौ
,,	१५	चतुर इमान्	चतुर इमान् चतुर इमान् चतुर इमान्
१५७	१३	हाहाभिर्देवगायनैस्तेषां वा	हाहा देवगायनस्तेन तेषां वा
१५८	१०	आयंश्चासौ पवनश्च	यन् वहन् स चासौ पवनश्च
१५९	१२	°भ्यां पद्मानि वी°	°भ्यां पश्यतां वी°
,,	१४	। भवतीति	। न भवतीति
,,	२१, २२	इह शरदि.........समर्थः	इह शरदि मर्त्यगणाय सुरेभ्यश्च खु निश्चितं अलं समर्थः
१६०	९	वधाय विनाशाय कुपिते	वधाय विनाशनिमित्तं रुष्टे कुपिते
,,	११	भविष्यती°	भवती°
,,	१३	भूतम् ।	भूतं संवृत्तम् ।
,,	१८	°सादृश्यात् त इ°	°सादृश्यात् ता इ°

पृष्ठे.	पङ्क्तौ.	Printed Text.	MS. D.
१६०	१९	पृष्टे	पृष्टौ
,,	२३	न एति नायाति किंतु	न पथिक एति किंतु
१६१	५	इव दूरं पथिकः तेभ्यो°	इव तेभ्यो°
,,	९	उज्वलैः कन°	उज्वलैः दीप्रैः कन°
,,	१०	लोपात् ।	लोपे ।
,,	१२	देश्यं शीघ्रार्थे ।	देश्य युगपत् ।
,,	१७	गुरु भवति गुरूयति । अलो°	गुरु वति वा । अलो°
१६२	१६	श्रेष्ठमपि	प्रेष्टमपि
,,	२४	विस्फुरन्ति	स्फुरन्ति
१६३	३	पासह	पासेह
,,	१९	फलिनीलताः श्यामालताः ताश्च	फलिनी श्यामा तस्या लताश्च
,,	२२	पासह ।	पासेह ।
१६४	११	चणकेषु	चनकेषु
,,	२०	अप्रीतिकां	अप्रीतिकं
,,	२२	एस्थाने	एः स्थाने
१६५	१	जुअ	जुव
,,	११	°रजत°	°रजन°
,,	१६	पुष्पमाल्यादि°	स्वस्य माल्यादि°
१६६	५	कराविज्जइ	करावीअइ
,,	८	भवन्तं भा°	भवन्तं तं भा°
,,	२३	मरणा°	मारणा°
१६७	९	करावीअइ ।	करावीअइ २
१६८	१०	भवन्तीं	भवतीं
,,	१५	युग्मे आर्या°	युग्मे आद्या आर्या°
१६९	५	पुंनागो,	पुंनामो ।
,,	१८	°लोको	°लोकश्च
१७०	११	लभ्यते	लभ्येत
,,	१७	इति पूर्वोक्तरीत्या	इत्यारामिकोक्तरीत्या
,,	१९	श्रीकुमारपालदेवः	श्रीकुमारपालभूपालः
१७३	१९	विशेषं	विशेषकं

पृष्ठे.	पङ्क्तौ.	Printed Text.	MS. D.
१७३	२०	प्रिये संमुखं......दानाद्यर्थं	प्रियसंमुखं गृहं प्रविशति प्रियेऽभ्यक्षणदानाद्यर्थं
१७४	११	प्रियेण सह......वदिष्यामि ।	प्रियं वक्ष्यामि वक्षसि धरिष्यामि ।
,,	१७	इत्यर्थः ।	इत्यर्थ इति यावत् ।
,,	१८	विजन°	जन°
,,	२३	स्वपरिचारिकां	स्वप्रतिचारिकां
१७५	१८	रमस्व । त्वमपि	रमस्व । त्वं रमस्व । त्वमपि
,,	२१	रमते [इयं रमते] ।	रमते । इयं रमते ।
१७७	१२	किलकिंचितं	किलिकिंचितं
,,	१९	वयं भविष्यामः ।	वयमभविष्याम ।
१७८	६	होज्ज । होज्जा ।	होज्ज २ होज्जा २।
,,	१६	विहसन्ती	विकसन्ती
१८२	३	°पसमाणिं	°पसमिणि
,,	१५	°प्रशमनीं	°प्रशमिनीं
,,	१६	। दिनतापः	। तापः
,,	१८	संतापिताङ्गः	संतप्ताङ्गः
१८३	७	अपिबत् ।	अपिबत् अधयत् ।
,,	१३	स्वपिति	स्वपति
१८४	१७	उकुकुरिअ	कुकुरिअ
१८५	१२	मानिनीमानो येन	मानिनीमानो ना(का?)मिन्यभिमानो येन
,,	१९	°मयं धव°	°मयधव°
१८६	८	सर्वत्रात्र रेचिर्बहिर्निःसारण... निःसारणम् ।	सर्वत्र रिचिर्बहिर्निःसरण... निःसारणम् ।
,,	१०	धनुर्गुणः	धनुषगुणः
,,	२१	°गुण्ठित°	°गुण्डित°
१८७	७	तयैव	तथैव
,,	१४	°ढक्कोम्बाल°	°ढक्कोम्बाल°
१८९	६	°स्फोरणं	°स्फेरणं
,,	१७	माण्डलिकाः	मण्डलिकाः

पृष्ठे.	पङ्क्तौ.	Printed Text.	MS. D.
१८९	१८	°माण्डलिक°	°मण्डलिक°
१९१	६	°भुमयाहिं	°भुमयाए
१९६	६	चतुरङ्गसैन्यं	चतुरङ्गवाहनं
१९७	१	कम्मन्तमत्त°	कम्मन्तमन्त°
२०१	१०	माठी यस्य	माठिर्यस्य
,,	२१	°भक्षा	°भक्ष्या
२०२	४	णिच्चलीअ	णिव्वलीअ
,,	१४	मुञ्चन् दुःखं	मुञ्चन् सन् दुःखं
,,	१८	कुमारपाल नृप कु°	कुमारपाल स कृ°
२०३	१२	°कृते समा°	°कृते सति समा°
२०४	१६	राजिताश्च ॥	राजिताश्च कामिताश्च ॥
२०५	१९	°स्तन्मते तेज°	°स्तन्मते च तेज°
२०६	२३	°सुवार्तो°	°सूचार्थो°
२०७	१२	°व्रजित	°व्रजितः
२०८	१४	केवलं ल°	केवलल°
२१०	२१	विलुण्टित°	लुटित°
२११	४	णिज्झोड°	णिच्छोड°
,,	५	°सिरक्क°	°सिरिक्क°
,,	११	°अच्छिआ ।	°अच्छइ ।
,,	१२	छेदनशस्त्रैः	छेदनाः शस्त्रैः
२१२	२	दलं	वलं
२१३	१	°जय°	°जइ°
,,	१८	परं पारं	परपारं
,,	१९	फंसावही ।	फंसाविही ।
२१४	९	आक्रन्देर्णी°	आक्रन्दे णी°
२१५	५	ततं	तं
,,	१२	त्वदाज्ञानङ्गीकारेण विरोधकं यत्	त्वदाज्ञाङ्गीकारेण विरोध । यत्
,,	१५	संतप्येर्झ°	संतपेर्झ°
२१६	५	गुलगु°	गुलगु°
२१७	१	उब्भुत्तिअ°	अब्भुत्थिअ°
२१८	७	धरिप्याम इति	धारयिष्याम इति

पृष्ठे.	पङ्क्तौ.	Printed Text.	MS. D.
२१९	१२	न स्थातुं दा°	नः स्थातुं न दा°
२२०	९	जृम्भमाणः	जृम्भमानः
,,	१०	महार्घे	महर्घ्यं
२२१	१८	त्थुन्दिअ ।	छुन्दिअ ।
२२२	२	तलअण्टइ	तणअण्टइ
,,	९	संसारे सर°	संसारे संसर°
२२५	७	°हितपद°	°हितप्रद°
,,	१५	°विषयपरम°	°विषयं परम°
२२६	१९	पूर्णभृताः	पूर्णा भृताः
२२८	८	तादृशवराङ्ग°	तादृशवराङ्गनावराङ्ग°
,,	१७	शतवा°	शतं वा°
२२९	३	°कह°	°बहु°
,,	२१	ऊहापोहो°	ऊहोपोहो°
२३०	२०	°लषेत	°लषत
२३२	१०	स्पृष्टा स°	स्पृष्टा श्लिष्टा स°
२३३	९	कुक्करी	कुकुरी
२३४	९	तीक्ष्णं ब्रह्म°	तीक्ष्णं ब्रह्म ब्रह्म°
,,	२१	कर्णाभ्यटनैका°	कर्णाभ्यष्टनिका°
२३५	९	°रसेन म्र°	°रसेन च म्र°
,,	२०	प्रतीक्षते भवा°	प्रतीक्षते अविभवा°
२३६	१५	मार्गाः कुम°	मार्गा अपमार्गाः कुम°
२३७	१७	पर्यस्यति	पर्यवस्यति
२३८	६	ओवाहए	ओहावए
,,	२०	युक्तायुक्तकारिता	युक्तकारिता
२४३	५	युध्यते न युद्धं	युध्यते युद्धं
,,	१६	दुःखकालेपि	दुःखमाकालेपि
२४५	१३	अधर्मम् अध°	अधर्मध°
२४६	३	°म्मीलणआ	°म्मीलणउ
२४७	१२	°पदार्थे	°पदार्थेषु
,,	१४	विदधामि ॥	विदधामि करोमि ॥
२४८	३	ख-पुप्फ°	खपुष्प°

पृष्ठे.	पङ्क्तौ.	Printed Text.	MS. D.
२४८	६	अर्हद्ध्यान°	अर्हदादिध्यान°
२४९	६	अप्पाप्प°	अप्पाअप्प°
,,	२१	परम°	चरम°
२५३	१३	भावेन अ°	भावेन च अ°
२५४	६	सिद्धेहिवि	सव्वेहिवि
,,	७	अह्निय°	अपह्निय°
२५५	७	°दान्निर्विघ्नं	°दादनिर्विघ्नं
२५६	५	स्पृशेश्छिप्पः ।	स्पृशश्छिप्पः ।
२५८	८	अपदादावित्येव ।	अपदादित्येव ।
२६०	२१	°न्यत् प्राकृतवदिति ।	°न्यत् प्राकृतवदेव भवन्ति ।
२६७	१८	सुषुम्णा°	सुषमणा°
२७५	३	तुम्हे निक्खउ	तुम्हि निरिक्खउ
,,	१८	नेतुं त्वा°	नेतुं प्रापयितुं त्वा°
२८०	४	बोलहु	बोल्लहु
,,	२३	किम् । अक°	किम् । कि । करहा । पुलय । असंयुक्तानामिति किम् । अक°
२८१	७	अम्वँलइं ।	कम्वलइं ।
२८७	७	। तादृशः	। स तादृशः
२९२	१३	सार्धं छन्दः ॥	सार्धच्छन्दः ॥

CORRECTIONS.

पृष्ठे.	पङ्क्तौ.	अशुद्धम्.	शुद्धम्.
२	३	°करणवण°	°करणवण° (°करणप्रवण°?)
३	५	अभिधेयप्रयोजन°	अभिधेयसंबन्धप्रयोजन°
४	१	जीवो	जीवे
७	१५	सालाहणो ।	सालाहण ।
८	१८	°लेन संभा°	°लेन खु इति संभा°
१०	१	संज्झाए	संझाए
,,	,,	°बइल्लो,	°छइल्लो,
,,	१२	संज्झाए ।	संझाए ।
,,	१४	मानुष्यः	मनुष्यः
,,	१५	°नाभ्यश्च अधि°	°नाभ्यश्चाभ्यधि°
,,	१९	ताश्च जनश्च	ताश्च स जनश्च
११	१८	इति अनु°	इति वा अनु°
१२	१	°वंज्झ-जण-वञ्ज्झो,	°वंझ-जण-वञ्झो,
,,	९	°त्रासने शक्तिः	°त्रासने प्रकटिता शक्तिः
१३	१९	वंज्झ	वंझ
,,	२०	वञ्ज्झो ।	वञ्झो ।
,,	२२	वा”	वा”
१४	११	पुण्यं	तारुण्यं
१५	५	तत्थ सिरि-कुमार°	तत्थ सिरि-कुमर°
,,	१४	अत्र	अत्र च
,,	,,	देवतानि ।	दैवतानि ।
१६	४	किंत्ति	किंति
,,	९	डो विस°	डोविस°
,,	१४	°चम्पकादि दाम ।	°चम्पकादिदाम ।
१७	१६	निषिक्तं	निषिक्तं (निःषिक्तं ?)
,,	१७	निःसत्त्वं	निःसत्त्वं
१८	३	खाए	खाएँ

पृष्ठे.	पङ्क्तौ.	अशुद्धम्.	शुद्धम्.
१८	१४	°सौख्याय	°सौस्थ्याय
,,	२५	Add १B खाएनीगा.° C खाएंमीगा.° D खाइंतिगा.°	
१९	१८	अखण्डिता अच्छिन्ना	अखण्डितः अच्छिन्नः
२०	१	धनु°	धणु°
,,	१२	किं च	किंवत्
,,	१५	अहिण्णु ।	अहिण्णू ।
,,	२१	यस्मिन्	अस्मिन्
२१	७	आश्चर्यकौतुकनिरीहाः	आश्चर्ये कौतुके निरीहाः
,,	८	यमिनामपि	योगिनामपि
२२	१६	°दाइ वा"	दाई वा"
,,	२१	रण्ण	रण्णे
२३	१६	अणुरागो ।	अणुरागा ।
२४	९	°नुसारे"	°नुस्वारे"
,,	१३	°कूर्पासवद्यशो°	°कूर्पासद्यशो°
२५	४	°रावेहि अ पिअ°	°रावोह्निअ-पिअ°
,,	१४	°तलानि चतु°	°तलानि यानि चतु°
२६	६	एत्वम् ।	एत्वं वा ।
२७	१५	°प्रतिश्रुत	°प्रतिश्रुति
,,	२४	हलद्दा । हलद्दी ।	हलद्द । हलद्दि ।
२८	६	°निवास°	निवास°
२९	१०	दिआ ॥	दिआ । निवास ॥
,,	२२	इति ओत्वम्	इति इत ओत्वम्
,,	२६	1 BC insert निवास before कचित्	Omit.
३०	२	अजुण्ण सूर°	अजुण्ण-सूर
३१	७	पेऊस ।	पेऊसा ।
,,	१२	पेढ	पेढे
३२	१	°वाहु°	°बाहु°
,,	१६	एवं मङ्गल°	एवंमङ्गल°
३३	७	°पदार्थपरि°	°पदार्थसार्थपरि°
३४	२५	स्थूणाः.	स्थूणास्तंभसंनिभा.

पृष्ठे.	पङ्क्तौ.	अशुद्धम्.	शुद्धम्.
३६	३	निवुत्त°	निवुत्त°
उत्साहोत्सन्नवर्जिते शब्दे यौ त्सच्छौ तयोः[4] परयोरादेरुत ऊद् भवति ॥ त्स । ऊसुओ[5] । ऊसवो । ऊसित्तो । ऊसरइ ॥ छ । उद्गताः शुका यस्मात् सः ऊसुओ । ऊससइ ॥ अनुत्साहोत्सन्न इति किम् । उच्छाहो[6] । उच्छन्नो ॥

लुकि दुरो वा ॥ ११५ ॥

दुरुपसर्गस्य रेफस्य[7] लोपे सति उत ऊत्वं वा भवति ॥ दूसहो दुसहो । दूहवो दुहओ[8] ॥ लुकीति किम् । दुस्सहो विरहो ॥

ओत्संयोगे ॥ ११६ ॥

संयोगे परे आदेरुत ओत्वं भवति ॥ तोण्डं । मोण्डं । पोक्खरं । कोट्टिमं । पोत्थओ । लोद्धओ । मोत्था । मोग्गरो । पोग्गलं । कोण्ढो । कोन्तो । वोक्कन्तं ॥

कुतूहले वा ह्रस्वश्च ॥ ११७ ॥

कुतूहलशब्दे उत ओद् वा भवति तत्संनियोगे ह्रस्वश्च वा ॥ कोऊहलं[9] कुऊहलं कोउहल्लं ॥

---

१ B इत्वं भ°. २ B ई क्षुते. ३ A °होछन्ने. ४ P तयोरा°. ५ B ऊसओ. ६ A उत्साहो. P ७ B रेफलो°. ८ P B दुहवो. ९ A B कोउहलं.

अदूतः सूक्ष्मे वा ॥ ११८ ॥

सूक्ष्मशब्दे ऊतोद् वा भवति ॥ सण्हं सुण्हं ॥ आर्षे । सुहुमं ॥

दुकूले वा लश्च द्विः ॥ ११९ ॥

दुकूलशब्दे ऊकारस्य अत्वं वा भवति तत्संनियोगे च लकारो द्विर्भवति ॥ दुअल्लं दुऊलं ॥ आर्षे दुगुल्लं ॥

ईर्वोद्व्यूढे ॥ १२० ॥

उद्व्यूढशब्दे ऊत ईत्वं वा भवति ॥ उव्वीढं । उव्वूढं ॥

उर्भ्रू-हनूमत्कण्डूय-वातूले ॥ १२१ ॥

एषु ऊत उत्वं भवति ॥ भुमया । हणुमन्तो । कण्डुअइ । वाउलो ॥

मधूके वा ॥ १२२ ॥

मधूकशब्दे ऊत उद्[1] वा भवति ॥ महुअं महूअं ॥

इदेतौ नूपुरे वा ॥ १२३ ॥

नूपुरशब्दे ऊत इत् एत् इत्येतौ वा भवतः ॥ निउरं नेउरं । पक्षे नूउरं[2] ॥

ओत्कूष्माण्डी-तूणीर-कूर्पर-स्थूल-ताम्बूल-गुडूची-मूल्ये १२४

एषु ऊत ओद् भवति ॥ कोहण्डी कोहली । तोणीरं । कोप्परं । थोरं । तम्बोलं । गलोई । मोल्लं ॥

स्थूणा-तूणे वा ॥ १२५ ॥

अनयोरूत ओत्वं वा भवति ॥ थोणा थूणा । तोणं तूणं ॥

ऋतोत् ॥ १२६ ॥

आदेर्ऋकारस्य अत्वं भवति ॥ घृतम् । घयं ॥ तृणम् । तणं ॥ कृतम् । कयं ॥ वृषभः । वसहो ॥ मृगः । मओ ॥ घृष्टः । घट्ठो ॥ दुहाइअमिति कृपादिपाठात् ॥

---

१ P उत्त्वं. २ B नूपुरं.

आत्कृशा-मृदुक-मृदुत्वे वा ॥ १२७ ॥

एषु आदेर्ऋत आद् वा भवति ॥ कासा किसा । माउक्कं मउअं । माउक्कं मउत्तणं ॥

ईत्कृपादौ[1] ॥ १२८ ॥

कृपा इत्यादिषु शब्देषु आदेर्ऋत इत्वं भवति ॥ किवा । हियय । मिट्ठं रसे एव । अन्यत्र मट्ठं । दिट्ठं । दिट्ठी । सिट्ठं । सिट्ठी । गिण्ठी[2]। पिच्छी । भिऊ । भिङ्गो । भिङ्गारो । सिङ्गारो । सिआलो । घिणा । घुसिणं । विद्ध-कई । समिद्धी । इद्धी[3] । गिद्धी । किसो । किसाणू । किसरा । किच्छं । तिप्पं । किसिओ । निवो । किच्चा । किई । धिई । किवो । किविणो । किवाणं । विञ्छुओ[4] । वित्तं । वित्ती । हिअं । वाहित्तं । बिंहिओ । विसी । इसी । विइण्हो । छिहा । सइ । उक्किट्ठं[5] । निसंसो ॥ क्वचिन्न भवति । रिद्धी ॥ कृपा । हृदय । मृष्ट । दृष्ट । दृष्टि । सृष्ट । सृष्टि । गृष्टि । पृथ्वी । भृगु । भृङ्ग । भृङ्गार । शृङ्गार । शृगाल । घृणा । घुसृण । वृद्धकवि । समृद्धि । ऋद्धि । गृद्धि । कृश । कृशानु । कृसरा । कृच्छ्र । तृप्त । कृषित । नृप । कृत्या । कृति । धृति । कृप । कृपण । कृपाण । वृश्चिक । वृत्त । वृत्ति । हृत । व्याहृत । बृंहित । बृसी । ऋषि । वितृष्ण । स्पृहा । सकृत् । उत्कृष्ट[6] । नृशंस ॥

पृष्ठे[7] वानुत्तरपदे ॥ १२९ ॥

पृष्ठशब्देनुत्तरपदे ऋत इद् भवति वा ॥ पिट्ठी पट्ठी । पिट्ठि-परिट्ठविअं ॥ अनुत्तरपद इति किम् । महि-वट्ठं ॥

मसृण-मृगाङ्क-मृत्यु-शृङ्ग-धृष्टे वा ॥ १३० ॥

एषु ऋत इद् वा भवति ॥ मसिणं मसणं । मिअङ्को मयङ्को । मिच्चू मच्चू । सिङ्गं सङ्गं । धिट्ठो धट्ठो ॥

---

१ A इः कृपा°. २ A गिट्ठी. ३ A इड्ढी. ४ B विञ्छिओ. ५ B P उक्किट्टं । क°. ६ B उत्कृष्ट. ॥ पृ° P उत्कृष्ट इत्यादि ॥ पृ°. ७ A पृष्टेऽनु°.

उदृत्वादौ ॥ १३१ ॥

ऋतु इत्यादिषु शब्देषु आदेर्ऋत उद् भवति ॥ उऊ । परामुट्ठो । पुट्ठो । पउट्ठो । पुहई । पउत्ती । पाउसो । पाउओ । भुई । पहुडि । पाहुडं । परहुओ । निहुअं । निउअं । विउअं । संवुअं । वुत्तन्तो । निव्वुअं । निव्वुई । वुन्दं । वुन्दावणो । वुड्ढो । वुड्ढी । उसहो । मुणालं । उज्जू[1] । जामाउओ[2] । माउओ । माउआ । भाउओ । पिउओ । पुहुवी[3] ॥ ऋतु । परामृष्ट । स्पृष्ट । प्रवृष्ट । पृथिवी । प्रवृत्ति । प्रावृष् । प्रावृत । भृति । प्रभृति । प्राभृत । परभृत । निभृत । निवृत । विवृत । संवृत । वृत्तान्त । निर्वृत । निर्वृति । वृन्द । वृन्दावन । वृद्ध । वृद्धि । ऋषभ । मृणाल । ऋजु । जामातृक । मातृक[4] । मातृका । भ्रातृक । पितृक । पृथ्वी । इत्यादि ॥

निवृत्त-वृन्दारके वा ॥ १३२ ॥

अनयोर्ऋत उद् वा भवति ॥ निवुत्तं निअत्तं । वुन्दारया वन्दारया ॥

वृषभे वा वा ॥ १३३ ॥

वृषभे ऋतो वेन सह उद् वा भवति ॥ उसहो वसहो ॥

गौणान्त्यस्य ॥ १३४ ॥

गौणशब्दस्य[5] योन्त्य ऋत् तस्य उद् भवति ॥ माउ-मण्डलं । माउ-हरं । पिउ-हरं । माउ-सिआ । पिउ-सिआ । पिउ-वणं । पिउ-वई ॥

मातुरिद्वा ॥ १३५ ॥

मातृशब्दस्य गौणस्य ऋत इद् वा भवति ॥ माइ-हरं । माउ-हरं ॥ क्वचिदगौणस्यापि । माईणं[6] ॥

उदूदोन्मृषि ॥ १३६ ॥

मृषाशब्दे ऋत उत् ऊत् ओच्च भवन्ति[7] ॥ मुसा । मूसा । मोसा । मुसा-वाओ । मूसा-वाओ । मोसा-वाओ ॥

---

१ B उज्जू. २ A जामाइओ । माइओ । भाइआ । भा°. P जामाइओ । माइआ । भा°.
३ A B पुहवी. ४ A मातृक । भ्रा°. ५ P B °णपदस्य. ६ B माईण. ७ P भवति.

इदुतौ वृष्ट-वृष्टि-पृथङ्-मृदङ्ग-नप्तृके ॥ १३७ ॥

एषु ऋत इकारोकारौ भवतः ॥ विट्ठो वुट्ठो । विट्ठी वुट्ठी । पिहं पुहं । मिइङ्गो[1] मुइङ्गो । नत्तिओ नत्तुओ ॥

वा बृहस्पतौ ॥ १३८ ॥

बृहस्पतिशब्दे[2] ऋत इदुतौ वा भवतः ॥ बिहप्फई बुहप्फई । पक्षे । बहप्फई ॥

इदेदोद्वृन्ते ॥ १३९ ॥

वृन्तशब्दे ऋत इत् एत् ओच्च भवन्ति[3] ॥ विण्टं वेण्टं वोण्टं ॥

रिः केवलस्य ॥ १४० ॥

केवलस्य व्यञ्जनेनासंपृक्तस्य ऋतो रिरादेशो भवति ॥ रिद्धी । रिच्छो ॥

ऋणर्ज्वृषभर्त्वृषौ वा ॥ १४१ ॥

ऋणऋजुऋषभऋतुऋषिषु ऋतो रिर्वा भवति ॥ रिणं अणं । रिज्जू[4] उज्जू[5] । रिसहो उसहो । रिऊ उऊ । रिसी इसी ॥

दृशः क्विप्-टक्सकः[6] ॥ १४२ ॥

क्विप् टक् सक् इत्येतदन्तस्य दृशेर्धातोर्ऋतो रिरादेशो भवति ॥ सदृक् । सरि-वण्णो । सरि-रूवो । सरि-बन्दीणं[7] ॥ सदृशः । सरिसो ॥ सदृक्षः । सरिच्छो ॥ एवम् एआरिसो । भवारिसो । जारिसो । तारिसो । केरिसो । एरिसो । अन्नारिसो । अम्हारिसो । तुम्हारिसो ॥ टक्सक्साहचर्यात् त्यदाद्यन्यादि[हे० ५. १]सूत्रविहितः क्विबिह गृह्यते ॥

आदृते ढिः ॥ १४३ ॥

आदृतशब्दे ऋतो ढिरादेशो भवति ॥ आढिओ ॥

अरिर्दृप्ते ॥ १४४ ॥

दृप्तशब्दे ऋतोरिरादेशो भवति ॥ दरिओ । दरिअ-सीहेण ॥

---

१ A मुयङ्गो. २ B 'तौ श'. ३ P भवति. ४ B रिजू. ५ B उजू. ६ B दृशेः. ७ A सरिवंदीणं.

ऌत इलिः क्लृप्त-क्लृन्ने ॥ १४५ ॥

अनयोर्ऌत इलिरादेशो भवति ॥ किलिन्न-कुसुमोवयारेसु ॥ धारा-किलिन्न-वत्तं[1] ॥

एत इद्वा वेदना-चपेटा-देवर-केसरे ॥ १४६ ॥

वेदनादिषु एत इत्त्वं वा भवति ॥ विअणा वेअणा । चविडा[2] । विअड-चवेडा-विणोआ । दिअरो देवरो ॥ महमहिअ-दसण[3]-किसरं । केसरं ॥ महिला महेला इति तु महिलामहेलाभ्यां शब्दाभ्यां सिद्धम्[4] ॥

ऊः स्तेने वा ॥ १४७ ॥

स्तेने एत ऊद् वा भवति ॥ थूणो थेणो ॥

ऐत एत् ॥ १४८ ॥

ऐकारस्यादौ वर्तमानस्य एत्त्वं भवति ॥ सेला[5] । तेलुक्कं[6] । एरावणो । केलासो । वेज्जो । केढवो । वेहव्वं ॥

इत्सैन्धव-शनैश्चरे ॥ १४९ ॥

एतयोरैत इत्त्वं भवति ॥ सिन्धवं । सणिच्छरो ॥

सैन्ये वा ॥ १५० ॥

सैन्यशब्दे ऐत इद् वा भवति ॥ सिन्नं सेन्नं ॥

अइर्दैत्यादौ च ॥ १५१ ॥

सैन्यशब्दे दैत्य इत्येवमादिषु च ऐतो अइ इत्यादेशो भवति । एत्वापवादः ॥ सइन्नं । दइच्चो । दइन्नं । अइसरिअं । भइरवो । वइजवणो । दइवअं । वइआलीअं । वइएसो । वइएहो । वइदब्भो । वइस्साणरो । कइअवं । वइसाहो । वइसालो । सइरं । चइत्तं ॥ दैत्य । दैन्य । ऐश्वर्य । भैरव । वैजवन । दैवत । वैतालीय । वैदेश । वैदेह ।

---

१ A वन्नं. B वन्तं. २ P °विडा । चवेडा । विअ° ३ B दंसण°. ४ P °महेलाशब्दा°. B °महेलाभ्यां सि°. ५ B सेला । सेन्नं । ते°. ६ P तेलोक्कं.

वैदर्भ । वैश्वानर । कैतव । वैशाख । वैशाल । स्वैर । चैत्य । इत्यादि ॥ विश्लेषे न भवति । चैत्यम् । चेइअं ॥ आर्षे । चैत्यवन्दनम् । ची-वन्दणं ॥

वैरादौ वा ॥ १५२ ॥

वैरादिषु ऐतः[1] अइरादेशो वा भवति ॥ वइरं वेरं । कइलासो केलासो । कइरवं केरवं । वइसवणो वेसवणो । वइसम्पायणो वेसम्पायणो । वइआलिओ वेआलिओ । वइसिअं वेसिअं । चइत्तो चेत्तो ॥ वैर । कैलास । कैरव । वैश्रवण । वैशम्पायन । वैतालिक । वैशिक चैत्र । इत्यादि ॥

एच्च दैवे ॥ १५३ ॥

दैवशब्दे ऐत एत् अइश्चादेशो भवति ॥ देव्वं[2] दइव्वं दइवं ॥

उच्चैर्नीचैस्यअः ॥ १५४ ॥

अनयोरैतः[3] अअ इत्यादेशो भवति ॥ उच्चअं । नीचअं । उच्चनीचाभ्यां के[4] सिद्धम् । उच्चैर्नीचैसोस्तु रूपान्तरनिवृत्त्यर्थं वचनम् ॥

ईद्धैर्ये ॥ १५५ ॥

धैर्यशब्दे ऐत ईद् भवति ॥ धीरं हरइ विसाओ ॥

ओतोद्वान्योन्य-प्रकोष्ठातोद्य-शिरोवेदना[5]-मनोहर-सरोरुहे क्तोश्च वः ॥ १५६ ॥

एषु ओतोत्त्वं वा भवति तत्संनियोगे च यथासंभवं ककारतकारयोर्वादेशः ॥ अन्नन्नं अन्नुन्नं । पवट्ठो पउट्ठो । आवज्जं आउज्जं । सिरविअणा[6] सिरो-विअणा । मणहरं मणोहरं । सररुहं सरोरुहं ॥

ऊत्सोच्छ्वासे ॥ १५७ ॥

सोच्छ्वासशब्दे[7] ओत ऊद् भवति ॥ सोच्छ्वासः[8] । सूसासो ॥

---

१ P ऐतोऽइ इत्यादे°. २ B देव्वं देवं दइव्वं. ३ P °रैसोऽअ इ°. ४ B केपि सि°. ५ A °वेदनम°. ६ A सिरिवि°. ७ B °च्छ्वासे श°. ८ A °सः.

गव्यउ-आअः[1] ॥ १५८ ॥

गोशब्दे[2] ओतः अउ आअ इत्यादेशौ भवतः ॥ गउओ । गउआ । गाओ ॥ हरस्स एसा गाई ॥

औत ओत् ॥ १५९ ॥

औकारस्यादेरोद् भवति ॥ कौमुदी । कोमुई ॥ यौवनम् । जोव्वणं ॥ कौस्तुभः । कोत्थुहो ॥ कौशाम्बी । कोसम्बी ॥ क्रौञ्चः । कोञ्चो ॥ कौशिकः । कोसिओ ॥

उत्सौन्दर्यादौ ॥ १६० ॥

सौन्दर्यादिषु शब्देषु औत उद् भवति ॥ सुन्देरं सुन्दरिअं । मुञ्जायणो । सुण्डो । सुद्धोअणी । दुवारिओ । सुगन्धत्तणं । पुलोमी । सुवण्णिओ ॥ सौन्दर्य । मौञ्जायन । शौण्ड । शौद्धोदनि । दौवारिक । सौगन्ध्य । पौलोमी । सौवर्णिकः[3] ॥

कौक्षेयके वा ॥ १६१ ॥

कौक्षेयकशब्दे औत उद् वा भवति ॥ कुच्छेअयं । कोच्छेअयं ॥

अउः पौरादौ च ॥ १६२ ॥

कौक्षेयके पौरादिषु च औत अउरादेशो भवति ॥ कउच्छेअयं ॥ पौरः । पउरो । पउर-जणो ॥ कौरवः । कउरवो ॥ कौशलम् । कउसलं ॥ पौरुषम् । पउरिसं ॥ सौधम् । सउहं ॥ गौडः । गउडो ॥ मौलिः । मउली ॥ मौनम् । मउणं ॥ सौराः । सउरा ॥ कौलाः । कउला ॥

आच्च गौरवे ॥ १६३ ॥

गौरवशब्दे औत आत्वम्[4] अउश्च भवति ॥ गारवं । गउरवं ॥

नाव्यावः ॥ १६४ ॥

नौशब्दे औत आवादेशो भवति ॥ नावा ॥

---

१ B °आअं ॥ ५८ ॥ २ B शब्दे अन. ३ B सौवर्णिक. ४ B आत्वं भ°.

एत्त्रयोदशादौ स्वरस्य सस्वरव्यञ्जनेन ॥ १६५ ॥

त्रयोदश[1] इत्येवंप्रकारेषु संख्याशब्देषु आदेः स्वरस्य परेण सस्वरेण[2] व्यञ्जनेन सह एद् भवति ॥ तेरह । तेवीसा । तेतीसा[3] ॥

स्थविर-विचकिलायस्कारे ॥ १६६ ॥

एषु आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह एद् भवति ॥ थेरो । वेइल्लं । मुद्ध[4]-विअइल्ल-पसूणपुञ्जा इत्यपि दृश्यते । एक्कारो ॥

वा कदले ॥ १६७ ॥

कदलशब्दे आदेः स्वरस्य परेण सस्वरव्यञ्जनेन[5] एद् वा भवति ॥ केलं कयलं । केली कयली ॥

वेतः कर्णिकारे ॥ १६८ ॥

कर्णिकारे इतः सस्वरव्यञ्जनेन सह एद् भवति ॥ कण्णेरो कण्णिआरो ॥

अयौ वैत् ॥ १६९ ॥

अयिशब्दे आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ऐद् वा भवति ॥ ऐ बीहेमि । अइ[7] उम्मत्तिए । वचनादैकारस्यापि प्राकृते प्रयोगः ॥

ओत्पूतर-बदर-नवमालिका-नवफलिका-पूगफले ॥ १७० ॥

पूतरादिषु आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ओद् भवति ॥ पोरो[6] । बोरं । बोरी । नोमालिआ । नोहलिआ । पोप्फलं । पोप्फली ॥

न वा मयूख-लवण-चतुर्गुण-चतुर्थ-चतुर्दश-चतुर्वार-सुकुमार-कुतूहलोदूखलोलूखले ॥ १७१ ॥

मयूखादिषु आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ओद् वा भवति ॥ मोहो मऊहो । लोणं । इअ लवणुग्गमा[8] । चोग्गुणो चउग्गुणो[9] ।

---

१ B °ञ्जिल्लं°. २ B °स्वरव्य°. ३ P तेत्तीसा. ४ A मुद्धवि°. ५ B कणे°. ६ A पोरा. ७ P अइ. ८ A ग्गमा. ९ P चउगुणो.

चोत्थो चउत्थो । चोत्थी चउत्थी । चोद्दह । चउद्दह । चोद्दसी चउद्दसी । चोव्वारो चउव्वारो । सोमालो सुकुमालो[1] । कोहलं कोउहल्लं । तह मन्ने कोहलिए । ओहलो उऊहलो । ओक्खलं । उलूहलं ॥ मोरो मऊरो इति तु मोरमयूरशब्दाभ्यां सिद्धम् ॥

अवापोते[2] ॥ १७२ ॥

अवापयोरुपसर्गयोरुत इति विकल्पार्थनिपाते[3] च आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ओद् वा भवति ॥ अव । ओअरइ अवयरइ । ओआसो अवयासो ॥ अप । ओ सरइ अव सरइ । ओसारिअं अवसारिअं ॥ उत । ओ वणं । ओ घणो । उअ वणं । उअ घणो ॥ क्वचिन्न भवति । अवगयं । अवसद्दो । उअ रवी ॥

ऊच्चोपे ॥ १७३ ॥

उपशब्दे आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ऊत् ओच्चादेशौ वा भवतः ॥ ऊहसिअं ओहसिअं उवहसिअं । ऊज्झाओ ओज्झाओ उवज्झाओ । ऊआसो ओआसो उववासो ॥

उमो निषण्णे ॥ १७४ ॥

निषण्णशब्दे आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह उम आदेशो वा भवति ॥ णुमण्णो । णिसण्णो ॥

प्रावरणे अङ्ग्वाऊ ॥ १७५ ॥

प्रावरणशब्दे आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह अङ्क आउ इत्येतावादेशौ वा भवतः ॥ पङ्गुरणं पाउरणं पावरणं ॥

स्वरादसंयुक्तस्यानादेः ॥ १७६ ॥

अधिकारोयम् । यदित ऊर्ध्वमनुक्रमिष्यामस्तत्स्वरात्परस्यासंयुक्तस्यानादेर्भवतीति वेदितव्यम्[4] ॥

---

१ B सुउमालो. २ B °पोते च ॥ ७२ ॥ ३ P °पातस्य चादेः. ४ P शब्दस्यादेः.

क-ग-च-ज-त-द-प-य-वां प्रायो लुक् ॥ १७७ ॥

स्वरात्परेषामनादिभूतानामसंयुक्तानां कगचजतदपयवानां प्रायो लुग् भवति ॥ क । तित्थयरो । लोओ । सयढं ॥ ग । नओ । नयरं । मयङ्को ॥ च । सई । कय-ग्गहो ॥ ज । रययं । पयावई । गओ ॥ त । विआणं । रसा-यलं । जई ॥ द । गया । मयणो ॥ प । रिऊ । सुउरिसो ॥ य । दयालू । नयणं । विओओ ॥ व । लायण्णं । विउहो[1] । वलयाणलो ॥ प्रायोग्रहणात्क्वचिन्न भवति । सुकुसुमं । पयाग-जलं । सुगओ । अगरू । सचावं । विजणं[2] । सुतारं । विदुरो । स-पावं । समवाओ । देवो । दाणवो ॥ स्वरादित्येव । संकरो । सं-गमो । नक्कंचरो[3] । धणंजओ । विसंतवो । पुरंदरो । संवुडो । सं-वरो ॥ असंयुक्तस्येत्येव[4] । अक्को । वग्गो । अच्चो । वज्जं । धुत्तो । उद्दामो[5] । विप्पो । कज्जं । सव्वं ॥ क्वचित्संयुक्तस्यापि । नक्तंचरः । नक्कंचरो ॥ अनादेरित्येव[6] । कालो । गन्धो । चोरो । जारो । तरू । दवो । पावं । वण्णो । यकारस्य तु जत्वम् आदौ वक्ष्यते । समासे तु वाक्यविभक्त्यपेक्षया भिन्नपदत्वमपि विवक्ष्यते । तेन तत्र यथा-दर्शनमुभयमपि भवति । सुहकरो सुहयरो[7] । आगमिओ आय-मिओ । जलचरो जलयरो । बहुतरो बहुअरो । सुहदो । सुहओ । इत्यादि ॥ क्वचिदादेरपि । स पुनः । स उण[8] ॥ स च । सो अ ॥ चिन्हं । इन्धं ॥ क्वचिच्चस्य जः । पिशाची । पिसाजी ॥ एकत्वम् । एगत्तं ॥ एक । एगो ॥ अमुकः । अमुगो ॥ असुकः । असुगो ॥ श्रा-वकः । सावगो ॥ आकारः । आगारो ॥ तीर्थकरः । तित्थगरो ॥ आकर्षः । आगरिसो ॥ लोगस्सुज्जोअगरा । इत्यादिषु तु व्यत्ययश्च [४.४४७] इत्येव कस्य गत्वम् ॥ आर्षे अन्यदपि दृश्यते । आकुञ्चनं । आउण्टणं । अत्र चस्य टत्वम् ॥

---

१ B विउओ. २ A विंज°. ३ B नन्नंचरो. ४ A °स्येति किम् । अक्को. ५ B उद्दामो । कज्जं. ६ A °देरिति किम्. ७ P °यरो । सहकारो । सहयारो । आग°. ८ A उणो.

यमुना-चामुण्डा-कामुकातिमुक्तके मोनुनासिकश्च ॥ १७८ ॥

एषु मस्य लुग् भवति लुकि च सति मस्य स्थाने अनुनासिको भवति ॥ जँउणा । चाँउण्डा । काँउओ । अणिँउतयं ॥ क्वचिन्न भवति । अइमुन्तयं । अइमुत्तयं ॥

नावर्णात्पः ॥ १७९ ॥

अवर्णात्परस्यानादेः पस्य लुग् न भवति ॥ सवहो । सावो ॥ अनादेरित्येव । परउट्ठो[1] ॥

अवर्णो यश्रुतिः ॥ १८० ॥

कगचजेत्यादिना लुकि सति शेषः अवर्णः अवर्णात्परो लघुप्रयत्नतरयकारश्रुतिर्भवति ॥ तित्थयरो । सयढं । नयरं । मयङ्को । कयग्गहो । काय-मणी । रययं । पयावई । रसायलं । पायालं । मयणो । गया । नयणं । दयालू । लायण्णं ॥ अवर्ण इति किम् । सउणो । पउणो । पउरं । राईवं । निहओ । निनओ । वाऊ । कई । अवर्णादित्येव । लोअस्स । देअरो ॥ क्वचिद् भवति । पियइ ॥

कुब्ज-कर्पर[2]-कीले कः खोपुष्पे ॥ १८१ ॥

एषु कस्य खो भवति पुष्पं चेत् कुब्जाभिधेयं न भवति ॥ खुज्जो । खप्परं । खीलओ ॥ अपुष्प इति किम् । बंधेउं कुज्जय[3]-पसूणं । आर्षेन्यत्रापि । कासितं । खासिअं[4] । कसितं । खसिअं[5] ॥

मरकत-मदकले गः कन्दुके त्वादेः ॥ १८२ ॥

अनयोः कस्य गो भवति कन्दुके त्वाद्यस्य[6] कस्य ॥ मरगयं । मयगलो । गेन्दुअं ॥

किराते चः ॥ १८३ ॥

किराते कस्य चो भवति ॥ चिलाओ ॥ पुलिन्द एवायं विधिः । कामरूपिणि तु नेष्यते । नमिमो हर-किरायं ॥

---

१ B परओट्ठो. २ B काल्के कः. ३ B °ज्जअपसूं°. ४ B खासितं. ५ A कसितं. ६ B °द्यस्य । म.°

शीकरे भ-हौ वा ॥ १८४ ॥

शीकरे[1] कस्य भहौ वा भवतः ॥ सीभरो सीहरो । पक्षे । सीअरो ॥

चन्द्रिकायां मः ॥ १८५ ॥

चन्द्रिकाशब्दे कस्य मो भवति ॥ चन्दिमा ॥

निकष-स्फटिक-चिकुरे हः ॥ १८६ ॥

एषु कस्य हो भवति ॥ निहसो । फलिहो । चिहुरो । चिहुरशब्दः संस्कृतेपि इति दुर्गः[2] ॥

ख-घ-थ-ध-भाम् ॥ १८७ ॥

स्वरात्परेषामसंयुक्तानामनादिभूतानां ख घ थ ध भ इत्येतेषां वर्णानां प्रायो हो भवति ॥ ख । साहा । मुहं[3] । मेहला । लिहइ ॥ घ । मेहो[4] । जहणं । माहो । लाहइ ॥ थ । नाहो । आवसहो । मिहुणं । कहइ ॥ ध । माहू । वाहो । बहिरो । बाहइ । इन्द-हणू[5] ॥ भ । सहा । सहावो । नहं । थणहरो । सोहइ ॥ स्वरादित्येव । संखो । संघो । कंथा । बंधो । खंभो ॥ असंयुक्तस्येत्येव । अक्खइ । अग्घइ । कत्थइ । सिद्धओ । बन्धइ । लब्भइ[6] ॥ अनादेरित्येव । गज्जन्ते[7] खे मेहा[8] । गच्छइ घणो ॥ प्राय इत्येव । सरिसव-खलो । पलय-घणो । अथिरो[9] । जिण-धम्मो । पणट्ठ-भओ । नभं[10] ॥

पृथकि धो वा ॥ १८८ ॥

पृथक्शब्दे थस्य धो वा भवति ॥ पिधं पुधं । पिहं पुहं ॥

शृङ्खले खः कः ॥ १८९ ॥

शृङ्खले खस्य को भवति ॥ सङ्कलं ॥

---

१ B करे भ°. २ P दुग्गः. ३ P मुहं. ४ B मोहो. ५ A इंदुनणू. ६ B लुब्भइ. ७ P गज्जंति. ८ B °हा फुल्ला नीवा पणच्चिरा मोरा । नट्ठो चंदुज्जोउ वासारत्तो हला पत्तो । गच्छ°. ९ B अथिरो. १० A नहं.

पुन्नाग-भागिन्योर्गो मः ॥ १९० ॥

अनयोर्गस्य मो भवति ॥ पुन्नामाइं वसन्ते । भामिणी ॥

छागे लः ॥ १९१ ॥

छागे[1] गस्य लो भवति ॥ छालो । छाली ॥

ऊत्वे दुर्भग-सुभगे वः ॥ १९२ ॥

अनयोरूत्वे गस्य वो भवति ॥ दूहवो । सूहवो ॥ ऊत्व इति किम् । दुहओ । सुहओ ॥

खचित-पिशाचयोश्चः स-ल्लौ वा ॥ १९३ ॥

अनयोश्चस्य यथासंख्यं स ल्ल इत्यादेशौ वा भवतः ॥ खसिओ खइओ । पिसल्लो पिसाओ ॥

जटिले जो झो वा ॥ १९४ ॥

जटिले जस्य झो वा भवति ॥ झडिलो जडिलो ॥

टो डः ॥ १९५ ॥

स्वरात्परस्यासंयुक्तस्यानादेष्टस्य डो भवति ॥ नडो । भडो । घडो । घडइ ॥ स्वरादित्येव । घंटा ॥ असंयुक्तस्येत्येव । खट्टा[2] ॥ अनादेरित्येव । टक्को ॥ क्वचिन्न भवति । अटति । अटइ ॥

सटा-शकट-कैटभे ढः ॥ १९६ ॥

एषु टस्य ढो भवति ॥ सढा । सयढो । केढवो[3] ॥

स्फटिके लः ॥ १९७ ॥

स्फटिके टस्य लो भवति ॥ फलिहो ॥

चपेटा-पाटौ वा ॥ १९८ ॥

चपेटाशब्दे ण्यन्ते च पटिधातौ[4] टस्य लो वा भवति ॥ चविला चविडा । फालेइ[5] फाडेइ ॥

---

१ A छागग°. २ B खट्ठा. ३ A कैढवो. ४ P °ते च पाटौ धा°. B °ते पाटौ धा°. ५ B फाल्इ.

ठो ढः ॥ १९९ ॥

स्वरात्परस्यासंयुक्तस्यानादेष्ठस्य ढो भवति ॥ मढो । सढो । कमढो । कुढारो । पढइ ॥ स्वरादित्येव । वेकुंठो ॥ असंयुक्तस्येत्येव । चिट्ठइ ॥ अनादेरित्येव । हिअए ठाइ ॥

अङ्कोठे ल्लः ॥ २०० ॥

अङ्कोठे ठस्य द्विरुक्तो लो भवति ॥ अङ्कोल्लतेल्ल-तुप्पं ॥

पिठरे हो वा रश्च डः ॥ २०१ ॥

पिठरे ठस्य हो वा भवति तत्सन्नियोगे च रस्य डो भवति ॥ पिहडो पिढरो ॥

डो लः ॥ २०२ ॥

स्वरात्परस्यासंयुक्तस्यानादेर्डस्य प्रायो लो भवति ॥ वडवामुखम् । वलया-मुहं ॥ गरुलो । तलायं । कीलइ ॥ स्वरादित्येव । मोंडं । कोंडं ॥ असंयुक्तस्येत्येव । खग्गो ॥ अनादेरित्येव । रमइ डिम्भो ॥ प्रायोग्रहणात् क्वचिद् विकल्पः । वलिसं वडिसं । दालिमं दाडिमं । गुलो गुडो । णाली णाडी । णलं णडं[1] । आमेलो आवेडो[2] ॥ क्वचिन्न भवत्येव । निविडं । गउडो । पीडिअं । नीडं । उडू । तडी ॥

वेणौ णो वा ॥ २०३ ॥

वेणौ णस्य लो वा भवति ॥ वेलू । वेणू ॥

तुच्छे तश्च-छौ वा ॥ २०४ ॥

तुच्छशब्दे तस्य च छ इत्यादेशौ[3] वा भवतः ॥ चुच्छं । छुच्छं । तुच्छं ॥

तगर-त्रसर-तूवरे टः ॥ २०५ ॥

एषु तस्य टो भवति ॥ टगरो । टसरो । टूवरो ॥

---

१ B नडं. २ A आमेडो. ३ A °शौम°.

प्रत्यादौ डः ॥ २०६ ॥

प्रत्यादिषु तस्य डो भवति ॥ पडिवन्नं । पडिहासो । पडिहारो । पाडिप्फद्धी । पडिसारो । पडिनिअत्तं । पडिमा । पडिवया । पडंसुआ । पडिकरइ । पहुडि । पाहुडं । वावडो । पडाया । बहेडओ । हरडई । मडयं ॥ आर्षे । दुष्कृतम् । दुक्कडं ॥ सुकृतम् । सुकडं ॥ आहृतम् । आहडं ॥ अवहृतम् । अवहडं । इत्यादि ॥ प्राय इत्येव । प्रतिसमयम् । पइसमयं ॥ प्रतीपम् । पईवं ॥ संप्रति । संपइ ॥ प्रतिष्ठानम् । पइट्ठाणं ॥ प्रतिष्ठा । पइट्ठा ॥ प्रतिज्ञा । पइण्णा ॥ प्रति । प्रभृति । प्राभृत । व्यापृत । पताका । बिभीतक । हरीतकी । मृतक । इत्यादि ॥

इत्वे वेतसे ॥ २०७ ॥

वेतसे तस्य डो भवति इत्वे सति ॥ वेडिसो ॥ इत्व इति किम् । वेअसो ॥ इः स्वप्नादौ [१.४६] इति इकारो न भवति इत्व इति व्यावृत्तिबलात् ॥

गर्भितातिमुक्तके णः ॥ २०८ ॥

अनयोस्तस्य णो भवति ॥ गब्भिणो । अणिउँतयं ॥ क्वचिन्न भवत्यपि । अइमुत्तयं ॥ कथम् एरावणो । ऐरावणशब्दस्य । एरावओ इति तु ऐरावतस्य ॥

रुदिते दिना ण्णः ॥ २०९ ॥

रुदिते दिना सह तस्य द्विरुक्तो णो भवति ॥ रुण्णं ॥ अत्र केचिद् ऋत्वादिषु द इत्यारब्धवन्तः स तु शौरसेनीमागधीविषय एव दृश्यत इति नोच्यते । प्राकृते हि । ऋतुः । रिऊ । उऊ ॥ रजतम् । रययं ॥ एतद् । एअं ॥ गतः । गओ ॥ आगतः । आगओ ॥ सांप्रतम् । संपयं ॥ यतः । जओ ॥ ततः । तओ ॥ कृतम् । कयं ॥

---

१ P °रो विकल्पेन भ° B °रो विकल्पेन भवति । इत्वव्या°. २ P °षु तस्य द°.

हतम्[1] । हयं ॥ हताशः । हयासो ॥ श्रुतः । सुओ ॥ आकृतिः । आकिई ॥ निर्वृतः । निव्वुओ ॥ तातः । ताओ ॥ कतरः । कयरो । द्वितीयः । दुइओ[2] इत्यादयः प्रयोगा भवन्ति । न पुनः उदू[3] रययमित्यादि ॥ क्वचित् भावेपि व्यत्ययश्च [४.४४७] इत्येव सिद्धम् ॥ दिही इत्येतदर्थं तु धृतेर्दिहिः [२.१३१] इति वक्ष्यामः ॥

सप्ततौ रः ॥ २१० ॥

सप्ततौ तस्य रो भवति ॥ सत्तरी ॥

अतसी-सातवाहने लः ॥ २११ ॥

अनयोस्तस्य लो भवति ॥ अलसी । सालाहणो । सालवाहणो । सालाहणी भासा ॥

पलिते वा ॥ २१२ ॥

पलिते तस्य लो वा भवति ॥ पलिलं । पलिअं ॥

पीते वो ले वा ॥ २१३ ॥

पीते तस्य वो वा भवति स्वार्थलकारे[4] परे ॥ पीवलं । पीअलं ॥ ल इति किम् । पीअं ॥

वितस्ति-वसति-भरत-कातर-मातुलिङ्गे हः ॥ २१४ ॥

एषु तस्य हो भवति ॥ विहत्थी । वसही ॥ बहुलाधिकारात् क्वचिन्न भवति । वसई । भरहो । काहलो । माहुलिङ्गं । मातुलुङ्गशब्दस्य तु माउलुङ्गं ॥

मेथि-शिथिर-शिथिल-प्रथमे थस्य ढः ॥ २१५ ॥

एषु थस्य ढो भवति । हापवादः ॥ मेढी । सिढिलो । सिढिलो । पढमो ॥

---

१ B हतं. २ B दुईओ. ३ B उदू. ४ B स्वार्थे ल°

निशीथ-पृथिव्योर्वा ॥ २१६ ॥

अनयोस्थस्य ढो वा भवति ॥ निसीढो । निसीहो । पुढवी । पुहवी ॥

दशन-दष्ट-दग्ध-दोला-दण्ड-दर-दाह-दम्भ-दर्भ-कदन-दोहदे दो वा डः ॥ २१७ ॥

एषु दस्य डो वा भवति ॥ डसणं दसणं । डट्ठो दट्ठो[1] । डड्ढो दड्ढो । डोला दोला । डण्डो दण्डो । डरो दरो । डाहो दाहो । डम्भो दम्भो । डब्भो दब्भो । कडणं कयणं । डोहलो दोहलो ॥ दरशब्दस्य च भयार्थवृत्तेरेव भवति । अन्यत्र दर-दलिअ ॥

दंश-दहोः ॥ २१८ ॥

अनयोर्धात्वोर्दस्य डो भवति ॥ डंसइ । डहइ ॥

संख्या-गद्गदे रः ॥ २१९ ॥

संख्यावाचिनि गद्गदशब्दे च दस्य रो भवति ॥ एआरह । बारह । तेरह । गग्गरं ॥ अनादेरित्येव । ते दस ॥ असंयुक्तस्येत्येव ॥ चउद्दह ॥

कदल्यामद्रुमे ॥ २२० ॥

कदलीशब्दे अद्रुमवाचिनि दस्य रो भवति ॥ करली ॥ अद्रुम इति किम् । कयली । केली ॥

प्रदीपि-दोहदे लः ॥ २२१ ॥

प्रपूर्वे दीप्यतौ धातौ दोहदशब्दे च दस्य लो भवति ॥ पलीवेइ । पलित्तं । दोहलो ॥

कदम्बे वा ॥ २२२ ॥

कदम्बशब्दे दस्य लो वा भवति ॥ कलम्बो । कयम्बो ॥

---

१ B °ड्ढो । डक्को । ड°. २ B दलिअं. ३ B डंसइ. ४ P °ह । ग°. ५ P °व । दस.

दीपौ धो वा ॥ २२३ ॥

दीप्यतौ[1] दस्य धो वा भवति ॥ धिप्पइ । दिप्पइ ॥

कदर्थिते वः ॥ २२४ ॥

कदर्थिते दस्य वो भवति ॥ कवट्टिओ ॥

ककुदे हः ॥ २२५ ॥

ककुदे दस्य हो भवति ॥ कउहं ॥

निषधे धो ढः ॥ २२६ ॥

निषधे धस्य ढो भवति ॥ निसढो ॥

वौषधे ॥ २२७ ॥

ओषधे धस्य[2] ढो वा भवति ॥ ओसढं । ओसहं ॥

नो णः ॥ २२८ ॥

स्वरात्परस्यासंयुक्तस्यानादेर्नस्य णो भवति ॥ कणयं । मयणो । वयणं । नयणं । माणइ ॥ आर्षे । आरनालं । अनिलो[3] । अनलो । इत्याद्यपि ॥

वादौ ॥ २२९ ॥

असंयुक्तस्यादौ वर्तमानस्य नस्य णो वा भवति ॥ णरो नरो । णई नई[4] । णेइ नेइ ॥ असंयुक्तस्येत्येव । न्यायः । नाओ ॥

निम्ब-नापिते ल-ण्हं वा ॥ २३० ॥

अनयोर्नस्य[5] ल ण्ह इत्येतौ वा भवतः ॥ लिम्बो निम्बो । ण्हाविओ नाविओ ॥

---

१ P °तौ धात्तो द°. २ B स्य ढो भवति वा ॥ ओसहं । ओसढं ॥ ३ B अनिलो इ°.
४ P नई । अ°. ५ P °स्य यथासङ्ख्यं ल.

पो वः ॥ २३१ ॥

स्वरात्परस्यासंयुक्तस्यानादेः पस्य[1] प्रायो वो भवति ॥ सवहो। सावो। उवसग्गो। पईवो[2]। कासवो। पावं। उवमा। कविलं। कुणवं। कलावो। कवालं। महि-वालो। गो-वइ। तवइ ॥ स्वरादित्येव। कम्पइ ॥ असंयुक्तस्येत्येव। अप्पमत्तो ॥ अनादेरित्येव। सुहेण पढइ ॥ प्राय इत्येव। कई। रिऊ ॥ एतेन पकारस्य प्राप्तयोर्लोपवकारयोर्यस्मिन् कृते श्रुतिसुखमुत्पद्यते स तत्र कार्यः ॥

पाटि-परुष-परिघ-परिखा-पनस-पारिभद्रे फः ॥ २३२ ॥

ण्यन्ते पटिधातौ[3] परुषादिषु च पस्य फो भवति ॥ फालेइ फाडेइ। फरुसो। फलिहो। फलिहा। फणसो। फालिहद्दो ॥

प्रभूते वः ॥ २३३ ॥

प्रभूते पस्य वो भवति ॥ वहुत्तं ॥

नीपापीडे मो वा ॥ २३४ ॥

अनयोः पस्य मो वा भवति ॥ नीमो नीवो। आमेलो आवेडो ॥

पापर्द्धौ रः ॥ २३५ ॥

पापर्द्धावपदादौ पकारस्य रो भवति ॥ पारद्धी ॥

फो भ-हौ ॥ २३६ ॥

स्वरात्परस्यासंयुक्तस्यानादेः फस्य भहौ भवतः ॥ क्वचिद् भः। रेफः। रेभो ॥ शिफा[4]। सिभा ॥ क्वचित्तु हः। मुत्ताहलं ॥ क्वचिदुभावपि। सभलं सहलं। सेभालिआ सेहालिआ। सभरी सहरी। गुभइ गुहइ ॥ स्वरादित्येव। गुंफइ ॥ असंयुक्तस्येत्येव। पुप्फं ॥ अनादेरित्येव। चिट्ठइ फणी ॥ प्राय इत्येव। कसण-फणी ॥

---

१ B परस्य. २ P ॰ओ। पावं. ३ P पाटि॰ ४ B भिफा.

बो वः ॥ २३७ ॥

स्वरात्परस्यासंयुक्तस्यानादेर्बस्य वो भवति ॥ अलाबू[1] । अलावू । अलाऊ ॥ शबलः । सवलो ॥

बिसिन्यां भः ॥ २३८ ॥

बिसिन्यां बस्य भो भवति ॥ भिसिणी ॥ स्त्रीलिङ्गनिर्देशादिह न भवति । बिस-तन्तु-पेलवाणं ॥

कबन्धे म-यौ ॥ २३९ ॥

कबन्धे बस्य मयौ भवतः ॥ कमन्धो । कयन्धो ॥

कैटभे भो वः ॥ २४० ॥

कैटभे भस्य वो भवति ॥ केढवो ॥

विषमे मो ढो वा ॥ २४१ ॥

विषमे मस्य ढो वा भवति ॥ विमढो । विसमो ॥

मन्मथे वः ॥ २४२ ॥

मन्मथे मस्य वो भवति ॥ वम्महो ॥

वाभिमन्यौ ॥ २४३ ॥

अभिमन्युशब्दे मो वो वा भवति ॥ अहिवन्नू अहिमन्नू ॥

भ्रमरे सो वा ॥ २४४ ॥

भ्रमरे मस्य सो वा भवति ॥ भसलो भमरो ॥

आदेर्यो जः ॥ २४५ ॥

पदादेर्यस्य जो[2] भवति ॥ जसो । जमो[3] । जाइ ॥ आदेरिति किम् । अवयवो । विणओ ॥ बहुलाधिकारात् सोपसर्गस्यानादेरपि । संजमो । संजोगो । अवजसो ॥ क्वचिन्न भवति । पओओ ॥ आर्षे लोपोपि । यथाख्यातम् । अहक्खायं ॥ यथाजातम् । अहाजायं ॥

---

१ P अलाबूः । अलावू । अ°. २ B जो वा भ°. ३ B जमो

युष्मद्यर्थपरे तः ॥ २४६ ॥

युष्मच्छब्देऽर्थपरे यस्य तो भवति ॥ तुम्हारिसो । तुम्हकेरो ॥ अर्थ-पर इति किम् । जुम्हदम्ह-पयरणं ॥

यष्ट्यां लः ॥ २४७ ॥

यष्ट्यां यस्य लो भवति ॥ लट्ठी । वेणु-लट्ठी । उच्छु-लट्ठी । महु-लट्ठी ॥

वोत्तरीयानीय-तीय-कृद्ये ज्जः ॥ २४८ ॥

उत्तरीयशब्दे अनीयतीयकृद्यप्रत्ययेषु च यस्य द्विरुक्तो जो वा भवति ॥ उत्तरिज्जं उत्तरीअं ॥ अनीय । करणिज्जं करणीअं । वि-म्हयणिज्जं[1] विम्हयणीअं । जवणिज्जं जवणीअं ॥ तीय । बिइज्जो बीओ ॥ कृद्य । पेज्जा[2] पेआ ॥

छायायां होकान्तौ वा ॥ २४९ ॥

अकान्तौ वर्तमाने छायाशब्दे यस्य हो वा भवति ॥ वच्छस्स छाही[4] वच्छस्स छाया[3] । आतपाभावः । सच्छाहं सच्छायं ॥ अकान्ताविति किम् ॥ मुह-च्छाया । कान्तिरित्यर्थः ॥

डाह-वौ कतिपये ॥ २५० ॥

कतिपये यस्य डाह व इत्येतौ पर्यायेण भवतः ॥ कइवाहं । कइअवं ॥

किरि-भेरे रो डः ॥ २५१ ॥

अनयो रस्य डो[5] भवति ॥ किडी । भेडो ॥

पर्याणे डा वा ॥ २५२ ॥

पर्याणे रस्य डा इत्यादेशो वा भवति ॥ पडायाणं पल्लाणं ॥

करवीरे णः ॥ २५३ ॥

करवीरे प्रथमस्य रस्य णो भवति ॥ कणवीरो ॥

---

१ B विम्हणि°. २ A पेज्जो. ३ B छाया. ४ B छाहा. ५ B डो वा भ°.

हरिद्रादौ लः ॥ २५४ ॥

हरिद्रादिषु शब्देषु असंयुक्तस्य रस्य लो भवति ॥ हलिद्दी । दलिद्दाइ । दलिद्दो । दालिद्दं । हलिद्दो । जहुट्ठिलो । सिढिलो । मुहलो । चलणो । वलुणो । कलुणो । इङ्गालो । सक्कालो । सोमालो । चिलाओ । फलिहा । फलिहो । फालिहद्दो । काहलो । लुक्को । अवद्दालं । भसलो । जढलं । बढलो । निट्ठुलो ॥ बहुलाधिकाराच्चरणशब्दस्य पादार्थवृत्तेरेव । अन्यत्र चरण-करणं ॥ भ्रमरे ससंनियोगे एव । अन्यत्र भमरो ॥ तथा । जढरं । बढरो । निट्ठुरो इत्याद्यपि ॥ हरिद्रा । दरिद्राति । दरिद्र । दारिद्र्य । हरिद्र । युधिष्ठिर । शिथिर । मुखर । चरण । वरुण । करुण । अङ्गार । सत्कार । सुकुमार । किरात । परिखा । परिघ । पारिभद्र । कातर । रुग्ण । अपद्वार । भ्रमर । जठर । बठर । निष्ठुर । इत्यादि ॥ आर्षे दुवालसङ्गे इत्याद्यपि ॥

स्थूले लो रः ॥ २५५ ॥

स्थूले लस्य रो भवति ॥ थोरं ॥ कथं थूलभद्दो । स्थूरस्य हरिद्रादिलत्वे भविष्यति ॥

लाहल-लाङ्गल-लाङ्गूले वादेर्णः ॥ २५६ ॥

एषु आदेर्लस्य णो वा भवति ॥ णाहलो । लाहलो ॥ णङ्गलं । लङ्गलं । णङ्गूलं । लङ्गूलं ॥

ललाटे च ॥ २५७ ॥

ललाटे च आदेर्लस्य णो भवति ॥ चकार आदेरनुवृत्त्यर्थः ॥ णिडालं । णडालं ॥

शबरे बो मः ॥ २५८ ॥

शबरे बस्य मो भवति ॥ समरो ॥

स्वप्न-नीव्योर्वा ॥ २५९ ॥

अनयोर्वस्य मो वा भवति ॥ सिमिणो सिविणो । नीमी नीवी ॥

---

१ A पदार्थे. २ B जठरं । भठरो. ३ A इत्यपि. ४ B थूर°.

श-षोः सः ॥ २६० ॥

शकारषकारयोः सो भवति ॥ श । सद्दो । कुसो । निसंसो । वंसो[1] । सामा[2] । सुद्धं । दसं[3] । सोहइ । विसइ ॥ ष । सण्डो । निहसो । कसाओ । घोसइ ॥ उभयोरपि । सेसो । विसेसो ॥

स्नुषायां ण्हो[4] न वा ॥ २६१ ॥

स्नुषाशब्दे षस्य[5] ण्हः णकाराक्रान्तो हो वा भवति ॥ सुण्हा सुसा ॥

दश-पाषाणे हः ॥ २६२ ॥

दशन्शब्दे[6] पाषाणशब्दे च शषोर्यथादर्शनं हो वा भवति ॥ दह-मुहो दस-मुहो । दह-बलो दस-बलो । दह-रहो दस-रहो । दह दस । एआरह । बारह । तेरह । पाहाणो पासाणो ॥

दिवसे सः ॥ २६३ ॥

दिवसे सस्य हो[7] वा भवति ॥ दिवहो । दिवसो ॥

हो घोनुस्वारात् ॥ २६४ ॥

अनुस्वारात्परस्य हस्य घो[8] वा भवति ॥ सिंघो । सीहो ॥ संघारो । संहारो । क्वचिदननुस्वारादपि[9] । दाहः । दाघो ॥

षट्-शमी-शाव-सुधा-सप्तपर्णेष्वादेश्छः ॥ २६५ ॥

एषु आदेर्वर्णस्य छो भवति ॥ छट्ठो । छट्ठी । छप्पओ । छंमुहो । छमी । छावो । छुहा । छत्तिवण्णो ॥

शिरायां वा ॥ २६६ ॥

शिराशब्दे आदेश्छो वा भवति ॥ छिरा सिरा ॥

लुग् भाजन-दनुज-राजकुले जः सस्वरस्य न वा ॥ २६७ ॥

एषु सस्वरजकारस्य[10] लुग् वा भवति ॥ भाणं भायणं । दणु-वहो । दणुअ-वहो । रा-उलं राय-उलं ॥

---

१ B वंसो. २ A सामो. ३ B दसा. ४ B ण्हो वा. ५ B °स्य णका°. ६ P °शश°. ७ B हो भ°. ८ B घो भ°. ९ B °स्वारात्. १० P °रस्य ज°.

व्याकरण-प्राकारागते कगोः ॥ २६८ ॥

एषु को गश्च सस्वरस्य लुग् वा भवति ॥ वारणं वायरणं । पारो पायारो ॥ आओ आगओ ॥

किसलय-कालायस-हृदये यः ॥ २६९ ॥

एषु सस्वर[1]यकारस्य लुग् वा भवति ॥ किसलं किसलयं । कालासं कालायसं । महण्णव-समा सहिआ । जाला ते सहिअएहिं घेप्प-न्ति । निसमणुप्पिअ-हिअस्स हिअयं ॥

दुर्गादेव्युदुम्बर-पादपतन-पादपीठेन्तर्दः ॥ २७० ॥

एषु सस्वरस्य दकारस्य अन्तर्मध्ये वर्तमानस्य लुग् वा भवति ॥ दुग्गा-वी । दुग्गा-एवी । उम्बरो[2] उउम्बरो । पा-वडणं पाय-वडणं । पा-वीढं ॥ पाय-वीढं ॥ अन्तरिति किम् । दुर्गादेव्यामादौ मा भूत् ॥

यावत्तावज्जीवितावर्त्तमानावट-प्रावारक-देवकुलैवमेवे वः॥२७१

यावदादिषु सस्वर[3]वकारस्यान्तर्वर्तमानस्य लुग् वा भवति ॥ जा जाव । ता ताव । जीअं जीविअं । अत्तमाणो आवत्तमाणो । अडो अवडो । पारओ पावारओ । दे-उलं देव-उलं । एमेव एवमेव ॥ अन्तरित्येव । एवमेवे[4]न्त्यस्य न भवति ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञ-शब्दानुशासनवृत्तौ अष्टमस्या[5]ध्यायस्य प्रथमः पादः ॥

[6]यद् दोर्मण्डलकुण्डलीकृतधनुर्दण्डेन सि[7]द्धाधिप
क्रीतं वैरिकुलात् त्वया किल दलत्कुन्दावदातं यशः ।
भ्रान्त्वा त्रीणि जगन्ति खेदविवशं तन्मालवीनां व्यधा-
दापाण्डौ स्तनमण्डले च धवले गण्डस्थले[8] च स्थितिम् ॥ १ ॥

---

१ P B °रस्य य°. २ A डम्बरे । उडम्बरे. ३ P B °रस्य व°. ४ A B वेत्यस्य.
५ B °अष्टमाध्या°. ६ P omits this verse. ७ B सिद्दा°. ८ B °वस्थि°.

अर्हं ॥ संयुक्तस्य ॥ १ ॥

अधिकारोयं ज्यायामीत् [२.११५] इति यावत् । यदित ऊर्ध्वम-नुक्रमिष्यामस्तत्संयुक्तस्येति वेदितव्यम् ॥

शक्त-मुक्त-दष्ट-रुग्ण-मृदुत्वे को वा ॥ २ ॥

एषु संयुक्तस्य को वा भवति ॥ सक्को सत्तो । मुक्को मुत्तो । डक्को दट्ठो । लुक्को लुग्गो । माउक्कं माउत्तणं ॥

क्षः खः क्वचित्तु छ-झौ ॥ ३ ॥

क्षस्य खो भवति । क्वचित्तु छझावपि ॥ खओ । लक्खणं ॥ क्वचित्तु छझावपि । खीणं । छीणं । झीणं । झिज्जइ ॥

ष्क-स्कयोर्नाम्नि ॥ ४ ॥

अनयोर्नाम्नि संज्ञायां खो भवति ॥ ष्क । पोक्खरं । पोक्खरिणी । निक्खं ॥ स्क । खन्धो । खन्धावारो । अवक्खन्दो ॥ नाम्नीति किम् । दुक्करं । निक्कम्पं । निक्कओ । नमोक्कारो । सक्कयं । सक्कारो । तक्करो ॥

शुष्क-स्कन्दे वा ॥ ५ ॥

अनयोः ष्कस्कयोः खो वा भवति ॥ सुक्खं सुक्कं । खन्दो कन्दो ॥

क्ष्वेटकादौ ॥ ६ ॥

क्ष्वेटकादिषु संयुक्तस्य खो भवति ॥ खेडओ । क्ष्वेटकशब्दो वि-षपर्यायः ॥ क्ष्वोटकः । खोडओ ॥ स्फोटकः । खोडओ ॥ स्फेटकः । खेडओ ॥ स्फेटिकः । खेडिओ ॥

---

१ A मउत्तणं. २ B छडी. ३ P °ति । ख°. ४ B छडा°. ५ P B °टग°.

स्थाणावहरे ॥ ७ ॥

स्थाणौ संयुक्तस्य खो भवति हरश्चेद् वाच्यो न भवति ॥ खाणू ॥ अहर इति किम् । थाणुणो रेहा ॥

स्तम्भे स्तो वा ॥ ८ ॥

स्तम्भशब्दे स्तस्य खो वा भवति ॥ खम्भो । थम्भो । काष्ठादिमयः ॥

थ-ठावस्पन्दे ॥ ९ ॥

स्पन्दाभाववृत्तौ स्तम्भे स्तस्य थठौ भवतः ॥ थम्भो । ठम्भो ॥ स्त[1]म्भ्यते । थम्भिज्जइ[2] । ठम्भिज्जइ ॥

रक्ते गो वा ॥ १० ॥

रक्तशब्दे संयुक्तस्य गो वा भवति ॥ रग्गो रत्तो ॥

शुल्के[3] ङ्गो वा ॥ ११ ॥

शुल्कशब्दे[4] संयुक्तस्य ङ्गो वा भवति ॥ सुङ्गं सुक्कं ॥

कृत्ति-चत्वरे चः ॥ १२ ॥

अनयोः संयुक्तस्य चो भवति ॥ किच्ची । चच्चरं ॥

त्योचैत्ये ॥ १३ ॥

चैत्यवर्जिते त्यस्य चो भवति ॥ सच्चं । पच्चओ ॥ अचैत्य इति किम् । चइत्तं ॥

प्रत्यूषे षश्च हो वा ॥ १४ ॥

प्रत्यूषे त्यस्य चो भवति तत्संनियोगे च षस्य हो वा भवति ॥ पच्चूहो । पच्चूसो ॥

त्व-थ्व-द्व-ध्वां च-छ-ज-झाः क्वचित् ॥ १५ ॥

एषां यथासंख्यमेते क्वचिद् भवन्ति ॥ भुक्त्वा । भोच्चा ॥ ज्ञात्वा ।

---

१ B स्तभ्यते. २ A थम्भिज्जइ ॥ ट°. ३ B शुक्ले ङ्गो. P शुक्ले ङ्गो. ४ P B शुक्लश°.

णञ्चा ॥ श्रुत्वा । सोञ्चा ॥ पृथ्वी । पिच्छी ॥ विद्वान् । विज्जं ॥ बुद्ध्वा । बुज्झा ॥

भोञ्चा सयलं पिच्छि विज्जं बुज्झा अणण्णय-ग्गामिं[1] ।
चइऊण तवं काउं सन्ती पत्तो सिवं परमं ॥

वृश्चिके श्चेर्ञ्चुर्वा ॥ १६ ॥

वृश्चिके श्चेः सस्वरस्य स्थाने ञ्चुरादेशो वा भवति । छापवादः ॥ विञ्चुओ विंचुओ[2] । पक्षे । विञ्छिओ ॥

छोक्ष्यादौ[3] ॥ १७ ॥

अक्ष्यादिषु[4] संयुक्तस्य छो भवति । खस्यापवादः ॥ अच्छि । उच्छू । लच्छी । कच्छो । छीअं । छीरं । सरिच्छो । वच्छो । मच्छिआ । छेत्तं । छुहा । दच्छो । कुच्छी । वच्छं । छुण्णो । कच्छा । छारो । कुच्छेअयं । छुरो । उच्छा । छयं । सारिच्छं ॥ अक्षि । इक्षु । लक्ष्मी । कक्ष । क्षुत । क्षीर । सदृक्ष । वृक्ष । मक्षिका । क्षेत्र । क्षुध् । दक्ष । कुक्षि । वक्षस् । क्षुण्ण । कक्षा । क्षार । कौक्षेयक । क्षुर । उक्षन् । क्षत । सादृश्य[5] ॥ क्वचित् स्थगितशब्देपि[6] । छइअं ॥ आर्षे । इक्खू । खीरं । सारिक्खमित्याद्यपि दृश्यते ॥

क्षमायां कौ ॥ १८ ॥

कौ पृथिव्यां वर्तमाने क्षमाशब्दे संयुक्तस्य छो भवति ॥ छमा पृथिवी ॥ लाक्षणिकस्यापि क्ष्मादेशस्य भवति । क्ष्मा । छमा ॥ काविति किम् । खमा क्षान्तिः ॥

ऋक्षे वा ॥ १९ ॥

ऋक्षशब्दे संयुक्तस्य[7] छो वा भवति ॥ रिच्छं । रिक्खं । रिच्छो । रिक्खो ॥ कथं छूढं क्षिप्तं । वृक्ष-क्षिप्तयोरुक्ख-छूढौ [२.१२७] इति भविष्यति ॥

---

१ P °ग्गाभि ॥ वृक्षि°. २ B विंचुवो. ३ A छोऽक्ष्यादौ. ४ A अक्ष्यादि°. ५ P सादृक्ष्य. ६ A शब्दोपि. ७ B °स्य छो भ°.

क्षण उत्सवे ॥ २० ॥

क्षणशब्दे उत्सवाभिधायिनि संयुक्तस्य छो भवति ॥ छणो ॥ उत्सव इति किम् । खणो ॥

ह्रस्वात् थ्य-श्च-त्स-प्सामनिश्चले ॥ २१ ॥

ह्रस्वात्परेषां थ्यश्चत्सप्सां छो भवति निश्चले तु न भवति ॥ थ्य । पच्छं । पच्छा । मिच्छा ॥ श्च । पच्छिमं । अच्छेरं । पच्छा ॥ त्स । उच्छाहो । मच्छलो । मच्छरो । संवच्छलो । संवच्छरो । चिइच्छइ ॥ प्स । लिच्छइ । जुगुच्छइ । अच्छरा ॥ ह्रस्वादिति किम् । ऊसारिओ ॥ अनिश्चल इति किम् । निच्चलो ॥ आर्षे तथ्ये चोपि । तच्चं ॥

सामर्थ्योत्सुकोत्सवे वा ॥ २२ ॥

एषु संयुक्तस्य छो वा भवति ॥ सामच्छं सामत्थं । उच्छुओ ऊसुओ । उच्छवो ऊसवो ॥

स्पृहायाम् ॥ २३ ॥

स्पृहाशब्दे संयुक्तस्य छो[1] भवति । फस्यापवादः ॥ छिहा ॥ बहुलाधिकारात्क्वचिदन्यदपि । निप्पिहो ॥

द्य-य्य-र्यां जः ॥ २४ ॥

एषां संयुक्तानां जो भवति ॥ द्य । मज्जं । अवज्जं । वेज्जो[2] । जुई । जोओ ॥ य्य । जज्जो । सेज्जा[3] ॥ र्य । भज्जा । चौर्यसमत्वात् भारिआ । कज्जं[4] । वज्जं । पज्जाओ । पज्जत्तं । मज्जाया ॥

अभिमन्यौ ज-ञ्जौ वा ॥ २५ ॥

अभिमन्यौ संयुक्तस्य जो ञ्जश्च वा भवति ॥ अहिमज्जू । अहिमञ्जू । पक्षे । अहिमन्नू ॥ अभिग्रहणादिह न भवति । मन्नू ॥

---

१ B छो वा भ°. २ A विज्जो. ३ A सिज्जा. ४ P कज्जं । प°.

साध्वस-ध्य-ह्यां झः ॥ २६ ॥

साध्वसे संयुक्तस्य ध्यह्ययोश्च झो भवति ॥ सज्झसं ॥ ध्य । वेज्झए[1] । झाणं । उवज्झाओ । सज्झाओ । संज्झं[2] । विञ्झो ॥ ह्य । सज्झो । मज्झं[3] । गुज्झं । णज्झइ[4] ॥

ध्वजे वा ॥ २७ ॥

ध्वजशब्दे संयुक्तस्य झो वा भवति ॥ झओ धओ ॥

इन्धौ झा ॥ २८ ॥

इन्धौ धातौ संयुक्तस्य झा इत्यादेशो[5] भवति ॥ समिज्झाइ । विज्झाइ ॥

वृत्त-प्रवृत्त-मृत्तिका-पत्तन-कदर्थिते टः ॥ २९ ॥

एषु संयुक्तस्य टो भवति ॥ वट्टो । पयट्टो[6] । मट्टिआ । पट्टणं । कवट्टिओ ॥

र्त्तस्याधूर्त्तादौ ॥ ३० ॥

र्त्तस्य टो भवति धूर्त्तादीन् वर्जयित्वा ॥ केवट्टो । वट्टी । जट्टो । पयट्टइ ॥ वट्टुलं । रायवट्टयं । नट्टई । संवट्टिअं ॥ अधूर्त्तादाविति किम् । धुत्तो । कित्ती । वत्ता । आवत्तणं । निवत्तणं । पवत्तणं । संवत्तणं । आवत्तओ । निवत्तओ । निव्वत्तओ । पवत्तओ । संवत्तओ । वत्तिआ । वत्तिओ । कत्तिओ[7] । उक्कत्तिओ । कत्तरी । मुत्ती । मुत्तो । मुहुत्तो ॥ बहुलाधिकाराद् वट्टा ॥ धूर्त[8] । कीर्ति । वार्ता । आवर्तन । निवर्तन । प्रवर्तन । संवर्तन । आवर्तक । निवर्तक[9][10] । निर्वर्तक । प्रवर्तक । संवर्तक । वर्तिका[11] । वार्तिक । कार्तिक । उत्कर्तित[12] । कर्तरी । मूर्ति । मूर्त । मुहूर्त[13] । इत्यादि ॥

---

१ B वज्झए. २ B संज्झं. ३ A मज्झो. ४ A नज्झइ. ५ B °शो वा भ°. ६ B पवट्टो. ७ B °ओ । प°. ८ A किन्तिओ । उक्कित्तिओ. ९ B धूर्ति. १० B °र्तक । प्रव°. ११ B वर्तिक. १२ A उत्कीर्ति. १३ A मुहूर्त ॥.

वृन्ते ण्टः ॥ ३१ ॥

वृन्ते[1] संयुक्तस्य ण्टो भवति ॥ वेण्टं । तालवेण्टं ॥

ठोस्थि-विसंस्थुले ॥ ३२ ॥

अनयोः संयुक्तस्य ठो भवति ॥ अट्ठी । विसंठुलं ॥

स्त्यान-चतुर्थार्थे वा ॥ ३३ ॥

एषु संयुक्तस्य ठो वा भवति ॥ ठीणं थीणं । चउट्ठो । अट्ठो प्रयोजनम् । अत्थो धनम् ॥

ष्टस्यानुष्ट्रेष्टासंदष्टे ॥ ३४ ॥

उष्ट्रादिवर्जिते ष्टस्य ठो भवति ॥ लट्ठी । मुट्ठी । दिट्ठी । सिट्ठी । पुट्ठो । कट्ठं । सुरट्ठा । इट्ठो । अणिट्ठं ॥ अनुष्ट्रेष्टासंदष्ट इति किम् । उट्टो । इट्टाचुण्णं व्व । संदट्टो ॥

गर्ते डः ॥ ३५ ॥

गर्तशब्दे संयुक्तस्य डो[2] भवति । टापवादः ॥ गड्डो । गड्डा ॥

सम्मर्द-वितर्दि-विच्छर्द-च्छर्दि-कपर्द-मर्दिते र्दस्य ॥ ३६ ॥

एषु र्दस्य डत्वं भवति ॥ सम्मड्डो । विअड्डी । विच्छड्डो[3] । छड्डइ । छड्डी । कवड्डो । मड्डिओ । सम्मड्डिओ ॥

गर्दभे वा ॥ ३७ ॥

गर्दभे र्दस्य डो वा भवति ॥ गड्डहो । गद्दहो ॥

कन्दरिका-भिन्दिपाले ण्डः ॥ ३८ ॥

अनयोः संयुक्तस्य ण्डो भवति ॥ कण्डलिआ । भिण्डिवालो ॥

स्तब्धे ठ-ढौ ॥ ३९ ॥

स्तब्धे संयुक्तयोर्यथाक्रमं ठढौ भवतः ॥ ठड्ढो ॥

---

१ B °न्ते ण्टो. २ B डो. ३ B °ड्डो । छड्डी.

दग्ध-विदग्ध-वृद्धि-वृद्धे ढः ॥ ४० ॥

एषु संयुक्तस्य ढो भवति ॥ दड्ढो । विअड्ढो । वुड्ढी । वुड्ढो ॥ क्वचिन्न भवति । विद्ध-कइ-निरूविअं ॥

श्रद्धर्द्धि-मूर्धार्धेन्ते वा ॥ ४१ ॥

एषु अन्ते वर्तमानस्य संयुक्तस्य ढो वा भवति ॥ सड्ढा सद्धा । इड्ढी रिद्धी । मुण्ढा मुद्धा । अड्ढं अद्धं ॥

म्नज्ञोर्णः ॥ ४२ ॥

अनयोर्णो भवति ॥ म्न । निण्णं । पज्जुण्णो ॥ ज्ञ । णाणं । सण्णा । पण्णा । विण्णाणं ॥

पंचाशत्पंचदश-दत्ते ॥ ४३ ॥

एषु संयुक्तस्य णो भवति ॥ पण्णासा । पण्णरह[1] । दिण्णं ॥

मन्यौ न्तो वा ॥ ४४ ॥

मन्युशब्दे संयुक्तस्य न्तो वा भवति ॥ मन्तू मन्नू ॥

स्तस्य थोसमस्त-स्तम्बे ॥ ४५ ॥

समस्तस्तम्बवर्जिते स्तस्य थो भवति ॥ हत्थो । थुई । थोत्तं । थोअं । पत्थरो । पसत्थो । अत्थि । सत्थि ॥ असमस्तस्तम्ब इति किम् । समत्तो । तम्बो ॥

स्तवे वा ॥ ४६ ॥

स्तवशब्दे स्तस्य थो वा भवति ॥ थवो तवो ॥

पर्यस्ते थ-टौ ॥ ४७ ॥

पर्यस्ते स्तस्य पर्यायेण थटौ भवतः ॥ पल्लत्थो पल्लट्टो ॥

---

1 A पण्णदह.

वोत्साहे थो हश्च रः ॥ ४८ ॥

उत्साहशब्दे संयुक्तस्य थो वा भवति तत्सन्नियोगे च हस्य रः ॥ उत्थारो उच्छाहो ॥

आश्लिष्टे ल-धौ ॥ ४९ ॥

आश्लिष्टे संयुक्तयोर्यथासंख्यं ल ध इत्येतौ भवतः ॥ आलिद्धो ॥

चिह्ने न्धो वा ॥ ५० ॥

चिह्ने संयुक्तस्य न्धो वा भवति । ण्हापवादः ॥ पक्षे सोपि ॥ चिन्धं इन्धं चिण्हं ॥

भस्मात्मनोः पो वा ॥ ५१ ॥

अनयोः संयुक्तस्य पो वा भवति ॥ भप्पो भस्सो । अप्पा अप्पाणो । पक्षे । अत्ता ॥

[1]ड्म-क्मोः ॥ ५२ ॥

ड्मक्मोः [2]पो भवति ॥ [3]कुड्मलम् । कुम्पलं । रुक्मिणी । रुप्पिणी ॥ क्वचित् च्मोपि । रुच्मी रुप्पी ॥

ष्प-स्पयोः फः ॥ ५३ ॥

ष्पस्पयोः फो भवति ॥ पुष्पम् । पुप्फं ॥ शष्पम् । सप्फं ॥ निष्पेषः । निप्फेसो ॥ निष्पावः । निप्फावो ॥ स्पन्दनम् । फन्दणं ॥ प्रतिस्पर्धिन् । [4]पाडिप्फद्धी ॥ बहुलाधिकारात् क्वचिद् विकल्पः । बुहप्फई बुहप्पई ॥ क्वचिन्न भवति । निप्पहो । णि[5]प्पुंसणं । परोप्परम् ॥

भीष्मे ष्मः ॥ ५४ ॥

भीष्मे ष्मस्य फो भवति ॥ भिप्फो ॥

श्लेष्मणि वा ॥ ५५ ॥

श्लेष्मशब्दे ष्मस्य [6]फो वा भवति ॥ सेफो सिलिम्हो ॥

---

१ P ड्मक्मोः. २ B पो वा भ°. ३ P कुड्मलं. ४ P पडिप्फद्धी. ५ P B निप्पुंसणं. ६ B फो भ°.

ताम्राम्रे म्बः ॥ ५६ ॥

अनयोः संयुक्तस्य मयुक्तो बो भवति ॥ तम्बं । अम्बं ॥ अम्बिर तम्बिर इति देश्यौ ॥

ह्वो भो वा ॥ ५७ ॥

ह्वस्य भो वा भवति ॥ जिब्भा जीहा ॥

वा विह्वले वौ वश्च ॥ ५८ ॥

विह्वले[1] ह्वस्य भो वा भवति तत्सन्नियोगे च विशब्दे वस्य वा भो भवति ॥ भिब्भलो विब्भलो विहलो ॥

वोर्ध्वे ॥ ५९ ॥

ऊर्ध्वशब्दे संयुक्तस्य भो वा भवति ॥ उब्भं उद्धं ॥

कश्मीरे म्भो वा ॥ ६० ॥

कश्मीरशब्दे संयुक्तस्य म्भो वा भवति ॥ कम्भारा[2] कम्हारा ॥

न्मो मः ॥ ६१ ॥

न्मस्य मो भवति । अधोलोपापवादः ॥ जम्मो । वम्महो । मम्मणं ॥

ग्मो वा ॥ ६२ ॥

ग्मस्य मो वा भवति ॥ युग्मम् । जुम्मं जुग्गं ॥ तिग्मम् । तिम्मं तिग्गं ॥

ब्रह्मचर्य-तूर्य-सौन्दर्य-शौण्डीर्ये र्यो रः ॥ ६३ ॥

एषु र्यस्य रो भवति । जापवादः ॥ बम्हचेरं[3] । चौर्यसमत्वाद् बम्हचरिअं[4] । तूरं । सुन्देरं । सोण्डीरं ॥

धैर्ये वा ॥ ६४ ॥

धैर्ये र्यस्य रो वा भवति ॥ धीरं धिज्जं । सूरो सुज्जो इति तु सूरसूर्यप्रकृतिभेदात् ॥

---

१ P विह्वलशब्दस्य ह्व°. २ A B कम्भारो कम्हारो. ३ B बम्भचेरं. ४ B बम्भच°.

एतः पर्यन्ते ॥ ६५ ॥

पर्यन्ते एकारात्परस्य र्यस्य रो भवति ॥ पेरन्तो ॥ एत इति किम् । पज्जन्तो ॥

आश्चर्ये ॥ ६६ ॥

आश्चर्ये एतः[1] परस्य र्यस्य रो भवति ॥ अच्छेरं ॥ एत इत्येव । अच्छरिअं ॥

अतो रिआर-रिज्ज-रीअं ॥ ६७ ॥

आश्चर्ये अकारात्परस्य र्यस्य रिअ अर रिज्ज रीअ इत्येते आदेशा भवन्ति ॥ अच्छरिअं अच्छअरं अच्छरिज्जं अच्छरीअं ॥ अत इति किम् । अच्छेरं ॥

पर्यस्त-पर्याण-सौकुमार्ये ल्लः ॥ ६८ ॥

एषु[2] र्यस्य ल्लो भवति ॥ पर्यस्तं पल्लट्टं पल्लत्थं । पल्लाणं । सोअमल्लं ॥ पल्लङ्को इति च पल्यङ्कशब्दस्य यलोपे द्वित्वे च ॥ पलिअङ्को इत्यपि चौर्यसमत्वात् ॥

बृहस्पति-वनस्पत्योः सो वा ॥ ६९ ॥

अनयोः संयुक्तस्य सो वा भवति ॥ बहस्सई[3] बहप्फई । भयस्सई भयप्फई । वणस्सई वणप्फई ॥

बाष्पे होश्रुणि ॥ ७० ॥

बाष्पशब्दे संयुक्तस्य हो भवनि अश्रुण्यभिधेये ॥ बाहो नेत्रजलम् ॥ अश्रुणीति किम् ॥ बप्फो[4] ऊष्मा ॥

कार्षापणे ॥ ७१ ॥

कार्षापणे संयुक्तस्य हो भवति ॥ काहावणो ॥ कथं कहावणो । ह्रस्वः संयोगे [१.८४] इति पूर्वमेव ह्रस्वत्वे पश्चादादेशे । कर्षापणशब्दस्य वा भविष्यति ॥

---

१ B ॥ ६६ ॥ एतः. २ P B ॥ ६८ ॥ पर्यस्त-पर्याण-सौकुमार्ये एषु. ३ P बिह॰. ४ A बाप्फो.

दुःख-दक्षिण-तीर्थे वा ॥ ७२ ॥

एषु संयुक्तस्य हो वा भवति ॥ दुहं दुक्खं । पर-दुक्खे[1] दुक्खिआ विरला । दाहिणो दक्खिणो । तूहं तित्थं ॥

कूष्माण्ड्यां ष्मो लस्तु ण्डो वा ॥ ७३ ॥

कूष्माण्ड्यां ष्मा इत्येतस्य हो भवति ण्ड इत्यस्य[2] तु वा लो भवति ॥ कोहली कोहण्डी ॥

पक्ष्म-श्म-ष्म-स्म-ह्मां म्हः ॥ ७४ ॥

पक्ष्मशब्दसंबन्धिनः संयुक्तस्य श्मष्मस्मह्मां च मकाराक्रान्तो हकार आदेशो भवति ॥ पक्ष्मन् । पम्हाइं । पम्हल-लोअणा ॥ श्म । कुश्मानः । कुम्हाणो । कश्मीराः । कम्हारा ॥ ष्म । ग्रीष्मः । गिम्हो । ऊष्मा । उम्हा ॥ स्म । अस्मादृशः । अम्हारिसो । विस्मयः । विम्हओ ॥ ह्म । ब्रह्मा । बम्हा ॥ सुह्माः । सुम्हा ॥ बम्हणो । बम्हचेरं ॥ क्वचित् म्भोपि दृश्यते । बम्भणो । बम्भचेरं । सिम्भो । क्वचिन्न भवति । रश्मिः । रस्सी । स्मरः । सरो ॥

सूक्ष्म-श्न-ष्ण-स्न-ह्न-ह्ण-क्ष्णां ण्हः ॥ ७५ ॥

सूक्ष्मशब्दसंबन्धिनः संयुक्तस्य श्नष्णस्नह्नह्णक्ष्णां च णकाराक्रान्तो हकार आदेशो भवति ॥ सूक्ष्मं । सण्हं ॥ श्न । पण्हो । सिण्हो ॥ ष्ण । विण्हू । जिण्हू । कण्हो । उण्हीसं ॥ स्न । जोण्हा । ण्हाओ । पण्हुओ ॥ ह्न । वण्ही । जण्हू ॥ ह्ण । पुव्वण्हो । अवरण्हो ॥ क्ष्ण । सण्हं । तिण्हं ॥ विप्रकर्षे तु कृष्णकृत्स्नशब्दयोः कसणो । कसिणो ॥

ह्लो ल्हः ॥ ७६ ॥

ह्लः स्थाने लकाराक्रान्तो हकारो[10] भवति ॥ कल्हारं । पल्हाओ ॥

---

१ B °क्खेण दु°. २ B इत्येतस्य. ३ A पक्ष्म. ४ P पक्ष्मला लो°. ५ B बम्हा । बम्ह°. ६ A °दृ भो°. ७ A संभो. ८ B °कारादे°. ९ B विण्हू । क°. १० B °न्तो हो भ

क-ग-ट-ड-त-द-प-श-ष-स-ᳲक-ᳲपामूर्ध्वं लुक् ॥ ७७ ॥

एषां संयुक्तवर्णसंबन्धिनामूर्ध्वं स्थितानां लुग् भवति ॥ क[1] । भुत्तं[2] । सित्थं ॥ ग । दुद्धं । मुद्धं ॥ ट । षट्पदः । छप्पओ ॥ कट्फलम् । कप्फलं ॥ ड । खड्गः । खग्गो ॥ षड्जः । सज्जो ॥ त । उप्पलं । उ[3]-प्पाओ ॥ द । मद्गुः । मग्गू । मोग्गरो ॥ प । सुत्तो । गुत्तो ॥ श । लण्हं । निच्चलो । चुअइ ॥ ष । गोट्ठी । छट्ठो । निट्ठुरो ॥ स । खलिओ । नेहो ॥ ᳲक । दुᳲखम् । दुक्खं ॥ ᳲप । अंतᳲपातः । अंतप्पाओ ॥

अधो म-न-याम् ॥ ७८ ॥

मनयां संयुक्तस्याधो वर्तमानानां लुग् भवति ॥ म । जुग्गं । रस्सी । सरो । सेरं ॥ न । नग्गो । लग्गो ॥ य । सामा । कुड्डं । वाहो ॥

सर्वत्र ल-ब-रामवन्द्रे[4] ॥ ७९ ॥

वन्द्र[5]शब्दादन्यत्र लबरां सर्वत्र संयुक्तस्योर्ध्वमधश्च स्थितानां लुग् भवति ॥ ऊर्ध्वं ॥ ल । उल्का । उक्का ॥ वल्कलम् । वक्कलं ॥ ब । शब्दः । सद्दो ॥ अब्दः । अद्दो ॥ लुब्धकः । लोद्धओ ॥ र । अर्कः । अक्को ॥ वर्गः । वग्गो ॥ अधः । श्लक्ष्णम् । सण्हं ॥ विक्लवः । विक्कवो ॥ पक्कम् । पक्कं[6] पिक्कं ॥ ध्वस्तः । धत्थो ॥ चक्रम् । चक्कं ॥ ग्रहः । गहो ॥ रात्रिः । रत्ती ॥ अत्र द्व इत्यादिसंयुक्तानामुभयप्राप्तौ यथादर्शनं लोपः ॥ क्वचिदूर्ध्वम् । उद्विग्नः । उव्विग्गो ॥ द्विगुणः । बि-उणो ॥ द्वितीयः । बीओ ॥ कल्मषम् । कम्मसं ॥ सर्वम् । सव्वं ॥ शुल्बम् । सुव्वं ॥ क्वचित्त्वधः । काव्यम् । कव्वं ॥ कुल्या । कुल्ला ॥ माल्यम् । मल्लं ॥ द्विपः । दिओ ॥ द्विजातिः । दुआई ॥ क्वचित्पर्यायेण । द्वारम् । बारं । दारं ॥ उद्विग्नः । उव्विग्गो । उव्विण्णो ॥ अवन्द्र[7] इति किम् । वन्द्रं[8] । संस्कृतसमोयं प्राकृतशब्दः । अत्रोत्तरेण विकल्पोपि न भवति निषेधसामर्थ्यात् ॥

---

१ B क । भुक्तं । भु°. २ B °त्थं । सिक्थं । सि°. ३ A तप्पाओ. ४ P °बन्द्रे. B °चन्द्रे. ५ P बन्द्र°. B चंद्र°. ६ B पक्कं । पि°. ७ P अबन्द्र°. B अचंद्र°. ८ P बन्द्रं. B चंद्रं.

द्रे रो न वा ॥ ८० ॥

द्रशब्दे[1] रेफस्य वा लुग् भवति ॥ चन्दो चन्द्रो । रुद्दो रुद्रो । भद्दं भद्रं । समुद्दो समुद्रो ॥ ह्रदशब्दस्य स्थितिपरिवृत्तौ द्रह इति रूपम् । तत्र द्रहो दहो । केचिद् रलोपं नेच्छन्ति । द्रहशब्दमपि कश्चित् संस्कृतं मन्यते ॥ वोद्रहादयस्तु तरुणपुरुषादिवाचका नित्यं रेफसंयुक्ता देश्या एव । सिक्खन्तु वोद्रहीओ । वोद्रह-द्रहम्मि[2] पडिआ ॥

धात्र्याम् ॥ ८१ ॥

धात्रीशब्दे रस्य लुग् वा भवति ॥ धत्ती । ह्रस्वात् प्रागेव रलोपे धाई । पक्षे । धारी ॥

तीक्ष्णे णः ॥ ८२ ॥

तीक्ष्णशब्दे णस्य लुग् वा भवति ॥ तिक्खं । तिण्हं ॥

ज्ञो ञः ॥ ८३ ॥

ज्ञः संबन्धिनो ञस्य लुग् वा भवति ॥ जाणं णाणं । सव्वज्जो सव्वण्णू । अप्पज्जो अप्पण्णू । दइवज्जो दइवण्णू । इङ्गिअज्जो इङ्गिअण्णू । मणोज्जं मणोण्णं । अहिज्जो अहिण्णू । पज्जा पण्णा । अज्जा आणा[3] । संजा सण्णा[4] ॥ क्वचिन्न भवति । विण्णाणं ॥

मध्याह्ने हः ॥ ८४ ॥

मध्याह्ने हस्य लुग् वा भवति ॥ मज्झन्नो मज्झण्हो ॥

दशार्हे ॥ ८५ ॥

पृथग्योगाद्वेति निवृत्तम् । दशार्हे हस्य लुग् भवति ॥ दसारो ॥

आदेः श्मश्रु-श्मशाने ॥ ८६ ॥

अनयोरादेर्लुग् भवति ॥ मासू मंसू मस्सू । मसाणं ॥ आर्षे श्मशानशब्दस्य सीआणं सुसाणमित्यपि भवति ॥

---

१ B °ब्दे परे रे°. २ B °द्रहंमि. ३ A आंणे°. ४ B अण्णा । सज्जा । स°.

श्चो हरिश्चन्द्रे ॥ ८७ ॥

हरिश्चन्द्रशब्दे श्च इत्यस्य लुग् भवति ॥ हरिअन्दो ॥

रात्रौ[1] वा ॥ ८८ ॥

रात्रिशब्दे संयुक्तस्य लुग् वा भवति ॥ राई रत्ती ॥

अनादौ शेषादेशयोर्द्वित्वम् ॥ ८९ ॥

पदस्यानादौ वर्तमानस्य शेषस्यादेशस्य च द्वित्वं भवति ॥ शेष । कप्पतरू । भुत्तं । दुद्धं । नग्गो । उक्का । अक्को । मुक्खो ॥ आदेश । डक्को । जक्खो । रग्गो । किच्ची । रुप्पी ॥ क्वचिन्न भवति । कसिणो ॥ अनादाविति किम् । खलिअं । थेरो । खम्भो ॥ द्वयोस्तु द्वित्वमस्त्येवेति न भवति । विञ्चुओ । भिण्डिवालो ॥

द्वितीय-तुर्ययोरुपरि पूर्वः ॥ ९० ॥

द्वितीयतुर्ययोर्द्वित्वप्रसङ्गे उपरि पूर्वौ भवतः ॥ द्वितीयस्योपरि प्रथमश्चतुर्थस्योपरि तृतीय इत्यर्थः ॥ शेष । वक्खाणं । वग्घो । मुच्छा । निज्झरो[2] । कट्ठं । तित्थं । निद्धणो । गुप्फं । निब्भरो[3] ॥ आदेश । जक्खो ॥ घस्य नास्ति ॥ अच्छी । मज्झं । पट्ठी । वुड्ढो । हत्थो । आलिद्धो । पुप्फं । भिब्भलो ॥ तैलादौ [२.९८] द्वित्वे ओक्खलं[4] ॥ सेवादौ [२.९९] नक्खा । नहा ॥ समासे । कइ-द्धओ कइ-धओ[5] ॥ द्वित्व इत्येव । खाओ ॥

दीर्घे वा ॥ ९१ ॥

दीर्घशब्दे शेषस्य घस्य उपरि पूर्वो वा भवति ॥ दिग्घो दीहो ॥

न दीर्घानुस्वारात् ॥ ९२ ॥

दीर्घानुस्वाराभ्यां लाक्षणिकाभ्यामलाक्षणिकाभ्यां च परयोः शेषादेशयोर्द्वित्वं न भवति ॥ छूढो । नीसासो । फासो ॥ अलाक्षणिक[6] ।

---

१ A °त्रौ ॥ २ B निब्भरो. ३ B निज्झरो. ४ P उक्खलं. ५ B °से वा । क°. ६ B °णिकं.

पार्श्वम् । पासं ॥ शीर्षम् । सीसं ॥ ईश्वरः । ईसरो ॥ द्वेष्यः । वेसो ॥ लास्यम् । लासं ॥ आस्यम् । आसं ॥ प्रेष्यः । पेसो ॥ अवमाल्यम् । ओमालं ॥ आज्ञा । आणा ॥ आज्ञप्तिः । आणत्ती ॥ आज्ञपनं[1] । आणवणं ॥ अनुस्वारात् । त्र्यस्रम् । तंसं ॥ अलाक्षणिक[2] । संझा । विंझो । कंसालो ॥

र-होः ॥ ९३ ॥

रेफहकारयोर्द्वित्वं न भवति ॥ रेफः शेषो नास्ति ॥ आदेश[3] । सुन्देरं । बम्हचेरं[4] । पेरन्तं ॥ शेषस्य हस्य । विहलो ॥ आदेशस्य । कहावणो ॥

धृष्टद्युम्ने णः ॥ ९४ ॥

धृष्टद्युम्नशब्दे आदेशस्य णस्य द्वित्वं न भवति ॥ धट्ठज्जुणो ॥

कर्णिकारे वा ॥ ९५ ॥

कर्णिकारशब्दे शेषस्य[5] णस्य द्वित्वं वा न भवति ॥ कणिआरो कण्णिआरो ॥

दृप्ते ॥ ९६ ॥

दृप्तशब्दे शेषस्य[6] द्वित्वं न भवति ॥ दरिअ-सीहेण ॥

समासे वा ॥ ९७ ॥

शेषादेशयोः समासे द्वित्वं वा भवति ॥ नइ-ग्गामो नइ-गामो । कुसुम-प्पयरो कुसुम-पयरो । देव-त्थुई देव-थुई । हर-क्खन्दा हर-खन्दा । आणाल-क्खम्भो आणाल-खम्भो ॥ बहुलाधिकारादशेषादेशयोरपि । स-प्पिवासो स-पिवासो । बद्ध-प्फलो बद्ध-फलो । मलय-सिहर-क्खण्डं मलय-सिहर-खण्डं । पम्मुक्कं पमुक्कं । अद्दंसणं अदंसणं । पडिक्कूलं पडिकूलं । तेल्लोक्कं तेलोक्कं इत्यादि ॥

---

१ B °ज्ञापनं. २ B °णिके. ३ P B °देशे. ४ B बम्भचे°. ५ B °स्य द्वि°. ६ P वा भ°. ७ P °स्य तस्य द्वि°.

तैलादौ ॥ ९८ ॥

तैलादिषु अनादौ यथादर्शनमन्त्यस्यानन्त्यस्य च व्यञ्जनस्य द्वित्वं भवति ॥ तेल्लं । मण्डुक्को । वेइल्लं । उज्जू । विड्डा । बहुत्तं ॥ अनन्त्यस्य । सोत्तं । पेम्मं । जुव्वणं ॥ आर्षे । पडिसोओ । विस्सोअसिआ ॥ तैल । मंडूक । विचकिल । ऋजु । व्रीडा । प्रभूत । स्रोतस् । प्रेमन् । यौवन । इत्यादि ॥

सेवादौ वा ॥ ९९ ॥

सेवादिषु अनादौ यथादर्शनमन्त्यस्यानन्त्यस्य च द्वित्वं वा भवति ॥ सेव्वा सेवा ॥ नेड्डं नीडं । नक्खा नहा । निहित्तो निहिओ । वाहित्तो वाहिओ । माउक्कं माउअं । एक्को एओ । कोउहल्लं कोउहलं । वाउल्लो वाउलो । थुल्लो थोरो । हुत्तं हुअं । दइव्वं दइवं । तुण्हिक्को तुण्हिओ । मुक्को मूओ । खण्णू खाणू । थिण्णं थीणं ॥ अनन्त्यस्य । अम्हक्केरं अम्हकेरं । तंच्चेअ तंचेअ । सोच्चिअ सोच्चिअ ॥ सेवा । नीड । नख । निहित । व्याहृत । मृदुक । एक । कुतूहल । व्याकुल । स्थूल । हूत । दैव । तूष्णीक । मूक । स्थाणु । स्त्यान । अस्मदीय । चेअ । चिअ । इत्यादि ॥

शार्ङ्गे ङात्पूर्वोत् ॥ १०० ॥

शार्ङ्गे ङात्पूर्वो अकारो भवति ॥ सारङ्गं ॥

क्ष्मा-श्लाघा-रत्नेन्त्यव्यञ्जनात् ॥ १०१ ॥

एषु संयुक्तस्य यदन्त्यव्यञ्जनं तस्मात्पूर्वोद् भवति ॥ छमा । सलाहा । रयणं ॥ आर्षे सूक्ष्मेपि । सुहमं ॥

स्नेहाग्न्योर्वा ॥ १०२ ॥

अनयोः संयुक्तस्यान्त्यव्यञ्जनात्पूर्वोकारो वा भवति ॥ सणेहो नेहो । अगणी अग्गी ॥

---

१ B जोव्वणं. २ A B विचिकिल. ३ B नेड्डं. ४ A थेरो.

प्लक्षे लात् ॥ १०३ ॥

प्लक्षशब्दे संयुक्तस्यान्त्यव्यञ्जनाल्लात्पूर्वोद् भवति ॥ पलक्खो ॥

र्ह-श्री-ह्री-कृत्स्न-क्रिया-दिष्ट्यास्वित् ॥ १०४ ॥

एषु संयुक्तस्यान्त्यव्यञ्जनात्पूर्व इकारो भवति ॥ र्ह । अरिहइ । अरिहा[2] । गरिहा । वरिहो ॥ श्री । सिरी ॥ ह्री । हिरी ॥ ह्रीतः । हिरीओ[3] ॥ अह्रीकः । अहिरीओ[4] ॥ कृत्स्नः । कसिणो ॥ क्रिया । किरिआ ॥ आर्षे तु हयं नाणं किया-हीणं ॥ दिष्ट्या । दिट्ठिआ ॥

र्श-र्ष-तप्त-वज्रे वा ॥ १०५ ॥

र्शर्षयोस्तप्तवज्रयोश्च[5] संयुक्तस्यान्त्यव्यञ्जनात्पूर्व इकारो वा भवति ॥ र्श । आयरिसो आयंसो । सुदरिसणो सुदंसणो । दरिसणं दंसणं ॥ र्ष । वरिसं वासं । वरिसा वासा । वरिस-सयं वास-सयं ॥ व्यवस्थितविभाषया क्वचिन्नित्यम् । परामरिसो । हरिसो । अमरिसो ॥ तप्त[6] । तविओ तत्तो ॥ वज्र[7] । वइरं वज्जं ॥

लात् ॥ १०६ ॥

संयुक्तस्यान्त्यव्यञ्जनाल्लात्पूर्व इद् भवति ॥ किलिन्नं । किलिट्ठं । सिलिट्ठं । पिलुट्ठं । पिलोसो । सिलिम्हो । सिलेसो । सुक्किलं[8] । सुइलं । सिलोओ । किलेसो । अम्बिलं । गिलाइ । गिलाणं । मिलाइ । मिलाणं । किलम्मइ । किलन्तं ॥ क्वचिन्न भवति ॥ कमो । पवो । विप्पवो । सुक्क-पक्खो ॥ उत्प्लावयति । उप्पावेइ ॥

स्याद्-भव्य-चैत्य-चौर्यसमेषु यात् ॥ १०७ ॥

स्यादादिषु चौर्यशब्देन समेषु च संयुक्तस्य यात्पूर्व इद् भवति ॥ सिआ । सिआ-वाओ । भविओ । चेइअं ॥ चौर्यसम । चोरिअं । थेरिअं । भारिआ । गम्भीरिअं । गहीरिअं । आयरिओ[9] । सुन्दरिअं । सोरिअं । वीरिअं । वरिअं । सूरिअं । धीरिअं । बम्हचरिअं[10] ॥

---

१ B ° ष्ठ्यामित्. २ B अरिहो. ३ P B हिरिओ. ४ B अहरिओ. ५ B योः सं°. ६ P B तप्तः. ७ P B वज्रं. ८ P सुकिलं. ९ P आइरिओ. १० B बंभच°.

स्वप्ने नात् ॥ १०८ ॥

स्वप्नशब्दे नकारात्पूर्व[1] इद् भवति ॥ सिविणो ॥

स्निग्धे वादितौ ॥ १०९ ॥

स्निग्धे संयुक्तस्य नात्पूर्वौ अदितौ वा भवतः ॥ सणिद्धं सिणिद्धं[2] । पक्षे निद्धं ॥

कृष्णे वर्णे वा ॥ ११० ॥

कृष्णे वर्णवाचिनि संयुक्तस्यान्त्यव्य[3]ञ्जनात्पूर्वौ अदितौ वा भवतः ॥ कसणो कसिणो कण्हो ॥ वर्ण इति किम् ॥ विष्णौ कण्हो ॥

उच्चार्हति ॥ १११ ॥

अर्हत्-शब्दे संयुक्तस्यान्त्यव्यञ्जनात्पूर्व उत् अदितौ च भवतः ॥ अरुहो अरहो अरिहो । अरुहन्तो अरहन्तो अरिहन्तो ॥

पद्म-छद्म-मूर्ख-द्वारे वा ॥ ११२ ॥

एषु संयुक्तस्यान्त्यव्यञ्जनात्पूर्व उद् वा भवति ॥ पउमं पोम्मं । छउमं छम्मं । मुरुक्खो मुक्खो । दुवारं । पक्षे । वारं । देरं । दारं[4] ॥

तन्वीतुल्येषु ॥ ११३ ॥

उकारान्ता ङीप्रत्ययान्तास्तन्वीतुल्याः । तेषु संयुक्तस्यान्त्यव्यञ्जना[5]त्पूर्व उकारो भवति ॥ तणुवी । लहुवी । गरुवी । बहुवी । पुहुवी[6] । मउवी ॥ क्वचिदन्यत्रापि[7] । स्रुघ्नम् । सुरुग्घं ॥ आर्षे । सूक्ष्मम् । सुहुमं ॥

एकस्वरे श्वः-स्वे ॥ ११४ ॥

एकस्वरे पदे यौ श्वस् स्व इत्येतौ तयोरन्त्यव्यञ्जनात्पूर्व उद् भवति ॥ श्वः कृतम् । सुवे कयं ॥ स्वे जनाः । सुवे जणा ॥ एकस्वर इति किम् । स्व-जनः । स-यणो ॥

---

१ B नात्पू°. २ P सिण्हं. ३ B °न्त्य°. ४ P °रं । बारं । दें°. ५ A B °न्तात् ङी°. ६ A पहुवी. ७ A °न्यदपि.

ज्यायामीत् ॥ ११५ ॥

ज्याशब्दे अन्त्यव्यञ्जनात्पूर्व ईद् भवति ॥ जीआ ॥

करेणू-वाराणस्यो र-णोर्व्यत्ययः ॥ ११६ ॥

अनयो रेफणकारयोर्व्यत्ययः स्थितिपरिवृत्तिर्भवति ॥ कणेरू । वाणारसी ॥ स्त्रीलिङ्गनिर्देशात्पुंसि न भवति । एसो करेणू ॥

आलाने लनोः ॥ ११७ ॥

आलानशब्दे लनोर्व्यत्ययो भवति ॥ आणालो । आणाल-क्खम्भो[1] ॥

अचलपुरे च-लोः ॥ ११८ ॥

अचलपुरशब्दे[2] चकारलकारयोर्व्यत्ययो भवति ॥ अलचपुरं ॥

महाराष्ट्रे ह-रोः ॥ ११९ ॥

महाराष्ट्रशब्दे हरोर्व्यत्ययो भवति ॥ मरहट्ठं ॥

ह्रदे ह-दोः ॥ १२० ॥

ह्रदशब्दे हकारदकारयोर्व्यत्ययो भवति ॥ द्रहो[3] ॥ आर्षे । हरए महपुण्डरिए ॥

हरिताले र-लोर्न वा ॥ १२१ ॥

हरितालशब्दे रकारलकारयोर्व्यत्ययो वा भवति ॥ हलिआरो हरिआलो ॥

लघुके ल-होः ॥ १२२ ॥

लघुकशब्दे वस्य हत्वे कृते लहोर्व्यत्ययो वा भवति ॥ हलुअं । लहुअं ॥ घस्य व्यत्यये कृते पदादित्वात् हो न प्राप्नोतीति हकरणम् ॥

ललाटे ल-डोः ॥ १२३ ॥

ललाटशब्दे लकारडकारयोर्व्यत्ययो भवति वा ॥ णडालं । णलाडं ।

---

1 P °क्खम्भो. 2 B पुरे श°. 3 P द्हो.

ललाटे च [१.२५७.] इति आदेर्लस्य णविधानादिह द्वितीयो लः स्थानी ॥

ह्ये ह्योः ॥ १२४ ॥

ह्यशब्दे हकारयकारयोर्व्यत्ययो वा भवति ॥ गुह्यम् । गुय्हं गुज्झं ॥ सह्यः । सय्हो सज्झो ॥

स्तोकस्य थोक्क-थोव-थेवाः ॥ १२५ ॥

स्तोकशब्दस्य एते त्रय आदेशा भवन्ति वा ॥ थोक्कं थोवं थेवं । पक्षे । थोअं ॥

दुहितृ-भगिन्योर्धूआ-बहिण्यौ ॥ १२६ ॥

अनयोरेतावादेशौ वा भवतः ॥ धूआ दुहिआ । बहिणी भइणी ॥

वृक्ष-क्षिप्तयो रुक्ख-छूढौ ॥ १२७ ॥

वृक्षक्षिप्तयोर्यथासंख्यं रुक्ख छूढ इत्यादेशौ वा भवतः ॥ रुक्खो वच्छो । छूढं खित्तं । उच्छूढं । उक्खित्तं ॥

वनिताया विलया ॥ १२८ ॥

वनिताशब्दस्य विलया इत्यादेशो वा भवति ॥ विलया वणिआ ॥ विलयेतिसंस्कृतेपीति केचित् ॥

गौणस्येषतः कूरः ॥ १२९ ॥

ईषच्छब्दस्य गौणस्य कूर इत्यादेशो वा भवति ॥ चिंचव्व कूर-पिक्का[1]। पक्षे । ईसि ॥

स्त्रिया इत्थी ॥ १३० ॥

स्त्रीशब्दस्य इत्थी इत्यादेशो वा भवति ॥ इत्थी थी ॥

धृतेर्दिहिः ॥ १३१ ॥

धृतिशब्दस्य दिहिरित्यादेशो वा[2] भवति ॥ दिही धिई ॥

१ P पक्का. २ B वा ॥

मार्जारस्य मञ्जर-वञ्जरौ ॥ १३२ ॥

मार्जार[1]शब्दस्य मञ्जर वञ्जर इत्यादेशौ वा भवतः ॥ मञ्जरो वञ्जरो । पक्षे । मज्जारो ॥

वैडूर्यस्य वेरुलिअं ॥ १३३ ॥

वैडूर्यशब्दस्य वेरुलिअ इत्यादेशो वा भवति ॥ वेरुलिअं । वेडुज्जं[2] ॥

एण्हिं एत्ताहे इदानीमः ॥ १३४ ॥

अस्य एतावादेशौ वा भवतः ॥ एण्हिं । एत्ताहे । इआणिं ॥

पूर्वस्य पुरिमः ॥ १३५ ॥

पूर्वस्य स्थाने पुरिम इत्यादेशो वा भवति ॥ पुरिमं पुव्वं ॥

त्रस्तस्य हित्थ-तट्ठौ ॥ १३६ ॥

त्रस्तशब्दस्य हित्थ तट्ठ[3] इत्यादेशौ वा भवतः ॥ हित्थं तट्ठं तत्थं ॥

बृहस्पतौ बहो भयः ॥ १३७ ॥

बृहस्पतिशब्दे बह इत्यस्यावयवस्य[4] भय इत्यादेशो वा भवति ॥ भयस्सई भयप्फई भयप्पई ॥ पक्षे । बहस्सई । बहप्फई । बहप्पई ॥ वा बृहस्पतौ [१. १३८] इति इकारे उकारे च बिहस्सई । बिहप्फई । बिहप्पई[5] । बुहस्सई । बुहप्फई । बुहप्पई ॥

मलिनोभय-शुक्ति-छुप्तारब्ध-पदातेर्मइलावह-सिप्पि-छिक्का-ढत्त-पाइक्कं ॥ १३८ ॥

मलिनादीनां यथासंख्यं मइलादय आदेशा वा भवन्ति ॥ मलिन[6] । मइलं मलिणं ॥ उभयं[7] । अवहं । उवहमित्यपि केचित् । अवहोआसं । उभयबलं ॥ आर्षे । उभयोकालं ॥ शुक्ति[8] । सिप्पी सुत्ती[9] ॥

---

1 B मार्जारस्य. 2 B वैडुउज्जं. 3 B °तट्ठाविस्या°. 4 P इत्येतस्य भ°. 5 B बिहप्पई । मलि°. 6 P B मलिनं. 7 P B उभयं. 8 P शुक्तिः. 9 B °त्ती ॥ छुप्त । छुप्त ।.

क्षुतं[1] । छिक्को क्षुत्तो ॥ आरब्धं[2] । आढत्तो आरद्धो ॥ पदाति[3] । पाइक्को[4] पयाई ॥

दंष्ट्राया दाढा ॥ १३९ ॥

पृथग्योगाद्वेति निवृत्तम् । दंष्ट्राशब्दस्य दाढा इत्यादेशो भवति ॥ दाढा[5] । अयं संस्कृतेपि ॥

बहिसो बाहिं-बाहिरौ ॥ १४० ॥

बहिःशब्दस्य बाहिं बाहिर इत्यादेशौ भवतः ॥ बाहिं बाहिरं ॥

अधसो हेट्ठं ॥ १४१ ॥

अधस्शब्दस्य हेट्ठ इत्ययमादेशो[6] भवति ॥ हेट्ठं ॥

मातृ-पितुः स्वसुः सिआ-छौ ॥ १४२ ॥

मातृपितृभ्यां परस्य स्वसृशब्दस्य सिआ छा इत्यादेशौ भवतः ॥ माउ-सिआ । माउ-च्छा । पिउ-सिआ । पिउ-च्छा ॥

तिर्यँचस्तिरिच्छिः ॥ १४३ ॥

तिर्यच्[7]शब्दस्य तिरिच्छिरित्यादेशो[8] भवति ॥ तिरिच्छि पेच्छइ ॥ आर्षे तिरिआ इत्यादेशोपि । तिरिआ[9] ॥

गृहस्य घरोपतौ ॥ १४४ ॥

गृहशब्दस्य घर इत्यादेशो भवति पतिशब्दश्चेन् परो न भवति ॥ घरो । घर-सामी । राय-हरं ॥ अपताविति किम् । गह-वई[10] ॥

शीलाद्यर्थस्येरः ॥ १४५ ॥

शीलधर्मसाध्वर्थे विहितस्य प्रत्ययस्य इर इत्यादेशो भवति ॥ हसनशीलः हसिरो । रोविरो । लज्जिरो । जम्पिरो । वेविरो । भमिरो । ऊससिरो ॥ केचित् तृन एव इरमाहुस्तेषां नमिरगमिरादयो न सिध्यन्ति । तृनोत्र रादिना बाधितत्वात् ॥

---

१ P क्षुतः. २ P आरब्धः. ३ P B पदातिः. ४ A पायक्को. ५ P दाढा । बहि°. ६ P B इत्यादे°. ७ B तिर्यंच°. ८ P °रिच्छ इत्या°. ९ A तिरिअ. १० B °वपरं.

क्त्वस्तुमत्तूण-तुआणाः ॥ १४६ ॥

क्त्वाप्रत्ययस्य तुम् अत् तूण तुआण[1] इत्येते आदेशा भवन्ति ॥ तुम्। दट्ठुं । मोत्तुं ॥ अत् । भमिअ । रमिअ ॥ तूण । घेत्तूण। काऊण ॥ तुआण । भेत्तुआण । सोउआण ॥ वन्दित्तु इत्यनुस्वारलोपात् ॥ वन्दित्ता इति सिद्धसंस्कृतस्यैव[2] वलोपेन ॥ कट्टु[3] इति तु आर्षे ।

इदमर्थस्य केरः ॥ १४७ ॥

इदमर्थस्य प्रत्ययस्य केर इत्यादेशो भवति ॥ युष्मदीयः । तुम्हकेरो ॥ अस्मदीयः । अम्हकेरो ॥ न च भवति[4] । मईअ-पक्खे । पाणि-णीआ ॥

पर-राजभ्यां क्क-डिक्कौ च ॥ १४८ ॥

पर राजन् इत्येताभ्यां परस्येदमर्थस्य प्रत्ययस्य यथासंख्यं संयुक्तो[5] क्को डित् इक्कश्चादेशौ भवतः । चकारात्केरश्च ॥ परकीयम् । पारक्कं[6] । परक्कं । पारकेरं ॥ राजकीयम् । राइक्कं । रायकेरं ॥

युष्मदस्मदोञ एच्चयः ॥ १४९ ॥

आभ्यां परस्येदमर्थस्याञ एच्चय इत्यादेशो भवति ॥ युष्माकमिदं यौष्माकम् । तुम्हेच्चयं । एवम् अम्हेच्चयं ॥

वतेर्व्वः ॥ १५० ॥

वतेः प्रत्ययस्य द्विरुक्तो वो भवति ॥ महुरव्व पाडलिउत्ते पासाया ॥

सर्वाङ्गादीनस्येकः ॥ १५१ ॥

सर्वाङ्गात् सर्वादेः पथ्यङ्ग [हे०७.१] इत्यादिना विहितस्येनस्य स्थाने इक इत्यादेशो भवनि ॥ सर्वाङ्गीणः । सव्वङ्गिओ ॥

---

१ A आणा इ°. २ B सिद्धं सं°. ३ B कट्टु. ४ B भवंति मईअपक्खे पा°. P भवति ॥ मईअ पक्खे । पा°. ५ B °क्तौ क डित्. ६ P B °क्कं । पा°.

पथो णस्येकट्[1] ॥ १५२ ॥

नित्यं णः पन्थश्च [हे० ६.४] इति यः पथो णो विहितस्तस्य इकट् भवति ॥ पान्थः । पहिओ ॥

ईयस्यात्मनो[2] णयः ॥ १५३ ॥

आत्मनः परस्य ईयस्य णय इत्यादेशो भवति ॥ आत्मीयम् । अप्पणयं ॥

त्वस्य डिमा-त्तणौ वा ॥ १५४ ॥

त्वप्रत्ययस्य डिमा त्तण इत्यादेशौ वा भवतः ॥ पीणिमा । पुप्फिमा । पीणत्तणं । पुप्फत्तणं । पक्षे । पीणत्तं । पुप्फत्तं[3] ॥ इम्नः पृथ्वादिषु नियतत्वात् तदन्यप्रत्ययान्तेषु अस्य विधिः ॥ पीनता इत्यस्य प्राकृते पीणया इति भवति । पीणदा इति तु भाषान्तरे । तेनेह तलो दा न क्रियते ॥

अनङ्कोठात्तैलस्य डेल्लः ॥ १५५ ॥

अङ्कोठवर्जिताच्छब्दात्परस्य तैलप्रत्ययस्य डेल्ल इत्यादेशो भवति ॥ सुरहि[5]-जलेण कडुएल्लं ॥ अनङ्कोठादिति किम् । अङ्कोल्लतेल्लं ॥

यत्तदेतदोतोरित्तिअ एतल्लुक् च ॥ १५६ ॥

एभ्यः परस्य डावादेरतोः परिमाणार्थस्य इत्तिअ इत्यादेशो भवति एतदो लुक् च ॥ यावत् । जित्तिअं ॥ तावत् । तित्तिअं ॥ एतावत् । इत्तिअं ॥

इदंकिमश्च[8] डेत्तिअ-डेत्तिल[6]-डेद्दहाः ॥ १५७ ॥

इदंकिंभ्यां यत्तदेतद्भ्यश्च परस्यातोर्डावतोर्वा डित एत्तिअ एत्तिल[9] एद्दह इत्यादेशा भवन्ति एतल्लुक् च ॥ इयत् । एत्तिअं । एत्तिलं[10] । एद्दहं ॥ कियत् । केत्तिअं[11] । केत्तिलं[12] । केद्दहं ॥ यावत् । जेत्तिअं ।

---

१ B °कट् नित्यं णः ॥ ५२ ॥ पन्थ. २ A नोऽणयः. ३ A पुप्फत्तं. ४ P अनङ्कोठव°. ५ A सुरहीज°. ६ A डिन्तिल. ७ B °ल्ल°. ८ B डितू. ९ A इत्तिल. १० A इत्तिलं. ११ A कित्तिअं. १२ A कित्तिलं.

जेत्तिलं[1]। जेद्दहं[2] ॥ तावत्। तेत्तिअं। तेत्तिलं[3]। तेद्दहं ॥ एतावत्। एत्तिअं। एत्तिलं[4]। एद्दहं ॥

कृत्वसो हुत्तं ॥ १५८ ॥

वारे कृत्वस् [हे० ७.२] इति यः कृत्वस् विहितस्तस्य हुत्तमित्यादेशो भवति ॥ सयहुत्तं। सहस्सहुत्तं ॥ कथं प्रियाभिमुखं पियहुत्तं। अभिमुखार्थेन हुत्तशब्देन भविष्यति ॥

आल्विल्लोल्लाल-वन्त-मन्तेत्तेर-मणा मतोः ॥ १५९ ॥

आलु इत्यादयो[5] नव आदेशा मतोः स्थाने यथाप्रयोगं भवन्ति ॥ आलु[6]। नेहालू। दयालू। ईसालू। लज्जालुआ[7] ॥ इल्ल। सोहिल्लो। छाइल्लो। जामइल्लो ॥ उल्ल। विआरुल्लो। मंसुल्लो। दप्पुल्लो[8] ॥ आल। सद्दालो। जडालो। फडालो। रसालो। जोण्हालो ॥ वन्त ॥ धणवन्तो। भत्तिवन्तो ॥ मन्त। हणुमन्तो। सिरिमन्तो। पुण्णमन्तो ॥ इत्त। कव्वइत्तो। माणइत्तो ॥ इर। गव्विरो। रेहिरो ॥ मण। धणमणो ॥ केचिन्मादेशमपीच्छन्ति। हणुमा ॥ मतोरिति किम्। धणी। अत्थिओ ॥

त्तो दो तसो वा ॥ १६० ॥

तसः प्रत्ययस्य स्थाने त्तो दो इत्यादेशौ[9] वा भवतः ॥ सव्वत्तो सव्वदो। एकत्तो एकदो[10]। अन्नत्तो अन्नदो। कत्तो कदो। जत्तो जदो। तत्तो तदो। इत्तो इदो। पक्षे। सव्वओ। इत्यादि ॥

त्रपो[11] हि-ह-त्थाः ॥ १६१ ॥

त्रप्प्रत्ययस्य[12] एते भवन्ति ॥ यत्र। जहि। जह। जत्थ ॥ तत्र। तहि। तह। तत्थ ॥ कुत्र। कहि। कह। कत्थ ॥ अन्यत्र। अन्नहि। अन्नह। अन्नत्थ ॥

---

१ A जित्तिलं. २ B °द्दं. ३ A तित्तिलं. ४ A इत्तिलं. ५ B °दय आ. ६ B आलू. ७ B लज्जालूआ. ८ A दप्फुल्लो. ९ B °देशौ भ. १० A एगदो. ११ P °त्रलो. १२ P °त्रल्प°.

वैकाद्दः सि सिअं इआ ॥ १६२ ॥

एकशब्दात्परस्य दाप्रत्ययस्य सि सिअं इआ[1] इत्यादेशा वा भवन्ति ॥ एकदा । एक्कसि । एक्कसिअं । एक्कइआ[2] । पक्षे । एगया ॥

डिल्ल-डुल्लौ भवे ॥ १६३ ॥

भवेर्थे नाम्नः परौ इल्ल उल्ल इत्येतौ डितौ प्रत्ययौ भवतः ॥ गामिल्लिआ । पुरिल्लं । हेट्ठिल्लं । उवरिल्लं । अप्पुल्लं ॥ आल्वालावपीच्छन्त्यन्ये ॥

स्वार्थे कश्च वा ॥ १६४ ॥

स्वार्थे कश्चकारादिल्लोल्लौ डितौ प्रत्ययौ वा भवतः ॥ क । कुङ्कुमपिञ्जरयं[3] । चन्दओ । गयणयम्मि । धरणीहर-पक्खुब्भन्तयं । दुहिअए राम-हिअयए[4] । इहयं । आलेट्ठुअं[5] । आश्लेष्टुमित्यर्थः ॥ द्विरपि भवति । बहुअयं ॥ ककारोच्चारणं पैशाचिकभाषार्थम् । यथा । वतनके वतनकं समप्पेत्तून[6] ॥ इल्ल । निज्जिआसोअ-पल्लविल्लेण । पुरिल्लो[7] । पुरा पुरो वा ॥ उल्ल । मह पिउल्लओ । मुहुल्लं[8] । हत्थुल्ला[9] । पक्षे । चन्दो । गयणं । इह । आलेट्ठुं । बहु । बहुअं । मुहं । हत्था ॥ कुत्सादिविशिष्टे तु संस्कृतवदेव[10] कप् सिद्धः ॥ यावादिलक्षण. कः प्रतिनियत[11]विषय एवेति वचनम् ॥

ल्लो नवैकाद्वा ॥ १६५ ॥

आभ्यां स्वार्थे संयुक्तो ल्लो[12] वा भवति ॥ नवल्लो । एकल्लो ॥ सेवादित्वात् कस्य द्वित्वे एक्कल्लो । पक्षे । नवो । एक्को । एओ ॥

उपरेः संव्याने ॥ १६६ ॥

संव्यानेर्थे वर्तमानादुपरिशब्दात् स्वार्थे ल्लो भवति ॥ अवरिल्लो ॥ संव्यान इति किम् । अवरिं[13] ॥

---

१ B इआदेशा. २ P °एक्कइआ. ३ P °मरम्पि°. ४ B °हियअए. A °हिअए. ५ P आलेद्रुअं. ६ B °तूण. ७ P पुरिल्ला. ८ A महुल्लं. ९ B हत्थुल्लो. १० B °व कसि°. P कः. ११ B °नियत एवे°. १२ P ल्लो. १३ P अवरि.

भुवो मया डमया ॥ १६७ ॥

भूशब्दात्स्वार्थे मया डमया इत्येतौ प्रत्ययौ भवतः ॥ भुमया। भमया ॥

शनैसो डिअम् ॥ १६८ ॥

शनैस्‌शब्दात्स्वार्थे डिअम् भवति ॥ सणिअमवगूढो ॥

मनाको न वा डयं च ॥ १६९ ॥

मनाक्‌शब्दात्स्वार्थे डयम् डिअम् च प्रत्ययो वा भवति ॥ मणयं। मणियं। पक्षे। मणा ॥

मिश्राड्डालिअः ॥ १७० ॥

मिश्रशब्दात्स्वार्थे डालिअः प्रत्ययो वा भवति ॥ मीसालिअं। पक्षे। मीसं ॥

रो दीर्घात् ॥ १७१ ॥

दीर्घशब्दात्परः स्वार्थे रो वा भवति ॥ दीहरं। दीहं ॥

त्वादेः सः ॥ १७२ ॥

भावे त्व-तल् [हे० ७. १] इत्यादिना विहितात्त्वादेः परः स्वार्थे स एव त्वादिर्वा भवति ॥ मृदुकत्वेन। मउअत्तयाइ ॥ आतिशायिकात्वातिशायिकः संस्कृतवदेव सिद्धः। जिट्ठयरो। कणिट्ठयरो ॥

विद्युत्पत्र-पीतान्धाल्लः ॥ १७३ ॥

एभ्यः स्वार्थे लो वा भवति ॥ विज्जुला। पत्तलं। पीवलं। पीअलं। अन्धलो। पक्षे। विज्जू। पत्तं। पीअं। अन्धो ॥ कथं जमलं। यमलमिति संस्कृतशब्दाद् भविष्यति ॥

गोणादयः ॥ १७४ ॥

गोणादयः शब्दा अनुक्तप्रकृतिप्रत्ययलोपागमवर्णविकारा बहुलं नि-

---

१ B मनाको वा डयं डियं च. A °वा डयश्च. २ B प्रत्ययौ वा भवतः. ३ A °ब्दाड्डा°. ४ B °यो भ°. ५ B °ब्दात् स्वा°. ६ B विहितत्वा°. ७ P जेट्ठयरो. ८ B कनिट्ठ°.

पात्यन्ते ॥ गौः । गोणो । गावी ॥ गावः[1] । गावीओ ॥ बलीवर्दः । बइल्लो ॥ आपः । आऊ ॥ पञ्चपञ्चाशत् । पञ्चावण्णा[2] । पणपन्ना[3] ॥ त्रिपञ्चाशत् । तेवण्णा । त्रिचत्वारिंशत् । तेआलीसा ॥ व्युत्सर्गः । विउसग्गो[4] ॥ व्युत्सर्जनम् । वोसिरणं[5] ॥ बहिर्मैथुनं वा । बहिद्धा ॥ कार्यम् । णामुक्कसिअं ॥ क्वचित् । कत्थइ ॥ उद्वहति । मुव्वहइ ॥ अपस्मारः । वम्हलो ॥ उत्पलम् । कन्दुट्टं ॥ धिक्धिक् । छिछि । द्धिद्धि ॥ धिगस्तु । धिरत्थु ॥ प्रतिस्पर्धा । पडिसिद्धी[6] । पाडिसिद्धी[7] ॥ स्थासकः । चच्चिक्कं ॥ निलयः । निहेलणं ॥ मघवान् । मघोणो ॥ साक्षी । सक्खिणो[8] ॥ जन्म । जम्मणं ॥ महान् । महन्तो ॥ भवान् । भवन्तो ॥ आशीः । आसीसा[9] ॥ क्वचित् हस्य ड्डुभौ[10] । बृहत्तरम् । वड्डयरं ॥ हिमोरः । भिमोरो ॥ क्षुल्लस्य ड्डुः[11] । क्षुल्लकः । खुड्डुओ ॥ घोषाणामग्रेतनो गायनः । घायणो ॥ वडः[12] । वढो[13] ॥ ककुदम् । ककुधं ॥ अकाण्डम् । अत्थक्कं[14] ॥ लज्जावती[15] । लज्जालुइणी ॥ कुतूहलम् । कुड्डं ॥ चूतः । मायन्दो । माकन्दशब्दः संस्कृतेपीत्यन्ये[16] ॥ विष्णुः । भट्टिओ ॥ श्मशानम् । करसी ॥ असुराः । अगया ॥ खेलम् । खेड्डं ॥ पौष्पं रजः । तिङ्गिच्छि ॥ दिनम् । अल्लं ॥ समर्थः । पक्कलो[17] ॥ पण्डकः[18] । णेलच्छो ॥ कर्पासः । पलही ॥ बली । उज्जल्लो[19] ॥ ताम्बूलम्[20] । झसुरं[21] ॥ पुंश्चली । छिंछई[22] ॥ शाखा । साहुली । इत्यादि ॥ वाधिकारात्पक्षे यथादर्शनं गउओ इत्याद्यपि भवति ॥ गोला गोआवरी इति तु गोलागोदावरीभ्यां सिद्धम् ॥ भाषाशब्दाश्च । आहित्थ[23] । ललक्क[24] । विड्डिर । पच्चड्डिअ । उप्पेहड । मडप्फर । पड्डिच्छिर[25] । अट्टमट्ट । विहडप्फड । उज्जल्ल । हल्लप्फल[26] इत्यादयो महाराष्ट्रविदर्भादिदेशप्रसिद्धा लोकतोवगन्तव्याः ॥ क्रिया-

---

१ B गावा. २ A पञ्चावन्ना. ३ P पणवण्णा. B पणअन्ना. ४ B विउस्सग्गो. ५ B वीसरिणं. ६ A पडिसिद्धी । स्था. ७ B °सिद्धा. ८ B साक्खिणो. ९ B आशीसा. १० B ड्डभौ. ११ B ड्डः. १२ P वटः. १३ B वठो. १४ P अत्त्छक्कं. १५ B लज्जावली. १६ B °तोपी°. १७ B पक्कले. १८ B पंडितः. १९ B उज्जलो. २० B ताम्बूलः. २१ P ऊसुरं. B कुसुरं. २२ B छिच्छई. २३ B आहिच्छ. २४ B ललक्क. २५ B पड्डिथिर. २६ B हूलप्फ°.

शब्दाश्च। अवयासइ। फुम्फुल्लइ। उप्फालेइ। इत्यादयः। अतएव च कृष्ट-घृष्ट-वाक्य-विद्वस्-वाचस्पति-विष्टरश्रवस्-प्रचेतस्-प्रोक्त-प्रोतादीनां क्विबादिप्रत्ययान्तानां च अग्निचित्सोमसुत्सुग्लसुम्लेत्यादीनां पूर्वैः कविभिरप्रयुक्तानां प्रतीतिवैषम्यपरः प्रयोगो न कर्तव्यः शब्दान्तरैरेव तु तदर्थोभिधेयः। यथा कृष्टः कुशलः। वाचस्पतिर्गुरुः। विष्टरश्रवा हरिरित्यादि॥ घृष्टशब्दस्य तु सोपसर्गस्य प्रयोग इष्यत एव। मन्दर-यॅड-परिघट्टं। तद्दिअस-निहट्ठाणङ्ग इत्यादि॥ आर्षे तु यथादर्शनं सर्वमविरुद्धम्। यथा। घट्ठा। मट्ठा। विउसा। सुअ-लक्खणाणुसारेण। वक्कन्तरेसु अ पुणो इत्यादि॥

अव्ययम्॥ १७५॥

अधिकारोयम्। इतः परं ये वक्ष्यन्ते आपादसमाप्तेस्तेव्ययसंज्ञा ज्ञातव्याः॥

तं वाक्योपन्यासे॥ १७६॥

तमिति वाक्योपन्यासे प्रयोक्तव्यम्॥ तं तिअस-बन्दि-मोक्खं॥

आम अभ्युपगमे॥ १७७॥

आमेत्यभ्युपगमे प्रयोक्तव्यम्॥ आम बहला वणोली॥

णवि वैपरीत्ये॥ १७८॥

णवीति वैपरीत्ये प्रयोक्तव्यम्॥ णवि हा वणे॥

पुणरुत्तं कृतकरणे॥ १७९॥

पुणरुत्तमिति कृतकरणे प्रयोक्तव्यम्॥

अइ सुप्पइ पंसुलि णीसहेहिँ अङ्गेहिँ पुणरुत्तं॥

हन्दि-विषाद-विकल्प-पश्चात्ताप-निश्चय-सत्ये॥ १८०॥

हन्दि इति विषादादिषु प्रयोक्तव्यम्॥

---

१ B P एव कृष्ट°. २ A सुग्लु°. ३ B °घड°. ४ B °व्ययसंज्ञका. ५ B बहुला.

हन्दि चलणे णओ[1] सो ण माणिओ हन्दि हुज्ज एत्ताहे ।
हन्दि न होही भणिरी सा सिज्जइ हन्दि तुह कज्जे ॥

हन्दि । सत्यमित्यर्थः ॥

हन्द च गृहाणार्थे ॥ १८१ ॥

हन्द हन्दि च गृहाणार्थे प्रयोक्तव्यम् ॥ हन्द पलोएसु इमं । हन्दि । गृहाणेत्यर्थः ॥

मिव पिव विव व्व व विअ इवार्थे वा ॥ १८२ ॥

एते इवार्थे अव्ययसंज्ञकाः प्राकृते वा प्रयुज्यन्ते ॥ कुमुअं मिव । चन्दणं पिव । हंसो विव । साअरो व्व खीरोओ[2] । सेसस्स व निम्मोओ । कमलं विअ । पक्षे । नीलुप्पल-माला[3] इव ॥

जेण तेण लक्षणे ॥ १८३ ॥

जेण तेण इत्येतौ[4] लक्षणे प्रयोक्तव्यौ ॥ भमर-रुअं जेण कमल-वणं । भमर-रुअं तेण कमल-वणं ॥

णइ चेअ चिअ च्च अवधारणे ॥ १८४ ॥

एतेवधारणे प्रयोक्तव्याः ॥ गईए णइ । जं चेअ मउलणं लोअणाणं । अणुबद्धं तं चिअ कामिणीणं ॥ सेवादित्वाद् द्वित्वमपि । ते च्चिअ धन्ना । ते च्चेअ सुपुरिसा[5] । च्च । स च्च य रूवेण । स च्च सीलेण ॥

बले निर्धारण-निश्चययोः ॥ १८५ ॥

बले इति निर्धारणे निश्चये च प्रयोक्तव्यम् ॥ निर्धारणे । बले पुरिसो धणंजओ खत्तिआणं ॥ निश्चये । बले सीहो । सिंह एवायम् ॥

किरेर हिर किलार्थे वा ॥ १८६ ॥

किर इर हिर इत्येते किलार्थे वा प्रयोक्तव्याः ॥ कल्लं किर खरहिअओ । तस्स इर । पिअ-वयंसो हिर । पक्षे । एवं[6] किल तेण सिविणए भणिआ[7] ॥

---

१ B णउ. २ B खारोओ. ३ B माल. ४ B °तौ प्र°. ५ A सुपुरिसा. ६ B पए°. ७ B हिरमाणगिज्जो.

णवरं[1] केवले ॥ १८७ ॥

केवलार्थे[2] णवरं इति प्रयोक्तव्यम् ॥ णवर पिआइं चिअ णिव्वडन्ति[3]॥

आनन्तर्ये णवरि ॥ १८८ ॥

आनन्तर्ये णवरीति प्रयोक्तव्यम् ॥ णवरि अ से रहु-वइणा ॥ केचित्तु केवलानन्तर्यार्थयोर्णवरणवरि इत्येकमेव सूत्रं कुर्वते तन्मते उभावप्युभयार्थौ ॥

अलाहि निवारणे ॥ १८९ ॥

अलाहीति निवारणे प्रयोक्तव्यम् ॥ अलाहि किं वाइएण[4] लेहेण ॥

अण णाइं[5] नञर्थे[6] ॥ १९० ॥

अण णाइं इत्येतौ नञर्थे प्रयोक्तव्यौ ॥ अणचिन्तिअममुणन्ती[7] । णाइं करेमि रोसं ॥

माइं[8] मार्थे ॥ १९१ ॥

माइं इति मार्थे प्रयोक्तव्यम् ॥ माइं काहीअ[9] रोसं । मा कार्षीद् रोषम् ॥

हद्धी निर्वेदे ॥ १९२ ॥

हद्धी इत्यव्ययमतएव निर्देशात् हाधिक्शब्दादेशो वा निर्वेदे प्रयोक्तव्यम्[10] ॥ हद्धीहद्धी । हा धाहधाह[11] ॥

वेव्वे भय-वारण-विषादे ॥ १९३ ॥

भयवारणविषादेषु वेव्वे इति प्रयोक्तव्यम् ॥

वेव्वेत्ति भये वेव्वत्ति वारणे जूरणे अ वेव्वेत्ति ।
उल्लाविरीइवि तुहं वेव्वेत्ति मयच्छि किं णेअं ॥
किं उल्लावेन्तीए[12] उअ[13] जूरन्तीएँ किं तु[14] भीआए ।
उव्वाडिरीएँ[15] वेव्वेत्ति तीएँ भणिअं न विम्हरिमो ॥

---

[1] B णवरं. [2] P B केवलेर्थे. [3] B निव्वडंति. [4] B वाउएण. [5] A णाइ. [6] P B नञर्थे. [7] B °णन्ति. [8] A माईं. [9] A काईहीअ. [10] A °व्यं । हद्धीहाधा°. [11] B धाहा°. [12] A उल्लावन्तीए. [13] A ओअ. [14] P नु. [15] B उव्वाडि°.

वेव्व च आमन्त्रणे ॥ १९४ ॥

वेव्व वेव्वे च आमन्त्रणे प्रयोक्तव्ये ॥ वेव्व गोले । वेव्वे मुरन्दले वहसि पाणिअं[1] ॥

मामि हला हले सख्या वा ॥ १९५ ॥

एते सख्या आमन्त्रणे वा प्रयोक्तव्याः ॥ मामि सरिसक्खराणवि ॥ पणवह माणस्स हला ॥ हले हयासस्स । पक्षे । सहि एरिसि च्चिअ गई ॥

दे संमुखीकरणे च ॥ १९६ ॥

संमुखीकरणे सख्या आमन्त्रणे च दे इति प्रयोक्तव्यम् ॥ दे पसिअ ताव सुन्दरि ॥ दे आ पसिअ निअत्तसु ॥

हुं दान-पृच्छा-निवारणे ॥ १९७ ॥

हुं इति दानादिषु प्रयुज्यते[2] ॥ दाने । हुं गेण्ह अप्पणो च्चिअ ॥ पृच्छायाम् । हुं साहसु[3] सब्भावं ॥ निवारणे । हुं निल्लज्ज समोसर ॥

हु खु निश्चय-वितर्क-संभावन-विस्मये ॥ १९८ ॥

हु खु इत्येतौ निश्चयादिषु प्रयोक्तव्यौ ॥ निश्चये । तंपि हु अच्छिन्न-सिरी[4] । तं खु सिरीए रहस्सं ॥ वितर्कः ऊहः संशयो वा । ऊहे । न हु णवरं संगहिआ । एअं खु हसइ ॥ संशये । जलहरो खु धूम-वडलो खु ॥ संभावने । तरीउं[5] ण हु णवरं[6] इमं । एअं खु हसइ ॥ विस्मये । को खु एसो सहस्स-सिरो ॥ बहुलाधिकारादनुस्वारात्परो हुर्न प्रयोक्तव्यः ॥

ऊ गर्हाक्षेप-विस्मय-सूचने ॥ १९९ ॥

ऊ इति गर्हादिषु प्रयोक्तव्यम् ॥ गर्हा । ऊ णिल्लज्ज ॥ प्रक्रान्तस्य वाक्यस्य विपर्यासाशङ्कया विनिवर्तनलक्षण आक्षेपः ॥ ऊ किं मए भणिअं ॥ विस्मये । ऊ कह मुणिआ[7] अहयं ॥ सूचने । ऊ केण न विण्णायं ॥

---

१ B पाणीयं. २ B °ते । हुं गेह्णह अप्पणोच्चिअ. ३ A साहस. B साहुसु. ४ P °सिरिं. B ° सिरीयर°. ५ B तरिउं. ६ B णवरं. ७ B मुणिणा.

थू कुत्सायाम् ॥ २०० ॥

थू[1] इति कुत्सायां प्रयोक्तव्यम् ॥ थू निल्लज्जो लोओ ॥

रे अरे संभाषण-रतिकलहे ॥ २०१ ॥

अनयोरर्थयोर्यथासंख्यमेतौ प्रयोक्तव्यौ ॥ रे संभाषणे । रे हिअय मडह-सरिआ[2] ॥ अरे रतिकलहे । अरे मए समं मा करेसु उवहासं ॥

हरे क्षेपे च ॥ २०२ ॥

क्षेपे संभाषणरतिकलहयोश्च हरे इति प्रयोक्तव्यम् ॥ क्षेपे । हरे णिल्लज्ज ॥ संभाषणे । हरे पुरिसा ॥ रतिकलहे । हरे बहु-वल्लह[3] ॥

ओ सूचना-पश्चात्तापे ॥ २०३ ॥

ओ इति सूचनापश्चात्तापयोः प्रयोक्तव्यम् ॥ सूचनायाम् । ओ अवि-णय[4]-तत्तिल्ले ॥ पश्चात्तापे । ओ न मए छाया इत्तिआए ॥ विकल्पे तु उतादेशेनैवौ[5]कारेण सिद्धम् ॥ ओ विरएमि नहयले ॥

अव्वो सूचना-दुःख-संभाषणापराध-विस्मयानन्दादर-भय-खेद-विषाद-पश्चात्तापे ॥ २०४ ॥

अव्वो इति सूचनादिषु प्रयोक्तव्यम् ॥ सूचनायाम् । अव्वो दुक्कर-यारय ॥ दुःखे । अव्वो दलन्ति हिययं ॥ संभाषणे । अव्वो किमिणं किमिणं ॥ अपराधविस्मययोः ।

> अव्वो हरन्ति हिअयं[6] तहवि न वेसा हवन्ति जुवईण ।
> अव्वो किंपि रहस्सं मुणन्ति[7] धुत्ता जणब्भहिआ ॥

आनन्दादरभयेषु ।

> अव्वो सुपहायमिणं अव्वो अज्जम्ह सप्फलं[8] जीअं ।
> अव्वो अइअम्मि तुमे नवरं जइ सा[9] न जूरिहिइ[10] ॥

---

१ A थू कु°. २ B सिरिआ. ३ A °वल्लभ. ४ A °यतित्तिल्ले. ५ B °शेन ओकारेणैव सि°. ६ P हिअयं अव्वो किंपि. ७ B सुणंति. ८ B सफलं. ९ B सो. १० B °हइ.

खेदे । अव्वो न जामि छेत्तं[1] ॥ विषादे[2] ।

अव्वो नासेन्ति दिहिं पुलयं वड्ढेन्ति देन्ति रणरणयं ।
एण्हि तस्सेअ गुणा तेच्चिअ अव्वो कह णु एअं ॥

पश्चात्तापे ।

अव्वो तह तेण कया अहयं जह कस्स साहेमि ॥

अइ संभावने ॥ २०५ ॥

संभावने अइ इति प्रयोक्तव्यम्[3] ॥ अइ दिअर किं न[4] पेच्छसि ॥

वणे निश्चय-विकल्पानुकम्प्ये च ॥ २०६ ॥

वणे इति निश्चयादौ संभावने च प्रयोक्तव्यम् ॥ वणे देमि । निश्चयं ददामि ॥ विकल्पे । होइ वणे न होइ । भवति वा न भवति ॥ अनुकम्प्ये । दासो वणे न मुच्चइ । दासोनुकम्प्यो[5] न त्यज्यते ॥ संभावने । नत्थि वणे जं[6] न देइ विहि-परिणामो । संभाव्यते एतदित्यर्थः ॥

मणे विमर्शे ॥ २०७ ॥

मणे इति विमर्शे प्रयोक्तव्यम् ॥ मणे सूरो । किं स्वित्सूर्यः ॥ अन्ये मन्ये इत्यर्थमपीच्छन्ति ॥

अम्मो आश्चर्ये ॥ २०८ ॥

अम्मो इत्याश्चर्ये प्रयोक्तव्यम् ॥ अम्मो कह पारिज्जइ ॥

स्वयमोर्थे अप्पणो न वा ॥ २०९ ॥

स्वयमित्यस्यार्थे अप्पणो वा प्रयोक्तव्यम् ॥ विसयं विअसन्ति अप्पणो कमल-सरा । पक्षे । सयं चेअ[7] मुणसि करणिज्जं ॥

प्रत्येकमः पाडिक्कं पाडिएक्कं ॥ २१० ॥

प्रत्येकमित्यस्यार्थे पाडिक्कं पाडिएक्कं इति[8] च प्रयोक्तव्यं वा ॥ पाडिक्कं । पाडिएक्कं । पक्षे । पत्तेअं ॥

---

१ P छित्तं. B त्थिवत्तं. २ P B °दे । अव्वो कह णु (P कह नु) एअं. ३ A °योक्तव्यः. ४ B नरपे°. ५ B °म्प्यो वने न. ६ A B जन्न. ७ B चेव मुणसि. ८ A °ति प्र°.

उअ पश्य ॥ २११ ॥

उअ इति पश्येत्यस्यार्थे प्रयोक्तव्यं वा ॥

उअ निच्चल निप्फंदा भिसिणी-पत्तंमि रेहइ बलाआ ।
निम्मल-मरगय-भायण-परिट्ठिआ सङ्ख-सुत्तिव्व ॥

पक्षे पुलआदयः ॥

इहरा इतरथा ॥ २१२ ॥

इहरा इति इतरथार्थे प्रयोक्तव्यं वा ॥ इहरा नीसामन्नेहिं । पक्षे । इअरहा ॥

एक्कसरिअं झगिति संप्रति ॥ २१३ ॥

एक्कसरिअं झगित्यर्थे संप्रत्यर्थे च प्रयोक्तव्यम् ॥ एक्कसरिअं । झगिति सांप्रतं वा ॥

मोरउल्ला मुधा ॥ २१४ ॥

मोरउल्ला इति मुधार्थे प्रयोक्तव्यम् ॥ मोरउल्ला । मुधेत्यर्थः ॥

दराधाल्पे ॥ २१५ ॥

दर इत्यव्ययमर्धार्थे ईषदर्थे च प्रयोक्तव्यम् ॥ दर-विअसिअं । अर्धेनेषद्वा विकसितमित्यर्थः ॥

किणो प्रश्ने ॥ २१६ ॥

किणो इति प्रश्ने प्रयोक्तव्यम् ॥ किणो धुवसि ॥

ई-जे-राः पाद-पूरणे ॥ २१७ ॥

इ जे र इत्येते पादपूरणे प्रयोक्तव्याः ॥ न उणा इ अच्छीइं । अणुकूलं वोत्तुं जे । गेण्हइ र कलम-गोवी ॥ अहो । हंहो । हेहो । हा ।

---

१ B पश्ये. २ A P निप्फंदा । पक्षे. ३ B नीसामन्नेहिं. ४ B ईजेइराः. ५ B ई जे इर. A इजेरा. ६ B ई. ७ A इच्छीइं. ८ B °ई. ९ A वोत्तुं. १० B °मागोवि. ११ B हे । हाहा । ना°.

नाम । अहह । ह्रीसि[१] । अयि । अहोह[२] । अरिरिहो[३] इत्यादयस्तु सं-स्कृतसमत्वेन सिद्धाः ॥

प्यादयः ॥ २१८ ॥

प्यादयो नियतार्थवृत्तयः प्राकृते प्रयोक्तव्याः ॥ पि वि अप्यर्थे ॥

**इत्याचार्यश्रीहेमचन्द्रसूरिविरचितायां सिद्धहेमचन्द्राभिधा-
नस्वोपज्ञशब्दानुशासनवृत्तौ अष्टमस्याध्यायस्य
द्वितीयः पादः समाप्तः ॥**

द्विषत्पुरक्षोदविनोदहेतोर्भवादवामस्य भवद्भुजस्य ।[४]
अयं विशेषो भुवनैकवीर परं न यत्काममपाकरोति[५] ॥ १ ॥

---

१ P ह्री । सि । अयि. २ A अहोह. ३ P अरि । रि । हो. ४ P omits this verse. ५ B करोषि.

अर्हं । वीप्स्यात्स्यादेर्वीप्स्ये स्वरे मो वा ॥ १ ॥

वीप्सार्थात्पदात्परस्य स्यादेः स्थाने स्वरादौ वीप्सार्थे पदे परे मो वा भवति ॥ एकैकम् । एक्कमेक्कं । एक्कमेक्केण । अङ्गेअङ्गे । अङ्गमङ्गम्मि । पक्षे । एक्केक्कमित्यादि ॥

अतः सेर्डोः ॥ २ ॥

अकारान्तान्नाम्नः परस्य स्यादेः सेः स्थाने डो भवति ॥ वच्छो ॥

वैतत्तदः ॥ ३ ॥

एतत्तदोकारात्परस्य स्यादेः सेर्डो वा भवति ॥ एसो एस । सो णरो । स णरो ॥

जस्-शसोर्लुक् ॥ ४ ॥

अकारान्तान्नाम्नः परयोः स्यादिसंबन्धिनोर्जस्-शसोर्लुग् भवति ॥ वच्छा एए । वच्छे पेच्छ ॥

अमोस्य ॥ ५ ॥

अतः परस्यामोकारस्य लुग् भवति ॥ वच्छं पेच्छ ॥

टा-आमोर्णः ॥ ६ ॥

अतः परस्य टा इत्येतस्य षष्ठीबहुवचनस्य च आमो णो भवति ॥ वच्छेण । वच्छाण ॥

भिसो हि हिँ हिं ॥ ७ ॥

अतः परस्य भिसः स्थाने केवलः सानुनासिकः सानुस्वारश्च हिर्भवति ॥ वच्छेहि । वच्छेहिँ । वच्छेहिं कया छाही ॥

---

१ B वीप्स्यात्स्या°. २ A वीप्स्यार्था°. ३ A वीप्स्यार्थे°. ४ B एक्कक्कं. ५ A डो.

ङसेस् त्तो-दो-दु-हि-हिन्तो-लुकः ॥ ८ ॥

अतः परस्य ङसेः त्तो दो दु हि हिन्तो लुक् इत्येते षडादेशा भवन्ति ॥ वच्छत्तो । वच्छाओ । वच्छाउ । वच्छाहि । वच्छाहिन्तो । वच्छा । दकारकरणं भाषान्तरार्थम् ॥

भ्यसस् त्तो दो दु हि हिन्तो सुन्तो ॥ ९ ॥

अतः परस्य भ्यसः स्थाने त्तो दो दु हि हिन्तो सुन्तो इत्यादेशा भवन्ति ॥ वृक्षेभ्यः । वच्छत्तो । वच्छाओ । वच्छाउ । वच्छाहि । वच्छेहि । वच्छाहिन्तो । वच्छेहिन्तो । वच्छासुन्तो । वच्छेसुन्तो॥

ङसः स्सः ॥ १० ॥

अतः परस्य ङसः संयुक्तः सो भवति ॥ पियस्स । पेम्मस्स । उपकुम्भं शैत्यम् । उवकुम्भस्स सीअलत्तणं ॥

डे म्मि ङेः ॥ ११ ॥

अतः परस्य ङेर्डित् एकारः संयुक्तो मिश्च भवति ॥ वच्छे । वच्छम्मि ॥ देवम् । देवम्मि । तम् । तम्मि । अत्र द्वितीयातृतीययोः सप्तमी [३.१३५] इत्यमो ङिः ॥

जस्-शस्-ङसि-त्तो-दो-द्वामि दीर्घः ॥ १२ ॥

एषु अतो दीर्घो भवति ॥ जसि शसि च । वच्छा ॥ ङसि । वच्छाओ । वच्छाउ । वच्छाहि । वच्छाहिन्तो । वच्छा ॥ त्तोदोदुषु । वृक्षेभ्यः । वच्छत्तो । ह्रस्वः संयोगे [१-४] इति ह्रस्वः ॥ वच्छाओ । वच्छाउ ॥ आमि । वच्छाण ॥ ङसिनैव सिद्धे त्तोदोदुग्रहणं भ्यसि एत्वबाधनार्थम् ॥

भ्यसि वा ॥ १३ ॥

भ्यसादेशे परे अतो दीर्घो वा भवति ॥ वच्छाहिन्तो वच्छेहिन्तो । वच्छासुन्तो वच्छेसुन्तो । वच्छाहि वच्छेहि ।

---

१ B लुक्. २ A °कुएगे ते ए°. ३ A हि । वच्छेहि । व°. ४ B स्सो. ५ B °कुम्भशै°.

टाण-शस्येत् ॥ १४ ॥

टादेशे णे शसि च परे अस्य एकारो भवति ॥ टाण । वच्छेण ॥ णेति किम् । अप्पणा । अप्पणिआ । अप्पणइआ ॥ शस् । वच्छे पेच्छ ॥

भिस्भ्यस्सुपि ॥ १५ ॥

एषु अत एर्भवति ॥ भिस् । वच्छेहि । वच्छेहिँ । वच्छेहिं ॥ भ्यस् । वच्छेहि । वच्छेहिन्तो । वच्छेसुन्तो ॥ सुप् । वच्छेसु ॥

इदुतो दीर्घः ॥ १६ ॥

इकारस्य उकारस्य च भिस्भ्यस्सुप्सु परेषु दीर्घो भवति ॥ भिस् । गिरीहिं । बुद्धीहिं । दहीहिं । तरूहिं । धेणूहिं । महूहिं कयं ॥ भ्यस् । गिरीओ । बुद्धीओ । दहीओ । तरूओ । धेणूओ । महूओ आगओ ॥ एवं गिरीहिन्तो । गिरीसुन्तो आगओ इत्याद्यपि ॥ सुप् । गिरीसु । बुद्धीसु । दहीसु । तरूसु । धेणूसु । महूसु ठिअं ॥ क्वचिन्न भवति । दिअ-भूमिसु दाण जलोल्लिआइं ॥ इदुत इति किम् । वच्छेहिं । वच्छेसुन्तो । वच्छेसु ॥ भिस्भ्यस्सुपीत्येव । गिरिं तरुं पेच्छ ॥

चतुरो वा ॥ १७ ॥

चतुर उदन्तस्य भिस्भ्यस्सुप्सु परेषु दीर्घो वा भवति ॥ चऊहिं चउहिं । चऊओ चउओ । चऊसु चउसु ॥

लुप्ते शसि ॥ १८ ॥

इदुतोः शसि लुप्ते दीर्घो भवति ॥ गिरी । बुद्धी । तरू । धेणू पेच्छ ॥ लुप्त इति किम् । गिरिणो । तरुणो पेच्छ ॥ इदुत इत्येव । वच्छे पेच्छ ॥ जस्-शस्° [३.१२] इत्यादिना शसि दीर्घस्य लक्ष्यानुरोधार्थो योगः । लुप्त इति तु णवि प्रतिप्रसवार्थशङ्कानिवृत्त्यर्थम् ॥

---

१ B णे शस. २ B एड्. ३ A °हि । वच्छेहि. ४ B °तोर्दा°. ५ A °स्य भि°. ६ B क्वचिन्नि. ७ B इतू उति. ८ B चतुरस्य उ°. ९ B °हिं. १० P B °र्थोऽयं यो°.

अक्लीबे सौ ॥ १९ ॥

इदुतोऽक्लीबे नपुंसकादन्यत्र सौ दीर्घो भवति ॥ गिरी । बुद्धी । तरू । धेणू ॥ अक्लीब इति किम् । दहिं । महुं ॥ साविति किम् । गिरिं । बुद्धिं । तरुं । धेणुं ॥ केचित्तु दीर्घत्वं विकल्प्य तदभावपक्षे सेर्मादेशमपीच्छन्ति । अग्गिं । निहिं । वाउं । विहुं ॥

पुंसि जसो डउ डओ वा ॥ २० ॥

इदुत इतीह पञ्चम्यन्तं संबध्यते । इदुतः परस्य जसः पुंसि अउ अओ इत्यादेशौ डितौ वा भवतः ॥ अग्गउ अग्गओ । वायउ वायओ चिट्ठन्ति । पक्षे । अग्गिणो । वाउणो ॥ शेषे अदन्तवद्भावाद् अग्गी । वाऊ ॥ पुंसीति किम् । बुद्धीओ । धेणूओ । दहीइं । महूइं ॥ जस इति किम् । अग्गी । अग्गिणो । वाऊ । वाउणो पेच्छइ ॥ इदुत इत्येव । वच्छा ॥

वोतो डवो ॥ २१ ॥

उदन्तात्परस्य जसः पुंसि डित् अवो इत्यादेशो वा भवति ॥ साहवो । पक्षे । साहओ । साहउ । साहू । साहुणो ॥ उत इति किम् । वच्छा ॥ पुंसीत्येव । धेणू । महूइं ॥ जस इत्येव । साहू । साहुणो पेच्छइ ॥

जस्-शसोर्णो वा ॥ २२ ॥

इदुतः परयोर्जस्-शसोः पुंसि णो इत्यादेशो वा भवति ॥ गिरिणो । तरुणो रेहन्ति पेच्छइ वा । पक्षे । गिरी । तरू ॥ पुंसीत्येव । दहीइं । महूइं ॥ जस्-शसोरिति किम् । गिरिं । तरुं ॥ इदुत इत्येव । वच्छा । वच्छे ॥ जस्-शसोरिति द्वित्वमिदुत इत्यनेन यथासंख्याभावार्थम् । एवमुत्तरसूत्रेऽपि ॥

---

१ A नहिं. २ P बुद्धीइ. ३ P धेणू°

ङसि-ङसोः पुं-क्लीबे वा ॥ २३ ॥

पुंसि क्लीबे च वर्तमानादिदुतः परयोर्ङसिङसोर्णो वा भवति ॥ गिरिणो । तरुणो । दहिणो । महुणो आगओ विआरो वा । पक्षे । ङसेः । गिरीओ । गिरीउ । गिरीहिन्तो । तरूओ । तरूउ । तरूहिन्तो ॥ हिलुकौ निषेत्स्येते ॥ ङसः । गिरिस्स । तरुस्स ॥ ङसिङसोरिति किम् । गिरिणा । तरुणा कयं ॥ पुंक्लीब इति किम् । बुद्धीअ । धेणूअ लद्धं समिद्धी वा ॥ इदुत इत्येव । कमलाओ । कमलस्स ॥

टो णा ॥ २४ ॥

पुंक्लीबे वर्तमानादिदुतः परस्य टा इत्यस्य णा भवति ॥ गिरिणा । गामणिणा । खलपुणा । तरुणा । दहिणा । महुणा ॥ टं इति किम् । गिरी । तरू । दहिं । महुं ॥ पुंक्लीब इत्येव । बुद्धीअ । धेणूअ कयं ॥ इदुत इत्येव । कमलेण ॥

क्लीबे स्वरान्म् सेः ॥ २५ ॥

क्लीबे वर्तमानात्स्वरान्तान्नाम्नः सेः स्थाने म् भवति ॥ वणं । पेम्मं । दहिं । महुं ॥ दहि महु इति तु सिद्धापेक्षया ॥ केचिदनुनासिकमपीच्छन्ति । दहिँ । महुँ ॥ क्लीब इति किम् । बालो । बाला । स्वरादिति इदुतो निवृत्त्यर्थम् ॥

जस्-शस इँ-इं-णयः सप्राग्दीर्घाः ॥ २६ ॥

क्लीबे वर्तमानान्नाम्नः परयोर्जस्-शसोः स्थाने सानुनासिकसानुस्वाराविकारौ णिश्चादेशा भवन्ति सप्राग्दीर्घाः । एषु सत्सु पूर्वस्वरस्य दीर्घत्वं विधीयते इत्यर्थः ॥ इँ । जाइँ वयणाइँ अम्हे ॥ इं । उम्मीलन्ति पङ्कयाइं पेच्छ वा चिट्ठन्ति । दहीइं जेम वा हुन्ति महूइं मुञ्च

---

१ B °दिदुतोः. २ B गिरिहिन्तो. ३ A B तरुहिन्तो. ४ B °वि ॥ गाम°. ५ B टा. ६ P नगं. ७ B पिम्मं. ८ B जीनि°. ९ A B °म्नस्.

वा ॥ णि । फुल्लन्ति पङ्कयाणि गेण्ह वा । हुन्ति दहीणि जेम वा । एवं महूणि ॥ क्लीब इत्येव । वच्छा । वच्छे ॥ जस्-शस इति किम् । सुहं ॥

स्त्रियामुदोतौ वा ॥ २७ ॥

स्त्रियां वर्तमानान्नाम्नः परयोर्जस्-शसोः स्थाने प्रत्येकम् उत् ओत् इत्येतौ सप्राग्दीर्घौ वा भवतः ॥ वचनभेदो यथासंख्यनिवृत्त्यर्थः ॥ मालाउ मालाओ । बुद्धीउ बुद्धीओ । सहीउ सहीओ । धेणूउ धेणूओ । वहूउ वहूओ । पक्षे । माला । बुद्धी । सही । धेणू । वहू ॥ स्त्रियामिति किम् । वच्छा । जस्-शस इत्येव । मालाए कयं ॥

ईतः सेश्चा वा ॥ २८ ॥

स्त्रियां वर्तमानादीकारान्तात् सेर्जस्-शसोश्च स्थाने आकारो वा भवति ॥ एसा हसन्तीआ । गोरीआ चिट्ठन्ति पेच्छ वा । पक्षे । हसन्ती[3] । गोरीओ ॥

टा-ङस्-ङेरदादिदेद्वा तु ङसेः ॥ २९ ॥

स्त्रियां वर्तमानान्नाम्नः परेषां टाङस्ङीनां स्थाने प्रत्येकम् अत् आत् इत् एत् इत्येते चत्वार आदेशाः सप्राग्दीर्घा भवन्ति । ङसेः पुनरेते सप्राग्दीर्घा[4] वा भवन्ति ॥ मुद्धाअ । मुद्धाइ । मुद्धाए कयं मुहं[5] ठिअं वा ॥ कप्रत्यये तु मुद्धिआअ । मुद्धिआइ । मुद्धिआए ॥ कमलिआअ । कमलिआइ । कमलिआए ॥ बुद्धीअ । बुद्धीआ । बुद्धीइ । बुद्धीए कयं विहओ ठिअं वा ॥ सहीअ । सहीआ । सहीइ । सहीए कयं वयणं ठिअं वा ॥ धेणूअ । धेणूआ । धेणूइ । धेणूए कयं दुद्धं ठिअं वा ॥ वहूअ । वहूआ । वहूइ । वहूए कयं भवणं ठिअं वा ॥ ङसेस्तु वा । मुद्धाअ । मुद्धाइ । मुद्धाए । बुद्धीअ । बुद्धीआ । बुद्धीइ । बुद्धीए ॥ सहीअ । सहीआ । सहीइ । सहीए ॥ धेणूअ । धेणूआ ।

---

१ A उन ओन इ°. २ B चिट्ठनि. ३ B हसंनीओ. ४ B °र्घा भ°. ५ P मुहं. ६ P B °ए । बु°

धेणूइ । धेणूए ॥ वहूअ । वहूआ । वहूइ । वहूए आगओ । पक्षे । मुद्धाओ । मुद्धाउ । मुद्धाहिन्तो ॥ रईओ । रईउ । रईहिन्तो । धेणूओ । धेणूउ । धेणूहिन्तो । इत्यादि ॥ शेषेदन्तवत् [३.१२४] अतिदेशात् जस्-शस्-ङसि-त्तो-दो-द्वामि दीर्घः [३.१२] इति दीर्घत्वं पक्षेपि[1] भवति ॥ स्त्रियामित्येव । वच्छेण । वच्छस्स । वच्छम्मि । वच्छाओ ॥ टादीनामिति किम् । मुद्धा । बुद्धी । सही । धेणू । वहू ॥

नात आत् ॥ ३० ॥

स्त्रियां वर्तमानादादन्तान्नाम्नः परेषां टाङस्ङिङसीनामादादेशो न भवति ॥ मालाअ । मालाइ । मालाए कयं सुहं ठिअं आगओ वा ॥

प्रत्यये ङीर्न वा ॥ ३१ ॥

अणादिसूत्रेण [हे०२.४.] प्रत्ययनिमित्तो यो ङीरुक्तः स स्त्रियां वर्तमानान्नाम्नो वा भवति ॥ साहणी । कुरुचरी । पक्षे । आत् [हे० २.४.] इत्याप् । साहणा । कुरुचरा ॥

अजातेः पुंसः ॥ ३२ ॥

अजातिवाचिनः पुल्लिङ्गात् स्त्रियां वर्तमानात् ङीर्वा भवति ॥ नीली नीला । काली काला । हसमाणी हसमाणा । सुप्पणही सुप्पणहा । इमीए इमाए । इमीणं इमाणं[2] । एईए एआए । एईणं एआणं ॥ अजातेरिति किम् । करिणी । अया । एलया ॥ अप्राप्ते[3] विभाषेयम् । तेन गोरी कुमारी इत्यादौ संस्कृतवन्नित्यमेव ङीः[4] ॥

किं-यत्तदोस्यमामि[5] ॥ ३३ ॥

सिअम्आम्वर्जिते स्यादौ परे एभ्यः स्त्रियां ङीर्वा भवति ॥ कीओ[6] । काओ । कीए । काए । कीसु । कासु । एवं । जीओ[6] । जाओ[6] । तीओ । ताओ[7] । इत्यादि ॥ अस्यमामीति किम् । का । जा । साँ । कं । जं । तं । काण । जाण । ताण ॥

---

१ B °क्षे भ°. २ A इमाणं । अजा°. ३ B °प्राप्तवि°. ४ B ङी. ५ B ° मिसि ॥ ३३ ॥ अम्°. ६ P ° ङ. ७ B ता.

छाया-हरिद्रयोः ॥ ३४ ॥

अनयोराप्प्रसङ्गे नाम्नः स्त्रियां ङीर्वा भवति ॥ छाही छाया[1]। हलद्दी हलद्दा ॥

स्वस्रादेर्डा ॥ ३५ ॥

स्वस्रादेः स्त्रियां वर्तमानात् डा[2] प्रत्ययो भवति ॥ ससा । नणन्दा[3]। दुहिआ । दुहिआहिं । दुहिआसु । दुहिआ-सुओ । गउआ ॥

ह्रस्वोमि ॥ ३६ ॥

स्त्रीलिङ्गस्य नाम्नोमि परे ह्रस्वो भवति ॥ मालं । नइं । वहुं । हसमाणिं । हसमाणं पेच्छ ॥ अमीति किम् । माला । सही । वहू ॥

नामन्त्र्यात्सौ मः ॥ ३७ ॥

आमन्त्र्यार्थात्परे सौ सति क्लीबे स्वरान्म् सेः [३.२५] इति यो म् उक्तः स न भवति ॥ हे तण । हे दहि । हे महु ॥

डो दीर्घो[4] वा ॥ ३८ ॥

आमन्त्र्यार्थात्परे[5] सौ सति अतः सेर्डोः [३.२] इति[6] यो नित्यं डोः[7] प्राप्तो यश्च अक्लीबे सौ [३.१९] इति इदुतोरकारान्तस्य च[8] प्राप्तो दीर्घः स वा भवति ॥ हे देव हे देवो ॥ हे खमा-समण हे खमा-समणो । हे अज्ज हे अज्जो ॥ दीर्घः । हे हरी हे हरि । हे गुरू हे गुरु । जाइ-विसुद्धेण पहू । हे प्रभो इत्यर्थः । एवं दोण्णि[9] पहू जिअ[10]-लोए । पक्षे । हे पहु । एषु प्राप्ते विकल्पः ॥ इह त्वप्राप्ते हे गोअमा हे गोअम । हे कासवा हे कासव । रेरे चप्फलया[11] । रेरे निग्घिणया ॥

ऋतोद्वा ॥ ३९ ॥

ऋकारान्तस्यामन्त्रणे सौ परे अकारोन्तादेशो[12] वा भवति ॥ हे पितः । हे पिअ ॥ हे दातः । हे दाय । पक्षे । हे पिअरं । हे दायार[13] ॥

---

१ B छाहा. २ A डाः. ३ B °दा । दुहिआहि. ४ A °दीर्घो. ५ B आमंत्र्यात्परे. ६ B °ति नित्यं. ७ B डो. ८ A चाप्रा°. ९ B दोणि. १० B जीअ°. ११ B चप्फला. १२ B अकारांता°. १३ B दाअर.

नाम्न्यरं वा ॥ ४० ॥

ऋदन्तस्यामन्त्रणे सौ परे नाम्नि संज्ञायां विषये अरं इति अन्तादेशो वा भवति[1] ॥ हे पितः । हे पिअरं । पक्षे । हे पिअ ॥ नाम्नीति किम् । हे कर्तः । हे कत्तार[2] ॥

वाप ए ॥ ४१ ॥

आमन्त्रणे सौ परे आप एत्वं वा भवति ॥ हे माले । हे महिले[3] । अज्जिए । पज्जिए । पक्षे । हे माला । इत्यादि ॥ आप इति किम् । हे पिउच्छा । हे माउच्छा ॥ बहुलाधिकारात् क्वचिदोत्वमपि[4] । अम्मो भणामि भणिए ॥

ईदूतोर्ह्रस्वः ॥ ४२ ॥

आमन्त्रणे सौ परे ईदूदन्तयोर्ह्रस्वो भवति ॥ हे नइ । हे गामणि[5] । हे समणि । हे वहु । हे खलपु ॥

क्विपः[6] ॥ ४३ ॥

क्विबन्तस्येदूदन्तस्य ह्रस्वो भवति ॥ गामणिणा । खलपुणा । गामणिणो । खलपुणो[7] ॥

ऋतामुदस्यमौसु[8] वा ॥ ४४ ॥

सिअम्औवर्जिते अर्थात् स्यादौ परे ऋदन्तानामुदन्तादेशो वा भवति ॥ जस् । भत्तू । भत्तुणो । भत्तउ । भत्तओ । पक्षे । भत्तारा[9] ॥ शस् । भत्तू । भत्तुणो । पक्षे । भत्तारे ॥ टा । भत्तुणा । पक्षे । भत्तारेण ॥ भिस् । भत्तूहिं । पक्षे । भत्तारेहिं ॥ ङसि । भत्तुणो । भत्तूओ । भत्तूउ[10] । भत्तूहि । भत्तूहिन्तो । पक्षे । भत्ताराओ[11] । भत्ताराउ । भत्ता-

---

१ P °ति । हे पिअरं २ B हे तार. ३ B °ले । आर्यिका । अ°. ४ A °त्वमिति. ५ A °णि । हे वहु. ६ B क्विप्. ७ P °णो । गामणिसुओ । खलपुमुहं ॥ ऋ°. B °णो । गामणिसुओ खलपुसुओ ॥ ऋ°. ८ P °ते स्या°. ९ B भत्तारो. १० B °उ । भत्तूहिन्तो. ११ A °ओ । भत्ताराहि.

राहि । भत्ताराहिन्तो । भत्तारा[1] । ङस् । भत्तुणो । भत्तुस्स । पक्षे । भत्तारस्स[2] । सुप् । भत्तूसु । पक्षे । भत्तारेसु ॥ बहुवचनस्य व्याप्त्यर्थत्वात् यथादर्शनं नाम्न्यपि उद् वा भवति जस्शस्ङसिङस्सु । पिउणो । जामाउणो । भाउणो ॥ टायाम् । पिउणा ॥ भिसि । पिऊहिं ॥ सुपि । पिऊसु[3] । पक्षे । पिअरा । इत्यादि ॥ अस्यमौस्विति किम्[4] । सि । पिआ ॥ अम् । पिअरं ॥ औ । पिअरा ॥

आरः स्यादौ ॥ ४५ ॥

स्यादौ परे ऋत आर इत्यादेशो भवति ॥ भत्तारो । भत्तारा । भत्तारं । भत्तारे । भत्तारेण । भत्तारेहिं[5] ॥ एवं ङस्यादिषूदाहार्यम् ॥ लुप्तस्याद्यपेक्षया । भत्तार-विहिअं ॥

आ अरा मातुः ॥ ४६ ॥

मातृसंबन्धिन ऋतः स्यादौ परे आ अरा इत्यादेशौ भवतः ॥ माआ । माअरा । माआउ । माआओ । माअराउ । माअराओ । माअं । माअरं । इत्यादि ॥ बाहुलकाज्जनन्यर्थस्य आ देवतार्थस्य तु अरा इत्यादेशः । माआए कुच्छीए । नमो माअराण ॥ मातुरिद् वा [१.१३५] इतीत्त्वे माइण इति भवति ॥ ऋतामुद° [३.४४] इत्यादिना उत्त्वे तु माऊए समन्निअं[6] वन्दे इति ॥ स्यादावित्येव । माइ-देवो । माइ-गणो[7] ॥

नाम्न्यरः ॥ ४७ ॥

ऋदन्तस्य नाम्नि संज्ञायां स्यादौ परे अर इत्यन्तादेशो भवति ॥ पिअरा । पिअरं । पिअरे । पिअरेण । पिअरेहिं[8] । जामायरा । जामायरं[9] । जामायरे । जामायरेण । जामायरेहिं । भायरा । भायरं । भायरे । भायरेण । भायरेहिं ॥

---

१ B °रा ॥ भ्यस् । भत्त् । भत्तूओ । भत्तूहिन्तो । भत्तूसुन्तो । पक्षे । भत्ताराओ । भत्ताराउ । भत्ताराहि । भत्तारेहि । भत्ताराहिन्तो । भत्तारेहिन्तो । भत्तारासुन्तो । भत्तारेसुन्तो ।. २ B °स्स । आम् । भत्तूणं । भत्तूण । पक्षे । भत्ताराणं । भत्ताराण । ङि । भत्तुम्मि । पक्षे । भत्तारे । भत्तारम्मि ।. ३ B पिउसु. ४ B किं । पिआ. ५ P भत्तारेहि. ६ A समुन्निअं. ७ A माइमणो. ८ P पिअरेहि. ९ B °रं । जामाअरेण.

आ सौ न वा ॥ ४८ ॥

ऋदन्तस्य सौ परे आकारो वा भवति ॥ पिआ । जामाया । भाया । कत्ता । पक्षे । पिअरो । जामायरो । भायरो । कत्तारो ॥

राज्ञः ॥ ४९ ॥

राज्ञो नलोपे[1]ऽन्त्यस्य आत्वं वा भवति सौ परे ॥ राया । हे राया । पक्षे । आणादेशे । रायाणो ॥ हे राय[2] । हे रायमिति तु शौरसेन्याम् । एवं हे अप्पं[3] । हे अप्प ॥

जस्-शस्-ङसि-ङसां णो ॥ ५० ॥

राजन्शब्दात्परेषामेषां णो इत्यादेशो वा भवति ॥ जस् । रायाणो चिट्ठन्ति[4] । पक्षे । राया ॥ शस् । रायाणो पेच्छ । पक्षे । राया । राए ॥ ङसि । राइणो रण्णो आगओ । पक्षे । रायाओ[5] । रायाउ । रायाहि । रायाहिन्तो । राया ॥ ङस् । राइणो रण्णो धणं । पक्षे । रायस्स ॥

टो णा ॥ ५१ ॥

राजन्शब्दात्परस्य टा इत्यस्य णा इत्यादेशो वा भवति ॥ राइणा । [6]रण्णा । पक्षे । रायेण कयं ॥

इर्जस्य णो-णा-ङौ ॥ ५२ ॥

राजन्श[7]ब्दसंबन्धिनो जकारस्य स्थाने णोणाङिषु परेषु इकारो वा भवति ॥ राइणो चिट्ठन्ति[8] पेच्छ आगओ धणं वा ॥ राइणा कयं । राइम्मि । पक्षे । रायाणो । [9]रण्णो । रायणा[10] । राएण । रायम्मि ॥

इणममामा ॥ ५३ ॥

राजन्शब्दसंबन्धिनो जकारस्य अमाम्भ्यां सहितस्य स्थाने इणम् इत्यादेशो वा भवति ॥ राइणं पेच्छ । राइणं धणं । पक्षे । रायं । राईणं ॥

---

१ A °पेऽन्तस्य. २ B हे राअ. ३ A हे अप्पं । जस्°. ४ A चेट्ठंतु. ५ B °ओ गआउ. ६ B रण्णा । राए°. ७ A °ब्दरयसं°. ८ A चेट्ठंति. ९ P रण्णो । रण्णा । राएण. १० A °णा । रायम्मि.

ईद्भिस्भ्यसाम्सुपि ॥ ५४ ॥

राजन्शब्दसंबन्धिनो जकारस्य भिसादिषु परतो वा ईकारो भवति ॥ भिस्। राईहि[1] ॥ भ्यस्[2]। राईहि। राईहिन्तो। राईसुन्तो ॥ आम्। राईणं ॥ सुप्। राईसु। पक्षे। रायाणेहि। इत्यादि ॥

आजस्य टा-ङसि-ङस्सु सणाणोष्वण् ॥ ५५ ॥

राजन्शब्दसंबन्धिन आज इत्यवयवस्य टाङसिङस्सु णा णो इत्यादेशापन्नेषु परेषु अण् वा भवति ॥ रण्णा राइणा कयं। रण्णो राईणो आगओ धणं वा ॥ टाङसिङस्स्विति किम्। रायाणो चिट्ठन्ति पेच्छ वा ॥ सणाणोष्विति किम्। राएण। रायाओ। रायस्स ॥

पुंस्यन आणो राजवच्च ॥ ५६ ॥

पुंलिङ्गे वर्तमानस्यान्नन्तस्य स्थाने आण इत्यादेशो वा भवति। पक्षे। यथादर्शनं राजवत् कार्यं भवति ॥ आणादेशे च अतः सेर्डोः [३.२] इत्यादयः प्रवर्तन्ते। पक्षे तु राज्ञः जस्-शस्-ङसि-ङसां णो [३.५०] टो णा [३.२४] इणममामा [३.५३] इति प्रवर्तन्ते ॥ अप्पाणो। अप्पाणा। अप्पाणं[6]। अप्पाणे। अप्पाणेण। अप्पाणेहि[7]। अप्पाणाओ। अप्पाणासुन्तो। अप्पाणस्स। अप्पाणाण। अप्पाणम्मि। अप्पाणेसु। अप्पाण-कयं। पक्षे। राजवत्। अप्पा। अप्पो। हे अप्पा[8]। हे अप्प। अप्पाणो चिट्ठन्ति[9]। अप्पाणो पेच्छ ॥ अप्पणा। अप्पेहिं। अप्पाणो। अप्पाओ। अप्पाउ[10]। अप्पाहि। अप्पाहिन्तो। अप्पा। अप्पासुन्तो ॥ अप्पणो धणं[11]। अप्पाणं। अप्पे। अप्पेसु ॥ रायाणो[12]। रायाणा। रायाणं। रायाणे। रायाणेण। रायाणेहिं[13]। रायाणाहिन्तो। रायाणस्स। रायाणाणं। रायाणम्मि। रायाणेसु[14]। पक्षे। राया। इत्यादि। एवं जुवाणो। जुवाण-जणो। जुआ ॥ बम्हा-

---

१ B राईहिं. २ B भ्यस्। राईहिंतो. ३ B °णाणेष्व°. ४ B राइणो. ५ B °णाणेष्वि.° ६ A °णं। अप्पाणो। अप्पणो। अप्पाणेण. ७ B अप्पाणेहिं. ८ A °प्पा। अप्पाणो°. ९ A चेट्ठंति. १० A °उ। अप्पेहि। अप्पा. ११ A धणं। अप्पे। १२ A रायणो. १३ A रायाणाहि. १४ A रायाणासु.

णो । बम्हा ॥ अद्धाणो । अद्धा ॥ उक्षन् । उच्छाणो । उच्छा ॥ गावाणो । गावा ॥ पूसाणो । पूसा ॥ तक्खाणो । तक्खा ॥ मुद्धाणो । मुद्धा ॥ श्वन् । साणो । सा ॥ सुकर्मणः पश्य । सुकम्माणे[1] पेच्छ । निएइ[2] कह सो सुकम्माणे[3] । पश्यति कथं स सुकर्मण इत्यर्थः ॥ पुंसीति किम् । शर्म । सम्मं ॥

आत्मनष्टो णिआ णइआ ॥ ५७ ॥

आत्मनः परस्याष्टायाः स्थाने णिआ णइआ इत्यादेशौ वा भवतः ॥ अप्पणिआ पाउसे उवगयम्मि । अप्पणिआ य विअड्डि खाणिआ । अप्पणइआ । पक्षे । अप्पाणेण ॥

अतः सर्वादेर्डेर्जसः ॥ ५८ ॥

सर्वादेरदन्तात्परस्य[4][5] जसः डित् ए इत्यादेशो[6] भवति ॥ सव्वे । अन्ने । जे । ते । के । एक्के । कयरे । इयरे । एए ॥ अत इति किम् । सव्वाओ रिद्धीओ[7] ॥ जस इति[8] किम् । सव्वस्स ॥

ङेः स्सि-म्मि-त्थाः ॥ ५९ ॥

सर्वादेरकारात्परस्य[9] ङेः स्थाने स्सि म्मि त्थ[10] एते आदेशा भवन्ति ॥ सव्वस्सि । सव्वम्मि । सव्वत्थ ॥ अन्नस्सि । अन्नम्मि । अन्नत्थ ॥ एवं सर्वत्र ॥ अत इत्येव । अमुम्मि ॥

न वानिदमेतदो हिं ॥ ६० ॥

इदम्एतद्वर्जितात्सर्वादेरदन्तात्परस्य[11] ङेर्हिमादेशो वा भवति ॥ सव्वहिं । अन्नहिं । कहिं । जहिं । तहिं ॥ बहुलाधिकारात् किंयत्तद्भ्यः स्त्रियामपि । काहिं । जाहिं । ताहिं ॥ बाहुलकादेव किंयत्तदोस्यमामि [३.३३] इति ङीर्नास्ति ॥ पक्षे । सव्वस्सि । स-

---

१ B °म्माणोपे°. २ B निएकह. ३ P B °म्माणो. ४ B °डेंज°. ५ A °दे-रतःप°. ६ B °त ए आदे°. ७ P बुद्धीओ. ८ B जसीति. ९ P °कारान्तात्प° १० B °त्था. ११ A °द्वर्जितस्य सर्वादेरतः प°.

व्वम्मि । सव्वत्थ[1] । इत्यादि ॥ स्त्रियां तु पक्षे । काए । कीए । जाए । जीए । ताए । तीए ॥ इदमेतद्वर्जनं किम् । इमस्सिं[2] । एअस्सिं ॥

आमो डेसिं[3] ॥ ६१ ॥

सर्वादेरकारान्तात्परस्यामो[4] डेसिमित्यादेशो[5] वा भवति ॥ सव्वेसिं । अन्नेसिं । अवरेसिं । इमेसिं । एएसिं । जेसिं । तेसिं । केसिं । पक्षे । सव्वाण । अन्नाण । अवराण । इमाण । एआण । जाण । ताण । काण ॥ बाहुलकात् स्त्रियामपि । सर्वासाम् । सव्वेसिं ॥ एवम् अन्नेसिं । तेसिं ॥

किंतद्भ्यां डासः ॥ ६२ ॥

किंतद्भ्यां परस्यामः[6] स्थाने डास इत्यादेशो वा भवति ॥ काम । तास । पक्षे । केसिं । तेसिं ॥

किंयत्तद्भ्यो ङसः ॥ ६३ ॥

एभ्यः परस्य ङसः[7] स्थाने डास इत्यादेशो वा भवति । ङसः स्सः [३.१०] इत्यस्यापवादः । पक्षे सोपि भवति ॥ कास । कस्स । जास । जस्स । तास । तस्स ॥ बहुलाधिकारात् किंतद्भ्यामाकारान्ताभ्यामपि डासादेशो वा । कस्या धनम् । कास धणं ॥ तस्या धनम् । तास धणं । पक्षे । काए । ताए ॥

ईद्भ्यः स्सा से[8] ॥ ६४ ॥

किमादिभ्य ईदन्तेभ्यः परस्य ङसः स्थाने स्सा से इत्यादेशौ वा भवतः । टा-ङस्-ङेरदादिदेद्वा तु ङसेः [३.२९] इत्यस्यापवादः । पक्षे अदादयोपि ॥ किस्सा । कीसे । कीअ । कीआ । कीइ । कीए ॥ जिस्सा । जीसे । जीअ । जीआ । जीइ । जीए ॥ तिस्सा । तीसे । तीअ । तीआ । तीइ । तीए ॥

---

१ B सव्वत्थ । अन्नस्सिं । अन्नम्मि । अन्नत्थ इत्यादि. २ B इदमस्सिं. ३ B ङेः सिम्. ४ A °रात्प°. ५ B ङेः सि°. ६ A °रस्य सर्वादेरामः. ७ A ङसेः. ८ P B इत्येतावादे°.

ङेर्डाहे डाला इआ काले ॥ ६५ ॥

किंयत्तद्भ्यः कालेभिधेये ङेः स्थाने आहे आला इति डितौ इआ इति च आदेशा वा भवन्ति । हिंस्सिम्मित्थानामपवादः । पक्षे तेपि भवन्ति ॥ काहे । काला । कइआ ॥ जाहे । जाला । जइआ ॥ ताहे । ताला । तइआ ॥

ताला जाअन्ति गुणा जाला ते सहिअएहिं घेप्पन्ति[1] ।

पक्षे । कहिं । कस्सिं । कम्मि । कत्थ ॥

ङसेर्म्हा ॥ ६६ ॥

किंयत्तद्भ्यः परस्य ङसेः स्थाने म्हा इत्यादेशो वा भवति ॥ कम्हा । जम्हा । तम्हा । पक्षे । काओ । जाओ । ताओ ॥

तदो डोः ॥ ६७ ॥

तदः परस्य ङसेर्डो इत्यादेशो वा भवति ॥ तो । तम्हा ॥

किमो डिणो-डीसौ ॥ ६८ ॥

किमः परस्य ङसेर्डिणो डीस इत्यादेशौ वा भवतः ॥ किणो । कीस[2] । कम्हा ॥

इदमेतत्किं-यत्तद्भ्यष्टो डिणा ॥ ६९ ॥

[3]एभ्यः सर्वादिभ्योकारान्तेभ्यः परस्याष्टायाः स्थाने डित् इणा इत्यादेशो वा भवति ॥ इमिणा । इमेण ॥ एदिणा । एदेण ॥ किणा । केण ॥ जिणा । जेण ॥ तिणा । तेण ॥

तदो णः स्यादौ क्वचित् ॥ ७० ॥

तदः स्थाने स्यादौ परे ण आदेशो भवति क्वचित् लक्ष्यानुसारेण ॥ णं पेच्छ । तं पश्येत्यर्थः ॥ सोअइ अ णं रहुवई । तमित्यर्थः[4] ॥ स्त्रियामपि । हत्थुन्नामिअ-मुही णं तिअडा । तां त्रिजटेत्यर्थः ॥

---

1 B °न्ति ॥ रविकिरणाणुग्गहिआइं हुन्ति कमलाइं कमलाइं ॥ प°. 2 A कीसा. 3 A एभ्योऽकारान्तेभ्यः परस्याः सर्वादेः°. 4 A °त्यर्थः । णेण°.

णेण भणिअं। तेन भणितमित्यर्थः॥ तो णेण कर-यल-ट्ठिआ। तेनेत्यर्थः॥ भणिअं च णाए। तयेत्यर्थः॥ णेहिं कयं। तैः कृतमित्यर्थः॥ णाहिं कयं। ताभिः कृतमित्यर्थः॥

किमः कस्त्र-तसोश्च ॥ ७१ ॥

किमः को भवति स्यादौ त्रतसोश्च परयोः॥ को। के। कं। के। केण॥ त्र। कत्थ॥ तस्। कओ। कत्तो। कदो॥

इदम इमः ॥ ७२ ॥

इदमः स्यादौ परे इम आदेशो भवति॥ इमो। इमे। इमं। इमे। इमेण॥ स्त्रियामपि। इमा॥

पुं-स्त्रियोर्न वायमिमिआ सौ ॥ ७३ ॥

इदम्शब्दस्य सौ परे अयमिति पुल्लिङ्गे इमिआ इति स्त्रीलिङ्गे आदेशौ वा भवतः॥ अहवायं कय-कज्जो। इमिआ वाणिअ-धूआ। पक्षे। इमो। इमा॥

स्सि-स्सयोरत् ॥ ७४ ॥

इदमः स्सि स्स इत्येतयोः परयोरद् भवति वा॥ अस्सि। अस्स। पक्षे। इमादेशोपि। इमस्सि। इमस्स॥ बहुलाधिकारादन्यत्रापि भवति। एहि। एसु। आहि। एभिः एषु आभिरित्यर्थः॥

ङेर्मेन हः ॥ ७५ ॥

इदमः कृतेमादेशात् परस्य ङेः स्थाने मेन सह ह आदेशो वा भवति॥ इह। पक्षे। इमस्सि। इमम्मि॥

न त्थः ॥ ७६ ॥

इदमः परस्य ङेः स्सि-म्मि-त्थाः [३.५९.] इति प्राप्तः त्थो न भवति॥ इह। इमस्सि। इमम्मि॥

---

१ B कृतं॥ णा°. २ A 'मिनिआ°. ३ A आभिः। ङे°. ४ A इमस्सि.

णोम्-शस्टा-भिसि ॥ ७७ ॥

इदमः स्थाने अम्शस्टाभिस्सु परेषु ण आदेशो वा भवति ॥ णं पेच्छ । णे पेच्छ । णेण । णेहिं कयं । पक्षे । इमं । इमे । इमेण । इमेहिं ॥

अमेणम् ॥ ७८ ॥

इदमोमा सहितस्य स्थाने इणम् इत्यादेशो वा भवति ॥ इणं पेच्छ । पक्षे । इमं ॥

क्लीबे स्यमेदमिणमो च ॥ ७९ ॥

नपुंसकलिङ्गे वर्तमानस्येदमः स्यम्भ्यां सहितस्य इदम् इणमो इणम् च नित्यमादेशा भवन्ति ॥ इदं इणमो इणं धणं चिट्ठइ पेच्छ वा ॥

किमः किं ॥ ८० ॥

किमः क्लीबे वर्तमानस्य स्यम्भ्यां सह किं भवति ॥ किं कुलं तुह । किं किं ते पडिहाइ ॥

वेदं-तदेतदो ङसाम्भ्यां से-सिमौ ॥ ८१ ॥

इदम् तद् एतद् इत्येतेषां स्थाने ङस् आम् इत्येताभ्यां सह यथासंख्यं से सिम् इत्यादेशौ वा भवतः ॥ इदम् । से सीलम् । से गुणा । अस्य शीलं गुणा वेत्यर्थः ॥ सिं उच्छाहो । एषाम् उत्साह इत्यर्थः ॥ तद् । से सीलं । तस्य तस्या वेत्यर्थः ॥ सिं गुणा । तेषां तासां वेत्यर्थः ॥ एतद् । से अहिअं । एतस्याहितमित्यर्थः ॥ सिं गुणा । सिं सीलं । एतेषां गुणाः शीलं वेत्यर्थः । पक्षे । इमस्स । इमेसिं । इमाण ॥ तस्स । तेसिं । ताण ॥ एअस्स । एएसिं । एआण । इदंतदोरामापि सेआदेशं कश्चिदिच्छति ॥

---

१ P B णेहिं. २ B इमेहिं. ३ A °हाअइ. ४ B शीलं. ५ B केचिदिच्छंति.

वैतदो ङसेस्त्तो त्ताहे ॥ ८२ ॥

एतदः परस्य ङसेः स्थाने त्तो त्ताहे इत्येतावादेशौ वा भवतः ॥ एत्तो । एत्ताहे । पक्षे । एआओ । एआउ । एआहि । एआहिन्तो । एआ ॥

त्थे च तस्य लुक् ॥ ८३ ॥

एतदस्त्थे परे चकारात् त्तो त्ताहे इत्येतयोश्च परयोस्तस्य लुग् भवति ॥ एत्थ । एत्तो । एत्ताहे ॥

एरदीतौ म्मौ वा ॥ ८४ ॥

एतद एकारस्य ङ्यादेशे म्मौ परे अदीतौ वा भवतः ॥ अयम्मि । ईयम्मि । पक्षे । एअम्मि ॥

वैसेणमिणमो सिना ॥ ८५ ॥

एतदः सिना सह एस इणम् इणमो इत्यादेशा वा भवन्ति ॥ सव्वस्सवि एस गई ॥ सव्वाणवि पत्थिवाण एस मही ॥ एस सहाओच्चिअ ससहरस्स ॥ एस सिरं । इणं । इणमो । पक्षे । एअं । एसा । एसो ॥

तदश्च तः सोक्लीबे ॥ ८६ ॥

तद एतदश्च तकारस्य सौ परे अक्लीबे सो भवति ॥ सो पुरिसो । सा महिला । एसो पिओ । एसा मुद्धा ॥ सावित्येव । ते एए धन्ना । ताओ एआओ महिलाओ ॥ अक्लीब इति किम् । तं एअं वणं ॥

वादसो दस्य होनोदाम् ॥ ८७ ॥

अदसो दकारस्य सौ परे ह आदेशो वा भवति तस्मिंश्च कृते अतः सेर्डोः [३.३.] इत्योत्वं शेषं संस्कृतवत् [४.४४८.] इत्यतिदेशाद् आत् [हे० २.४.] इत्याप् क्लीबे स्वरान्म् सेः [३.२५.] इति मश्च

१ P सहे. २ A °ओ । एआहि. ३ A °हिंतो । ओ°. ४ P इअम्मि. ५ B मही. ६ B °ण ए°. ७ B °णं.

न भवति ॥ अह पुरिसो । अह महिला । अह वणं । अह मोहो पर-गुण-लहुँअयाइ । अह णे हिअएण हसइ मारुय-तणओ । असावस्मान् हसतीत्यर्थः । अह कमल-मुही । पक्षे । उत्तरेण मुरादेशः । अमू पुरिसो । अमू महिला । अमुं वणं ॥

मुः स्यादौ ॥ ८८ ॥

अदसो दस्य स्यादौ परे मुरादेशो भवति ॥ अमू पुरिसो । अमुणो पुरिसा । अमुं वणं । अमूइं वणाइं । अमूणि वणाणि । अमू माला । अमूउ अमूओ मालाओ । अमुणा । अमूहिं ॥ ङसि । अमूओ । अमूउ । अमूहिन्तो ॥ भ्यस् । अमूहिन्तो । अमूसुन्तो ॥ ङस् । अमुणो । अमुस्स ॥ आम् । अमूण ॥ ङि । अमुम्मि ॥ सुप् । अमूसु ॥

म्मावयेऔ वा ॥ ८९ ॥

अदसोन्त्यव्यञ्जनलुकि दकारान्तस्य स्थाने ङ्यादेशे म्मौ परतः अय इअ इत्यादेशौ वा भवतः ॥ अयम्मि । इअम्मि । पक्षे । अमुम्मि ॥

युष्मदस्तं तुं तुवं तुह तुमं सिना ॥ ९० ॥

युष्मदः सिना सह तं तुं तुवं तुह तुमं इत्येते पञ्चादेशा भवन्ति ॥ तं तुं तुवं तुह तुमं दिट्ठो ॥

भे तुब्भे तुज्झ तुम्ह तुय्हे उय्हे जसा ॥ ९१ ॥

युष्मदो जसा सह भे तुब्भे तुज्झ तुम्ह तुय्हे उय्हे इत्येते षडादेशा भवन्ति ॥ भे तुब्भे तुज्झ तुम्ह तुय्हे उय्हे चिट्ठह । ब्भो म्हज्झौ वा [३.१०४.] इति वचनात् तुम्हे । तुज्झे । एवं चाष्टरूप्यम् ॥

तं तुं तुमं तुवं तुह तुमे तुए अमा ॥ ९२ ॥

युष्मदोमा सह एते सप्तादेशा भवन्ति ॥ तं तुं तुमं तुवं तुह तुमे तुए वन्दामि ॥

---

१ P B °हुआई. २ B थणाइं. ३ P तुब्भ तु°. ४ B उज्झे°. ५ B उय्हे निगम. ६ A चोरह. ७ B °ण्हणाणि.

वो तुज्झ[1] तुब्भे तुय्हे उय्हे भे शसा ॥ ९३ ॥

युष्मदः शसा सह एते षडादेशा भवन्ति ॥ वो तुज्झ[2] तुब्भे । ब्भो म्हज्झौ वेति वचनात् तुम्हे तुज्झे तुय्हे उय्हे भे पेच्छामि ॥

भे दि दे ते तइ तए तुमं तुमइ तुमए तुमे तुमाइ टा ॥९४॥

युष्मदष्टा इत्यनेन सह एते एकादशादेशा भवन्ति ॥ भे दि दे ते तइ तए तुमं तुमइ तुमए तुमे तुमाइ जम्पिअं ॥

भे तुब्भेहिं[3] उँज्झेहिं[3] उम्हेहिं[3] तुय्हेहिं[3] उय्हेहिं[3] भिसा ॥ ९५ ॥

युष्मदो भिसा सह एते षडादेशा भवन्ति ॥ भे । तुब्भेहिं[3] । ब्भो म्ह-ज्झौ वेति वचनात् तुंम्हेहिं[3] तुज्झेहिं उज्झेहिं[3] उम्हेहिं[3] तुय्हे-हिं[3] उय्हेहिं[3] भुत्तं । एवं चाष्टरूप्यम् ॥

तइ-तुव-तुम-तुह-तुब्भा ङसौ ॥ ९६ ॥

युष्मदो ङसौ पञ्चम्येकवचने परत एते[6] पञ्चादेशा भवन्ति । ङसेस्तु त्तोदोदुहिहिन्तोलुंको[7] यथाप्राप्तमेव ॥ तइत्तो । तुवत्तो । तुमत्तो । तुहत्तो । तुब्भत्तो । ब्भोम्ह-ज्झौ वेति वचनात् तुम्हत्तो । तुज्झत्तो ॥ एवं दोदुहिहिन्तोलुक्ष्वप्युदाहार्यम् ॥ तत्तो इति तु त्वत्त इत्यस्य वलोपे सति ॥

तुय्ह तुब्भ तहिन्तो ङसिना ॥ ९७ ॥

युष्मदो ङसिना सहितस्य एते त्रय आदेशा भवन्ति ॥ तुय्ह तुब्भ तहिन्तो आगओ । ब्भो म्ह-ज्झौ वेति वचनात् तुम्ह । तुज्झ । एवं च पञ्च रूपाणि ॥

तुब्भ-तुय्होय्होम्हा भ्यसि ॥ ९८ ॥

युष्मदो भ्यसि परत एते चत्वार आदेशा भवन्ति ॥ भ्यसस्तु यथाप्राप्तमेव ॥ तुब्भत्तो । तुय्हत्तो । उय्हत्तो । उम्हत्तो । ब्भो म्ह-

१ B तुब्भे उज्झे तु°. २ B तुब्भे उज्झे तु°. ३ A हि. ४ P तब्भेहि. ५ B तुज्झेहि तुम्हेहिं. ६ B °तेषां पं. ७ A लुकय°.

ज्झौ वेति वचनात् तुम्हत्तो । तुज्झत्तो ॥ एवं दोदुहिहिन्तोसुन्तो[1]-ष्वप्युदाहार्यम् ॥

तई-तु[2]-ते-तुम्हं-तुह-तुहं-तुव-तुम-तुमे-तुमो-तुमाइ-दि-दे-इ-ए-तुब्भोब्भोय्हा ङसा ॥ ९९ ॥

युष्मदो ङसा षष्ठ्येकवचनेन सहितस्य एते अष्टादशादेशा भवन्ति ॥ तइ । तु[3] । ते । तुम्हं[4] । तुह । तुहं । तुव । तुम । तुमे । तुमो । तुमाइ । दि । दे । इ । ए । तुब्भ । उब्भ । उय्ह धणं ॥ ब्भो म्ह-ज्झौ वेति वचनात् तुम्ह । तुज्झ । उम्ह । उज्झ । एवं च द्वाविंशती[5] रूपाणि ॥

तु वो भे[6] तुब्भ तुब्भं तुब्भाण तुवाण तुमाण तुहाण उम्हाण[7] आमा ॥ १०० ॥

युष्मद आमा सहितस्य एते[8] दशादेशा भवन्ति ॥ तु । वो । भे[9] । तुब्भ । तुब्भं । तुब्भाण । तुवाण । तुमाण । तुहाण । उम्हाण । क्त्वा-स्यादेर्णस्वोर्वा [१.२७.] इत्यनुस्वारे तुब्भाणं । तुवाणं । तुमाणं । तुहाणं[10] । उम्हाणं ॥ ब्भो म्ह-ज्झौ वेति वचनात् तुम्ह । तुज्झ । तुम्हं[11] । तुज्झं । तुम्हाण । तुम्हाणं । तुज्झाण । तुज्झाणं[12] धणं । एवं च त्रयोविंशती रूपाणि ॥

तुमे तुमए तुमाइ तइ तए ङिना ॥ १०१ ॥

युष्मदो ङिना सप्तम्येकवचनेन सहितस्य एते पञ्चादेशा भवन्ति ॥ तुमे तुमए तुमाइ तइ तए ठिअं ॥

तु-तुव-तुम-तुह-तुब्भा ङौ ॥ १०२ ॥

युष्मदो ङौ परत एते पञ्चादेशा भवन्ति । ङेस्तु यथाप्राप्तमेव ॥

---

१ B °म्हन्तेष्व°. २ A तइतुमेतेतुम्हंतु°. ३ B तुं. ४ B तुम्ह. ५ B °शतिरू°. ६ B भेतुय्हतुब्भउब्भ. ७ P B तुम्हाण. ८ B °ते आदे. ९ B भे । तुय्ह । तुब्भ । उब्भ. १० P B तुम्हाणं. ११ B उम्ह । उज्झ. १२ B तुज्झाणं । एवं.

तुम्मि । तुवम्मि । तुमम्मि । तुहम्मि । तुब्भम्मि । ब्भो म्ह-ज्झौ वेति वचनात् तुम्हम्मि । तुज्झम्मि । इत्यादि ॥

सुपि ॥ १०३ ॥

युष्मदः सुपि परतः तु-तुव-तुम-तुह-तुब्भा भवन्ति ॥ तुसु । तुवेसु । तुमेसु । तुहेसु । तुब्भेसु ॥ ब्भो म्ह-ज्झौ वेति वचनात् तुम्हेसु । तुज्झेसु ॥ केचित्तु सुप्येत्वविकल्पमिच्छन्ति । तन्मते तुवसु । तुमसु । तुहसु । तुब्भसु । तुम्हसु । तुज्झसु ॥ तुब्भस्यात्वमपीच्छत्यन्यः[1] । तुब्भासु । तुम्हासु । तुज्झासु ॥

ब्भो म्ह-ज्झौ वा ॥ १०४ ॥

युष्मदादेशेषु यो द्विरुक्तो भस्तस्य म्ह ज्झ इत्येतावादेशौ वा भवतः ॥ पक्षे स एवास्ते[2] । तथैव चोदाहृतम् ॥

अस्मदो म्मि अम्मि अम्हि हं अहं अहयं सिना ॥ १०५ ॥

अस्मदः सिना सह एते षडादेशा भवन्ति ॥ अज्ज म्मि हासिआ मामि तेण ॥ उन्नमं[3] न अम्मि कुविआ । अम्हि करेमि । जेण[4] हं विद्धा । किं पम्हुट्ठम्मि[5] अहं । अहयं कय-प्पणामो ॥

अम्ह अम्हे अम्हो मो वयं भे जसा ॥ १०६ ॥

अस्मदो जसा सह एते षडादेशा भवन्ति ॥ अम्ह अम्हे अम्हो मो वयं भे भणामो ॥

णे णं मि अम्मि अम्ह मम्ह मं ममं मिमं अहं अमा ॥१०७॥

अस्मदोमा सह एते दशादेशा भवन्ति ॥ णे णं मि अम्मि अम्ह मम्ह मं ममं मिमं[6] अहं पेच्छ ॥

अम्हे अम्हो अम्ह णे शसा ॥ १०८ ॥

अस्मदः शसा सह एते चत्वार आदेशा भवन्ति ॥ अम्हे अम्हो[7] अम्ह णे पेच्छ ॥

---

१ B °च्छंति इत्यन्ये. २ P °वास्ति. ३ B म अ. ४ P नेण हं दिट्ठा. ५ P B °ट्ठम्हि अ°. ६ B मिममहं. ७ A अम्हा.

मि मे ममं ममए ममाइ मइ मए मयाइ णे टा ॥ १०९ ॥

अस्मदष्टा सह एते नवादेशा भवन्ति ॥ मि मे ममं ममए ममाइ मइ मए मयाइ णे कयं ॥

अम्हेहि अम्हाहि अम्ह अम्हे णे भिसा ॥ ११० ॥

अस्मदो भिसा सह एते पञ्चादेशा भवन्ति ॥ अम्हेहि अम्हाहि अम्ह अम्हे णे कयं ॥

मइ-मम-मह-मज्झा ङसौ ॥ १११ ॥

अस्मदो ङसौ पञ्चम्येकवचने परत एते चत्वार आदेशा भवन्ति । ङसेस्तु यथाप्राप्तमेव ॥ मइत्तो ममत्तो महत्तो मज्झत्तो आगओ ॥ मत्तो इति तु मत्त इत्यस्य ॥ एवं दो-दुहि-हिन्तो-लुक्ष्वप्युदाहार्यम ॥

ममाम्हौ भ्यसि ॥ ११२ ॥

अस्मदो भ्यसि परतो मम अम्ह इत्यादेशौ भवतः । भ्यसस्तु यथाप्राप्तम् ॥ ममत्तो । अम्हत्तो । ममाहिन्तो । अम्हाहिन्तो । ममासुन्तो । अम्हासुन्तो । ममेसुन्तो । अम्हेसुन्तो ॥

मे मइ मम मह महं मज्झ मज्झं अम्ह अम्हं ङसा ॥ ११३ ॥

अस्मदो ङसा षष्ठ्येकवचनेन सहितस्य एते नवादेशा भवन्ति ॥ मे मइ मम मह महं मज्झ मज्झं अम्ह अम्हं धणं ॥

णे णो मज्झ अम्ह अम्हं अम्हे अम्हो अम्हाण ममाण महाण मज्झाण आमा ॥ ११४ ॥

अस्मद आमा सहितस्य एते एकादशादेशा भवन्ति ॥ णे णो मज्झ अम्ह अम्हं अम्हे अम्हो अम्हाण ममाण महाण मज्झाण धणं ॥ क्त्वा-स्यादेर्ण-स्वोर्वा [१.२७.] इत्यनुस्वारे । अम्हाणं । ममाणं । महाणं । मज्झाणं । एवं च पञ्चदश रूपाणि ॥

मि मइ ममाइ मए मे ङिना ॥ ११५ ॥

अस्मदो ङिना सहितस्य एते पञ्चादेशा भवन्ति ॥ मि मइ ममाइ मए मे ठिअं ॥

अम्ह-मम-मह-मज्झा ङौ ॥ ११६ ॥

अस्मदो ङौ परत एते चत्वार आदेशा भवन्ति। ङेस्तु यथाप्राप्तम् ॥ अम्हम्मि ममम्मि महम्मि मज्झम्मि ठिअं ॥

सुपि ॥ ११७ ॥

अस्मदः सुपि परे अम्हादयश्चत्वार आदेशा भवन्ति ॥ अम्हेसु। ममेसु। महेसु। मज्झेसु। एत्वविकल्पमते तु। अम्हसु। ममसु। महसु। मज्झसु ॥ अम्हस्यात्वमपीच्छत्यन्यः। अम्हासु ॥

त्रेस्ती तृतीयादौ ॥ ११८ ॥

त्रेः स्थाने ती इत्यादेशो भवति तृतीयादौ ॥ तीहिं कयं। तीहिन्तो आगओ। तिण्हं धणं। तीसु ठिअं ॥

द्वेर्दो वे ॥ ११९ ॥

द्विशब्दस्य तृतीयादौ दो वे इत्यादेशौ भवतः ॥ दोहि वेहि कयं। दोहिन्तो वेहिन्तो आगओ। दोण्हं वेण्हं धणं। दोसु वेसु ठिअं ॥

दुवे दोण्णि वेण्णि च जस्-शसा ॥ १२० ॥

जस्-शस्भ्यां सहितस्य द्वेः स्थाने दुवे दोण्णि वेण्णि इत्येते दो वे इत्येतौ च आदेशा भवन्ति ॥ दुवे दोण्णि वेण्णि दो वे ठिआ पेच्छ वा। ह्रस्वः संयोगे [१.८४.] इति ह्रस्वत्वे दुण्णि विण्णि ॥

---

१ A °न्नि। अ°. २ B °म्हेत्यन्ये. ३ P त्रेस्तिस्तृ°. ४ A °दौ। तीहिंतो. ५ B °शौ वा भ°. ६ A वणं. ७ P °शसो. ८ B °ते आदेशा भवंति। चकाराद्दो वे इत्येतौ भवतः ॥.

त्रेस्तिण्णिः ॥ १२१ ॥

जस्-शस्भ्यां सहितस्य त्रेः स्थाने तिण्णि इत्यादेशो भवति ॥ तिण्णि ठिआ पेच्छ वा ॥

चतुरश्चत्तारो चउरो चत्तारि ॥ १२२ ॥

चतुर्शब्दस्य जस्-शस्भ्यां सह[1] चत्तारो चउरो चत्तारि इत्येते आदेशा भवन्ति ॥ चत्तारो । चउरो । चत्तारि चिट्ठन्ति पेच्छ वा ॥

संख्याया आमो ण्ह ण्हं ॥ १२३ ॥

संख्याशब्दात्परस्यामो ण्ह ण्हं इत्यादेशौ भवतः ॥ दोण्ह । तिण्ह । चउण्ह । पञ्चण्ह । छण्ह । सत्तण्ह । अट्ठण्ह ॥ एवं दोण्हं । तिण्हं । चउण्हं । पंचण्हं । छण्हं । सत्तण्हं । अट्ठण्हं । नवण्हं । दसण्हं । पण्णरसण्हं दिवसाणं । अट्ठारसण्हं समण-साहस्सीणं ॥ कतीनाम् । कइण्हं ॥ बहुलाधिकाराद् विंशत्यादेर्न भवति ॥

शेषेऽदन्तवत् ॥ १२४ ॥

उपर्युक्तादन्यः शेषस्तत्र स्यादिविधिरदन्तवदतिदिश्यते । येष्वाकाराद्यन्तेषु पूर्वं कार्याणि नोक्तानि तेषु जस्-शसोर्लुक् [३.४.] इत्यादीनि अदन्ताधिकारविहितानि कार्याणि भवन्तीत्यर्थः ॥ तत्र जस्-शसोर्लुक् इत्येतत्कार्यातिदेशः । माला गिरी गुरू सही वहू रेहन्ति पेच्छ वा ॥ अमोस्य [३.५.] इत्येतत्कार्यातिदेशः । गिरिं गुरुं सहिं वहुं गामणिं खलपुं पेच्छ ॥ टा-आमोर्णः [३.६.] इत्येतत्कार्यातिदेशः । हाहाण कयं । मालाण गिरीण गुरूण सहीण वहूण धणं । टायास्तु । टो णा [३.२४.] । टा-ङस्-ङेरदादिदेद्वा तु ङसेः [३.२९.] इति विधिरुक्तः ॥ भिसो हि हिँ हिं [३.७.] इत्येतत्कार्यातिदेशः । मालाहि गिरीहि गुरूहि सहीहि वहूहि कयं । एवं सानुनासिकानु-

---

१ B सहितस्य च°. २ A तिण्हं । नवण्हं. ३ A पञ्च°. ४ P °शः । मालाण. ५ A मामाण.

स्वारयोरपि ॥ ङसेस् त्तो-दो-दु-हि-हिन्तो-लुकः [३.८.] इत्येतत्कार्यातिदेशः। मालाओ। मालाउ। मालाहिन्तो ॥ बुद्धीओ। बुद्धीउ। बुद्धीहिन्तो ॥ धेणूओ। धेणूउ। धेणूहिन्तो आगओ। हिलुकौ तु प्रतिषेत्स्येते [३.१२७,१२६.]। भ्यसस् त्तो दो दु हि हिन्तो सुन्तो [३.९.] इत्येतत्कार्यातिदेशः। मालाहिन्तो। मालासुन्तो। हिस्तु निषेत्स्यते [३.१२७.]। एवं गिरीहिन्तो। इत्यादि ॥ ङसः स्सः [३.१०.] इत्येतत्कार्यातिदेशः। गिरिस्स। गुरुस्स। दहिस्स। महुस्स ॥ स्त्रियां तु टा-ङस्-ङेः [३.२९.] इत्याद्युक्तम् ॥ डे म्मि ङेः [३.११.] इत्येतत्कार्यातिदेशः। गिरिम्मि। गुरुम्मि। दहिम्मि। महुम्मि। डेस्तु निषेत्स्यते [३.१२८.]। स्त्रियां तु टा-ङस्-ङेः [३.२९.] इत्याद्युक्तम् ॥ जस्-शस्-ङसि-त्तो-दो-द्वामि दीर्घः [३.१२.] इत्येतत्कार्यातिदेशः। गिरी गुरू चिट्ठन्ति। गिरीओ गुरूओ आगओ। गिरीण गुरूण धणं ॥ भ्यसि वा [३.१३.] इत्येतत्कार्यातिदेशो न प्रवर्तते। इदुतो दीर्घः [३.१६.] इति नित्यं विधानात् ॥ टाण-शस्येत् [३.१४.] भिस्भ्यस्सुपि [३.१५.] इत्येतत्कार्यातिदेशस्तु निषेत्स्यते [३.१२९.] ॥

न दीर्घो णो ॥ १२५ ॥

इदुदन्तयोरर्थाज्जस्-शस्-ङस्यादेशे णो इत्यस्मिन् परतो दीर्घो न भवति ॥ अग्गिणो। वाउणो ॥ णो इति किम्। अग्गी। अग्गीओ ॥

ङसेर्लुक् ॥ १२६ ॥

आकारान्तादिभ्योदन्तवत्प्राप्तो ङसेर्लुग् न भवति ॥ मालत्तो। मालाओ। मालाउ। मालाहिन्तो आगओ ॥ एवं अग्गीओ। वाऊओ। इत्यादि ॥

भ्यसश्च हिः ॥ १२७ ॥

आकारान्तादिभ्योदन्तवत्प्राप्तो भ्यसो ङसेश्च हिर्न भवति ॥ माला-

१ A B लुक्. २ A मुहस्स. ३ B ङेस्तु. ४ P °न्ति पेच्छवा। गि°. ५ B °देशो णो. ६ B °रादि° ७ P °ति। मालाओ. ८ B °ओ। मालाहिन्तो।.

हिन्तो । मालासुन्तो । एवं अग्गीहिन्तो । इत्यादि ॥ मालाओ । मालाउ । मालाहिन्तो ॥ एवम् अग्गीओ । इत्यादि ॥

ङेर्डे: [1] ॥ १२८ ॥

आकारान्तादिभ्योदन्तवत्प्राप्तो ङेर्डे न भवति ॥ अग्गिम्मि । वाउम्मि । दहिम्मि । महुम्मि [3] ॥

एत् ॥ १२९ ॥

आकारान्तादीनामर्थात् टाशस्भिस्भ्यस्सुप्सु [4] परतोदन्तवद् एत्वं न भवति ॥ हाहाण कयं ॥ मालाओ पेच्छ ॥ मालाहि कयं ॥ मालाहिन्तो । मालासुन्तो आगओ ॥ मालासु ठिअं ॥ एवं अग्गिणो । वाउणो । इत्यादि ॥

द्विवचनस्य बहुवचनम् ॥ १३० ॥

सर्वासां विभक्तीनां स्यादीनां त्यादीनां च द्विवचनस्य स्थाने बहुवचनं भवति ॥ दोण्णि कुणन्ति । दुवे कुणन्ति । दोहिं [5] । दोहिन्तो । दोसुन्तो । दोसु । हत्था । पाया [6] । थणया । नयणा ॥

चतुर्थ्याः षष्ठी ॥ १३१ ॥

चतुर्थ्याः स्थाने षष्ठी भवति ॥ मुणिस्स । मुणीण देइ ॥ नमो देवस्स । देवाण ॥

तादर्थ्यङेर्वा ॥ १३२ ॥

तादर्थ्यविहितस्य [7] ङेश्चतुर्थ्येकवचनस्य स्थाने षष्ठी वा भवति ॥ देवस्स देवाय । देवार्थमित्यर्थः ॥ ङेरिति किम् । देवाण ॥

वधाड्डाइश्च [8] वा ॥ १३३ ॥

वधशब्दात्परस्य तादर्थ्यङेर्डिद् आइः षष्ठी च वा भवति ॥ वहाइ वहस्स वहाय । वधार्थमित्यर्थः ॥

---

१ B ङेर्डे. २ P °ङेर्ने. ३ A मुहम्मि. ४ B °स्सु प°. ५ A दोहि. ६ B °या । न°. ७ B °दर्थ्ये वि°. ८ B °श्च ॥.

क्वचिद् द्वितीयादेः ॥ १३४ ॥

द्वितीयादीनां विभक्तीनां स्थाने षष्ठी भवति क्वचित् ॥ सीमाधरस्स वन्दे । तिस्सा मुहस्स भरिमो । अत्र द्वितीयायाः[1] षष्ठी ॥ धणस्स लद्धो[2] । धनेन[3] लब्ध इत्यर्थः । चिरस्स मुक्का । चिरेण मुक्तेत्यर्थः । तेसिमेअमणाइण्णं[4] । तैरेतदनाचरितम्[5] । अत्र तृतीयायाः[6] ॥ चोरस्स बीहइ[7] । चोराद्बिभेतीत्यर्थः[8] । इअराइं जाण लहुअक्खराइं पायन्तिमिल्ल-सहिआण । पादान्तेन सहितेभ्य इतराणीति । अत्र पञ्चम्याः[9] ॥ पिट्ठीए केस-भारो । अत्र सप्तम्याः ॥

द्वितीया-तृतीययोः सप्तमी ॥ १३५ ॥

द्वितीयातृतीययोः स्थाने क्वचित् सप्तमी भवति ॥ गामे वसामि । नयरे न जामि[10] । अत्र द्वितीयायाः ॥ मइ वेविरीए[11] मलिआइं ॥ तिसु तेसु अलंकिआ पुहवी । अत्र तृतीयायाः ॥

पञ्चम्यास्तृतीया च ॥ १३६ ॥

पञ्चम्याः स्थाने क्वचित् तृतीयासप्तम्यौ भवतः ॥ चोरेण बीहइ । चोराद्बिभेतीत्यर्थः ॥ अन्तेउरे रमिउमागओ राया । अन्तःपुराद् रन्त्वागत इत्यर्थः ॥

सप्तम्या द्वितीया ॥ १३७ ॥

सप्तम्याः स्थाने क्वचिद् द्वितीया भवति ॥ विज्जुज्जोयं भरइ रत्तिं ॥ आर्षे तृतीयापि दृश्यते । तेणं कालेणं । तेणं समएणं । तस्मिन् काले तस्मिन् समये इत्यर्थः ॥ प्रथमाया[12] अपि द्वितीया दृश्यते । चउवीसं पि जिणवरा । चतुर्विंशतिरपि जिनवरा इत्यर्थः ॥

---

१ P °यार्थे ष°. २ B लद्धो. ३ B धणेण लद्ध. ४ A °इन्नं. ५ B °दनाचीर्णमित्यर्थः. ६ P °यार्थे ॥. ७ P बिहइ. ८ P °त्यर्थे. ९ P °म्यर्थे. १० B जानामि. ११ B वेवरिए. १२ B °मायेपि.

क्यङोर्यलुक्[1] ॥ १३८ ॥

क्यङन्तस्य[2] क्यङ्षन्तस्य[2] वा संबन्धिनो यस्य लुग् भवति ॥ गरुआइ । गरुआअइ[3] । अगुरुर्गुरुर्भवति गुरुरिवाचरति वेत्यर्थः ॥ क्यङ्ष्[4] । दमदमाइ । दमदमाअइ[5] ॥ लोहिआइ । लोहिआअइ ॥

त्यादीनामाद्यत्रयस्याद्यस्येचेचौ[6] ॥ १३९ ॥

त्यादीनां विभक्तीनां परस्मैपदानामात्मनेपदानां च संबन्धिनः प्रथमत्रयस्य यदाद्यं वचनं तस्य स्थाने इच एच् इत्येतावादेशौ भवतः ॥ हसइ । हसए । वेवइ । वेवए । चकारौ इचेचः[7] [४.३१८] इत्यत्र विशेषणार्थौ ॥

द्वितीयस्य सि से ॥ १४० ॥

त्यादीनां परस्मैपदानामात्मनेपदानां च द्वितीयस्य त्रयस्य संबन्धिन आद्यवचनस्य[8] स्थाने सि से इत्येतावादेशौ भवतः ॥ हससि । हससे । वेवसि । वेवसे ॥

तृतीयस्य मिः ॥ १४१ ॥

त्यादीनां परस्मैपदानामात्मनेपदानां च तृतीयस्य त्रयस्याद्यस्य वचनस्य स्थाने मिरादेशो भवति ॥ हसामि । वेवामि ॥ बहुलाधिकाराद् मिवेः[9] स्थानीयस्य मेरिकारलोपश्च ॥ बहु-जाणय रूसिउं[10] सक्कं । शक्नोमीत्यर्थः ॥ न मरं । न म्रिये इत्यर्थः ॥

बहुष्वाद्यस्य न्ति न्ते इरे ॥ १४२ ॥

त्यादीनां परस्मैपदात्मनेपदानामाद्यत्रयसंबन्धिनो[11] बहुषु वर्तमानस्य

---

१ B °ङो यलुक्. २ B °स्य क्यङंतस्य क्यषंत°. P °स्यक्यषन्तस्य. ३ A गुरु°. ४ P क्यष्. B क्यन्. ५ B °इ । क्यष् । लो°. ६ A °स्यत्र°. ७ B इचेच् इ°. ८ B दास्य व°. ९ P मिवेस्था°. B मिवस्था. १० A रूसिअ. B रूसिओ. ११ B °दानामात्मनेपदानां च आद्य.°

वचनस्य स्थाने न्ति न्ते इरे इत्यादेशा भवन्ति ॥ हसन्ति । वेवन्ति । हसिज्जन्ति । रमिज्जन्ति । गज्जन्ते खे मेहा ॥ बीहन्ते रक्खसाणं च ॥ उप्पज्जन्ते कइ-हिअय-सायरे कव्व-रयणाइं ॥ दोण्णिवि न पहुप्पिरे बाहू । न प्रभवत इत्यर्थः ॥ विच्छुहिरे । विक्षुभ्यन्तीत्यर्थः॥ क्वचिद् रे एकत्वेपि । सूसइरे गाम-चिक्खल्लो । शुष्यतीत्यर्थः ॥

मध्यमस्येत्था-हचौ ॥ १४३ ॥

त्यादीनां परस्मैपदात्मनेपदानां मध्यमस्य त्रयस्य बहुषु वर्तमानस्य स्थाने इत्था हच् इत्येतावादेशौ भवतः॥ हसित्था। हसह । वेवित्था। वेवह ॥ बाहुलकादित्थान्यत्रापि । यद्यत्ते रोचते । जं जं ते रोइत्था । हच् इति चकारः इह-हचोर्हस्य [४.२६८] इत्यत्र विशेषणार्थः ॥

तृतीयस्य मो-मु-माः ॥ १४४ ॥

त्यादीनां परस्मैपदात्मनेपदानां तृतीयस्य त्रयस्य संबन्धिनो बहुषु वर्तमानस्य वचनस्य स्थाने मो मु म इत्येते आदेशा भवन्ति ॥ हसामो । हसामु । हसाम । तुवरामो । तुवरामु । तुवराम ॥

अत एवैच् से ॥ १४५ ॥

त्यादेः स्थाने यौ एच् से इत्येतावादेशावुक्तौ तावकारान्तादेव भवतो नान्यस्मात् ॥ हसए । हससे ॥ तुवरए । तुवरसे ॥ करए । करसे ॥ अत इति किम् । ठाइ । ठासि ॥ वसुआइ । वसुआसि ॥ होइ । होसि । एवकारोकारान्ताद् एच् से एव भवत इति विपरीतावधारणनिषेधार्थः । तेनाकारान्ताद् इच सि इत्येतावपि सिद्धौ ॥ हसइ । हससि ॥ वेवइ । वेवसि ॥

सिनास्तेः सिः ॥ १४६ ॥

सिना द्वितीयत्रिकादेशेन सह अस्तेः सिरादेशो भवति ॥ निठ्ठुरो जं सि ॥ सिनेति किम् । सेआदेशे सति अत्थि तुमं ॥

---

१ B कविहियअसा°. २ A °दात्मने°. ३ B °स्य वचनस्य स्था°. ४ B वेविह. ५ P बहुलाधिकारात्. ६ B °स्य स्था° ७ B इत्यादे°. ८ A ||स.

मि-मो-मैर्म्हि-म्हो-म्हा वा ॥ १४७ ॥

अस्तेर्धातोः स्थाने मि मो म इत्यादेशैः सह यथासंख्यं म्हि म्हो म्ह इत्यादेशा वा भवन्ति ॥ एस म्हि । एषोस्मीत्यर्थः ॥ गयम्हो । गयम्ह । मुकारस्याग्रहणादप्रयोग एव तस्येत्यवसीयते । पक्षे अत्थि अहं । अत्थि अम्हे । अत्थि अम्हो ॥ ननु च सिद्धावस्थायां पक्ष्म-श्म-ष्म-स्म-ह्मां म्हः [२.७४] इत्यनेन म्हादेशे म्हो इति सिध्यति । सत्यम् । किं तु विभक्तिविधौ प्रायः साध्यमानावस्थाङ्गीक्रियते । अन्यथा वच्छेण । वच्छेसु । सव्वे । जे । ते । के इत्याद्यर्थं सूत्राण्यनारम्भणीयानि स्युः ॥

अत्थिस्त्यादिना ॥ १४८ ॥

अस्तेः स्थाने त्यादिभिः सह अत्थि इत्यादेशो भवति ॥ अत्थि सो । अत्थि ते[1] । अत्थि तुमं । अत्थि तुम्हे । अत्थि अहं । अत्थि अम्हे ॥

णेरदेदावावे ॥ १४९ ॥

णेः स्थाने अत् एत् आव आवे एते चत्वार आदेशा भवन्ति ॥ दरिसइ[2] । कारेइ[3] । करावइ । करावेइ ॥ हासेइ । हसावइ । हसावेइ ॥ उवसामेइ । उवसमावइ । उवसमावेइ ॥ बहुलाधिकारात् क्वचिदेन्नास्ति । जाणावेइ ॥ क्वचिद् आवे नास्ति । पाएइ । भावेइ ॥

गुर्वादेरविर्वा ॥ १५० ॥

गुर्वादेर्णेः स्थाने अवि इत्यादेशो वा भवति ॥ शोषितम् । सोसविअं । सोसिअं ॥ तोषितम् । तोसविअं । तोसिअं ॥

भ्रमेराडो वा ॥ १५१ ॥

भ्रमेः परस्य णेराड[4] आदेशो वा भवति ॥ भमाडइ । भमाडेइ । पक्षे । भामेइ । भमावइ । भमावेइ ॥

---

१ B °ते । अत्थि अम्हे ॥. २ A दरसइ. ३ A °इ । हासेइ. ४ B °राड इत्यादे°.

लुगावी क्त-भाव-कर्मसु ॥ १५२ ॥

णेः स्थाने लुक् आवि इत्यादेशौ भवतः क्ते भावकर्मविहिते च प्रत्यये परतः ॥ कारिअं । कराविअं ॥ हासिअं । हसाविअं ॥ खामिअं । खमाविअं ॥ भावकर्मणोः । कारीअइ । करावीअइ । कारिज्जइ । कराविज्जइ । हासीअइ । हसावीअइ । हासिज्जइ । हसाविज्जइ ॥

अदेल्लुक्यादेरत आः ॥ १५३ ॥

णेरदेल्लोपेषु कृतेषु आदेरकारस्य आ भवति ॥ अति । पाडइ । मारइ ॥ एति । कारेइ । खामेइ ॥ लुकि । कारिअं । खामिअं । कारीअइ । खामीअइ । कारिज्जइ । खामिज्जइ ॥ अदेल्लुकीति किम् । कराविअं । करावीअइ । कराविज्जइ ॥ आदेरिति किम् । संगामेइ । इह व्यवहितस्य मा भूत् ॥ कारिअं । इहान्त्यस्य मा भूत् ॥ अत इति किम् । दूसेइ ॥ केचित्तु आवेआव्यादेशयोरप्यादेरत आत्वमिच्छन्ति । कारावेइ । हासाविओ जणो सामलीए ॥

मौ वा ॥ १५४ ॥

अत आ इति वर्तते । अदन्ताद्धातोर्मौ परे अत आत्वं वा भवति ॥ हसामि हसमि । जाणामि जाणमि । लिहामि लिहमि ॥ अत इत्येव । होमि ॥

इच्च मो-मु-मे वा ॥ १५५ ॥

अकारान्ताद्धातोः परेषु मोमुमेषु अत इत्वं चकारादात्वं च वा भवतः ॥ भणिमो भणामो । भणिमु भणामु । भणिम भणाम । पक्षे । भणमो । भणमु । भणम ॥ वर्तमाना-पञ्चमी-शतृषु वा [३.१५८] इत्येत्वे तु भणेमो । भणेमु । भणेम ॥ अत इत्येव । ठामो । होमो ॥

क्ते ॥ १५६ ॥

क्ते परतोत इत्वं भवति ॥ हसिअं । पढिअं । नविअं । हासिअं ।

---

१ A कारिज्ज ।. २ A ति । पा°. ३ B °वी°. ४ A °रे आत्वं. ५ B आका°. ६ B त्वं वा भवति.

पाढिअं ॥ गयं नयमित्यादि तु सिद्धावस्थापेक्षणात् ॥ अत इत्येव । झायं । लुअं । हुअं ॥

एच्च क्त्वा-तुम्-तव्य-भविष्यत्सु ॥ १५७ ॥

क्त्वातुम्तव्येषु भविष्यत्कालविहिते च प्रत्यये परतोत एकारश्चकारादिकारश्च भवति ॥ क्त्वा । हसेऊण । हसिऊण ॥ तुम् । हसेउं । हसिउं ॥ तव्य । हसेअव्वं । हसिअव्वं ॥ भविष्यत् । हसेहिइ । हसिहिइ ॥ अत इत्येव । काऊण ॥

वर्तमाना-पञ्चमी-शतृषु वा ॥ १५८ ॥

वर्तमानापञ्चमीशतृषु[1] परत अकारस्य स्थाने एकारो वा भवति ॥ वर्तमाना । हसेइ हसइ । हसेम हसिम । हसेमु हसिमु[2] ॥ पञ्चमी । हसेउ हसउ । सुणेउ सुणउ ॥ शतृ । हसेन्तो हसन्तो ॥ क्वचिन्न भवति । जयइ ॥ कचिदात्वमपि । सुणाउ[3] ॥

ज्जा-ज्जे ॥ १५९ ॥

ज्जा ज्ज इत्यादेशयोः परयोरकारस्य एकारो भवति ॥ हसेज्जा । हसेज्ज ॥ अत इत्येव । होज्जा । होज्ज ॥

ईअ-इज्जौ क्यस्य ॥ १६० ॥

चिजिप्रभृतीनां भावकर्मविधिं वक्ष्यामः । येषां तु न वक्ष्यते तेषां संस्कृतातिदेशात्प्राप्तस्य[4] क्यस्य स्थाने ईअ इज्ज इत्येतावादेशौ भवतः ॥ हसीअइ । हसिज्जइ । हसीअन्तो । हसिज्जन्तो । हसीअमाणो । हसिज्जमाणो । पढीअइ । पढिज्जइ । होईअइ । होइज्जइ ॥ बहुलाधिकारात् क्वचित् क्योपि विकल्पेन भवति । मए नवेज्ज[5] । मए नविज्जेज्ज[6] । तेण लहेज्ज । तेण लहिज्जेज्ज । तेण अच्छेज्ज । तेण अच्छिज्जेज्ज[7] । तेण अच्छीअइ ॥

---

१ B °दिषु तु. २ P °मु । हसेमो । हसिमो । प°. ३ B सुणाओ. ४ A °स्य स्थाने इत्ये°. ५ P मए न वेज्ज. ६ P मए न विज्जेज्ज. ७ B °ज्ज । तेण अच्छीअइ.

दृशि-वचेर्डीस-डुच्चं[1] ॥ १६१ ॥

दृशेर्वचेश्च परस्य क्यस्य स्थाने यथासंख्यं डीस डुच्च इत्यादेशौ भवतः । ईअइज्जापवादः ॥ दीसइ । वुच्चइ ॥

सी ही हीअ भूतार्थस्य ॥ १६२ ॥

भूतेर्थे विहितोद्यतन्यादि:[2] प्रत्ययो भूतार्थः तस्य स्थाने सी ही हीअ इत्यादेशा भवन्ति ॥ उत्तरत्र व्यञ्जनादीअविधानात् स्वरान्तादेवायं विधिः ॥ कासी । काही । काहीअ । अकार्षीत् । अकरोत् । चकार वेत्यर्थः । एवं ठासी । ठाही । ठाहीअ ॥ आर्षे । देविन्दो इणमब्बवी इत्यादौ सिद्धावस्थाश्रयणात् ह्यस्तन्याः प्रयोगः ॥

व्यञ्जनादीअः ॥ १६३ ॥

व्यञ्जनान्ताद्धातोः परस्य भूतार्थस्याद्यतन्यादिप्रत्ययस्य ईअ इत्यादेशो भवति ॥ हुवीअ । अभूत् । अभवत् । बभूवेत्यर्थः ॥ एवं अच्छीअ । आसिष्ट । आस्त । आसांचक्रे वा ॥ गेण्हीअ । अग्रहीत्[3] । अगृण्हात् । जग्राह वा ॥

तेनास्तेरास्यहेसी ॥ १६४ ॥

अस्तेर्धातोस्तेन भूतार्थेन प्रत्ययेन सह आसि अहेसि इत्यादेशौ भवतः ॥ आसि सो तुमं अहं वा । जे[4] आसि । ये आसन्नित्यर्थः[5] । एवं अहेसि ॥

ज्जात्सप्तम्या इर्वा ॥ १६५ ॥

सप्तम्यादेशात् ज्जात्पर इर्वा प्रयोक्तव्यः ॥ भवेत् । होज्जइ । होज्ज ॥

भविष्यति हिरादिः ॥ १६६ ॥

भविष्यदर्थे[6] विहिते प्रत्यये परे तस्यैवादिर्हिः[7] प्रयोक्तव्यः ॥ होहिइ । भविष्यति भविता वेत्यर्थः ॥ एवं होहिन्ति । होहिसि । होहित्था । हसिहिइ । काहिइ ॥

---

१ B °डुच्चा. २ A °न्यादि°. ३ A अगृहीत्. ४ A ये. ५ B °र्वाभवनि ॥. ६ P B °दर्थवि°. ७ B °थादेर्हिः.

मि-मो-मु-मे स्सा हा न वा ॥ १६७ ॥

भविष्यत्यर्थे मिमोमुमेषु तृतीयत्रिकादेशेषु परेषु तेषामेवादी स्सा हा इत्येतौ वा प्रयोक्तव्यौ । हेरपवादौ[1] ॥ पक्षे हिरपि ॥ होस्सामि होहामि । होस्सामो होहामो । होस्सामु होहामु । होस्साम होहाम ॥ पक्षे । होहिमि । होहिमो । होहिमु । होहिम ॥ कचित्तु हा न भवति[2] । हसिस्सामो । हसिहिमो ॥

मो-मु-मानां हिस्सा हित्था ॥ १६८ ॥

धातोः परौ भविष्यति काले मोमुमानां स्थाने हिस्सा हित्था इत्येतौ वा प्रयोक्तव्यौ ॥ होहिस्सा । होहित्था । हसिहिस्सा । हसिहित्था । पक्षे । होहिमो । होस्सामो । होहामो । इत्यादि ॥

मेः स्सं ॥ १६९ ॥

धातोः परो[3] भविष्यति[4] काले म्यादेशस्य स्थाने स्सं वा प्रयोक्तव्यः ॥ होस्सं । हसिस्सं । कित्तइस्सं । पक्षे । होहिमि । होस्सामि । होहामि । कित्तइहिमि ॥

कृ-दो हं ॥ १७० ॥

करोतेर्ददातेश्च परो भविष्यति विहितस्य म्यादेशस्य स्थाने हं वा प्रयोक्तव्यः ॥ काहं । दाहं । करिष्यामि दास्यामीत्यर्थः ॥ पक्षे । काहिमि । दाहिमि । इत्यादि ॥

श्रु-गमि-रुदि-विदि-दृशि-मुचि-वचि-छिदि-भिदि-भुजां सोच्छं गच्छं रोच्छं वेच्छं दच्छं मोच्छं वोच्छं[5] छेच्छं भेच्छं भोच्छं ॥१७१॥

श्वादीनां धातूनां भविष्यद्विहितम्यन्तानां स्थाने सोच्छमित्यादयो[6] निपात्यन्ते ॥ सोच्छं । श्रोष्यामि ॥ गच्छं । गमिष्यामि ॥ सं-

---

१ P °वादः. २ A P °ति । हासिहिमो. ३ B परे. ४ A °ष्यत्काले. ५ B वच्छं. ६ P B °यो वा नि°.

गच्छं । संगंस्ये ॥ रोच्छं । रोदिष्यामि ॥ विदं ज्ञाने । वेच्छं । वेदिष्यामि ॥ दच्छं । द्रक्ष्यामि ॥ मोच्छं । मोक्ष्यामि । वोच्छं । वक्ष्यामि ॥ छेच्छं । छेत्स्यामि ॥ भेच्छं । भेत्स्यामि ॥ भोच्छं । भोक्ष्ये ॥

सोच्छादय इजादिषु हिलुक् च वा ॥ १७२ ॥

श्वादीनां स्थाने इजादिषु भविष्यदादेशेषु यथासंख्यं सोच्छादयो भवन्ति । ते एवादेशा अन्त्यस्वराद्यवयववर्जा इत्यर्थः । हिलुक् च वा भवति ॥ सोच्छिइ । पक्षे । सोच्छिहिइ । एवं सोच्छिन्ति । सोच्छिहिन्ति । सोच्छिसि । सोच्छिहिसि । सोच्छित्था । सोच्छिहित्था । सोच्छिह । सोच्छिहिह । सोच्छिमि । सोच्छिहिमि । सोच्छिस्सामि । सोच्छिहामि । सोच्छिस्सं । सोच्छं । सोच्छिमो । सोच्छिहिमो । सोच्छिस्सामो । सोच्छिहामो । सोच्छिहिस्सा । सोच्छिहित्था । एवं मुमयोरपि ॥ गच्छिइ । गच्छिहिइ । गच्छिन्ति । गच्छिहिन्ति । गच्छिसि । गच्छिहिसि । गच्छित्था । गच्छिहित्था । गच्छिह । गच्छिहिह । गच्छिमि । गच्छिहिमि । गच्छिस्सामि । गच्छिहामि । गच्छिस्सं । गच्छं । गच्छिमो । गच्छिहिमो । गच्छिस्सामो । गच्छिहामो । गच्छिहिस्सा । गच्छिहित्था । एवं मुमयोरपि ॥ एवं रुदादीनामप्युदाहार्यम् ॥

दु सु मु विध्यादिष्वेकस्मिंस्त्रयाणाम् ॥ १७३ ॥

विध्यादिष्वर्थेषूत्पन्नानामेकत्वेर्थे वर्तमानानां त्रयाणामपि त्रिकाणां स्थाने यथासंख्यं दु सु मु इत्येते आदेशा भवन्ति ॥ हसउ सा । हससु तुमं । हसामु अहं ॥ पेच्छउ । पेच्छसु । पेच्छामु ॥ दकारोच्चारणं भाषान्तरार्थम् ॥

सोर्हिर्वा ॥ १७४ ॥

पूर्वसूत्रविहितस्य सोः स्थाने हिरादेशो वा भवति ॥ देहि देसु ॥

---

१ A विदक्. २ B °दादिषु. ३ B °वर्ज्या. ४ A गच्छिस्थ. ५ B °नामनेकार्थे°.

अत इज्जस्विज्जहीज्जे-लुको वा ॥ १७५ ॥

अकारात्परस्य सोः इज्जसु इज्जहि इज्जे इत्येते लुक् च आदेशा वा भवन्ति ॥ हसेज्जसु । हसेज्जहि । हसेज्जे । हस । पक्षे । हससु ॥ अत इति किम् । होसु । ठाहि ॥

बहुषु न्तु ह मो ॥ १७६ ॥

विध्यादिषूत्पन्नानां बहुष्वर्थेषु वर्तमानानां त्रयाणां त्रिकाणां स्थाने यथासंख्यं न्तु ह मो इत्येते आदेशा भवन्ति ॥ न्तु । हसन्तु । हसन्तु हसेयुर्वा ॥ ह । हसह । हसत । हसेत वा ॥ मो । हसामो । हसाम । हसेम वा ॥ एवं तुवरन्तु । तुवरह । तुवरामो ॥

वर्तमाना-भविष्यन्त्योश्च ज्ज ज्जा वा ॥ १७७ ॥

वर्तमानाया भविष्यन्त्याश्च विध्यादिषु च विहितस्य प्रत्ययस्य स्थाने ज्ज ज्जा इत्येतावादेशौ वा भवतः ॥ पक्षे यथाप्राप्तम् ॥ वर्तमाना । हसेज्ज । हसेज्जा । पढेज्ज । पढेज्जा । सुणेज्ज । सुणेज्जा ॥ पक्षे । हसइ । पढइ । सुणइ ॥ भविष्यन्ती । पढेज्ज । पढेज्जा । पक्षे । पढिहिइ ॥ विध्यादिषु । हसेज्ज । हसिज्जा । हसतु । हसेद्वा इत्यर्थः । पक्षे । हसउ ॥ एवं सर्वत्र । यथा तृतीयत्रये । अइवाएज्जा । अइवायाविज्जा । न समणुजाणामि । न समणुजाणेज्जा वा ॥ अन्ये त्वन्यासामपीच्छन्ति । होज्ज । भवति । भवेत् । भवतु । अभवत् । अभूत् । बभूव । भूयात् । भविता । भविष्यति । अभविष्यद्वेत्यर्थः ॥

मध्ये च स्वरान्ताद्वा ॥ १७८ ॥

स्वरान्ताद्धातोः प्रकृतिप्रत्यययोर्मध्ये चकारात्प्रत्ययानां च स्थाने ज्ज ज्जा इत्येतौ वा भवतः वर्तमानाभविष्यन्त्योर्विध्यादिषु च ॥ वर्तमाना । होज्जइ । होज्जाइ । होज्ज । होज्जा । पक्षे । होइ ॥ एवं होज्जसि । होज्जासि । होज्ज । होज्जा । होसि । इत्यादि ॥ भविष्यन्ती । होज्जहिइ । होज्जाहिइ । होज्ज । होज्जा । पक्षे । होहिइ ॥ एवं होज्जहिसि । होज्जाहिसि । होज्ज । होज्जा । होहिसि । होज्जहिमि । होज्जाहिमि । हो-

---

१ B हसिज्जहि. २ B सहइ. ३ P B हसेज्जा. ४ B °याविज्जा. ५ B होज्जा. ६ A अभूव. ७ B होज्जिहिमि.

जस्सामि । होज्जहामि । होज्जस्सं । होज्ज । होज्जा । इत्यादि ॥ विध्यादिषु । होज्जउ । होज्जाउ । होज्ज । होज्जा । भवतु भवेद्वेत्यर्थः । पक्षे । होउ ॥ स्वरान्तादिति किम् । हसेज्ज । हसेज्जा । तुवरेज्ज । तुवरेज्जा ॥

क्रियातिपत्तेः ॥ १७९ ॥

क्रियातिपत्तेः स्थाने ज्जज्जावादेशौ भवतः ॥ होज्ज । होज्जा । अभविष्यदित्यर्थः । जइ होज्ज वण्णणिज्जो ॥

न्त-माणौ ॥ १८० ॥

क्रियातिपत्तेः स्थाने न्तमाणौ आदेशौ भवतः ॥ होन्तो । होमाणो । अभविष्यदित्यर्थः ॥

हरिण-ट्ठाणे हरिणङ्क जइ सि हरिणाहिवं निवेसन्तो ।
न सहन्तो च्चिअ तो राहुपरिहवं से जिअन्तस्स ॥

शत्रानशः ॥ १८१ ॥

शतृआनश् इत्येतयोः प्रत्येकं न्त माण इत्येतावादेशौ भवतः ॥ शतृ । हसन्तो हसमाणो ॥ आनश् । वेवन्तो वेवमाणो ॥

ई च स्त्रियाम् ॥ १८२ ॥

स्त्रियां वर्तमानयोः शत्रानशोः स्थाने ई चकारात् न्तमाणौ च भवन्ति ॥ हसई । हसन्ती । हसमाणी । वेवई । वेवन्ती । वेवमाणी ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनवृत्तौ अष्टमस्याध्यायस्य तृतीयः पादः ॥ ३ ॥

ऊर्ध्वं स्वर्गनिकेतनादपि तले पातालमूलादपि
त्वत्कीर्तिर्भ्रमति क्षितीश्वरमणे पारे पयोधेरपि ।
तेनास्याः प्रमदास्वभावसुलभैरुच्चावचैश्चापलै-
र्ते वाचंयमवृत्तयोऽपि मुनयो मौनव्रतं त्याजिताः ॥ १ ॥

सर्वविदे नमः ॥

---

१ B तुरवे°. २ P °र्थः ॥ जइ. ३ B हसंतो. ४ P °नं ॥ शृ°. ५ B °नशा. ६ A आनशइ°. B आनइ°. ७ A आनशः. B आनश. ८ B भवतः. ९ A हसमाणा. १० B अष्टमाध्या°. ११ P B °दः समाप्तः ॥.

अर्हं ॥ इदितो वा ॥ १ ॥

सूत्रे ये इदितो धातवो वक्ष्यन्ते तेषां ये आदेशास्ते विकल्पेन भवन्तीति वेदितव्यम् । तत्रैवं[1] चोदाहरिष्यते ॥

कथेर्वज्जर-पज्जरोप्पाल-पिसुण-सङ्घ-बोल्ल-चव-जम्प-सीस-साहाः ॥ २ ॥

कथेर्धातोर्वज्जरादयो दशादेशा[2] वा भवन्ति ॥ वज्जरइ । पज्जरइ । उप्पालइ । पिसुणइ । सङ्घइ । बोल्लइ । चवइ । जम्पइ । सीसइ । साहइ ॥ उच्चुक्कइ इति तूत्पूर्वस्य बुक्क भाषणे[3] इत्यस्य । पक्षे । कहइ ॥ एते चान्यैर्देशीषु पठिता अपि अस्माभिर्धात्वादेशीकृता विविधेषु प्रत्ययेषु प्रतिष्ठन्तामिति[4] ॥ तथा च । वज्जरिओ कथितः । वज्जरिऊण कथयित्वा । वज्जरणं कथनम् । वज्जरन्तो कथयन् । वज्जरिअव्वं कथयितव्यमिति रूपसहस्राणि सिध्यन्ति । संस्कृतधातुवच्च प्रत्ययलोपागमादिविधिः ॥

दुःखे णिव्वरः ॥ ३ ॥

दुःखविषयस्य कथेर्णिव्वर[5] इत्यादेशो वा भवति ॥ णिव्वरइ । दुःखं कथयतीत्यर्थः ॥

जुगुप्सेर्झुण-दुगुच्छ-दुगुञ्छाः ॥ ४ ॥

जुगुप्सेरेते[6] त्रय आदेशा वा भवन्ति ॥ झुणइ । दुगुच्छइ । दुगुञ्छइ । पक्षे । जुगुच्छइ ॥ गलोपे । दुउच्छइ । दुउञ्छइ । जुउच्छइ ॥

---

१ B तत्रैवोदाहियते. २ B °शा भ°. ३ B भाषणे. ४ B °तिष्ठिता इ°. ५ B णिव्वर°. ६ B °जुगुप्सइ°.

बुभुक्षि-वीज्योर्णीरव-वोज्जौ ॥ ५ ॥[1]

बुभुक्षेराचारक्विबन्तस्य च वीजेर्यथासंख्यमेतावादेशौ वा भवतः ॥ णीरवइ । बुहुक्खइ । वोज्जइ । वीजइ ॥

ध्या-गोर्झा-गौ ॥ ६ ॥

अनयोर्यथासंख्यं झा गा इत्यादेशौ भवतः ॥ झाइ । झाअइ । णिज्झाइ । णिज्झाअइ । निपूर्वो दर्शनार्थः । गाइ । गायइ । झाणं । गाणं ॥

ज्ञो जाण-मुणौ ॥ ७ ॥

जानातेर्जाण मुण इत्यादेशौ भवतः ॥ जाणइ । मुणइ ॥ बहुलाधिकारात्क्वचिद्विकल्पः । जाणिअं । णायं । जाणिऊण । णाऊण । जाणणं । णाणं । मणइ इति तु मन्यतेः ॥

उदो ध्मो धुमा ॥ ८ ॥

उदः परस्य ध्मो धातोर्धुमा इत्यादेशो भवति ॥ उद्धुमाइ ॥

श्रदो धो दहः ॥ ९ ॥

श्रदः परस्य दधातेर्दह इत्यादेशो भवति ॥ सद्दहइ । सद्दहमाणो जीवो ॥

पिबेः पिज्ज-डल्ल-पट्ट-घोट्टाः ॥ १० ॥

पिबतेरेते चत्वार आदेशा वा भवन्ति ॥ पिज्जइ । डल्लइ । पट्टइ । घोट्टइ । पिअइ ॥

उद्वातेरोरुम्मा वसुआ ॥ ११ ॥

उत्पूर्वस्य वातेः ओरुम्मा वसुआ इत्येतावादेशौ वा भवतः ॥ ओरुम्माइ । वसुआइ । उव्वाइ ॥

---

१ B बुभुक्षुवीजोर्णी°. २ A बहु°. ३ A °इ । निपू°. ४ B णणइ इति तु मन्यते. ५ B ध्माधा°. ६ B °डुल्ल°. ७ B डुल्लइ. ८ Our Sutra and Kumárpal-charita Mss. read ङ् instead of ने in Sutras 11, 12 & 14. ९ B डत्यादे°.

निद्रातेरोहीरोङ्घौ ॥ १२ ॥

निपूर्वस्य द्रातेः ओहीर उङ्घ इत्यादेशौ वा भवतः ॥ ओहीरइ । उं-ङ्घइ । निद्दाइ ॥

आघ्रेराइग्घः ॥ १३ ॥

आजिघ्रतेराइग्घ इत्यादेशो वा भवति ॥ आइग्घइ । अग्घाइ ॥

स्नातेरब्भुत्तः ॥ १४ ॥

स्नातेरब्भुत्त इत्यादेशो वा भवति ॥ अब्भुत्तइ । ण्हाइ ॥

समः स्त्यः खाः ॥ १५ ॥

संपूर्वस्य स्त्यायतेः खा इत्यादेशो भवति ॥ संखाइ । संखायं ॥

स्थष्ठा-थक्क-चिट्ठ-निरप्पाः ॥ १६ ॥

तिष्ठतेरेते चत्वार आदेशा भवन्ति ॥ ठाइ । ठाअइ । ठाणं । पट्ठिओ । उट्ठिओ । पट्ठाविओ । उट्ठाविओ । थक्कइ । चिट्ठइ । चिट्ठिऊण । निरप्पइ ॥ बहुलाधिकारात्क्वचिन्न भवति । थिअं । थाणं । पत्थिओ । उत्थिओ । थाऊण ॥

उदष्ठ-कुक्कुरौ ॥ १७ ॥

उदः परस्य तिष्ठतेः ठ कुक्कुर इत्यादेशौ भवतः ॥ उट्ठइ । उक्कुक्कुरइ ॥

म्लेर्वा-पव्वायौ ॥ १८ ॥

म्लायतेर्वा पव्वाय इत्यादेशौ वा भवतः ॥ वाइ । पव्वायइ । मिलाइ ॥

निर्मो निम्माण-निम्मवौ ॥ १९ ॥

निर्पूर्वस्य मिमीतेरेतावादेशौ भवतः ॥ निम्माणइ । निम्मवइ ॥

---

1 Our Sutra and Kumarapalacharita Mss. read के instead of ते in Sutras 11, 12 & 14. 2 B °ङ्गौ. 3 B ओङ्घ. 4 B इत्येतावादे°. 5 B ओङ्घइ. 6 B आग्घा°. 7 P B °ग्घाअइ. 8 B ण्हा°. 9 B °शो वा भ°. 10 B संखाइयं. 11 B °ओ। था°. 12 B °कुक्कुरइ. 13 A °शौ वा भ°.

क्षेर्णिज्झरो वा ॥ २० ॥

क्षयतेर्णिज्झर इत्यादेशो वा भवति ॥ णिज्झरइ । पक्षे । झिज्जइ ॥

छदेर्णेर्णुम-नूम-सन्नुम-ढक्कौम्वाल-पव्वालाः ॥ २१ ॥

छदेर्ण्यन्तस्य एते षडादेशा वा भवन्ति ॥ णुमइ । नूमइ । णत्वे णूमइ । सन्नुमइ । ढक्कइ । ओम्वालइ । पव्वालइ । छायइ ॥

निवि[1]पत्योर्णिहोडः ॥ २२ ॥

निवृ[2]गः पतेश्च ण्यन्तस्य णिहोड इत्यादेशो वा भवति ॥ णिहोडइ । पक्षे । निवारेइ । पाडेइ ॥

दूङो दूमः ॥ २३ ॥

दूङो ण्यन्तस्य दूम इत्यादेशो भवति ॥ दूमेइ मज्झ हिअयं ॥

धवलेर्दुमः ॥ २४ ॥

धवलयतेर्ण्यन्तस्य दुमादेशो वा भवति ॥ दुमइ । धवलइ ॥ स्वराणां स्वरा (बहुलम्)[४.२३८] इति दीर्घत्वमपि । दूमिअं । धवलितमित्यर्थः ॥

तुलेरोहामः ॥ २५ ॥

तुलेर्ण्यन्तस्य ओहाम इत्यादेशो वा भवति ॥ ओहामइ । तुलइ ॥

विरि[3]चेरोलुण्डोल्लुण्ड-पल्हत्थाः ॥ २६ ॥

विरेचयतेर्ण्यन्तस्य ओलुण्डाद[4]यस्त्रय आदे[5]शा वा भवन्ति ॥ ओलुण्डइ । उल्लुण्डइ । पल्हत्थइ । विरेअइ ॥

तडेराहोड-विहोडौ ॥ २७ ॥

तडेर्ण्यन्तस्य एतावादेशौ वा भवतः ॥ आहोडइ । विहोडइ । पक्षे । ताडेइ ॥

---

१ P B निवृप°. २ P निवृग्ः. ३ B विरेचो. ४ B °य आ°. ५ A B °शा भ°.

मिश्रेर्वीसाल-मेलवौ ॥ २८ ॥

मिश्रयतेर्ण्यन्तस्य वीसाल मेलव इत्यादेशौ वा भवतः ॥ वीसालइ । मेलवइ । मिस्सइ ॥

उद्धूलेर्गुण्ठः ॥ २९ ॥

उद्धूलेर्ण्यन्तस्य गुण्ठ इत्यादेशो वा भवति ॥ गुण्ठइ । पक्षे । उद्धूलेइ ॥

भ्रमेस्तालिअण्ट-तमाडौ ॥ ३० ॥

भ्रमयतेर्ण्यन्तस्य तालिअण्ट तमाड इत्यादेशौ[1] वा भवतः ॥ तालिअण्टइ । तमाडइ । भामेइ । भमाडेइ[2] । भमावेइ ॥

नशेर्विउड-नासव-हारव-विप्पगाल-पलावाः ॥ ३१ ॥

नशेर्ण्यन्तस्य एते पञ्चादेशा वा भवन्ति ॥ विउडइ । नासवइ । हारवइ । विप्पगालइ[3] । पलावइ[4] । पक्षे । नासइ ॥

दृशेर्दाव-दंस-दक्खवाः ॥ ३२ ॥

दृशेर्ण्यन्तस्य एते त्रय आदेशा वा भवन्ति ॥ दावइ । दंसइ । दक्खवइ । दरिसइ ॥

उद्घटेरुग्गः ॥ ३३ ॥

उत्पूर्वस्य घटेर्ण्यन्तस्य उग्ग इत्यादेशो वा भवति ॥ उग्गइ । उग्घाडइ ॥

स्पृहः सिहः ॥ ३४ ॥

स्पृहो[5] ण्यन्तस्य सिह इत्यादेशो[6] भवति ॥ सिहइ ॥

संभावेरासङ्घः ॥ ३५ ॥

संभावयतेरासङ्घ इत्यादेशो वा भवति ॥ आसङ्घइ । संभावइ ॥

---

१ B भ्रमते°. २ B °डइ. ३ B °प्पइ । गा°. ४ P B °इ । ना°. ५ B स्पृहे-र्ण्यंत°. ६ B °शो वा भ°.

उन्नमेरुत्थङ्घोल्लाल-गुलुगुञ्छोप्पेलाः ॥ ३६ ॥

उत्पूर्वस्य नमेर्ण्यन्तस्य एते चत्वार आदेशा वा भवन्ति ॥ उत्थङ्घइ। उल्लालइ। गुलुगुञ्छइ। उप्पेलइ। उन्नावइ ॥

प्रस्थापेः पट्ठव-पेण्डवौ ॥ ३७ ॥

प्रपूर्वस्य तिष्ठतेर्ण्यन्तस्य पट्ठव पेण्डव इत्यादेशौ वा भवतः ॥ पट्ठवइ। पेण्डवइ। पट्ठावइ ॥

विज्ञपेर्वोक्कावुक्कौ ॥ ३८ ॥

विपूर्वस्य जानातेर्ण्यन्तस्य वोक्क अवुक्क इत्यादेशौ वा भवतः ॥ वोक्कइ। अँवुक्कइ। विण्णवइ ॥

अर्पेरल्लिव-चच्चुप्प-पणामाः ॥ ३९ ॥

अर्पेर्ण्यन्तस्य एते त्रय आदेशा वा भवन्ति ॥ अल्लिवइ। चच्चुप्पइ। पणामइ। पक्षे। अप्पेइ ॥

यापेर्जवः ॥ ४० ॥

यातेर्ण्यन्तस्य जव इत्यादेशो वा भवति ॥ जवइ जावेइ ॥

प्लावेरोम्वाल-पव्वालौ ॥ ४१ ॥

प्लवतेर्ण्यन्तस्य एतावादेशौ वा भवतः ॥ ओम्वालइ। पव्वालइ। पावेइ ॥

विकोशेः पक्खोडः ॥ ४२ ॥

विकोशयतेर्नामधातोर्ण्यन्तस्य पक्खोड इत्यादेशो वा भवति ॥ पक्खोडइ। विकोसइ ॥

रोमन्थे रोग्गाल-वग्गोलौ ॥ ४३ ॥

रोमन्थेर्नामधातोर्ण्यन्तस्य एतावादेशौ वा भवतः ॥ ओग्गालइ। वग्गोलइ। रोमन्थइ ॥

---

१ B °रुत्थंघो°. २ P गुलगु°. ३ B उत्थंघ°. ४ P उन्नामइ. ५ A B विज्ञपे. ६ P B इत्येतावादे°. ७ P अवुक्क. ८ A [illegible]. ९ B [illegible] पावेइ.

कमेर्णिहुवः ॥ ४४ ॥

कमेः स्वार्थ[1]ण्यन्तस्य णिहुव इत्यादेशो वा भवति ॥ णिहुवइ । कामेइ ॥

प्रकाशेर्णुव्वः ॥ ४५ ॥

प्रकाशेर्ण्यन्तस्य णुव्व इत्यादेशो वा भवति ॥ णुव्वइ । पयासेइ ॥

कम्पेर्विच्छोलः ॥ ४६ ॥

कम्पेर्ण्यन्तस्य विच्छोल इत्यादेशो वा भवति ॥ विच्छोलइ । कम्पेइ ॥

आरोपेर्वलः ॥ ४७ ॥

आरुहेर्ण्यन्तस्य वल इत्यादेशो वा भवति ॥ वलइ । आरोवेइ ॥

दोले रङ्खोलः ॥ ४८ ॥

दुलेः स्वार्थे ण्यन्तस्य रङ्खोल इत्यादेशो वा भवति ॥ रङ्खोलइ । दोलेइ ॥

रञ्जेरावः ॥ ४९ ॥

रञ्जेर्ण्यन्तस्य राव इत्यादेशो वा भवति ॥ रावेइ । रञ्जेइ ॥

घटेः परिवाडः ॥ ५० ॥

घटेर्ण्यन्तस्य परिवाड इत्यादेशो वा भवति ॥ परिवाडेइ । घडेइ ॥

वेष्टेः परिआलः ॥ ५१ ॥

वेष्टेर्ण्यन्तस्य परिआल इत्यादेशो वा भवति ॥ परिआलेइ । वेढेइ ॥

क्रियः किणो वेस्तु क्के च ॥ ५२ ॥

णेरिति निवृत्तम् । क्रीणातेः किण इत्यादेशो भवति । वेः परस्य तु द्विरुक्तः क्केश्चकारात्किणश्च भवति ॥ किणइ । विक्केइ । विक्किणइ ॥

१ P B स्वार्थे ण्य°. २ B रोहेर्वे°. ३ P दोलेः. ४ P दोलेइ. ५ A °शो वा भ°. ६ P केश्चका°. B क्केनका°.

भियो भा-बीहौ ॥ ५३ ॥

बिभेतेरेतावादेशौ भवतः ॥ भाइ[1] । भाइअं । बीहइ । बीहिअं ॥ बहुलाधिकाराद् भीओ ॥

आलीङोल्ली ॥ ५४ ॥

आलीयतेः अल्ली इत्यादेशो भवति ॥ अल्लियइ[2] । अल्लीणो ॥

निलीङ[3]र्णिलीअ-णिलुक्क-णिरिग्घ-लुक्क-लिक्क-ल्हिक्काः ॥५५॥

निलीङ एते षडादेशा वा भवन्ति ॥ णिलीअइ । णिलुक्कइ । णिरिग्घइ । लुक्कइ । लिक्कइ । ल्हिक्कइ । निलिज्जइ[4] ॥

विलीङ[5]र्विरा ॥ ५६ ॥

विलीङ[6]र्विरा इत्यादेशो वा भवति ॥ विराइ । विलिज्जइ ॥

रुते[7] रुञ्ज-रुण्टौ ॥ ५७ ॥

रौतेरेतावादेशौ वा भवतः ॥ रुञ्जइ । रुण्टइ । रवइ[8] ॥

श्रुटेर्हणः ॥ ५८ ॥

शृणोतेर्हण इत्यादेशो वा भवति ॥ हणइ । सुणइ ॥

धूगे[9]र्धुवः ॥ ५९ ॥

धुनाते[10]र्धुव इत्यादेशो वा भवति ॥ धुवइ । धुणइ ॥

भुवेर्हो-हुव-हवाः ॥ ६० ॥

भुवो धातोर्हो हुव हव इत्येते आदेशा[11] वा भवन्ति ॥ होइ । होन्ति । हुवइ । हुवन्ति । हवइ । हवन्ति ॥ पक्षे । भवइ । परिहीण-वि-

---

१ A °इ । भाअइ । बीह°. २ B अल्लीअइ. ३ B °लीङो णि°. ४ P णिलिज्जइ. B निलिज्जइ. ५ B विलीङो विरा. ६ P B विलीङो विरा. ७ P रुके रु°. ८ P रुवइ. ९ P धूञेर्धु°. १० B धुनाते°. ११ A °शा भ°.

हवो । भविउं । पभवइ । परिभवइ । संभवइ ॥ क्वचिदन्यदपि । उब्भुअइ । भत्तं[1] ॥

अविति[2] हुः ॥ ६१ ॥

विद्वर्जे[3] प्रत्यये भुवो हु इत्यादेशो[4] वा भवति ॥ हुन्ति । भवन्[5] । हुन्तो । अवितीति[6] किम् । होइ ॥

पृथक्-स्पष्टे णिव्वडः ॥ ६२ ॥

पृथक्भूते स्पष्टे च कर्तरि भुवो णिव्वड इत्यादेशो भवति ॥ णिव्वडइ । पृथक् स्पष्टो वा भवतीत्यर्थः ॥

प्रभौ हुप्पो वा ॥ ६३ ॥

प्रभुकर्तृकस्य भुवो हुप्प इत्यादेशो वा भवति ॥ प्रभुत्वं च प्रपूर्वस्यैवार्थः । अङ्गेच्चिअ[7] न पहुप्पइ । पक्षे । पभवेइ ॥

क्ते हूः ॥ ६४ ॥

भुवः क्तप्रत्यये[8] हूरादेशो भवति ॥ हूअं । अणुहूअं । पहूअं ॥

कृगेः[9] कुणः ॥ ६५ ॥

कृगः[10] कुण इत्यादेशो वा भवति ॥ कुणइ । करइ ॥

काणेक्षिते णिआरः ॥ ६६ ॥

काणेक्षितविषयस्य कृगो[11] णिआर इत्यादेशो वा भवति ॥ णिआरइ । काणेक्षितं करोति ॥

निष्टम्भावष्टम्भे णिट्ठुह-संदाणं ॥ ६७ ॥

निष्टम्भविषयस्यावष्टम्भविषयस्य च कृगो[12] यथासंख्यं णिट्ठुह संदाण

---

१ B भुत्तं. २ P अचिति. B अविन्ति. ३ P विद्व°. ४ B °शो भ.° ५ P भुवन्. ६ P अचिती°. B अविन्ती°. ७ A चिअ. ८ B क्ते प्र°. ९ P कृञेः. १० P कृञः. B कृगेः. ११ P कृञो णि°. B कृगोर्णि°. १२ P कृञो.

इत्यादेशौ[1] वा भवतः ॥ णिट्टुहइ । निष्टम्भं करोति । संदाणइ । अवष्टम्भं करोति[2] ॥

श्रमे वावम्फः ॥ ६८ ॥

श्रमविषयस्य कृगो[3] वावम्फ इत्यादेशो वा भवति ॥ वावम्फइ । श्रमं करोति ॥

मन्युनौष्ठमालिन्ये णिव्वोलः ॥ ६९ ॥

मन्युना करणेन यदोष्ठमालिन्यं तद्विषयस्य कृगो[3] णिव्वोल इत्यादेशो[4] वा भवति ॥ णिव्वोलइ । मन्युना ओष्ठं मलिनं करोति ॥

शैथिल्य-लम्बने पयल्लः ॥ ७० ॥

शैथिल्यविषयस्य लम्बनविषयस्य च कृगः[5] पयल्ल इत्यादेशो[4] वा भवति ॥ पयल्लइ । शिथिलीभवति लम्बते वा ॥

नि[6]ष्पाताच्छोटे णीलुञ्छः ॥ ७१ ॥

निष्पतनविषयस्य आच्छोटन[7]विषयस्य च कृगो[3] णीलुञ्छ इत्यादेशो भ[8]वति वा ॥ णीलुञ्छइ । निष्पतति । आच्छोटयति वा ॥

क्षुरे कम्मः ॥ ७२ ॥

क्षुरविषयस्य कृगः[5] कम्म इत्यादेशो वा भवति ॥ कम्मइ । क्षुरं करोतीत्यर्थः ॥

चाटौ गुललः ॥ ७३ ॥

चाटुविषयस्य कृगो[3] गुलल इत्यादेशो[9] वा भवति ॥ गुललइ । चाटु करोतीत्यर्थः ॥

---

१ A °शौ भ°. २ B °रोतीत्यर्थः. ३ P कृञो. ४ A °शो भ°. ५ P कृञः. ६ B निष्पना°. ७ A टनवि°. ८ A °ति । णी°. ९ A °शो भ°.

स्मरेर्झर-झूर-भर-भल-लढ-विम्हर-सुमर-पयर-पम्हुहाः[1] ॥७४॥

स्मरेरेते नवादेशा वा भवन्ति ॥ झरइ । झूरइ । भरइ । भलइ । लढइ । विम्हरइ । सुमरइ । पयरइ । पम्हुहइ । सरइ ॥

विस्मुः पम्हुस-विम्हर-वीसराः ॥ ७५ ॥

विस्मरतेरेते आदेशा भवन्ति ॥ पम्हुसइ । विम्हरइ । वीसरइ ॥

व्याहृगेः[2] कोक्क-पोक्कौ ॥ ७६ ॥

व्याहरतेरेतावादेशौ वा भवतः ॥ कोक्कइ । ह्रस्वत्वे तु कुक्कइ । पोक्कइ । पक्षे । वाहरइ ॥

प्रसरेः पयल्लोवेल्लौ ॥ ७७ ॥

प्रसरतेः पयल्ल उवेल्ल[3] इत्येतावादेशौ वा भवतः ॥ पयल्लइ । उवेल्लइ[3] । पसरइ ॥

महमहो गन्धे ॥ ७८ ॥

प्रसरतेर्गन्धविषये महमह इत्यादेशो वा भवति ॥ महमहइ मालई । मालई[4]-गन्धो पसरइ ॥ गन्ध इति किम् । पसरइ ॥

निस्सरेर्णीहर-नील-धाड-वरहाडाः ॥ ७९ ॥

निस्सरतेरेते चत्वार आदेशा वा भवन्ति ॥ णीहरइ[5] । नीलइ । धाडइ । वरहाडइ । नीसरइ ॥

जाग्रेर्जग्गः ॥ ८० ॥

जागर्तेर्जग्ग इत्यादेशो वा भवति ॥ जग्गइ । पक्षे । जागरइ ॥

व्याप्रेराअड्डः ॥ ८१ ॥

व्याप्रियतेराअड्ड इत्यादेशो वा भवति ॥ आअड्डइ । वावरेइ[6] ॥

---

१ A °पम्हुहः. २ P °हृग्रे:. ३ A उव्वे°. ४ B मालइ°. ५ B नीह°. ६ B वावारइ.

संवृगेः[1] साहर-साहट्टौ ॥ ८२ ॥

संवृणोतेः साहर साहट्ट इत्यादेशौ वा भवतः ॥ साहरइ । साहट्टइ । संवरइ ॥

आङृङः[2] सन्नामः ॥ ८३ ॥

आद्रियतेः सन्नाम इत्यादेशो वा भवति ॥ सन्नामइ[3] । आदरइ[4] ॥

प्रहृगेः[5] सारः ॥ ८४ ॥

प्रहरतेः सार इत्यादेशो वा भवति ॥ सारइ । पहरइ ॥

अवतरेरोह-ओरसौ ॥ ८५ ॥

अवतरतेः ओह ओरस[6] इत्यादेशौ वा भवतः ॥ ओहइ[7] । ओरसइ । ओअरइ ॥

शकेश्चय-तर-तीर-पाराः ॥ ८६ ॥

शक्नोतेरेते चत्वार आदेशा वा भवन्ति ॥ चयइ । तरइ । तीरइ । पारइ । सक्कइ ॥ त्यजतेरपि[8] चयइ । हानिं करोति ॥ तरतेरपि तरइ[9] ॥ तीरयतेरपि तीरइ ॥ पारयतेरपि पारेइ । कर्म समाप्नोति ॥

फक्कस्थक्कः ॥ ८७ ॥

फक्कतेस्थक्क इत्यादेशो भवति ॥ थक्कइ ॥

श्लाघः सलहः ॥ ८८ ॥

श्लाघतेः सलह इत्यादेशो भवति ॥ सलहइ ॥

खचेर्वेअडः ॥ ८९ ॥

खचतेर्वेअड इत्यादेशो वा भवति ॥ वेअडइ । खचइ ॥

पचेः सोल्ल-पउल्लौ[10] ॥ ९० ॥

पचतेः सोल्ल पउल्ल[11] इत्यादेशौ वा भवतः ॥ सोल्लइ । पउल्लइ[12] । पयइ ॥

---

१ P वृञेः. २ B आदृङः. ३ P B सन्नामेइ. ४ B आदरेइ. ५ P °हृञेः. ६ A ओसर. ७ B °हरइ. ८ A त्यजेर°. ९ A तरइ । पार°. १० B °उल्लौ. ११ B पउल्ल. १२ B पउल्लइ.

मुचेश्छड्डावहेड-मेल्लोस्सिक्क-रेअव-णिलुञ्छ-धंसाडाः ॥ ९१ ॥

मुञ्चतेरेते[3] सप्तादेशा वा भवन्ति ॥ छड्डइ । अवहेडइ । मेल्लइ । उ-स्सिक्कइ[4] । रेअवइ । णिलुञ्छइ[5] । धंसाडइ । पक्षे । मुअइ ॥

दुःखे णिव्वलः ॥ ९२ ॥

दुःखविषयस्य मुचेः[6] णिव्वल इत्यादेशो वा भवति ॥ णिव्वलेइ[7] । दुःखं मुञ्चतीत्यर्थः ॥

वञ्चेर्वेहव-वेलव-जूरवोमच्छाः ॥ ९३ ॥

वञ्चतेरेते चत्वार आदेशा[8] वा भवन्ति ॥ वेहवइ । वेलवइ । जूरवइ । उमच्छइ । वञ्चइ ॥

रचेरुग्गहावह-विडविड्डाः[9] ॥ ९४ ॥

रचेर्धातोरेते त्रय आदेशा वा भवन्ति ॥ उग्गहइ । अवहइ । विडविड्डइ[10] । रयइ ॥

समारचेरुवहत्थ-सारव-समार-केलायाः ॥ ९५ ॥

समारचेरेते चत्वार आदेशा वा भवन्ति ॥ उवहत्थइ । सारवइ । समारइ । केलायइ । समारयइ ॥

सिचेः[11] सिञ्च-सिम्पौ ॥ ९६ ॥

सिञ्चतेरेतावादेशौ वा भवतः ॥ सिञ्चइ । सिम्पइ । सेअइ ॥

प्रच्छः पुच्छः ॥ ९७ ॥

पृच्छेः[12] पुच्छादेशो भवति ॥ पुच्छइ ॥

गर्जेर्बुक्कः ॥ ९८ ॥

गर्जतेर्बुक्क इत्यादेशो वा भवति ॥ बुक्कइ । गज्जइ ॥

---

१ A B °ल्लोसिक्क°. २ B णिलुञ्छ°. ३ A मुंचतेः स°. ४ B उसिक्कइ. ५ B णिच्छ°. ६ B मुचो. ७ B णिच्चलेइ. ८ B °शा भ°. ९ P °विडाः. १० P °विडइ. ११ A सिंचेः. १२ B प्रच्छेः.

वृषे [1]ढिक्कः ॥ ९९ ॥

वृषकर्तृकस्य गर्जेर्ढिक्क इत्यादेशो वा भवति ॥ ढिक्कइ। वृषभो गर्जति ॥

राजेरग्घ-छज्ज-सह-रीर-रेहाः ॥ १०० ॥

राजेरेते पञ्चादेशा वा भवन्ति ॥ अग्घइ । छज्जइ । सहइ । रीरइ । रेहइ। रायइ ॥

मस्जेराउड्ड-णिउड्ड-बुड्ड-खुप्पाः ॥ १०१ ॥

मज्जतेरेते चत्वार आदेशा वा भवन्ति ॥ आउड्डइ । णिउड्डइ । बुड्डइ । खुप्पइ । मज्जइ ॥

पुञ्जेरारोल-वमालौ ॥ १०२ ॥

पुञ्जेरेतावादेशौ वा भवतः ॥ आरोलइ । वमालइ । पुञ्जइ ॥

लस्जेर्जीहः ॥ १०३ ॥

लज्जतेर्जीह इत्यादेशो वा भवति ॥ जीहइ । लज्जइ ॥

तिजेरोसुक्कः ॥ १०४ ॥

तिजेरोसुक्क इत्यादेशो वा भवति ॥ ओसुक्कइ । तेअणं ॥

मृजेरुग्घुस-लुञ्छ-पुञ्छ-पुंस-फुस-पुस-लुह-हुल-रोसाणाः १०५

मृजेरेते नवादेशा वा भवन्ति ॥ उग्घुसइ । लुञ्छइ । पुञ्छइ । पुंसइ । फुसइ । पुसइ । लुहइ । हुलइ । रोसाणइ । पक्षे । मज्जइ ॥

भञ्जेर्वेमय-मुसुमूर-मूर-सूर-सूड-विर-पविरञ्ज-करञ्ज-नीरञ्जाः ॥ १०६ ॥

भञ्जेरेते नवादेशा वा भवन्ति ॥ वेमयइ । मुसुमूरइ । मूरइ । सूरइ । सूडइ । विरइ । पविरञ्जइ । करञ्जइ । नीरञ्जइ । भञ्जइ ॥

---

१ P B वृषेर्ढि°. २ B °ओ भ°. ३ B गर्जनात्मगे:. ४ B °आ भ°. ५ P मस्ने°. ६ B °डुडुबुडुसु°. ७ B °ते पंच. ८ B °इ । बुडुइ । खुडुइ । खु°. ९ L फुस°. १० B मृजंत°. ११ A उग्घमइ. १२ B फुंसइ. १३ A °विरंजनीर°.

अनुव्रजेः पडिअग्गः ॥ १०७ ॥

अनुव्रजेः पडिअग्ग इत्यादेशो वा भवति ॥ पडिअग्गइ। अणुवच्चइ ॥

अर्जेर्विढवः ॥ १०८ ॥

अर्जेर्विढव इत्यादेशो वा भवति ॥ विढवइ । अज्जइ ॥

युजो जुञ्ज-जुज्ज-जुप्पाः ॥ १०९ ॥

युजो[1] जुञ्ज जुज्ज जुप्प इत्यादेशा भवन्ति ॥ जुञ्जइ । जुज्जइ । जुप्पइ ॥

भुजो भुञ्ज-जिम-जेम-कम्माण्ह-समाण-चमढ-चड्डाः ॥ ११० ॥

भुज एतेष्टादेशा भवन्ति ॥ भुञ्जइ । जिमइ । जेमइ । कम्मेइ[2] । अण्हइ । समाणइ । चमढइ । चड्डइ ॥

वोपेन कम्मवः ॥ १११ ॥

उपेन युक्तस्य भुजेः[3] कम्मव इत्यादेशो वा भवति ॥ कम्मवइ । उवहुञ्जइ ॥

घटेर्गढः ॥ ११२ ॥

घटतेर्गढ इत्यादेशो वा भवति ॥ गढइ । घडइ[4] ॥

समो गलः ॥ ११३ ॥

सम्पूर्वस्य घटतेर्गल इत्यादेशो वा भवति ॥ संगलइ । संघडइ ॥

हासेन स्फुटेर्मुरः ॥ ११४ ॥

हासेन करणेन यः स्फुटिस्तस्य मुरादेशो[5] वा भवति ॥ मुरइ । हासेन स्फुटति ॥

मण्डेश्चिञ्च-चिञ्चअ-चिञ्चिल्ल-रीड-टिविडिक्काः ॥ ११५ ॥

मण्डेरेते[6] पञ्चादेशा वा भवन्ति ॥ चिञ्चइ । चिञ्चअइ । चिञ्चिल्लइ । रीडइ । टिविडिक्कइ । मण्डइ[7] ॥

---

१ B युजेरेते त्रय आदे°. २ B कम्मइ. ३ P भुजः. ४ B घडइ. ५ B °शो भ°. ६ P मुण्डे°. ७ P मुण्डइ.

तुडेस्तोड-तुट्ट-खुट्ट-खुडोक्खुडोल्लुक-णिल्लुक[1]-लुकोल्लूराः[2] ॥ ११६ ॥

तुडेरेते नवादेशा वा भवन्ति ॥ तोडइ । तुट्टइ । खुट्टइ । खुडइ । उक्खुडइ । उल्लुकइ । णिल्लुकइ[3] । लुकइ । उल्लूरइ[4] । तुडइ ॥

घूर्णो[5] घुल-घोल-घुम्म-पहल्लाः ॥ ११७ ॥

घूर्णेरेते चत्वार आदेशा भवन्ति ॥ घुलइ । घोलइ । घुम्मइ । पहल्लइ ॥

विवृतेर्ढंसः ॥ ११८ ॥

विवृतेर्ढंस इत्यादेशो वा भवति ॥ ढंसइ । विवट्टइ ॥

क्वथेरट्टः ॥ ११९ ॥

क्वथेरट्ट इत्यादेशो वा भवति ॥ अट्टइ । कढइ ॥

ग्रन्थो गण्ठः ॥ १२० ॥

ग्रन्थेर्गण्ठ[6] इत्यादेशो भवति ॥ गण्ठइ । गण्ठी ॥

मन्थेर्घुसल-विरोलौ ॥ १२१ ॥

मन्थेर्घुसल विरोल इत्यादेशौ[7] वा भवतः ॥ घुसलइ । विरोलइ । मन्थइ[8] ॥

ह्लादेरवअच्छः[9] ॥ १२२ ॥

ह्लादतेर्ण्यन्तस्याण्यन्तस्य च अवअच्छ[10] इत्यादेशो भवति ॥ अवअच्छइ । ह्लादते । ह्लादयति वा ॥ इकारो ण्यन्तस्यापि परिग्रहार्थः ॥

नेः सदो मज्जः ॥ १२३ ॥

निपूर्वस्य सदो[11] मज्ज इत्यादेशो भवति ॥ अत्ता एत्थ णुमज्जइ ॥

छिदेर्दुहाव-णिच्छल्ल-णिज्झोड-णिव्वर-णिल्लूर-लूराः ॥ १२४ ॥

छिदेरेते षडादेशा वा भवन्ति ॥ दुहावइ । णिच्छल्लइ । णिज्झोडइ । णिव्वरइ । णिल्लूरइ । लूरइ । पक्षे । छिन्दइ ॥

---

१ B °णिल्लुक्क°. २ B °क्कोच्छुराः. ३ B णिल्लुक्कइ. ४ B उच्छूरइ. ५ B घूर्णेर्घु°. ६ B ग्रंथो गं°. ७ B °शौ भ. ८ B °इ ॥ ल्हा°. ९ B ल्हा°. १० B °अच्छ°. ११ B सदेर्म°.

आङा ओअन्दोद्दालौ ॥ १२५ ॥

आङा युक्तस्य छिदेरोअन्द उद्दाल इत्यादेशौ वा भवतः ॥ ओअन्दइ । उद्दालइ । अच्छिन्दइ[1] ॥

मृदो मल-मढ-परिहट्ट-खड्ड-चड्ड-मड्ड-पन्नाडाः ॥ १२६ ॥

मृद्नातेरेते सप्तादेशा[2] भवन्ति ॥ मलइ । मढइ । परिहट्टइ । खड्डइ । चड्डइ । मड्डइ । पन्नाडइ ॥

स्पन्देश्चुलुचुलः ॥ १२७ ॥

स्पन्देश्चुलुचुल इत्यादेशो वा भवति ॥ चुलुचुलइ । फन्दइ ॥

निरः पदेर्वलः ॥ १२८ ॥

निर्पूर्वस्य पदेर्वल इत्यादेशो वा भवति ॥ निव्वलइ । निप्पज्जइ[3] ॥

विसंवदेर्विअट्ट-विलोट्ट-फंसाः ॥ १२९ ॥

विसंपूर्वस्य वदेरेते त्रय आदेशा वा भवन्ति ॥ विअट्टइ । विलोट्टइ । फंसइ । विसंवयइ ॥

शदो झड-पक्खोडौ ॥ १३० ॥

शीयतेरेतावादेशौ भवतः ॥ झडइ[4] । पक्खोडइ[5] ॥

आक्रन्देर्णीहरः ॥ १३१ ॥

आक्रन्देर्णीहर इत्यादेशो वा भवति ॥ णीहरइ । अक्कन्दइ ॥

खिदेर्जूर-विसूरौ ॥ १३२ ॥

खिदेरेतावादेशौ वा भवतः ॥ जूरइ । विसूरइ । खिज्जइ ॥

रुधेरुत्थङ्घः ॥ १३३ ॥

रुधे[7]रुत्थङ्घ इत्यादेशो वा भवति ॥ उत्थङ्घइ । रुन्धइ ॥

---

१ B आच्छिदइ. २ A °शा वा भ°. ३ A निप्फ°. ४ B झड°. ५ B °इ ॥ खिदे°. ६ P °क्न°. ७ P उन°.

निषेधेर्हक्कः ॥ १३४ ॥

निषेधतेर्हक्क इत्यादेशो वा भवति ॥ हक्कइ । निसेहइ ॥

क्रुधेर्जूरः ॥ १३५ ॥

क्रुधेर्जूर इत्यादेशो वा भवति ॥ जूरइ । कुज्झइ ॥

जनो जा-जम्मौ ॥ १३६ ॥

जायतेर्जा जम्म इत्यादेशौ[1] भवतः ॥ जाअइ । जम्मइ ॥

तनेस्तड-तड्ड-तड्डव-विरल्लाः ॥ १३७ ॥

तनेरेते चत्वार आदेशा वा भवन्ति ॥ तडइ । तड्डइ । तड्डवइ । विरल्लइ । तणइ ॥

तृपस्थिप्पः ॥ १३८ ॥

तृप्यतेस्थिप्प[2] इत्यादेशो भवति ॥ थिप्पइ ॥

उपसर्पेरल्लिअः ॥ १३९ ॥

उपपूर्वस्य सृपेः कृतगुणस्य अल्लिअ इत्यादेशो वा भवति ॥ अल्लिअइ । उवसप्पइ ॥

संतपेर्झङ्खः[3] ॥ १४० ॥

संतपे[4]र्झङ्ख[5] इत्यादेशो वा भवति ॥ झङ्खइ[6] । पक्षे । संतप्पइ ॥

व्यापेरोअग्गः ॥ १४१ ॥

व्याप्नोतेरोअग्ग इत्यादेशो वा भवति ॥ ओअग्गइ । वावेइ ॥

समापेः समाणः ॥ १४२ ॥

समाप्नोतेः समाण इत्यादेशो वा भवति ॥ समाणइ । समावेइ ॥

---

१ B °शौ वा भ°. २ A तेः स्थि°. ३ B °पेर्झङ्खः. ४ P B °तप्यतेर्झ°. ५ B °पेर्झङ्ख°. ६ B झंखइ.

क्षिपेर्गलत्थाड्डक्ख-सोल्ल-पेल्ल-णोल्ल-छुह-हुल-परी-घत्ताः॥१४३॥

क्षिपेरेते नवादेशा वा भवन्ति ॥ गलत्थइ । अड्डक्खइ । सोल्लइ । पेल्लइ । णोल्लइ । ह्रस्वत्वे[1] तु णुल्लइ । छुहइ । हुलइ । परीइ । घत्तइ । खिवइ ॥

उत्क्षिपेर्गुलगुञ्छोत्थङ्घाल्लत्थोब्भुत्तोस्सिक्क-हक्खुवाः ॥१४४॥

उत्पूर्वस्य क्षिपेरेते षडादेशा वा भवन्ति ॥ गुलगुञ्छइ । उत्थङ्घइ । अल्लत्थइ । उब्भुत्तइ । उस्सिक्कइ । हक्खुवइ । उक्खिवइ ॥

आक्षिपेर्णीरवः ॥ १४५ ॥

आङ्पूर्वस्य क्षिपेर्णीरव इत्यादेशो वा भवति ॥ णीरवइ । अक्खिवइ ॥

स्वपेः कमवस-लिस-लोट्टाः ॥ १४६ ॥

स्वपेरेते त्रय आदेशा वा भवन्ति ॥ कमवसइ । लिसइ । लोट्टइ । सुअइ ॥

वेपेरायम्बायज्झौ ॥ १४७ ॥

वेपेरायम्ब आयज्झ इत्यादेशौ वा भवतः ॥ आयम्बइ । आयज्झइ । वेवइ ॥

विलपेर्झङ्ख-वडवडौ ॥ १४८ ॥

विलपेर्झङ्ख वडवड इत्यादेशौ वा भवतः ॥ झङ्खइ । वडवडइ । विलवइ ॥

लिपो लिम्पः ॥ १४९ ॥

लिम्पतेर्लिम्प इत्यादेशो भवति ॥ लिम्पइ ॥

गुप्येर्विर-णडौ ॥ १५० ॥

गुप्यतेरेतावादेशौ वा भवतः ॥ विरइ । णडइ । पक्षे । गुप्पइ ॥

१ P B °त्वे णु°. २ A गुलुगुं°. ३ P °ङ्घालत्थो°. ४ A °त्तोसिक्कहक्खुवः. ५ B °हक्खुप्पाः. ६ A B गुलुगुं°. ७ B हक्खुप्पइ. ८ B कमठस°. ९ B लिप°. १० P गुपेवि°.

क्रृपोवहो णिः ॥ १५१ ॥

क्रृपेः अवह इत्यादेशो ण्यन्तो भवति ॥ अवहावेइ । कृपां करोतीत्यर्थः ॥

प्रदीपेस्तेअव-सन्दुम-सन्धुक्काब्भुत्ताः ॥ १५२ ॥

प्रदीप्यतेरेते चत्वार आदेशा वा भवन्ति ॥ तेअवइ । सन्दुमइ । सन्धुक्कइ । अब्भुत्तइ । पलीवइ ॥

लुभेः संभावः ॥ १५३ ॥

लुभ्यतेः संभाव इत्यादेशो वा भवति ॥ संभावइ । लुब्भइ ॥

क्षुभेः खउर-पड्डुहौ ॥ १५४ ॥

क्षुभेः खउर पड्डुह इत्यादेशौ वा भवतः ॥ खउरइ । पड्डुहइ । खुब्भइ ॥

आङो रभे रम्भ-ढवौ ॥ १५५ ॥

आङः परस्य रभे रम्भ ढव इत्यादेशौ वा भवतः ॥ आरम्भइ । आढवइ । आरभइ ॥

उपालम्भेर्झङ्ख-पच्चार-वेलवाः ॥ १५६ ॥

उपालम्भेरेते त्रय आदेशा वा भवन्ति ॥ झङ्खइ । पच्चारइ । वेलवइ । उवालम्भइ ॥

अवेर्जृम्भो जम्भा ॥ १५७ ॥

जृम्भेर्जम्भा इत्यादेशो भवति वेस्तु न भवति ॥ जम्भाइ । जम्भाअइ ॥ अवेरिति किम् । केलि-पसरो विअम्भइ ॥

---

१ B कृपोऽव°. २ B कृपेः. ३ A °सुंदम°. ४ B °पड्डुहौ. ५ B पडुह. ६ पडुहइ. ७ A आढे°. ८ B जृंभेर्ज°.

भाराक्रान्ते नमेर्णिसुढः ॥ १५८ ॥

भाराक्रान्ते कर्तरि नमेर्णिसुढ इत्यादेशो भवति ॥ णिसुढइ । पक्षे । णवइ । भाराक्रान्तो नमतीत्यर्थः ॥

विश्रमेर्णिव्वा ॥ १५९ ॥

विश्राम्यतेर्णिव्वा इत्यादेशो वा भवति ॥ णिव्वाइ । वीसमइ ॥

आ[2]क्रमेरोहावो[3]त्थारच्छुन्दाः ॥ १६० ॥

आक्र[4]मतेरेते त्रय आदेशा वा भवन्ति ॥ ओहावइ । उत्था[5]रइ । छुन्दइ । अक्कमइ ॥

भ्रमेष्टिरिटिल्ल-ढुण्ढुल्ल-ढण्ढल्ल-चक्कम्म[6]-भम्मड-भमड-भमाड-तल-अण्ट-झ[7]ण्ट-झम्प-भुम-गुम-फुम-फुस-ढुम-ढुस-परी-पराः॥१६१॥

भ्रमेरेतेष्टादशादेशा वा भवन्ति ॥ टिरिटिल्लइ । ढुण्ढुल्लइ । ढण्ढल्लइ । चक्कम्मइ । भ[8]म्मडइ । भमडइ । भमाडइ । तलअण्टइ । झ[9]ण्टइ । झम्पइ । भुमइ । गुमइ । फुमइ । फुसइ । ढुमइ । ढुसइ । परीइ । परइ । भमइ ॥

गमेरई-अइच्छाणुवज्जा[10]वज्जसोक्कुसाक्कुस-पच्चड्ड-पच्छन्द-णिम्मह-णी-णीण-णीलुक्क-पदअ-रम्भ-परिअल्ल-वोल-परिअल-णिरिणास-णिवहावसेहावहराः ॥ १६२ ॥

गमेरेते एकविंशतिरादेशा वा भवन्ति ॥ अईइ । अइच्छइ । अणुवज्जइ । अवज्जस[11]इ । उक्कुसइ । अक्कुसइ । पच्चड्डइ । पच्छन्दइ । णिम्महइ । णीइ । णीणइ । णीलुक्कइ । पदअइ । रम्भइ । परिअल्लइ । वोलइ । परिअलइ । णिरिणासइ । णिवहइ । अवसेहइ । अवहरइ ।

---

१ A B इ । भा°. २ B आक्रामे°. ३ B °वोच्छार°. ४ B आक्रमेरे°. ५ B उच्छार°. ६ B °म्मभमडभम्माडभमाडत°. ७ A °झंट°. ८ B भमडइ । भम्माडइ. ९ A झंटइ. १० B °वसओक्कुसा°. ११ B अवसअइ.

पक्षे । गच्छइ ॥ हम्मइ । णिहम्मइ । णीहम्मइ । आहम्मइ । पहम्मइ इत्येते तु हम्म गतावित्यस्यैव भविष्यन्ति ॥

आङा अहिपच्चुअः ॥ १६३ ॥

आङा सहितस्य गमेः अहिपच्चुअ इत्यादेशो वा भवति ॥ अहिपच्चुअइ । पक्षे । आगच्छइ ॥

समा[1] अब्भिडः ॥ १६४ ॥

समा युक्तस्य गमेः अब्भिड इत्यादेशो वा भवति ॥ अब्भिडइ । संगच्छइ ॥

अभ्याङोम्मत्थः ॥ १६५ ॥

अभ्याङ्भ्यां युक्तस्य गमेः उम्मत्थ इत्यादेशो वा भवति ॥ उम्मत्थइ । अब्भागच्छइ । अभिमुखमागच्छतीत्यर्थः ॥

प्रत्याङा पलोट्टः ॥ १६६ ॥

प्रत्याङ्भ्यां युक्तस्य गमेः पलोट्ट इत्यादेशो वा भवति ॥ पलोट्टइ । पच्चागच्छइ ॥

शमेः पडिसा-परिसामौ ॥ १६७ ॥

शमेरेतावादेशौ वा भवतः ॥ पडिसाइ । परिसामइ । समइ ॥

रमेः संखुड्ड-खेड्डोब्भाव-किलिकिञ्च-कोट्टुम-मोट्टाय-णीसर-वेल्लाः ॥ १६८ ॥

रमतेरेतेष्टादेशा वा भवन्ति ॥ संखुड्डइ । खेड्डइ । उब्भावइ । किलिकिञ्चइ । कोट्टुमइ । मोट्टायइ । णीसरइ । वेल्लइ । रमइ ॥

---

१ A भाऽब्भिडः

पूरेरग्घाडो[1]ग्घवोद्धुमाङ्कुमाहिरेमाः ॥ १६९ ॥

पूरेरेते पञ्चादेशा वा भवन्ति ॥ अग्घाडइ । अग्घवइ[2] । उद्धुमाइ[3] । अङ्कुमइ । अहिरेमइ । पूरइ ॥

त्वरस्तुवर-जअडौ ॥ १७० ॥

त्वरतेरेतावादेशौ भवतः ॥ तुवरइ । जअडइ । तुवरन्तो । जअडन्तो ।

त्यादिशत्रोस्तूरः ॥ १७१ ॥

त्वरतेस्त्यादौ शतरि च तूर इत्यादेशो भवति ॥ तूरइ । तूरन्तो ॥

तुरोत्यादौ ॥ १७२ ॥

त्वरोत्यादौ तुर आदेशो भवति ॥ तुरिओ । तुरन्तो ॥

क्षरः खिर-झर-पज्झर-पच्चड-णिच्चल-णिट्टुआः ॥ १७३ ॥

क्षरेरेते षड् आदेशा भवन्ति ॥ खिरइ । झरइ[4] । पज्झरइ । पच्चडइ । णिच्चलइ[5] । णिट्टुअइ[6] ॥

उच्छल उत्थल्लः[7] ॥ १७४ ॥

उच्छलतेरुत्थल्ल इत्यादेशो भवति ॥ उत्थल्लइ ॥

विगलेस्थिप्प-णिट्टुहौ[8] ॥ १७५ ॥

विगलतेरेतावादेशौ वा भवतः ॥ थिप्पइ । णिट्टुहइ । विगलइ ॥

दलि-वल्योर्विसट्ट-वम्फौ ॥ १७६ ॥

दलेर्वलेश्च यथासंख्यं विसट्ट वम्फ इत्यादेशौ वा भवतः ॥ विसट्टइ । वम्फइ । पक्षे । दलइ । वलइ ॥

---

१ B °डोग्घ°. २ B उग्घव°. ३ B उद्धूमइ. ४ B °ज्झर°. ५ B °ब्बल°. ६ B °ट्टु°. ७ B °च्छल्ल°. ८ B °ट्टु°.

भ्रंशेः फिड-फिट्ट-फुड-फुट्ट-चुक्क-भुल्लाः ॥ १७७ ॥

भ्रंशेरेते षडादेशा वा भवन्ति ॥ फिडइ । फिट्टइ । फुडइ । फुट्टइ । चुक्कइ । भुल्लइ । पक्षे । भंसइ ॥

नशेर्णि[1]रणास-णिवहावसेह-पडिसा-सेहावहराः ॥ १७८ ॥

नशेरेते षडादेशा वा भवन्ति ॥ णिर[2]णासइ । णिवहइ । अवसेहइ । पडिसाइ । सेहइ । अवहरइ । पक्षे । नस्सइ ॥

अवात्काशो वासः ॥ १७९ ॥

अवात्परस्य काशो वास इत्यादेशो भवति ॥ ओवासइ ॥

संदिशेरप्पाहः ॥ १८० ॥

संदिशतेरप्पाह इत्यादेशो वा भवति ॥ अप्पाहइ । संदिसइ ॥

दृशो निअच्छ-पेच्छावयच्छावयज्झ-वँज्ज[3]-सव्वव-देक्खौ[4]अक्खा-वँक्खावअक्ख-पुलोअ[5]-पुलअ-निआवआस-पासाः॥१८१॥

दृशेरेते पञ्चदशादेशा भवन्ति[6] ॥ निअच्छइ । पेच्छइ । अवयच्छइ । अवयज्झइ[7] । वँज्जइ[8] । सव्ववइ[9] । देक्खइ । ओअक्खइ । अवेक्खइ । अवअक्खइ । पुलोएइ । पुलएइ[10] । निअइ । अवआसइ । पासइ ॥ निज्झाअइ इति तु निध्यायतेः[11] स्वरादत्यन्ते भविष्यति ॥

स्पृशः फास-फंस-फरिस-छिव-छिहालुङ्खालिहाः ॥ १८२ ॥

स्पृशतेरेते सप्त आदेशा भवन्ति ॥ फासइ । फंसइ । फरिसइ । छिवइ । छिहइ । आलुङ्खइ । आलिहइ ॥

---

१ B णिरिणा°. २ A B णिरिणा°. ३ B °वज्जसव्ववदे°. ४ B °चक्खा°. ५ B °पुलोए°. ६ B °न्ति वा. ७ B वज्ज°. ८ B सव्व°. ९ B अच°. १० B °अइ. ११ B निपूर्वस्य ध्यायतेः स्वरादंत्यन्ते भ°.

प्रविशे रिअः ॥ १८३ ॥

प्रविशेः रिअ इत्यादेशो वा भवति ॥ रिअइ । पविसइ ॥

प्रान्मृश-मुषोर्म्हुसः ॥ १८४ ॥

प्रात्परयोर्मृशतिमुष्णात्योर्म्हुस इत्यादेशो भवति ॥ पम्हुसइ । प्रमृशति । प्रमुष्णाति[1] वा ॥

पिषेर्णिवह-णिरिणास-णिरिणज्ज-रोञ्च-चड्डाः ॥ १८५ ॥

पिषेरेते पञ्चादेशा भवन्ति वा ॥ णिवहइ[2] । णिरिणासइ । णिरिणज्जइ[3] । रोञ्चइ । चड्डइ । पक्षे । पीसइ ॥

भषेर्भुक्कः ॥ १८६ ॥

भषेर्भुक्क इत्यादेशो वा भवति ॥ भुक्कइ । भसइ ॥

कृषेः कड्ड[4]-साअड्ड[5]ाञ्चाणच्छायञ्छाइञ्छाः ॥ १८७ ॥

कृषेरेते षडादेशा वा भवन्ति ॥ कड्डइ । साअड्डइ[6] । अञ्चइ । अणच्छइ । अयञ्छइ । आइञ्छइ । पक्षे । करिसइ ॥

असावक्खोडः ॥ १८८ ॥

असिविषयस्य कृषेरक्खोड इत्यादेशो भवति ॥ अक्खोडेइ[7] । असिं कोशात्कर्षतीत्यर्थः ॥

गवेषेर्ढुण्ढुल्ल-ढण्ढोल-गमेस-घत्ताः ॥ १८९ ॥

गवेषेरेते चत्वार आदेशा वा भवन्ति ॥ ढुण्ढुल्लइ । ढण्ढोलइ । गमेसइ । घत्तइ । गवेसइ ॥

---

१ B °मुष्णाति ॥. २ B °णिव्वहइ°. ३ B °रिणिज्ज . ४ B कड्ढ°. ५ B °साअड्ढ°. ६ B साअड्ढइ. ७ B °क्खोडइ.

श्लिषेः सामग्गावयास-परिअन्ताः ॥ १९० ॥

श्लिष्येतेरेते त्रय आदेशा वा भवन्ति ॥ सामग्गइ । अवयासइ । परिअन्तइ । सिलेसइ ॥

म्रक्षेश्चोप्पडः ॥ १९१ ॥

म्रक्षेश्चोप्पड इत्यादेशो वा भवति ॥ चोप्पडइ । मक्खइ ॥

काङ्क्षेराहाहिलङ्घाहिलङ्ख-वच्च-वम्फ-मह-सिह-विलुम्पाः॥१९२॥

काङ्क्षतेरेतेष्टादेशा वा भवन्ति ॥ आहइ । अहिलङ्घइ । अहिलङ्खइ । वच्चइ । वम्फइ । महइ । सिहइ । विलुम्पइ । कङ्खइ ॥

प्रतीक्षेः सामय-विहीर-विरमालाः ॥ १९३ ॥

प्रतीक्षेरेते त्रय आदेशा वा भवन्ति ॥ सामयइ । विहीरइ । विरमालइ । पडिक्खइ ॥

तक्षेस्तच्छ-चच्छ-रम्प-रम्फाः ॥ १९४ ॥

तक्षेरेते चत्वार आदेशा वा भवन्ति ॥ तच्छइ । चच्छइ । रम्पइ । रम्फइ । तक्खइ ॥

विकसेः कोआस-वोसट्टौ ॥ १९५ ॥

विकसेरेतावादेशौ वा भवतः ॥ कोआसइ । वोसट्टइ । विअसइ ॥

हसेर्गुञ्जः ॥ १९६ ॥

हसेर्गुञ्ज इत्यादेशो वा भवति ॥ गुञ्जइ । हसइ ॥

स्रंसेर्ल्हस-डिम्भौ ॥ १९७ ॥

स्रंसेरेतावादेशौ वा भवतः ॥ ल्हसइ । परिल्हसइ सलिल-वसणं । डिम्भइ । संसइ ॥

---

१ B °अन्ताः. २ A श्लिषि. ३ B °अन्तइ. ४ A म्रक्षेश्चो. ५ A °म्फाः. ६ A आहिइ. B आहाइ. ७ A °लुम्फइ. ८ A °म्फाः ॥ ९ B °इ । सलिलवसणं डिम्भइ.

त्रसेर्डर-बोज्ज-वज्जाः ॥ १९८ ॥

त्रसेरेते त्रय आदेशा वा भवन्ति ॥ डरइ । बोज्जइ । वज्जइ । तसइ ॥

न्यसो णिम-णुमौ ॥ १९९ ॥

न्यस्यतेरेतावादेशौ भवतः ॥ णिमइ । णुमइ ॥

पर्यसः पलोट्ट-पल्लट्ट-पल्हत्थाः ॥ २०० ॥

पर्यस्यतेरेते त्रय आदेशा भवन्ति ॥ पलोट्टइ । पल्लट्टइ । पल्हत्थइ ॥

निःश्वसेर्झङ्खः ॥ २०१ ॥

निःश्वसेर्झङ्ख इत्यादेशो वा भवति ॥ झङ्खइ । नीससइ ॥

उल्लसेरूसलोसुम्भ-णिल्लस-पुलआअ-गुञ्जोल्लारोआः ॥२०२॥

उल्लसेरेते षडादेशा वा भवन्ति ॥ ऊसलइ । ऊसुम्भइ । णिल्लसइ । पुलआअइ । गुञ्जोल्लइ । ह्रस्वत्वे तु । गुञ्जुल्लइ । आरोअइ । उल्लसइ ॥

भासेर्भिसः ॥ २०३ ॥

भासेर्भिस इत्यादेशो वा भवति ॥ भिसइ । भासइ ॥

ग्रसेर्घिसः ॥ २०४ ॥

ग्रसेर्घिस इत्यादेशो वा भवति ॥ घिसइ । गसइ ॥

अवाद्गाहेर्वाहः ॥ २०५ ॥

अवात्परस्य गाहेर्वाह इत्यादेशो वा भवति ॥ ओवाहइ । ओगाहइ ॥

आरुहेश्चड-वलग्गौ ॥ २०६ ॥

आरुहेरेतावादेशौ वा भवतः ॥ चडइ । वलग्गइ । आरुहइ ॥

मुहेर्गुम्म-गुम्मडौ ॥ २०७ ॥

मुहेरेतावादेशौ वा भवतः ॥ गुम्मइ । गुम्मडइ । मुज्झइ ॥

---

१ B ड्वा°. २ B ड्गा°.

दहेरहिऊलालुङ्खौ ॥ २०८ ॥

दहेरेतावादेशौ वा भवतः ॥ अहिऊलइ । आलुङ्खइ । डहइ ॥

ग्रहो वल-गेण्ह-हर-पङ्ग-निरुवाराहिपच्चुआः ॥ २०९ ॥

ग्रहेरेते षडादेशा भवन्ति ॥ वलइ । गेण्हइ । हरइ । पङ्गइ । निरुवा- रइ । अहिपच्चुअइ[1] ॥

क्त्वा-तुम्-तव्येषु घेत् ॥ २१० ॥

ग्रहे[2]: क्त्वातुमुतव्येषु घेत् इत्यादेशो भवति ॥ क्त्वा । घेत्तूण । घेत्तुआण[3] ॥ क्वचिन्न भवति । गेण्हिअ ॥ तुम् । घेत्तुं ॥ तव्य । घे- त्तव्वं ॥

वचो वोत् ॥ २११ ॥

वक्तेर्वोत्[4] इत्यादेशो भवति क्त्वातुमुतव्येषु ॥ वोत्तूण । वोत्तुं । वोत्तव्वं ॥

रुँद[5]-भुज-मुचां तोन्त्यस्य[6] ॥ २१२ ॥

एषामन्त्यस्य क्त्वातुमुतव्येषु[7] तो भवति ॥ रोत्तूण । रोत्तुं । रोत्तव्वं ॥ भोत्तूण । भोत्तुं । भोत्तव्वं ॥ मोत्तूण । मोत्तुं । मोत्तव्वं ॥

दृशस्तेन ट्ठः[8] ॥ २१३ ॥

दृशोन्त्यस्य तकारेण सह द्विरुक्तष्ठकारो भवति ॥ दट्ठूण । दट्ठुं । दट्ठव्वं ॥

आः[9] कृगो भूत-भविष्यतोश्च[10] ॥ २१४ ॥

कृगोन्त्यस्य आ इत्यादेशो भवति भूतभविष्यत्कालयोश्चकारात् क्त्वातुमुतव्येषु च ॥ काहीअ । अकार्षीत् । अकरोत् । चकार वा ॥ काहिइ । करिष्यति । कर्ता वा ॥ क्त्वा । काऊण ॥ तुम् । काउं ॥ तव्य । कायव्वं ॥

---

१ B °च्चुइ. २ B ग्रहेः. ३ A B घेत्तूआण. ४ A °वोंदादे°. ५ P रुद°. ६ B सों°. ७ B °पु परतः तो. ८ A ट्ठः. ९ P आ कृ°. १० A °ष्यतेश्च.

गमिष्यमासां छः ॥ २१५ ॥

एषामन्त्यस्य[1] छो भवति ॥ गच्छइ । इच्छइ । जच्छइ । अच्छइ ॥

छिदि-भिदो न्दः ॥ २१६ ॥

अनयोरन्त्यस्य नकाराक्रान्तो दकारो भवति ॥ छिन्दइ । भिन्दइ ॥

युध-बुध-गृध-क्रुध-सिध-मुहां ज्झः ॥ २१७ ॥

एषामन्त्यस्य द्विरुक्तो झो भवति ॥ जुज्झइ । बुज्झइ । गिज्झइ । कुज्झइ । सिज्झइ । मुज्झइ ॥

रुधो न्ध-म्भौ च ॥ २१८ ॥

रुधोन्त्यस्य न्ध म्भ इत्येतौ चकारात् ज्झश्च भवति[2] ॥ रुन्धइ । रुम्भइ । रुज्झइ ॥

सद-पतोर्डः ॥ २१९ ॥

अनयोरन्त्यस्य[3] डो भवति ॥ सडइ । पडइ ॥

कथ-वर्धां ढः ॥ २२० ॥

अनयोरन्त्यस्य ढो भवति ॥ कढइ । वड्ढइ पवय-कलयलो ॥ परिअड्ढइ लायण्णं ॥ बहुवचनाद् वृधेः कृतगुणस्य वर्धेश्चाविशेषेण ग्रहणम् ॥

वेष्टः[4] ॥ २२१ ॥

वेष्ट वेष्टने इत्यस्य धातोः कगटड[5] इत्यादिना [२.७७.] षलोपेन्त्यस्य ढो भवति ॥ वेढइ । वेढिज्जइ ॥

समो ल्लः ॥ २२२ ॥

संपूर्वस्य वेष्टतेरन्त्यस्य द्विरुक्तो लो भवति ॥ संवेल्लइ ॥

वोदः ॥ २२३ ॥

उदः परस्य वेष्टतेरन्त्यस्य[6] ल्लो वा भवति ॥ उव्वेल्लइ उव्वेढइ ॥

---

१ A °मंतस्य. २ P भवान्त. ३ A °रंतस्य. ४ A वेष्टः. B वेष्टेः. ५ A त्रिष्टि. ६ B वेष्टेर°.

स्विदां ज्जः ॥ २२४ ॥

स्विदिप्रकाराणामन्त्यस्य द्विरुक्तो जो भवति ॥ सव्वङ्ग-सिज्जिरीए । संपज्जइ । खिज्जइ ॥ बहुवचनं प्रयोगानुसरणार्थम् ॥

व्रज-नृत-मदां च्चः ॥ २२५ ॥

एषामन्त्यस्य द्विरुक्तश्चो भवति ॥ वच्चइ । नच्चइ । मच्चइ ॥

रुद-नमोर्वः ॥ २२६ ॥

अनयोरन्त्यस्य वो भवति ॥ रुवइ । रोवइ । नवइ ॥

उद्विजः ॥ २२७ ॥

उद्विजतेरन्त्यस्य वो भवति ॥ उव्विवइ । उव्वेवो ॥

खाद-धावोर्लुक् ॥ २२८ ॥

अनयोरन्त्यस्य लुग् भवति ॥ खाइ । खाअइ । खाहिइ । खाउ । धाइ । धाहिइ । धाउ ॥ बहुलाधिकाराद्वर्तमानाभविष्यद्विध्याद्येकवचन एव भवति । तेनेह न भवति । खादन्ति । धावन्ति ॥ क्वचिन्न भवति । धावइ पुरओ ॥

सृजो रः ॥ २२९ ॥

सृजो धातोरन्त्यस्य रो भवति ॥ निसिरइ । वोसिरइ । वोसिरामि ॥

शकादीनां द्वित्वम् ॥ २३० ॥

शकादीनामन्त्यस्य द्वित्वं भवति ॥ शक् । सक्कइ ॥ जिम् । जिम्मइ ॥ लग् । लग्गइ ॥ मग् । मग्गइ ॥ कुप् । कुप्पइ ॥ नश् । नस्सइ ॥ अट् । परिअट्टइ ॥ लुट् । पलोट्टइ ॥ तुट् । तुट्टइ ॥ नट् । नट्टइ ॥ सिव् । सिव्वइ । इत्यादि ॥

---

१ A °मंतस्य. २ A °रंतस्य. ३ P णवइ. ४ B खाओ. ५ B °इ । धाअइ । धाहि°. ६ B धाओ. ७ A B सिन् । सिन्नइ.

स्फुटि-चलेः ॥ २३१ ॥

अनयोरन्त्यस्य द्वित्वं वा भवति ॥ फुट्टइ फुडइ । चल्लइ चलइ ॥

प्रादेर्मीलेः[1] ॥ २३२ ॥

प्रादेः परस्य मीलेरन्त्यस्य द्वित्वं वा भवति ॥ पमिल्लइ पमीलइ । निमिल्लइ निमीलइ । संमिल्लइ संमीलइ । उम्मिल्लइ उम्मीलइ[2] ॥ प्रादेरिति किम् । मीलइ ॥

उवर्णस्यावः ॥ २३३ ॥

धातोरन्त्यस्योवर्णस्य अवादेशो[3] भवति ॥ न्हुङ् । निण्हवइ[4] ॥ हु । निहवइ ॥ च्युङ् । चवइ ॥ रु । रवइ ॥ कु । कवइ ॥ सू । सवइ । पसवइ ॥

ऋवर्णस्यारः ॥ २३४ ॥

धातोरन्त्यस्य[5] ऋवर्णस्य अरादेशो भवति ॥ करइ । धरइ । मरइ[6] । वरइ । सरइ । हरइ । तरइ । जरइ ॥

वृषादीनामरिः ॥ २३५ ॥

वृष इत्येवंप्रकाराणां धातूनाम् ऋवर्णस्य अरिः इत्यादेशो भवति ॥ वृष । वरिसइ ॥ कृष । करिसइ[7] ॥ मृष । मरिसइ ॥ हृष । हरिसइ ॥ येषामरिरादेशो दृश्यते ते वृषादयः ॥

रुषादीनां दीर्घः ॥ २३६ ॥

रुष इत्येवंप्रकाराणां धातूनां स्वरस्य दीर्घो भवति ॥ रूसइ । तूसइ । सूसइ । दूसइ । पूसइ । सीसइ । इत्यादि ॥

युवर्णस्य गुणः ॥ २३७ ॥

धातोरिवर्णस्योवर्णस्य च क्ङित्यपि गुणो भवति ॥ जेऊण । नेऊण ।

---

१ A °मीलः. २ A उमीलइ. ३ B °शो वा भ°. ४ P B °इ । नि°. ५ A °रंतस्य. ६ A °इ । स°. ७ B °इ । हृष् । हरिसइ । मृ°.

नेइ । नेन्ति । उड्डेइ । उड्डेन्ति । मोत्तूण । सोऊण ॥ क्वचिन्न भवति । नीओ । उड्डीणो ॥

स्वराणां स्वराः ॥ २३८ ॥

धातुषु स्वराणां स्थाने स्वरा बहुलं भवन्ति ॥ हवइ । हिवइ ॥ चिणइ । चुणइ ॥ सद्दहणं । सद्दहाणं ॥ धावइ । धुवइ ॥ रुवइ । रोवइ ॥ क्वचिन्नित्यम् । देइ । लेइ । विहेइ । नासइ ॥ आर्षे । बेमि ॥

व्यञ्जनाददन्ते ॥ २३९ ॥

व्यञ्जनान्ताद्धातोरन्ते अकारो भवति ॥ भमइ । हसइ । कुणइ । चुम्बइ । भणइ । उवसमइ । पावइ । सिञ्चइ । रुन्धइ । मुसइ । हरइ । करइ ॥ शब्‍आदीनां च प्रायः प्रयोगो नास्ति ॥

स्वरादनतो वा ॥ २४० ॥

अकारान्तवर्जितात्स्वरान्ताद्धातोरन्ते अकारागमो वा भवति ॥ पाइ पाअइ । धाइ धाअइ । जाइ जाअइ । झाइ झाअइ । जम्भाइ जम्भाअइ । उव्वाइ उव्वाअइ । मिलाइ मिलाअइ । विक्केइ विक्केअइ । होऊण होइऊण ॥ अनत इति किम् । चिइच्छइ । दुगुच्छइ ॥

चि-जि-श्रु-हु-स्तु-लू-पू-धूगां णो ह्रस्वश्च ॥ २४१ ॥

च्यादीनां धातूनामन्ते णकारागमो भवति एषां स्वरस्य च ह्रस्वो भवति ॥ चि । चिणइ ॥ जि । जिणइ ॥ श्रु । सुणइ ॥ हु । हुणइ ॥ स्तु । थुणइ ॥ लू । लुणइ ॥ पू । पुणइ ॥ धूग् । धुणइ ॥ बहुलाधिकारात्क्वचिद्विकल्पः । उच्चिणइ । उच्चेइ ॥ जेऊण । जिणिऊण ॥ जयइ । जिणइ ॥ सोऊण । सुणिऊण ॥

न वा कर्म-भावे व्वः क्यस्य च लुक् ॥ २४२ ॥

च्यादीनां कर्मणि भावे च वर्तमानानामन्ते द्विरुक्तो वकारागमो

---

१ A °इ । कणइ । चुं. २ B थवा°. ३ A P होअऊण. ४ B °हु. ५ P B च दीर्घस्य ह्र. ६ B हु. ७ B बेर्मो.

वा भवति तत्सन्नियोगे च क्यस्य लुक् ॥ चिव्वइ चिणिज्जइ । जिव्वइ जिणिज्जइ । सुव्वइ सुणिज्जइ । हुव्वइ हुणिज्जइ । थुव्वइ थुणिज्जइ । लुव्वइ लुणिज्जइ । पुव्वइ पुणिज्जइ । धुव्वइ धुणिज्जइ ॥ एवं भविष्यति । चिव्विहिइ । इत्यादि ॥

म्मश्चेः ॥ २४३ ॥

चिगः कर्मणि भावे च अन्ते संयुक्तो मो वा भवति तत्सन्नियोगे[1] क्यस्य च लुक् ॥ चिम्मइ । चिव्वइ । चिणिज्जइ ॥ भविष्यति । चिम्मिहिइ । चिव्विहिइ । चिणिहिइ ॥

हन्खनोन्त्यस्य[2] ॥ २४४ ॥

[3]अनयोः कर्मभावेन्त्यस्य द्विरुक्तो मो वा भवति तत्सन्नियोगे क्यस्य च लुक् ॥ हम्मइ हणिज्जइ । खम्मइ खणिज्जइ ॥ भविष्यति । हम्मिहिइ हणिहिइ । खम्मिहिइ खणिहिइ ॥ बहुलाधिकाराद्धन्तेः कर्तर्यपि ॥ हम्मइ । हन्तीत्यर्थः ॥ क्वचिन्न भवति ॥ हन्तव्वं । हन्तूण[4] । हओ ॥

ब्भो दुह-लिह-वह-रुधामुच्चातः ॥ २४५ ॥

दुहादीनामन्त्यस्य कर्मभावे द्विरुक्तो भो वा भवति तत्सन्नियोगे क्यस्य च लुक् वहेरकारस्य च उकारः ॥ दुब्भइ दुहिज्जइ । लिब्भइ । लिहिज्जइ । वुब्भइ वहिज्जइ । रुब्भइ रुन्धिज्जइ । भविष्यति । दुब्भिहिइ दुहिहिइ । इत्यादि ॥

दहो ज्झः ॥ २४६ ॥

दहोन्त्यस्य कर्मभावे द्विरुक्तो झो वा भवति[10] तत्सन्नियोगे क्यस्य च लुक् ॥ डज्झइ । डहिज्जइ । भविष्यति । डज्झिहिइ । डहिहिइ ॥

१ B °गे न क्यस्य लुक्. २ A °णोन्तस्य. ३ A [illegible] ननुगः कर्मणि भावे चांते संयुक्तो मो वा भ°. ४ B हंतूणं. ५ A °अंतस्य. ६ B हओ. ७ B रुंब्भइ. ८ A °न्तस्य. ९ B ज्झो. १० B तित्स°. ११ PB डहि°. १२ A डज्झहिइ.

बन्धो न्धः ॥ २४७ ॥

बन्धेर्धातोरन्त्यस्य न्ध इत्यवयवस्य कर्मभावे ज्झो वा भवति तत्सन्नि-योगे क्यस्य च लुक् ॥ बज्झइ। बन्धिज्जइ ॥ भविष्यति। बज्झिहिइ। बन्धिहिइ ॥

समनूपाद्रुधेः ॥ २४८ ॥

समनूपेभ्यः परस्य रुधेरन्त्यस्य कर्मभावे ज्झो वा भवति तत्सन्नि-योगे क्यस्य च लुक् ॥ संरुज्झइ। अणुरुज्झइ। उवरुज्झइ। पक्षे। संरुन्धिज्जइ। अणुरुन्धिज्जइ। उवरुन्धिज्जइ ॥ भविष्यति। संरुज्झि-हिइ। संरुन्धिहिइ। इत्यादि ॥

गमादीनां द्वित्वम् ॥ २४९ ॥

गमादीनामन्त्यस्य कर्मभावे द्वित्वं वा भवति तत्सन्नियोगे क्यस्य च लुक् ॥ गम्। गम्मइ। गमिज्जइ ॥ हस्। हस्सइ। हसिज्जइ ॥ भण्। भण्णइ। भणिज्जइ। कुप्। कुप्पइ। कुविज्जइ ॥ रुद-नमोर्वः [४.२२६] इति कृतवकारादेशो रुदिरत्र पठ्यते। रुव्। रुव्वइ। रुविज्जइ ॥ लभ्। लब्भइ। लहिज्जइ ॥ कथ्। कत्थइ। कहिज्जइ ॥ भुज्। भुज्जइ ॥ भुञ्जिज्जइ ॥ भविष्यति। गम्मिहिइ। गमिहिइ। इत्यादि ॥

हृ-कृ-तृ-ज्रामीरः ॥ २५० ॥

एषामन्त्यस्य ईर इत्यादेशो वा भवति तत्सन्नियोगे च क्यलुक् ॥ हीरइ हरिज्जइ। कीरइ करिज्जइ। तीरइ तरिज्जइ। जीरइ जरिज्जइ ॥

अर्जेर्विढप्पः ॥ २५१ ॥

अन्त्यस्येति निवृत्तम्। अर्जेर्विढप्प इत्यादेशो वा भवति तत्सन्नियोगे क्यस्य च लुक् ॥ विढप्पइ। पक्षे। विढविज्जइ। अज्जिज्जइ ॥

---

१ A °रंतस्य. २ B °त्यस्याव°. ३ B वज्झेहिइ. ४ B रुधेः क°. ५ A °मंनस्य. ६ P भण्णए। भणिज्जए. ७ A °दित्यत्र प°. B °दिरत्रोच्यते. ८ B रुव्विज्जइ. ९ B °कृ°. १० P °गे क्यलुक् च. B °गे क्यस्य च लुक्.

ज्ञो णव्व-णज्जौ ॥ २५२ ॥

जानातेः कर्मभावे णव्व णज्ज इत्यादेशौ वा भवतः तत्संनियोगे क्यस्य च लुक् ॥ णव्वइ णज्जइ । पक्षे । जाणिज्जइ । मुणिज्जइ ॥ म्न-ज्ञोर्णः [२.४२] इति णादेशे तु । णाइज्जइ ॥ नञ्पूर्वकस्य । अणाइज्जइ ॥

व्याहृगेर्वाहिप्पः ॥ २५३ ॥

व्याहरतेः कर्मभावे वाहिप्प इत्यादेशो वा भवति तत्संनियोगे क्यस्य च लुक् ॥ वाहिप्पइ । वाहरिज्जइ ॥

आरभेराढप्पः ॥ २५४ ॥

आङ्पूर्वस्य[1] रभेः कर्मभावे आढप्प इत्यादेशो वा भवति क्यस्य[2] च लुक् ॥ आढप्पइ । पक्षे । आढवीअइ ॥

स्निह[3]-सिचोः सिप्पः ॥ २५५ ॥

अनयोः कर्मभावे सिप्प इत्यादेशो[4] भवति क्यस्य[2] च लुक् ॥ सिप्पइ । स्निह्यते । सिच्यते वा ॥

ग्रहेर्घेप्पः ॥ २५६ ॥

ग्रहेः कर्मभावे घेप्प इत्यादेशो वा भवति क्यस्य[2] च लुक् ॥ घेप्पइ । गिण्हिज्जइ[5] ॥

स्पृशेश्छिप्पः ॥ २५७ ॥

स्पृशतेः कर्मभावे छिप्पादेशो वा भवति क्यलुक् च ॥ छिप्पइ । छिविज्जइ ॥

---

१ A °पूर्वस्य. २ P B क्यलुक् च ।. ३ B स्नेह°. ४ A °शो वा भ°. ५ B गेण्हि°.

क्तेनाप्फुण्णादयः[1] ॥ २५८ ॥

अप्फुण्णादयः शब्दा आक्रमिप्रभृतीनां धातूनां स्थाने क्तेन सह[2] वा निपात्यन्ते ॥ अप्फुण्णो[3] । आक्रान्तः ॥ उक्कोसं । उत्कृष्टम् ॥ फुडं । स्पष्टम् ॥ वोलीणो । अतिक्रान्तः ॥ वोसट्टो[4] । विकसितः ॥ निसुट्टो[5] । निपातितः ॥ लुग्गो । रुग्णः ॥ ल्हिक्को । नष्टः ॥ पम्हुट्टो । प्रमृष्टः प्रमुषितो वा ॥ विढत्तं[6] । अर्जितम् ॥ छित्तं । स्पृष्टम् ॥ निमिअं । स्थापितम् ॥ चक्खिअं । आस्वादितम् ॥ लुअं[7] । लूनम् ॥ जढं । त्यक्तम् ॥ झोसिअं[8] । क्षिप्तम् ॥ निच्छूढं । उद्धृत्तम्[9] ॥ पल्हत्थं पलोट्टं[10] च । पर्यस्तम् ॥ हीसमणं । हेषितम् । इत्यादि ॥

धातवोर्थान्तरेपि ॥ २५९ ॥

उक्तादर्थादर्थान्तरेपि धातवो वर्तन्ते ॥ बलिः प्राणने पठितः खादनेपि वर्तते । बलइ । खादति प्राणनं करोति वा ॥ एवं कलिः संख्याने संज्ञानेपि । कलइ । जानाति संख्यानं करोति वा ॥ रिगिर्गतौ प्रवेशेपि ॥ रिगइ[11] । प्रविशति गच्छति वा ॥ काङ्क्षतेर्वम्फ आदेशः प्राकृते । वम्फइ । अस्यार्थः । इच्छति खादति वा ॥ फक्कतेस्थक्क आदेशः । थक्कइ । नीचां गतिं करोति विलम्बयति[12] वा ॥ विलप्युपालम्भ्योर्झङ्ख[13] आदेशः । झङ्खइ । विलपति उपालभते भाषते वा ॥ एवं पडिवालेइ[14] । प्रतीक्षते रक्षति वा ॥ केचित् केश्चिदुपसर्गैर्नित्यम् । पहरइ । युध्यते ॥ संहरइ । संवृणोति ॥ अणुहरइ । सदृशीभवति ॥ नीहरइ । पुरीषोत्सर्गं करोति ॥ विहरइ । क्रीडति ॥ आहरइ । खादति ॥ पडिहरइ । पुनः पूरयति ॥ परिहरइ । त्यजति ॥ उवहरइ । पूजयति ॥ वाहरइ । आह्वयति ॥ पवसइ । देशान्तरं गच्छति ॥ उच्चुपइ । चटति ॥ उल्लुहइ । निःसरति ॥

---

१ A °नाप्फुण्णा°. २ B सह नि . ३ A अफुण्णो. ४ B °सट्टो. ५ B °सुट्टो. ६ A वेढत्तं. ७ A लूअं. ८ A °झासिअं. ९ P उद्धृतं. १० B पलोट्टं. ११ P रिंगइ. B रिंगइ. १२ B पृच्छति. १३ B विडंव . १४ A °पालंभे झंख°. P °पालम्भ्यो°. १५ A °पइ. १६ P B °वालइ. १७ A क्रीणाति. १८ P उच्चुप्पइ. १९ B °ति ॥ अथ शौरसेनी ॥ नो°.

तो दोनादौ शौरसेन्यामयुक्तस्य ॥ २६० ॥

शौरसेन्यां भाषायामनादावपदादौ वर्तमानस्य तकारस्य दकारो भवति न चेदसौ वर्णान्तरेण संयुक्तो भवति ॥ तदो पूरिद-पदिञ्ञेन मारुदिना मन्तिदो ॥ एतस्मात् । एदाहि । एदाओ ॥ अनादाविति किम् । तधा करेध जधा तस्स राइणो अणुकम्पणीआ भोमि ॥ अयुक्तस्येति किम् । मत्तो । अय्यउत्तो । असंभाविद-सक्कारं । हला सउन्तले ॥

अधः क्वचित् ॥ २६१ ॥

वर्णान्तरस्याधोवर्तमानस्य तस्य शौरसेन्यां दो भवति । क्वचिल्लक्ष्यानुसारेण ॥ महन्दो । निच्चिन्दो । अन्देउरं ॥

वादेस्तावति[३] ॥ २६२ ॥

शौरसेन्यां तावच्छब्दे आदेस्तकारस्य दो वा भवति ॥ दाव । ताव ॥

आ आमन्त्र्ये सौ वेनो नः ॥ २६३ ॥

शौरसेन्यामिनो नकारस्य आमन्त्र्ये सौ परे आकारो वा भवति ॥ भो कञ्चुइआ । सुहिआ । पक्षे । भो तवस्सि । भो मणस्सि ॥

मो वा ॥ २६४ ॥

शौरसेन्यामामन्त्र्ये सौ परे नकारस्य मो वा भवति ॥ भो रायं । भो विअयवम्मं । सुकम्मं । भयवं कुसुमाउह । भयवं तित्थं पवत्तेह । पक्षे । सयल लोअ-अन्तेआरि भयवं हुदवह ॥

भवद्भगवतोः ॥ २६५ ॥

आमन्त्र्य इति निवृत्तम् । शौरसेन्यामनयोः सौ परे नस्य मो भवति ॥ किं एत्थभवं हिदएण चिन्तेदि । एदु भवं । समणे भगवं महावीरे ॥

---

१ P °ञ्ञेण मारुदिणा म°. २ A अज्जउ°. ३ B °ति शौरसेन्यां ॥ ६२ ॥ ताव°. ४ A आमन्त्र्ये. ५ P भो सुहिआ. ६ A भयवं. ७ B भवम्. ८ P भयवं.

पज्जलिदो भयवं हुदासणो ॥ क्वचिदन्यत्रापि । मघवं पागसासणे । संपाइअवं सीसो[1] । कयवं । करेमि काहं च ॥

न वा र्यो य्यः ॥ २६६ ॥

शौरसेन्यां र्यस्य स्थाने य्यो वा भवति ॥ अय्यउत्त पय्याकुलीक[2]-दह्मि । सुय्यो । पक्षे । अज्जो । पज्जाउलो । कज्ज-परवसो ॥

थो[3] धः ॥ २६७ ॥

शौरसेन्यां थस्य धो वा भवति ॥ कधेदि कहेदि । णाधो णाहो । कधं कहं । राज-पधो राज-पहो ॥ अपदादावित्येव । थामं । थेओ ॥

इह-हचोर्हस्य ॥ २६८ ॥

इहशब्दसंबन्धिनो मध्यमस्येत्था-हचौ [३.१४३] इति विहितस्य हचश्च हकारस्य शौरसेन्यां धो वा भवति[4] ॥ इध । होध । परित्ता-यध ॥ पक्षे । इह । होह । परित्तायह ॥

भुवो भः ॥ २६९ ॥

भवतेर्हकारस्य शौरसेन्यां भो वा भवति ॥ भोदि होदि । भुवदि हुवदि । भवदि हवदि ॥

पूर्वस्य पुरवः ॥ २७० ॥

शौरसेन्यां पूर्वशब्दस्य पुरव इत्यादेशो वा भवति ॥ अपुरवं[5] नाडयं । अपुरवागदं[6] । पक्षे । अपुव्वं पदं[7] । अपुव्वागदं ॥

क्त्व इय-दूणौ ॥ २७१ ॥

शौरसेन्यां क्त्वाप्रत्ययस्य इय दूण इत्यादेशौ वा भवतः ॥ भविय भोदूण । हविय[8] होदूण । पढिय पढिदूण[9] । रमिय रन्दूण । पक्षे भोत्ता । होत्ता । पढित्ता । रन्ता[10] ॥

---

१ A °सां । संपादितवान् शिष्यः । क°. २ A अय्या°. ३ B थोवः शौरसेन्यां ॥ १७ ॥ थ°. ४ A °ति ॥ इह । इध. ५ A °रवयं ना°. ६ B °वादग°. ७ A °दं । अपुव्वागदं. ८ P B °अ. ९ A °ण । मरिय । मरिदूण । र°. १० P रन्तूत्ता.

क्ृ-गमो डडुअः ॥ २७२ ॥

आभ्यां परस्य क्त्वाप्रत्ययस्य डित् अडुअ इत्यादेशो[1] वा भवति ॥ कडुअ[2] । गडुअ । पक्षे । करिय । करिदूण । गच्छिय । गच्छिदूण ॥

दिरिचेचोः ॥ २७३ ॥

त्यादीनामाद्यत्रयस्याद्यस्येचेचौ [३.१३९] इति विहितयोरिचेचोः स्थाने दिर्भवति ॥ वेति निवृत्तम् । नेदि । देदि । भोदि । होदि ॥

अतो देश्च ॥ २७४ ॥

अकारात्परयोरिचेचोः स्थाने देश्चकाराद् दिश्च[7] भवति ॥ अच्छदे । अच्छदि[4] ॥ गच्छदे । गच्छदि ॥ रमदे । रमदि ॥ किज्जदे । किज्जदि ॥ अत इति किम् । वसुआदि । नेदि[6] । भोदि ॥

भविष्यति स्सिः ॥ २७५ ॥

शौरसेन्यां भविष्यदर्थे विहिते प्रत्यये परे स्सिर्भवति ॥ हिस्साहामपवादः ॥ भविस्सिदि । करिस्सिदि । गच्छिस्सिदि ॥

अतो ङसेर्डादो-डादू ॥ २७६ ॥

अतः परस्य ङसेः शौरसेन्यां आदो आदु[8] इत्यादेशौ डितौ भवतः ॥ दूरादो य्येव । दूरादु ॥

इदानीमो दाणिं ॥ २७७ ॥

शौरसेन्यामिदानीमः स्थाने दाणिमित्यादेशो भवति ॥ अनन्तरकरणीयं दाणिं आणवेदु अय्यो ॥ व्यत्ययात्प्राकृतेपि । अन्नं दाणिं बोहिं ॥

तस्मात्ताः ॥ २७८ ॥

शौरसेन्यां तस्माच्छब्दस्य ता इत्यादेशो भवति ॥ ता जाव पविसामि । ता अलं एदिणा माणेण[9] ॥

---

१ P °दुअ°. २ P °शो भ°. ३ P कदुअ । गदुअ. ४ A दे च°. ५ A °दि । रम°. ६ B नोदि. ७ B अकारात्प°. ८ A B आदू. ९ B माणेन.

मोन्त्याण्णो वेदेतोः ॥ २७९ ॥

शौरसेन्यामन्त्यान्मकारात्पर इदेतोः परयोर्णकारागमो वा भवति ॥ इकारे । जुत्तं णिमं जुत्तमिणं । सरिसं णिमं सरिसमिणं । एकारे । किं णेदं किमेदं । एवं णेदं एवमेदं ॥

एवार्थे य्येव ॥ २८० ॥

एवार्थे य्येव इति निपातः शौरसेन्यां प्रयोक्तव्यः ॥ मम य्येव बम्भणस्स । सो य्येव एसो ॥

हञ्जे चेट्याह्वाने ॥ २८१ ॥

शौरसेन्यां चेट्याह्वाने हञ्जे इति निपातः प्रयोक्तव्यः ॥ हञ्जे चदुरिके ॥

हीमाणहे विस्मय-निर्वेदे ॥ २८२ ॥

शौरसेन्यां हीमाणहे इत्ययं निपातो विस्मये निर्वेदे च प्रयोक्तव्यः ॥ विस्मये ॥ हीमाणहे जीवन्त-वच्छा मे जणणी ॥ निर्वेदे । हीमाणहे पलिस्सन्ता हगे एदेण निय-विधिणो दुव्ववसिदेण ॥

णं नन्वर्थे ॥ २८३ ॥

शौरसेन्यां नन्वर्थे णमिति निपातः प्रयोक्तव्यः ॥ णं अफलोदया । णं अय्यमिस्सेहिं पुढमं य्येव आणत्तं । णं भवं मे अग्गदो चलदि । आर्षे वाक्यालंकारेपि दृश्यते । नमोत्थु णं । जया णं । तया णं ॥

अम्महे हर्षे ॥ २८४ ॥

शौरसेन्याम् अम्महे इति निपातो हर्षे प्रयोक्तव्यः ॥ अम्महे एआए सुम्मिलाए सुपलिगढिदो भवं ॥

---

१ A °नि । जु°. २ B इजु°. ३ A °मं । सरिसमिणं. ४ B °तः प्र°. ५ B चतु°. ६ A °स्मयनि°. ७ P I: दुव्वसि°. ८ B आणतं.

हीही विदूषकस्य ॥ २८५ ॥

शौरसेन्यां हीही इति निपातो विदूषकाणां हर्षे द्योत्ये प्रयोक्तव्यः ॥ हीही भो संपन्ना मणोरधा पिय-वयस्सस्स ॥

शेषं प्राकृतवत् ॥ २८६ ॥

शौरसेन्यामिह प्रकरणे यत्कार्यमुक्तं ततोन्यच्छौरसेन्यां प्राकृतवदेव भवति ॥ दीर्घ-ह्रस्वौ मिथो वृत्तौ [१.४] इत्यारभ्य तो दोनादौ शौरसेन्यामयुक्तस्य [४.२६०] एतस्मात्सूत्रात्प्राग् यानि सूत्राणि एषु यान्युदाहरणानि तेषु मध्ये अमूनि तदवस्थान्येव शौरसेन्यां भवन्ति अमूनि पुनरेवंविधानि भवन्तीति विभागः प्रतिसूत्रं स्वयमभ्यूह्य दर्शनीयः ॥ यथा । अन्दावेदी । जुवदि-जणो । मणसिला । इत्यादि[१] ॥

अत एत्सौ[२] पुंसि मागध्याम् ॥ २८७ ॥

मागध्यां भाषायां सौ परे अकारस्य[३] एकारो भवति पुंसि पुल्लिङ्गे ॥ एष मेषः । एशे मेशे ॥ एशे पुलिशे ॥ करोमि[४] भदन्त[५] । करेमि भन्ते ॥ अत इति किम् । णिही । कली । गिली ॥ पुंसीति किम् । जलं ॥ यदपि "पोराणमद्ध-मागह-भासा-निययं हवइ सुत्तम्" इत्यादिनार्षस्य अर्द्धमागधभाषानियतत्वमाम्नायि वृद्धैस्तदपि प्रायोस्यैव विधानान्न वक्ष्यमाणलक्षणस्य ॥ कयरे आगच्छइ ॥ से तारिसे दुक्खसहे जिइन्दिए[६] । इत्यादि ॥

र-सोर्ल-शौ ॥ २८८ ॥

मागध्यां रेफस्य दन्त्यसकारस्य च स्थाने यथासंख्यं लकारस्तालव्यशकारश्च भवति ॥ र ॥ नले । कले ॥ स । हंशे । शुदं । शोभणं ॥ उभयोः । शालशे । पुलिशे ॥

लहश-वश-नमिल-शुल-शिल-विअलिदं[७]-मन्दाल-लायिदंहि-युगे ।
वील-यिणे[८] पक्खालदु मम शयलमवय्य-येम्बालं[९] ॥

---

१ B °दि ॥ अथ मागधी ॥ २ A एतत्पुं°. ३ B आका°. ४ B करेमि. ५ P भदन्ते.
६ P जिएन्दि°. ७ B °विअ°. ८ B °यियं°. ९ A जंबालं.

स-षोः संयोगे सोऽग्रीष्मे ॥ २८९ ॥

मागध्यां सकारषकारयोः संयोगे वर्तमानयोः सो भवति ग्रीष्मशब्दे तु न भवति । ऊर्ध्वलोपाद्यपवादः ॥ स । पस्खलदि हस्ती[1] । बुहस्पदी । मस्कली । विस्मये ॥ ष । शुस्क-दालुं । कस्टं । विस्नुं । शस्प-कवले । उस्मा[2] । निस्फलं । धनुस्खण्डं ॥ अग्रीष्म इति किम् । गिम्ह-वाशले ॥

ट्ट-ष्ठयोस्टः ॥ २९० ॥

द्विरुक्तस्य टस्य[3] षकाराक्रान्तस्य च ठकारस्य मागध्यां सकाराक्रान्तः टकारो भवति ॥ ट्ट । पस्टे । भस्टालिका । भस्टिणी ॥ ष्ठ । शुस्टु[4] कदं । कोस्टागालं ॥

स्थ-र्थयोस्तः ॥ २९१ ॥

स्थ र्थ इत्येतयोः स्थाने मागध्यां सकाराक्रान्तः तो भवति[5] ॥ स्थ । उवस्तिदे । शुस्तिदे ॥ र्थ । अस्त-वदी । शस्तवाहे ॥

ज-द्य-यां यः ॥ २९२ ॥

मागध्यां जद्ययां स्थाने यो भवति ॥ ज । याणदि । यणवदे । अय्युणे । दुय्यणे । गय्यदि । गुण-वय्यिदे ॥ द्य । मय्यं । अय्य किल विय्याहले आगदे ॥ य । यादि । यधाशलूवं[6] । याण-वत्तं । यदि ॥ यस्य यत्वविधानम् आदेर्यो जः [१.२४५] इति बाधनार्थम् ॥

न्य-ण्य-ज्ञ-ञ्जां ञ्ञः ॥ २९३ ॥

मागध्यां न्य ण्य ज्ञ ञ्ज इत्येतेषां द्विरुक्तो ञो[7] भवति ॥ न्य । अहिमञ्ञु-कुमाले[8] । अञ्ञ-दिशं । शामञ्ञ-गुणे । कञ्ञका-वलणं[9] ॥ ण्य । पुञ्ञवन्ते[10] [11] । अबम्हञ्ञं । पुञ्ञाहं । पुञ्ञं ॥ ज्ञ । पञ्ञाविशाले । शव्वञ्ञे[12] । अवञ्ञा[13] ॥ ञ्ज । अञ्ञली । धणञ्ञए । पञ्ञले ॥

---

[1] B °स्ती । म°. [2] A उस्सा. [3] B टकारस्य. [4] B सुस्टु. [5] B °ति ॥ उ°. [6] B यथाश°. [7] A °लूवमया°. [8] B ञ्ञो°. [9] A °मञ्ञकु°. [10] B °काचल°. [11] B °वन्तो. [12] A सव्व.° [13] A सव्वञ्ञा । अञ्ञ । अञ्ञली.

[1]व्रजो जः ॥ २९४ ॥

मागध्यां व्रजेर्जकारस्य [2]ञ्जो भवति । यापवादः ॥ [3]वञ्जदि ॥

छस्य श्चोनादौ ॥ २९[4]५ ॥

मागध्यामनादौ वर्तमानस्य छस्य तालव्यशकाराक्रान्तश्चो भवति ॥ ग[5]श्च गश्च । उश्चलदि । पिश्चिले । पुश्चदि ॥ लाक्षणिकस्यापि । आपन्नवत्सल[6]ः । आवन्न-वश्चले ॥ तिर्यक् प्रेक्षते । तिरिच्छि पेच्छइ । तिरि[7]श्चि पे[8]स्कदि ॥ अनादाविति किम् । छाले ॥

क्षस्यᳵकः ॥ २९६ ॥

मागध्यामनादौ वर्तमान[9]स्य क्षस्यᳵको जिह्वामूलीयो भवति ॥ [10]यᳵके । लᳵ[11]कशे ॥ अनादावित्येव । खय-यलहला । क्षयजलधरा इत्यर्थः ॥

स्कः प्रेक्षा[12]चक्षोः ॥ २९७ ॥

मागध्यां प्रेक्षेराचक्षेश्च क्षस्य सकाराक्रान्तः को भवति ॥ जिह्वामूलीयापवादः ॥ पेस्कदि । आचस्कदि ॥

तिष्ठश्चि[13]ष्ठः ॥ २९८ ॥

मागध्यां स्थाधातोर्यस्तिष्ठ इत्यादेशस्तस्य चि[14]ष्ठ इत्यादेशो भवति ॥ चिष्ठदि ॥

अवर्णाद्वा ङसो डाहः ॥ २९९ ॥

मागध्यामवर्णात्परस्य ङसो डित् आह इत्यादेशो वा भवति ॥ हगे न [15]एलिशाह कम्माह काली । भगद[16]त्त-शोणिदाह कुम्भे । पक्षे । भीमशे[17]णस्स पश्चादो हिण्डीअदि । हिडिम्बाए [18]घडुक्कय-शोके ण उवशमदि ॥

---

१ B व्रजेर्जः. २ B ञ्जो. ३ B वञ्जदि. ४ B २९५ ॥ अनादौ. ५ B °श्च । उ°. ६ B °लः । आवन्नवच्छले । आ.° ७ A तिरश्चि. ८ B पेश्चदि. ९ A °स्यᳵकजि°. १० A यᳵक. ११ B °कसे. १२ B °चक्ष्योः. १३ A °श्चिट्ठः. १४ चिट्ठ°. १५ P ईदिशा°. १६ B भदन्त. १७ P °णश्श. १८ P घुडु°.

आमो डाहँ वा ॥ ३०० ॥

मागध्यामवर्णात्परस्य आमोनुनासिकान्तो डित् आहादेशो वा भवति ॥ श-यणाहँ सुहं । पक्षे । नलिन्दाणं ॥ व्यत्ययात्प्राकृतेपि । ताहँ । तुम्हाहँ । अम्हाहँ । सरिआहँ । कम्माहँ ॥

अहं-वयमोर्हगे ॥ ३०१ ॥

मागध्यामहंवयमोः स्थाने हगे इत्यादेशो भवति ॥ हगे शक्कावदालतित्थ-णिवाशी धीवले । हगे शंपत्ता ॥

शेषं शौरसेनीवत् ॥ ३०२ ॥

मागध्यां यदुक्तं ततोन्यच्छौरसेनीवद् द्रष्टव्यम् ॥ तत्र तो दोनादौ शौरसेन्यामयुक्तस्य [४.२६०] ॥ पविशदु आवुत्ते शामि-पशादाय ॥ अधः क्वचित् [४.२६१] ॥ अले किं एशे महन्दे कलयले ॥ वादेस्तावति [४.२६२] ॥ मालेध वा धलेध वा । अयं दाव शे आगमे ॥ आ आमन्त्र्ये सौ वेनो नः [४.२६३] ॥ भो कञ्चुइआ ॥ मो वा [४.२६४] ॥ भो रायं ॥ भवद्भगवतोः [४.२६५] ॥ एदु भवं शमणे भयवं महावीले । भयवं कदन्ते ये अप्पणो पक्कं उज्झिय पलस्स पक्कं पमाणीकलेशि ॥ न वा र्यो य्यः [४.२६६] ॥ अय्य एशे खु कुमाले मलयकेदू ॥ थो धः [४.२६७] ॥ अले कुम्भिला कधेहि ॥ इह-हचोर्हस्य [४.२६८] ॥ ओशलध अय्या ओशलध ॥ भुवो भः [४.२६९] ॥ भोदि ॥ पूर्वस्य पुरवः [४.२७०] ॥ अपुरवे ॥ क्त्व इय-दूणौ [४.२७१] ॥ किं खु शोभणे बम्हणे शित्ति कलिय लञ्ञा पलिग्गहे दिण्णे ॥ कृ-गमो डडुअः [४.२७२] ॥ कडुअ । गडुअ ॥ दिरिचेचोः [४.२७३] ॥ अमच्च-लक्कशं पिक्खिदुं इदो य्येव आग-

---

१ P B मुहं. २ A °तित्थ.° ३ B °वासी. ४ A °विसदु. ५ P आउत्ते. ६ A एसे. ७ B महेंदे. ८ B °वाय । यदा.° ९ A °मे ॥ आम. १० P °रायं. ११ B भगवं. १२ B कयंते. १३ A पक्कं. १४ A अय्ये एसे खु. १५ B वखु. १६ B उशालधअय्य । कुश°. १७ P अपुलवे. १८ P B इअ°. १९ P °दु°. २० P B पेक्खिदुं.

श्चदि ॥ अतोदेश्च [४.२७४] ॥ अले किं एशे महन्दे[1] कलयले शु-
णीअदे ॥ भविष्यति स्सिः [४.२७५] ॥ ता कहिं नु गदे[2] लुहिलप्पिए
भविस्सिदि ॥ अतो ङसेर्डादो-डादू [४.२७६] ॥ अहंपि भागुलाय-
णादो मुद्दं पावेमि[3] ॥ इदानीमो दाणिं [४.२७७] ॥ शुणध दाणिं
हगे शक्कावयाल-तिस्त-णिवाशी धीवले ॥ तस्मात्ताः [४.२७८] ॥
ता याव पविशामि ॥ मोन्त्याण्णो वेदेतोः [४.२७९] ॥ युत्तं णिमं ।
शलिशं णिमं ॥ एवार्थे य्येव [४.२८०] ॥ मम य्येव ॥ हञ्जे चेट्या-
ह्वाने [४.२८१] ॥ हञ्जे चदुलिके[6] ॥ हीमाणहे विस्मय-निर्वेदे
[४.२८२] ॥ विस्मये । यथा उदात्तराघवे । राक्षसः । हीमाणहे जी-
वन्त-वश्चा मे जणणी ॥ निर्वेदे ॥ यथा विक्रान्तभीमे । राक्षसः । ही-
माणहे पलिस्सन्ता हगे एदेण निय-विधिणो दुव्ववशिदेण[7] ॥ णं न-
न्वर्थे [४.२८३] ॥ णं अवशलोपशप्पणीया[8][9] लायाणो ॥ अम्महे हर्षे
[४.२८४] ॥ अम्महे एआए शुम्मिलाए शुपलिगढिदे भवं ॥ हीही
विदूषकस्य [४.२८५] ॥ हीही संपन्ना[10] मे मणोलधा पियवयस्सस्स ॥
शेषं प्राकृतवत् [४.२८६] ॥ मागध्यामपि दीर्घ-ह्रस्वौ मिथो वृत्तौ
[१.४] इत्यारभ्य तो दोनादौ शौरसेन्यामयुक्तस्य [४.२६०] इत्य-
स्मात्प्राग् यानि सूत्राणि तेषु यान्युदाहरणानि सन्ति तेषु मध्ये अमूनि
तदवस्थान्येव मागध्याममूनि पुनरेवंविधानि भवन्तीति विभागः स्व-
यमभ्यूह्य दर्शनीयः[11] ॥

ज्ञो ञः पैशाच्याम् ॥ ३०३ ॥

पैशाच्यां भाषायां ज्ञस्य स्थाने ञ्ञो भवति[12] ॥ पञ्ञा । सञ्ञा । सव्व-
ञ्ञो । ञ्ञानं[13][14] । विञ्ञानं ॥

---

१ B महेंद. २ P गडे. ३ B °वेमि. ४ P °वदाल°. ५ A °नित्थ°. ६ P चडुलिके. ७ A °श्वविशोदे°. ८ P °लोवशप्प°. ९ A °सप्पिणी°. १० A °न्ना म°. ११ B °यः ॥ अथ पैशाची ॥ ज्ञो°. १२ B °ति । स°. १३ P ज्ञानं. १४ A °नं ॥ रा°.

राज्ञो वा चिञ्[1] ॥ ३०४ ॥

पैशाच्यां राज्ञ इति शब्दे यो ज्ञकारस्तस्य चिञ्[2] आदेशो वा भवति ॥ राचिञा लपितं । रञ्ञा लपितं । राचिञो धनं । रञ्ञो धनं । ज्ञ इत्येव । राजा[3] ॥

न्य-ण्योर्ञ्ञः[4] ॥ ३०५ ॥

पैशाच्यां न्यण्योः स्थाने ञ्ञो भवति ॥ कञ्ञका । अभिमञ्ञू । पुञ्ञ-कम्मो । पुञ्ञाहं[5] ॥

णो नः ॥ ३०६ ॥

पैशाच्यां णकारस्य नो भवति ॥ गुन-गन-युत्तो[6] । गुनेन ॥

तदोस्तः[7] ॥ ३०७ ॥

पैशाच्यां तकारदकारयोस्तो भवति ॥ तस्य । भगवती । पव्वती[8] । सतं ॥ दस्य । मतन-परवसो । सतनं । तामोतरो । पतेसो । वतनकं । होतु । रमतु[9] ॥ तकारस्यापि तकारविधानमादेशान्तरबाधनार्थम् । तेन पताका वेतिसो[10] इत्याद्यपि सिद्धं भवति ॥

लो ळः[11] ॥ ३०८ ॥

पैशाच्यां लकारस्य ळकारो[12] भवति ॥ सीळं[13] । कुळं[13] । जळं[13] । सळिळं[14] । कमळं[13] ॥

श-षोः सः ॥ ३०९ ॥

पैशाच्यां शषोः सो भवति ॥ श । सोभति । सोभनं । ससी । सक्को । सङ्खो ॥ ष । विसमो । किसानो[15] ॥ न कगचजादिषट्शम्यन्तसूत्रोक्तम् [४.३२४] इत्यस्य बाधकस्य बाधनार्थोयं योगः ॥

---

१ B चिञः. २ B चिञ. ३ B राया. ४ A °ण्योर्ञः. ५ A पुञाहं. ६ P जुत्तो. B युक्तो. ७ B °स्तः पैशाच्यां ॥ ६ ॥ न.° ८ A पव्वती. ९ P °तु । तुमातो । तुमातु । ममातो । ममातु । त°. १० P B वेतसो. ११ B °ळः पैशाच्यां ॥ ७ ॥ ळ°. १२ A ळो. B ळकारो. १३ °ळं. १४ सळिळं. १५ P विसानो.

हृदये यस्य पः ॥ ३१० ॥

पैशाच्यां हृदयशब्दे यस्य पो भवति ॥ हितपकं । किंपि किंपि हितपके अत्थं चिन्तयमानी ॥

टोस्तुर्वा ॥ ३११ ॥

पैशाच्यां टोः स्थाने तुर्वा भवति ॥ कुतुम्बकं । कुटुम्बकं ॥

क्त्वस्तूनः ॥ ३१२ ॥

पैशाच्यां क्त्वाप्रत्ययस्य स्थाने तून इत्यादेशो भवति ॥ गन्तून । रन्तून । हसितून । पठितून । कधितून ॥

द्धून-त्थूनौ ष्ट्वः ॥ ३१३ ॥

पैशाच्यां ष्ट्वा इत्यस्य स्थाने द्धून त्थून इत्यादेशौ भवतः । पूर्वस्यापवादः ॥ नद्धून । नत्थून । तद्धून । तत्थून ॥

र्य-स्न-ष्टां रिय-सिन-सटाः क्वचित् ॥ ३१४ ॥

पैशाच्यां र्यस्नष्टां स्थाने यथासंख्यं रिय सिन सट इत्यादेशाः क्वचिद् भवन्ति ॥ भार्या । भारिया ॥ स्नातम् । सिनातं ॥ कष्टम् । कसटं ॥ क्वचिदिति किम् । सुज्जो । सुनुसा । तिट्ठो ॥

क्यस्येय्यः ॥ ३१५ ॥

पैशाच्यां क्यप्रत्ययस्य इय्य इत्यादेशो भवति ॥ गिय्यते । दिय्यते । रमिय्यते । पठिय्यते ॥

कृगो डीरः ॥ ३१६ ॥

पैशाच्यां कृगः परस्य क्यस्य स्थाने डीर इत्यादेशो भवति ॥ पुधुमतंसने सव्वस्स य्येव सम्मानं कीरते ॥

---

१ P पढितून. २ P द्धून. ३ B ष्ट्वः ॥ १२ ॥ ष्ट्वा. ४ P °सताः. ५ A B किम् । सुनु°. ६ P B पढिय्यते. ७ A °स्य स्था°.

याद्दशादेर्दुस्तिः ॥ ३१७ ॥

पैशाच्यां याद्दश इत्येवमादीनां द्द इत्यस्य स्थाने तिः इत्यादेशो भवति ॥ यातिसो । तातिसो । केतिसो । एतिसो । भवातिसो । अन्नातिसो । युम्हातिसो । अम्हातिसो ॥

इचेचः ॥ ३१८ ॥

पैशाच्यामिचेचोः स्थाने तिरादेशो भवति ॥ वसुआति । भोति । नेति । तेति ॥

आत्तेश्च ॥ ३१९ ॥

पैशाच्यामकारात्परयोः इचेचोः स्थाने तेश्चकारात् तिश्चादेशो भवति ॥ लपते । लपति । अच्छते । अच्छति । गच्छते । गच्छति । रमते । रमति ॥ आदिति किम् । होति । नेति ॥

भविष्यत्येय्य एव ॥ ३२० ॥

पैशाच्यामिचेचोः स्थाने भविष्यति एय्य एव भवति न तु स्सिः ॥ तं तद्धून चिंतितं रञ्ञा का एसा हुवेय्य ॥

अतो ङसेर्डातो-डातू ॥ ३२१ ॥

पैशाच्यामकारात्परस्य ङसेर्डितौ आतो आतु इत्यादेशौ भवतः ॥ ताव चँ तीए दूरातो य्येव तिट्ठो । तूरातु । तुमातो । तुमातु । ममातो । ममातु ॥

तदिदमोष्टा नेन स्त्रियां तु नाए ॥ ३२२ ॥

पैशाच्यां तदिदमोः स्थाने टाप्रत्ययेन सह नेन इत्यादेशो भवति । स्त्रीलिङ्गे तु नाए इत्यादेशो भवति ॥ तत्थ चँ नेनं कत-सिनानेन ॥ स्त्रियाम् । पूजितो चँ नाए पातग्ग-कुसुम-प्पतानेन ॥ टेति किम् । एवं चिन्तयन्तो गतो सो ताए समीपं ॥

---

१ P B तिरादे°. २ P °सो । ए°. ३ P °सो । अ°. ४ B ढम्हा°. Dhundhika here reads तुम्हा°, in accordance with I. 246. ५ A B ने चका°. ६ P तद्धून. ७ B व. ८ P तूरातो. ९ B दूरातु. १० P नेन । कतसिन । नेन. ११ A चिन्तय. १२ A तीए. १३ B समीवे.

शेषं शौरसेनीवत् ॥ ३२३ ॥

पैशाच्यां यदुक्तं ततोन्यच्छेषं पैशाच्यां शौरसेनीवद् भवति ॥ अध ससरीरो भगव मकर-धजो[1] । एत्थ परिब्भमन्तो हुवेय्य । एवंविधाए भगवतीए कथं तापस-वेस-गहनं कतं ॥ एतिसं अतिट्ठ-पुरवं महा-धनं तठून[2] । भगवं यदि[3] मं वरं पयच्छसि[4] राजं[5] च दाव लोकं[6] । तावं[7] च तीए दूरातोय्येव तिट्ठो[8] सो आगच्छमानो[9] राजा[10] ॥

न क-ग-च-जादि-षट्-शम्यन्त-सूत्रोक्तम् ॥ ३२४ ॥

पैशाच्यां क-ग-च-ज-त-द-प-य-वां प्रायोलुक् [१.१७७] इत्यारभ्य षट्-शमी-शाव-सुधा-सप्तपर्णेष्वादेश्छः [१.२६५] इति यावद्यानि सूत्राणि तैर्यदुक्तं कार्यं तन्न भवति ॥ मकरकेतू । सगर-पुत्त-वचनं । विजयसेनेन लपितं । मतनं[11] । पापं । आयुधं । तेवरो ॥ एवमन्यसूत्राणामप्युदाहरणानि द्रष्टव्यानि ॥

चूलिका-पैशाचिके[12] तृतीय-तुर्ययोराद्य-द्वितीयौ[13] ॥ ३२५ ॥

चूलिकापैशाचिके वर्गाणां तृतीयतुर्ययोः स्थाने यथासंख्यमाद्यद्वितीयौ भवतः ॥ नगरम् । नकरं ॥ मार्गणः[14] । मक्कनो ॥ गिरि-तटम् । किरि-तटं ॥ मेघः । मखो ॥ व्याघ्रः । वक्खो ॥ घर्मः । खम्मो ॥ राजा । राचा[15] ॥ जर्जरम् । चच्चरं ॥ जीमूतः । चीमूतो ॥ निर्झरः । निच्छरो ॥ झर्झरः । छच्छरो[16] ॥ तडागम् । तटाकं[17] ॥ मण्डलम् । मण्टलं ॥ डमरुकः । टमरुको ॥ गाढम । काठं ॥ षण्ढः । सण्ठो ॥ ढक्का । ठक्का ॥ मदनः । मतनो ॥ कन्दर्पः । कन्तप्पो ॥ दामोदरः । तामोतरो ॥ मधुरम् । मथुरं ॥ बान्धवः । पन्थवो[18] ॥ धूली । थूली ॥ बालकः । पालको ॥ रभसः । रफसो[19] ॥ रम्भा । रम्फा ॥ भगवती । फकवती ॥ नियोजितम । नियोचितं ॥ क्वचिल्लाक्षणिकस्यापि । पडिमा इत्यस्य स्थाने पटिमा[20] । दाढा इत्यस्य स्थाने ताठा ॥

---

१ P °रद्धजो. B °रध्वजो. २ P तधून. ३ P यति ४ P °यच्छसे. B °यच्छसं. ५ B रायं. ६ P लोके. ७ B °व ती°. ८ P तुरा . ९ B अग°. १० B राआ ॥ अथ चूलिका-पैशाची ॥ न°. ११ B थ. १२ A पतनं. १३ A चौलिका . १४ A मार्गनगः. १५ B राचा. १६ A छछेरो. १७ B तटागं. १८ B पन्धवो. १९ A °सो । भग°. २० B पडिमा.

रस्य लो वा ॥ ३२६ ॥

चूलिकापैशाचिके रस्य स्थाने लो वा भवति ॥

पनमथ पनयं[1]-पकुप्पित-गोली-चलन[2]ग्ग-लग्ग-पति-बिम्बं ।
तससु नख-तप्पनेसुं एकातस-तनु-थलं[3] लुद्दं[4] ॥
नच्चन्तस्स[5] य लीला-पातुक्खेवेन कम्पिता वसुधा[6] ।
उच्छल्लन्ति[7] समुद्दा सइला निपतन्ति तं हलं नमथ ॥

नादि-युज्योरन्येषाम् ॥ ३२७ ॥

चूलिकापैशाचिकेपि अन्येषामाचार्याणां मतेन तृतीयतुर्ययोरादौ वर्तमानयोर्युजिधातौ च आद्यद्वितीयौ न भवतः ॥ गतिः । गती ॥ घर्मः । घम्मो ॥ जीमूतः । जीमूतो ॥ झर्झरः । झच्छरो ॥ डमरुकः । डमरुको ॥ ढक्का । ढक्का[8] ॥ दामोदरः । दामोतरो[9] ॥ बालकः । बालको ॥ भगवती । भकवती[10] ॥ नियोजितम् । नियोजितं[11] ॥

शेषं प्राग्वत् ॥ ३२८ ॥

चूलिकापैशाचिके तृतीयतुर्ययोरित्यादि यदुक्तं ततोन्यच्छेषं प्राक्तन[12]-पैशाचिकवद् भवति ॥ नकरं । मक्कनो[13] । अनयोर्नो णत्वं[14] न भवति ॥ णस्य च[15] नत्वं स्यात् । एवमन्यदपि[16] ॥

स्वराणां स्वराः प्रायोपभ्रंशे ॥ ३२९ ॥

अपभ्रंशे स्वराणां स्थाने प्रायः स्वरा भवन्ति ॥ कच्चु । काच्च ॥ वेण । वीण[17] ॥ बाह । बाहा । बाहु ॥ पट्ठि । पिट्ठि । पुट्ठि ॥ तणु । तिणु । तृणु ॥ सुकिदु । सुकिओ[18] । सुकृदु ॥ किन्नओ । किलिन्नओ ॥ लिह । लीह । लेह ॥ गउरि । गोरि ॥ प्रायोग्रहणाद्यस्यापभ्रंशे विशेषो वक्ष्यते[19] तस्यापि क्वचित्प्राकृतवत् शौरसेनीवच्च कार्यं भवति ॥

---

१ B °यपकु°. २ B °नग्गपइवि°. ३ P थलं. ४ B लुद्दं. ५ B °नस्य. ६ B वसुधा. ७ B उच्छलंति. ८ A °क्का । दामोतरं. ९ B दामोदरो. १० B भगवती. ११ A नियोचितं. १२ A °क्तनं पै°. १३ B मक्करो. १४ B °त्वं च न. १५ B तु. १६ B °पि ॥ अथ अपभ्रंशभाषा ॥ स्वरा°. १७ A वीणा. १८ A सुकिउ. १९ B वक्ष्यति.

स्यादौ दीर्घ-ह्रस्वौ ॥ ३३० ॥

अपभ्रंशे नाम्नोंत्यस्वरस्य दीर्घह्रस्वौ स्यादौ प्रायो भवतः ॥ सौ ॥

ढोल्ला सामला धण चम्पा-वण्णी ।
णाइ[1] सुवण्ण-रेह कस-वट्टइ दिण्णी ॥

आमन्त्र्ये ।

ढोल्ला मइं[2] तुहुं वारिया[3] मा कुरु[4] दीहा माणु ।
निद्दए गमिही रत्तडी दडवड होइ विहाणु ॥

स्त्रियाम् ॥

बिट्टीए मइ भणिय तुहुं[5] मा करु वङ्की दिट्ठि[6] ।
पुत्ति सकण्णी[7] भल्लि जिवँ[8] मारइ हिअइ[9] पइट्ठि ॥

जसि ॥

एइ ति घोडा एह थलि एइ ति निसिआ खग्ग ।
एत्थु[10] मुणीसिम जाणीअइ[11] जो नवि वालइ वग्ग ॥

एवं विभक्त्यन्तरेष्वप्युदाहार्यम् ॥

स्यमोरस्योत् ॥ ३३१ ॥

अपभ्रंशे अकारस्य स्यमोः परयोः उकारो भवति ॥

दहमुहु[12] भुवण-भयंकरु तोसिअ-संकरु णिग्गउ रहे-वरि चडिअउ[13] ।
चउमुहु[12] छंमुहु[12] झाइवि एक्कहिं लाइवि णावइ दइवें घडिअउ ॥

सौ पुंस्योद्वा ॥ ३३२ ॥

अपभ्रंशे पुल्लिङ्गे वर्तमानस्य नाम्नोकारस्य सौ परे ओकारो[14] वा भवति ॥

अगलिअ-नेह-निवट्टाहं जोअण-लक्खुवि जाउ[15] ।
वरिस-सएणवि जो मिलइ सहि सोक्खहं सो ठाउ[16] ॥

पुंसीति किम् ।

---

१ P नाइ. २ P मइ. B मइ. ३ P B वारिओ. ४ B करु. ५ P तुह. B तुहं. ६ B वंकिदिट्ठी. ७ B °कण्णिभ°. ८ A जिम. B जिम. ९ A हिअय. B हीअइ. १० B एत्थ. ११ P जाणिअइ. १२ B °हु. १३ B रहेवडिं च°. १४ A B °रो भ°. १५ A जाओ. १६ B ट्ठाउ. A ठाओ.

अङ्गहिं अङ्गु न मिलिउ[1] हलि[2] अहरें[3] अहरु न पत्तु ।
पिअ जोअन्तिहे मुह-कमलु एम्वइ सुरउ समत्तु ॥

एट्टि ॥ ३३३ ॥

अपभ्रंशे अकारस्य टायामेकारो भवति ॥

जे महु दिण्णा[4] दिअहडा दइएं[5] पवसन्तेण ।
ताणं[6] गणन्तिए[7] अङ्गुलिउ जज्जरिआउ नहेण ॥

ङिनेच्च ॥ ३३४ ॥

अपभ्रंशे अकारस्य ङिना सह इकार एकारश्च भवतः[8] ॥

सायरु[9] उप्परि[10] तणु धरइ तलि घल्लइ रयणाइं ।
सामि सुभिच्चुवि परिहरइ सम्माणेइ खलाइं ॥

तले घल्लइ ॥

भिस्येद्वा ॥ ३३५ ॥

अपभ्रंशे अकारस्य भिसि परे एकारो[11] वा भवति ॥

गुणहिं[12] न संपइ[13] कित्ति परं[14] फल लिहिआ भुञ्जन्ति ।
केसरि न लहइ बोड्डिअवि गय लक्खेहिं घेप्पन्ति ॥

ङसेर्हे-हू[15] ॥ ३३६ ॥

अस्येति पञ्चम्यन्तं विपरिणम्यते । अपभ्रंशे अकारात्परस्य ङसेर्हे हु[16] इत्यादेशौ[17] भवतः ॥

वच्छहे गृण्हइ फलइं जणु कडु-पल्लव वज्जेइ ॥
तोवि महद्दुमु सुअणु जिवँ[19] ते उच्छङ्गि[20] धरेइ ॥

वच्छहु[21] गृण्हइ[18] ॥

---

१ P मिलिअउ. २ A हले. ३ B अहरे. ४ A दिन्ना. ५ A B दइए. ६ B ताणं. ७ A गणंतिअ. ८ A भवति. ९ B सायर. १० B उपरि. ११ B °रो भ°. १२ B गुणेहिं. १३ P संपय. १४ B परं. १५ A °हेंहू:. १६ A °हेंहू. १७ B °शौ वा भ°. १८ A गृन्हइ. १९ A B जिम्व. २० P उच्छङ्गे. २१ B वच्छहू.

भ्यसो हुं ॥ ३३७ ॥

अपभ्रंशे अकारात्परस्य भ्यसः पञ्चमीबहुवचनस्य हुं इत्यादेशो भवति ॥

दूरुड्डाणें पडिउ खलु अप्पणु जणु मारेइ[1]।
जिहँ[2] गिरि-सिङ्गहुं पडिअ सिल अन्नु[3] वि चूरु करेइ ॥

ङसः सु-हो-स्सवः ॥ ३३८ ॥

अपभ्रंशे अकारात्परस्य ङसः स्थाने सु हो स्सु इति त्रय आदेशा भवन्ति ॥

जो गुण गोवइ अप्पणा पयडा[4] करइ परस्सु ।
तसु हउं कलि-जुगि[5] दुल्लहहो बलि किज्जउं सुअणस्सु ॥

आमो हं ॥ ३३९ ॥

अपभ्रंशे अकारात्परस्यामो हमित्यादेशो भवति ॥

तणहं तइज्जी भङ्गि न वि[6] तें अवड-यडि वसन्ति ।
अह जणु लग्गिवि[7] उत्तरइ अह सह[8] सइं मज्जन्ति ॥

हुं चेदुद्भ्याम् ॥ ३४० ॥

अपभ्रंशे इकारोकाराभ्यां परस्यामो हुं हं चादेशौ भवतः ॥

दइवु[9] घडावइ वणि तरुहुं[10] सउणिहं[11] पक्क फलाइं ।
सो वरि सुक्खु पइट्ठ ण वि कण्णहिं खल-वयणाइं ॥

प्रायोधिकारात् क्वचित्सुपोपि हुं ।

धवलु विसूरइ सामिअहो[12] गरुआ भरु[13] पिक्खेवि ।
हउं[14] कि न जुत्तउ दुहुं दिसिहिं खण्डइं दोण्णि करेवि ॥

---

१ B मारइ. २ P जिहं. B जिहिं. ३ B अन्नवि. ४ A पइडा. ५ B °लियुगि. ६ B ते. ७ B भग्गिवि. ८ B सहि. ९ B वेदु°. १० B वादे°. ११ B सणिहं. १२ B °होमिअहोग°. १३ B भरपेक्खे°. १४ B हुं कि.

ङसि-भ्यस्-ङीनां हे-हुं-हयः ॥ ३४१ ॥

अपभ्रंशे इदुद्भ्यां परेषां ङसि भ्यस् ङि इत्येतेषां यथासंख्यं हे हुं हि इत्येते त्रय आदेशा भवन्ति ॥ ङसेर्हे ।

गिरिहे सिलायलु तरुहे फलु घेप्पइ नीसावँन्नु[1] ।
घरु मेल्लेप्पिणु[2] माणुसहं तोवि न रुच्चइ रंन्नु[3] ॥

भ्यसो हुं ।

तरुहुंवि वक्कलु फलु मुणिवि परिहणु असणु लहन्ति ।
सामिहुं एत्तिउ अग्गलेंउं[4] आयरु भिच्चु गृहन्ति ॥

ङेर्हि । अह विरल-पहाउ जि कलिहि धम्मु ॥

आट्टो णानुस्वारौ ॥ ३४२ ॥

अपभ्रंशे अकारात्परस्य टावचनस्य णानुस्वारावादेशौ[5] भवतः ॥ दइएं पवसन्तेण ॥

एं[6] चेदुतः ॥ ३४३ ॥

अपभ्रंशे इकारोकाराभ्यां परस्य टावचनस्य एं चकारात् णानुस्वारौ च भवन्ति ॥ एं ।

अग्गिएं उण्हउ होइ जगु वाँएं[7] सीअलु तेवँ[8] ।
जो पुणु[9] अग्गिं सीअला तसु उण्हत्तणु केवँ[10] ॥

णानुस्वारौ ।

विप्पिअ-आरउ जइवि पिउ तोवि तं आणहि[11] अज्जु[12] ।
अग्गिण दड्ढा जइवि घरु तो तें अग्गिं कज्जु ॥

एवमुकारादप्युदाहार्याः ॥

---

१ A B °सावन्नु. २ B मेल्लप्पिणु. ३ B रण्णु. ४ P B °लउ. ५ B °शौ वा भ°. ६ B एँ. ७ A वाउएं. ८ A B तेम्व. ९ B पुण. १० A B केम्व. ११ A आणहिँ. १२ B अज्जु.

स्यम्-जस्-शसां लुक् ॥ ३४४ ॥

अपभ्रंशे सि अम् जस् शस् इत्येतेषां लोपो भवति ॥ एइ ति[1] घोडा एह थलि । इत्यादि । अत्र स्यम्जसां लोपः ॥

> जिवँ[2] जिवँ वंकिम लोअणहं णिरु[3] सामलि[4] सिक्खेइ ।
> तिवँ[5] तिवँ वम्महु निअय-सरु[6] खर-पत्थरि तिक्खेइ ॥

अत्र स्यम्शसां लोपः ॥

षष्ठ्याः ॥ ३४५ ॥

अपभ्रंशे षष्ठ्या विभक्त्याः[7] प्रायो लुग् भवति ॥

> संगर-सएहिं[8] जु वण्णिअइ[9] देक्खु अम्हारा कन्तु ।
> अइमत्तहं चत्तङ्कुसहं गय कुम्भइं[10] दारन्तु ॥

पृथग्योगो लक्ष्यानुसारार्थः ॥

आमन्त्र्ये जसो होः ॥ ३४६ ॥

अपभ्रंशे आमन्त्र्येर्थे वर्तमानान्नाम्नः परस्य जसो हो इत्यादेशो भवति । लोपापवादः ॥

> तरुणहो तरुणिहो मुणिउ[11] मइं करहु[12] मं अप्पहो घाउ ॥

भिस्सुपोर्हि[13] ॥ ३४७ ॥

अपभ्रंशे भिस्सुपोः स्थाने हिं इत्यादेशो भवति ॥ गुणहिं[14] न संपइ कित्ति पर ॥ सुप् । भाईरहि जिवँ[15] भारइ मग्गेहिं तिहिंवि पयट्टइ ॥

स्त्रियां जस्-शसोरुदोत् ॥ ३४८ ॥

अपभ्रंशे स्त्रियां वर्तमानान्नाम्नः परस्य जसः शसश्च प्रत्येकमुदोतावादेशौ भवतः । लोपापवादौ[16] ॥ जसः । अंगुलिउ[17] जज्जरियाओ[18] नहेण ॥ शसः । सुन्दर-सव्वङ्गाउ[19] विलासिणीओ[20] पेच्छन्ताण ॥ वचनभेदान्न यथासंख्यम् ॥

---

१ B ते. २ A B जिम्वजिम्व. ३ A निरु. ४ B साम्वलि. ५ A B तिम्वतिम्व. ६ B सर. ७ P °भक्तेः. ८ P सआहिं. ९ A वन्नि°. १० A कुंभइ. B कुंभय. ११ P B मइ. १२ B मप्पहो. १३ A °पोर्हिं. १४ B गुणेहिं. १५ A B जिम्व. १६ P °वादः. १७ B °लीउ. १८ P B °रिआउ. १९ P B °गाओ. २० P °णीउ.

टए ॥ ३४९ ॥

अपभ्रंशे स्त्रियां वर्तमानान्नाम्नः परस्याष्टायाः स्थाने ए इत्यादेशो भवति ॥

निअ-मुह-करहिंवि मुद्ध कर अन्धारइ पडिपेक्खइ ।
ससि-मण्डल-चन्दिमए पुणु काइं न दूरे देक्खइ ॥

जहिं मरगय-कन्तिए संवलिअं ॥

ङस्-ङस्योर्हे ॥ ३५० ॥

अपभ्रंशे स्त्रियां वर्तमानान्नाम्नः परयोर्ङस् ङसि इत्येतयोर्हे इत्यादेशो भवति ॥ ङसः ।

तुच्छ-मज्झहे तुच्छ-जम्पिरहे ।
तुच्छच्छ-रोमावलिहे तुच्छ-राय तुच्छयर-हासहे ।
पिय-वयणु अलहन्तिअहे तुच्छकाय-वम्मह-निवासहे ॥
अन्नु जु तुच्छउं तहे धणहे तं अक्खणह न जाइ ।
कटरि थणंतरु मुद्धडहे जें[12] मणु विच्चि ण माइ ॥

ङसेः ।

फोडेन्ति[14] जें[15] हियडउं अप्पणउं ताहं पराइ कवण घृण ।
रक्खेज्जहु लोअहो अप्पणा बालहे जाया विसम थण ॥

भ्यसामोर्हुः ॥ ३५१ ॥

अपभ्रंशे स्त्रियां वर्तमानान्नाम्नः परस्य भ्यस आमश्च हु इत्यादेशो भवति ॥

भल्ला हुआ जु मारिआ बहिणि महारा कन्तु ।
लज्जेज्जं तु वयंसिअहु जइ भग्गा घरु एन्तु ॥

वयस्याभ्यो वयास्यानां वेत्यर्थः ॥

१ A °रस्यटायाः. २ B मुकरहिं. ३ B मुद्ध. A मुद्द. ४ P किर. ५ A दूरं. B दूरे. ६ B °गयं कंति°. ७ B °हंहिअ°. ८ B थणहे. ९ P णउं. १० A B घणं°. ११ B मुद्धडहे. १२ A जे. B जं. १३ P B न माइ. १४ B फोडंति. १५ A जि. १६ B हिंअ°. १७ A घृण. B घण. P घण ॥ भ्यसा°. १८ P तहणहो. १९ B थण. २० A चेत्य°.

ङेर्हिं[1] ॥ ३५२ ॥

अपभ्रंशे स्त्रियां वर्तमानान्नाम्नः परस्य ङेः सप्तम्येकवचनस्य हिं[2] इत्यादेशो भवति ॥

वायसु उड्डावन्तिअए पिउ दिट्ठउ सहसत्ति[3] ।
अद्धा वलया महिहिं[4] गय अद्धा फुट्ट तडत्ति[5] ॥

क्लीबे जस्-शसोरिं[6] ॥ ३५३ ॥

अपभ्रंशे क्लीबे वर्तमानान्नाम्नः परयोर्जस्-शसोः इं इत्यादेशो भवति ॥

कमलइं मेल्लवि अलि-उलइं करि-गण्डाइं महन्ति ।
असुलहमेच्छण[7] जाहं भलि ते णवि दूरं[8] गणन्ति ॥

कान्तस्यात उं स्यमोः ॥ ३५४ ॥

अपभ्रंशे क्लीबे वर्तमानस्य ककारान्तस्य नाम्नो योकारस्तस्य स्यमोः परयोः उं इत्यादेशो भवति ॥ अन्नु जु तुच्छउं तहे धणहे ॥

भग्गउं देक्खिवि[9] निअय बलु[10] बलु पसरिअउं[11] परस्सु ।
उम्मिल्लइ ससि-रेह[12] जिवँ[13] करि करवालु[14] पियस्सु[15] ॥

सर्वादेर्ङसेर्हां ॥ ३५५ ॥

अपभ्रंशे सर्वादेरकारान्तात्परस्य ङसेर्हां इत्यादेशो भवति ॥ जहां होन्तउ[16] आगदो । तहां होन्तउ[16] आगदो । कहां होन्तउ[16] आगदो ॥

किमो डिहे[17] वा ॥ ३५६ ॥

अपभ्रंशे किमोकारान्तात्[18]परस्य ङसेर्डिहे[17] इत्यादेशो[19] वा भवति ॥

जइ तहो तुट्टउ नेहडा मइं सहुं[20] नवि तिल-तार[21] ।
तं किहे[22] वङ्केहिं[23] लोअणेहिं[24] जोइज्जउं सय-वार[25] ॥

---

१ A ङेर्हिं. २ A हिं. ३ B °सन्ति. ४ A महिहिं. ५ B तडुन्ति. ६ B °रिं ॥५३॥ क्ली°. ७ B °मेत्थण. ८ B दूरे. ९ B देक्खवि १० B बलुप°. ११ B पस्सरिउं परस्स । १२ A °हांमिजि° १३ A B जिम्व. १४ B °वाल. १५ B °यस्स. १६ B होतउ. १७ B हिहे. १८ B °कारात्प°. १९ B °देशा वा भवन्ति. २० A सहु. B सह. २१ P तारु. २२ B किहि. २३ P वङ्कहि. २४ B °अणिहिं. २५ P वारु.

ङेर्हिं ॥ ३५७ ॥

अपभ्रंशे सर्वादेरकारान्तात्[1]परस्य ङेः सप्तम्येकवचनस्य हिं इत्यादेशो भवति ॥

जहिं कप्पिज्जइ सरिं[2]ण सरु छिज्जइ खग्गिण[3] खग्गु ।
तहिं तेहइ भड-घड-निवहि[4] कन्तु पयासइ मग्गु ॥
एक्कहिं अंक्खिहिं[5] सावणु अन्नहिं भद्दवउँ[6] ।
माहउँ महिअल-सत्थरि गण्ड-त्थले सरउँ ॥
अङ्गिहिं[7] गिम्ह सुहच्छी[8]-तिल-वणि[9] मग्गसिरु ।
तहे[10] मुद्धहे[11] मुह-पङ्कइ आवासिउँ सिसिरु ॥
हिअडा फुट्टि तडत्ति[12] करि कालक्खेवें[13] काइं ।
देक्खउं[14] हय-विहि कहिं ठवइ पइं विणु[15] दुक्ख-सयाइं ॥

यत्तत्किंभ्यो ङसो डासुर्न वा ॥ ३५८ ॥

अपभ्रंशे यत्तत्किम् इत्येतेभ्योकारान्तेभ्यः परस्य ङसो डासु इत्यादेशो वा भवति ॥

कन्तु महारउ हलि सहिए निच्छइं[16] रूसइ जासु ।
अत्थिहिं[17] सत्थिहिं[18] हत्थिहिंवि[19] ठाउवि फेडइ[20] तासु ॥
जीविउ कासु न वल्लहउं धणु पुणु[21] कासु न इट्ठु ।
दोण्णिवि[22] अवसर[23]-निवडिआइं[24][25] तिण-सम[26] गणइ[27] विसिट्ठु ॥

स्त्रियां[28] डहे ॥ ३५९ ॥

अपभ्रंशे[29]स्त्रीलिङ्गे वर्तमानेभ्यो यत्तत्किंभ्यः परस्य ङसो डहे इत्यादेशो वा भवति ॥ जहे केरउ । तहे केरउँ । कहे केरउ ॥

---

१ B °कारान्प°. २ P सरें. B सरेण. ३ P खग्गें. B खग्गेण. ४ P णिवहि. ५ A अंखिहिं. ६ B °ओ. ७ P अङ्गहि गिम्हु. ८ B सुहत्थीति°. ९ B वहिणि. १० P तहि. ११ B मुद्धमु°. १२ A तडिन्नि. १३ B °क्खेवं. १४ B देक्खवं ह. १५ B विदुणुक्ख. १६ B तिच्छएँ. १७ P अत्थ°. B अत्थे°. १८ P सत्थ°. B सत्थे°. १९ P हत्थ°. B हत्थे°. २० B °डइइ. २१ B पुण. २२ B दोन्निवि. २३ B °सरि. २४ A °रवडिआइं. २५ P °डिअइं. २६ P सवँ. २७ B गणइ. २८ A स्त्रियां व°. २९ B °ड ॥ य°.

यत्तदः स्यमोर्ध्रुं त्रं ॥ ३६० ॥

अपभ्रंशे यत्तदोः स्थाने स्यमोः परयोर्यथासंख्यं ध्रुं त्रं इत्यादेशौ वा भवतः ॥

प्रङ्गणि चिट्ठदि नाहु[1] ध्रुं त्रं रणि करदि न भ्रन्त्रि[2] ॥

पक्षे । तं बोल्लिअइ[3] जु निव्वहइ ॥

इदम इमुः क्लीबे ॥ ३६१ ॥

अपभ्रंशे नपुंसकलिङ्गे वर्तमानस्येदमः स्यमोः परयोः इमु इत्यादेशो भवति ॥ इमु कुलु तुह तणउं । इमु कुलु देक्खु ॥

एतदः स्त्री-पुं-क्लीबे एह एहो एहु ॥ ३६२ ॥

अपभ्रंशे स्त्रियां पुंसि नपुंसके[4] वर्तमानस्यैतदः स्थाने स्यमोः परयोर्यथासंख्यम् एह एहो एहु इत्यादेशा[5] भवन्ति ॥

एह कुमारी एहो नरु एहु मणोरह-ठाणु[6] ।
एहउं वढ चिन्तन्ताहं पच्छइ होइ विहाणुं[7] ॥

एइर्जस्-शसोः ॥ ३६३ ॥

अपभ्रंशे एतदो जस्-शसोः परयोः एइ इत्यादेशो भवति ॥ एइ ति[8] घोडा एह थलि ॥ एइ पेच्छ ॥

अदस ओइ ॥ ३६४ ॥

अपभ्रंशे अदसः स्थाने जस्-शसोः परयोः ओइ[9] इत्यादेशो भवति ॥

जइ पुच्छह घर वड्डाइं[10] तो वड्डा घर[11] ओइ ।
विहलिअ-जण-अब्भुद्धरणु कन्तु कुडीरइ जोइ ॥

अमूनि वर्तन्ते पृच्छ वा ॥

---

१ B नाहुं. २ B भ्रंशि. ३ B बोल्लिज्जइ. ४ P के च व॰. ५ B इति त्रय आदे॰. ६ B ठाउ. ७ B विहाण. ८ B ते. ९ B ओइत्या॰. १० B वड्डाइ. ११ B घरं.

इदम आयः ॥ ३६५ ॥

अपभ्रंशे इदम्‌शब्दस्य[1] स्यादौ आय इत्यादेशो भवति ॥

आयइं लोअहो लोअणइं जाईं सरइं न भन्ति ।
अप्पिए दिट्ठइं[2] मउलिअहिं पिएँ[3] दिट्ठइं[4] विहसन्ति ॥
सोसउ म सोसउ च्चिअ उअही वडवानलस्स किं तेण ।
जं जलइ जले जलणो आएणवि किं न पज्जत्तं ॥
आयहो दड्ढ-कलेवरहो[5] जं वाहिउ[6] तं सारु ।
जइ उट्ठब्भइ[7] तो कुहइ अह डज्झइ तो छारु[8] ॥

सर्वस्य साहो वा ॥ ३६६ ॥

अपभ्रंशे सर्वशब्दस्य साह इत्यादेशो वा भवति ॥

साहुवि लोउ[9] तडप्फडइ वड्डत्तणहो तणेण[10] ।
वड्डप्पणु[11] परिपाविअइ[12] हत्थिं[13] मोक्कलडेण ॥

पक्षे । सव्वुवि ॥

किमः काइं-कवणौ वा ॥ ३६७ ॥

अपभ्रंशे किमः स्थाने काइं[14] कवण इत्यादेशौ वा भवतः ॥

जइ न सु आवइ दूइ घरु[15] काइं अहो-मुहु[16] तुज्झु ।
वयणु[17] जु खण्डइ तउ सहि एसो पिउ होइ न मज्झु ॥

काइं न दूरे देक्खइ[18] ॥

फोडेन्ति[19] जे हिअडउं[20] अप्पणउं ताहं पराइ[22] कवण घणु[23] ।
रक्खेज्जहु लोअहो[24] अप्पणा बालहे जाया विसम थण ॥

---

१ B °दम्यादौ. २ B दिट्ठइं. ३ B पिअ. ४ B दट्ठ. ५ P कडेव°. ६ B °हिउं. ७ B ओटब्भ°. ८ B च्छारु. ९ B लोओ. १० B °तोत्तणेण. ११ A वडुत्तणु. B वड्डुप्पणु. १२ B °पावीअ°. १३ P हत्थें. B हत्थे. १४ P काइ. १५ A घर. १६ B मुह तुज्झ. १७ B वयणज्जुवं°. १८ B देक्खइ. १९ P फोडेन्ति. B फोडंति. P and B write रक्खेज्जहु° as the first and फोडेन्ति° as the second half. २० A जि. २१ B हीअ°. २२ B पराइ. २३ A घृण. B थिण. २४ P B तरुणहो.

सुपुरिस[1] कङ्गुहे अणुहरहिं[2] भण कज्जें[3] कवणेण ।
जिवँ[4] जिवँ वड्डत्तणु[5] लहहिं[6] तिवँ[7] तिवँ नवहिं[8] सिरेण ॥

पक्षे ।

जइ ससणेही[9] तो मुइअ[10] अह जीवइ निन्नेह ।
बिहिंवि[11] पयारेहिं[12] गइअ धण किं गज्जहि[13] खल मेह ॥

युष्मदः सौ तुहुं[14] ॥ ३६८ ॥

अपभ्रंशे युष्मदः सौ परे तुहुं इत्यादेशो भवति ॥

भमरु म रुणझुणि[15] रण्णडइ सा दिसि जोइ म रोइ ।
सा मालइ देसन्तरिअ जसु तुहुं मरहि विओइ ॥

जस्-शसोस्तुम्हे[16] तुम्हइं ॥ ३६९ ॥

अपभ्रंशे युष्मदो जसि शसि च प्रत्येकं तुम्हे तुम्हइं इत्यादेशौ भवतः ॥ तुम्हे तुम्हइं जाणह । तुम्हे तुम्हइं पेच्छइ ॥ वचनभेदो यथासंख्यनिवृत्त्यर्थः ॥

टा-ङ्यमा पइं[17] तइं[18] ॥ ३७० ॥

अपभ्रंशे युष्मदः टा ङि अम् इत्येतैः सह पइं तइं इत्यादेशौ भवतः ॥ टा ।

पइं मुक्काहंवि वर[19]-तरु फिट्टइ पत्तत्तणं न पत्ताणं ।
तुह पुणु[20] छाया जइ होज्ज[21] कहवि ता तेहिं पत्तेहिं ॥
महु हिअउं तइं[22] ताए तुहुं[23] सवि अन्नें[24] विनाडिज्जइ ।
पिअ[25] काइं[26] करउं हउं काइं तुहुं मच्छें[27] मच्छु गिलिज्जइ ॥

ङिना ।

---

१ A सपुरिस कंगुहिं. २ B °हरीहि. ३ B कज्जे. ४ A B जिम्वजिम्व. ५ B °त्तण. ६ B लहइ. ७ A B तिम्वतिम्व. ८ B नवहि. ९ A ससिणे°. १० A मुईअअह. B मुईअह. ११ B बेहिंवि. १२ P °यारहिं. १३ B गज्जहिं. १४ P तुहु. B तुहं. १५ P रुणु°. १६ A °रतुम्हतुम्हेइं. १७ P पइ. १८ P तइ. १९ A वरु. २० B पुण. २१ B होइज्ज. २२ P तइ. २३ P तुहु. B तुहं. २४ B अन्ने. २५ P प्रिअ. B प्रिय. २६ P काइँ. २७ B मच्छे.

पइं[१] मइं[२] बेहिंवि[३] रण-गयहिं को जयसिरि तक्केइ[४] ।
केसहिं लेप्पिणु[५] जम-घरिणि[६] भण सुहु को थक्केइ ॥

एवं तइं[७] ॥ अमा ।

पइं[८] मेल्लन्तिहे[९] महु मरणु[१०] मइं[११] मेल्लन्तहो तुज्झु[१२] ।
सारस जसु[१३] जो वेग्गला सोवि कृदन्तहो सज्झु[१४] ॥

एवं तइं ॥

भिसा तुम्हेहिं ॥ ३७१ ॥

अपभ्रंशे युष्मदो भिसा सह तुम्हेहिं इत्यादेशो भवति ॥

तुम्हेहिं अम्हेहिं जं किअउं दिट्ठउं[१५] बहुअ-जणेण ।
तं तेवड्डउं समरु[१६]-भरु निज्जिउ एक्क-खणेण ॥

ङसि-ङस्भ्यां तउ तुज्झ तुध्र[१७] ॥ ३७२ ॥

अपभ्रंशे युष्मदो ङसिङस्भ्यां सह तउ तुज्झ तुध्र इत्येते त्रय आदेशा भवन्ति ॥ तउ होन्तउ[१८] आगदो । तुज्झ[१९] होन्तउ[२०] आगदो । तुध्र होन्तउ आगदो ॥ ङसा ।

तउ गुण-संपइ तुज्झु[२१] मदि तुध्र अणुत्तर खन्ति ।
जइ उप्पत्तिं अन्न जण[२२] महि-मंडलि सिक्खन्ति ॥

भ्यसाम्भ्यां तुम्हहं ॥ ३७३ ॥

अपभ्रंशे युष्मदो भ्यस् आम् इत्येताभ्यां सह तुम्हहं इत्यादेशो भवति ॥ तुम्हहं होन्तउ आगदो । तुम्हहं केरउं धणु ॥

तुम्हासु सुपा ॥ ३७४ ॥

अपभ्रंशे युष्मदः सुपा सह तुम्हासु इत्यादेशो भवति ॥ तुम्हासु ठिअं ॥

---

१ P पइं. २ P मइं. ३ A वेहिवि. ४ B थक्केइ. ५ A लिप्पिणु. ६ A घरणि. ७ P तइं. ८ P पइं. ९ A मेल्लंतिहिं. १० B मरण. ११ P मइं. B मई. १२ A तुज्झ. १३ B जस. १४ B °ज्झु ॥ भि°. १५ B दिट्ठउ. १६ B समरु. १७ P तुध्राः. १८ B होतउ. १९ A तुज्झु. २० A हुंतउ. B होतउ. २१ B तुज्झु. २२ P जणा.

सावस्मदो हउं ॥ ३७५ ॥

